श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(पञ्चमसंपुटः—किष्किन्धाकाण्डः)

प्राच्यविद्यासंशोधनालयः
मैसूरुविश्वविद्यानिलयः
मैसूरु
१९७५

श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(पञ्चमसंपुटः—किष्किन्धाकाण्डः)

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः

मै सू रु

१९७५

प्राच्यविद्यासंशोधनालयग्रन्थमाला ११९

प्रधानसंपादकः

डा॰ जि. मरुलसिद्दय्यः, एम्.ए., पिएच् डि.,

डैरेक्टर्

श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(पञ्चमसंपुटः—किष्किन्धाकाण्डः)

संपादकः

विद्वान् के. एस्. वरदाचार्यः

रिसर्च् असिस्टेण्ट्

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः

मैसूरु

१९७५

आरक्षितास्सर्वेऽधिकाराः

मूल्यम् रू. १७–००

मैसूरुराजकीयपठ्यपुस्तकमुद्रणालये तदधिकारिभिर्मुद्रितम्
१९७५

ORIENTAL RESEARCH INSTITUTE SANSKRIT SERIES 119

GENERAL EDITOR :

DR G. MARULASIDDAIAH, M.A., Ph.D

Director

ŚRĪMADVĀLMĪKIRĀMĀYAṆA

WITH

AMRTAKATAKA OF MĀDHAVAYOGI

(VOL. V—KIṢKINDHĀKĀṆḌA)

EDITOR :

VIDWAN K. S. VARADACHARYA,

Research Assistant

ORIENTAL RESEARCH INSTITUTE

UNIVERSITY OF MYSORE

MYSORE

1975

All Rights Reserved

Price: Rs. 17-00

PRINTED BY THE JOINT DIRECTOR AT THE
GOVERNMENT TEXT BOOK PRESS, MYSORE-9

1973

PREFACE

We are very glad to bring out the Volume-V of "Rāmāyaṇa" with "Amṛta-kataka" commentary containing "Kiṣkindhā-kāṇḍa."

No doubt, it was delayed but we are happy as we could bring it out at least now. We hope that we may be able to bring out the remaining volumes of this series (Sundara-kāṇḍa, Yuddha-kāṇḍa and Uttara-kāṇḍa) early.

The most important commentaries of the "Rāmāyaṇa available at present are: (1) Maheśwara teerthīya, (2) Govindarājīya, (3) Amṛta-kataka, (4) Tilaka and (5) Śiromaṇi. Among them, Amṛta-kataka of Mādhavayogi is most dependable in our view.

Neither philosophical nor religious prejudices have played their usual roll here as Mādhavayogi emphasis only clarifications on literary points. He is an independent thinker and is understood to be a real "Yogi" in the proper sense of the term. Endowed with realisation of "Tatvānubhava", he has introduced all balanced and non-controversial interpretations of the Text along with its other implications also.

Hence, this commentary is "Taṭastha" or impartial of any type of preoccupations.

He hails from "Kālahasti, Kānchīpura." Belongs to the 16th C. A.D. This commentary is older than "Tilaka" and "Śiromaṇi."

"Tilaka" commentator refers to "Amṛta-kataka" commentary. It is also correct that "Tilaka" commentator 'Rāmavarma' wrote his commentary with the full knowledge of "Amṛta-kataka" commentary. A close comparison of these two commentaries will bear evidence on this point. So, "Kataka" commentary also should have been more popular and we do our utmost to bring out all the remaining volumes early.

This V-volume of "Kiṣkindhā-kāṇḍa" is edited well by one of our Senior Research Assistants, Panditaratnam Vidwan K. S. Varadacharya. He has spared no pains in offering necessary footnotes, readings and also meanings at appropriate places to make the original and commentary more and more intelligible in the best interest of Readers. The Editor has proved his eminence in other publications of our Institute. The title of every narrative is given on the top of the every righthand page in the form of "Sloka." In fact, it may be called "Kiṣkindhā-kāṇḍa Saṅgraha".

We thank heartily the Curator of Oriental Manuscripts Library, Madras for having helped us by lending the second manuscript of "Kataka" commentary for collation purpose. Our thanks

are also due to the authorities of Government Text-Book Press, Mysore, for fine get up of this Volume.

The great epic has played its roll in the past and will continue to enlighten the posterity with its rich and evergreen enchanting cultural contents. Our Institution is happy in publishing this as the Publication of such classical works is our primary duty.

So, we are very glad to submit this to the public and also to our readers.

Dr. G. MARULASIDDAIAH,
Professor and Head of the Department of Sanskrit and Director,
Oriental Research Institute, University of Mysore, Mysore-9

Mysore

प्रस्तावना

‘ वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षात् रामायणात्मना ॥ ’

क्रमप्राप्तोऽयमद्य उपायनीक्रियते उदारचरितेभ्यः सहृदयेभ्यः श्रीमद्वाल्मीकिरामायणस्य पञ्चमः संपुटः किष्किन्धाकाण्डात्मकः ॥

[किष्किन्धाकाण्डः]

किष्किन्धापरिसरप्रवृत्तकथाप्रधानत्वादयं भागः किष्किन्धाकाण्ड इति प्रथत इति सर्वविदितमेव ॥

कबन्धसूचनानुसारेण रामस्य सुग्रीवान्वेषणं, रामसुग्रीवसख्यं, वालिवधः, सीतान्वेषणाय कपीनां प्रेषणं, हनुमदादिभिः संपातिमुखात् सीतावृत्तान्तश्रवणं, हनुमतः सागरलङ्घनोद्यमः इत्येते विषया काण्डेऽस्मिन् वर्ण्यन्ते ॥

[वालिवधः]

विचारशीलानां तु संख्यावतां अत्रत्यः वालिवधः महते कुतूहलाय वादविवादेभ्यश्च बहुधा विषयो भवति। न केवलमेतत्काण्डेः कृत्स्नेऽपि रामायणे अप्रतिसमाधेयः, सर्वथा समर्थयितुमशक्य एवायं वालिवधः इत्येव प्रायः सर्वेऽपि मन्यन्ते । निश्चिन्वन्ति च बहव, “ रामोऽपि कश्चिन्मनुज एव खलु । वाल्मीकिरपि तं ‘ महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ’[1], ‘ मुने ! वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ’[2] इति रामं नरशब्देनैव निर्दिशति । रामोऽप्यात्मान

---

[1] रामायणं 1-1-5 [2] रामायणं 1-1-7

मानुषमेव 'आत्मानं मानुषं मन्ये रामं दशरथात्मजम्'[1] इति प्रकटयति। अतश्च वालिवधः मानवसहजस्य प्रमादस्य, दौर्बल्यस्य वा निदर्शनम्" इति ॥

इमं विषयमधिकृत्य किञ्चिदिव विमृशामः ॥

[आक्षेपः]

आदर्शपुरुषः, 'रामो विग्रहवान् धर्मः'[2] इति शत्रुणापि मारीचेन प्रशंस्यमानः रामः अन्येन युध्यन्तं वालिनं प्रच्छन्नः सन् कथं जघान? वाल्यपि हि 'क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम्'[3] इति शपथयति ॥

[समाधानम्]

अस्य च उत्तरं रामस्त्रेधाऽभिधत्ते—

१. भ्रातृभार्यापहारिणः तव वधः क्षत्रियस्य मम कर्तव्यो धर्मः।

२. मन्मित्रस्य सुग्रीवस्य कृते तथा प्रतिज्ञातत्वात् प्रतिज्ञा-संरक्षणाय त्वद्वधः मम कर्तव्यो धर्मः।

३. मृगाणां भवादृशानां प्रच्छन्नवधो वा, अन्येन युध्यतां वधो वा मृगयाधिकृतानां क्षत्रियाणां नैव दोषावहः ॥

मानवबुद्धिदृष्ट्या इदं समाधानत्रयमपि न क्षोदक्षममिति तीक्ष्णमतयः सर्वेऽपि अभिप्रयन्ति। तद्विस्तरस्तु महानित्यद्योदास्यते ॥

[सांप्रदायिकाः]

सांप्रदायिकास्तु—प्रथमं राममेवमधिक्षिपन् वाल्येव स्ववधस्य धर्म्यत्वं अनन्तरं पश्यन् 'प्रसादितस्त्वं क्षम मे नरेश्वर[4]!' इति रामं

---

[1] रामा.युद्ध. 120-11 [2] रामा.अरण्य. 37-12 [3] रामा.किष्कि. 17-51
[4] रामा. किष्कि. 18-67.

क्षमामयाचदिति चेत् मध्येऽस्माकं किं वर्तते वृथाजल्पनाय । यं शत्रुरपि मारीचः 'विग्रहवान् धर्मः' इति प्रशंसति तत्कृत्ये अधर्मत्वसंभावना वा कथम्? अतः एतच्चर्चा न केवलं वृथा, प्रत्युत पापायापि भवेत् इति वदन्ति ॥

समीचीनसमाधानकथनेन इतरमुखपिधानाशक्तानां श्रद्धाजडानां भीषणमात्रमिदमिति अन्तर्मन्यन्ते विमर्शकाः ॥

[धर्मः नीतिश्च]

लोके कस्यचित् कार्यस्य निर्दुष्टत्वे उपादेयत्वे वा प्रयोजकः हेतुः धर्मः न्यायश्च। यद्यपि कार्यस्य स्वतो धर्मत्वं न्यायत्वं च न संभवति, अथापि धर्मादनपेतत्वात्=धर्म्यत्वात्, न्यायादनपेतत्वात्= न्याय्यत्वात् तस्य धर्मत्वन्यायत्वव्यवहारः ॥

धर्मन्यायशब्दौ च न समानार्थकौ। 'भवतां एवमाचरणं धर्मो वा, न्यायो वा' इत्येव पृच्छन्ति लोके। पर्यायत्वे पदद्वयप्रयोगः कथम्? किमधिकोक्त्या? धर्मशास्त्रमन्यत्, नीतिशास्त्रं चान्यत् इति सर्वविदितम्। न्यायः नीतिरिति चात्र समानौ शब्दौ। ततश्च धर्मन्यायशब्दौ भिन्नार्थकौ ॥

[धर्मनीत्योर्वैलक्षण्यम्]

तर्हि धर्मः कः? न्यायः कः?

धर्मः आन्तरः—न्यायः=नीतिः बाह्या। धर्मः पुरुषसंबन्धी—नीतिः बुद्धिसंबन्धिनी। धर्मः आत्मनिष्ठः—नीतिः प्रकृतिनिष्ठा। धर्मस्य स्थानं हृदयं—नीतेः स्थानं मस्तिष्कम्। धर्मः हृदयग्राह्यः—नीतिः बुद्धिग्राह्या। धर्मः आत्मा—नीतिः देहः। अत एव धर्मः सूक्ष्मः—नीतिः स्थूला ॥

['धर्मः दुर्ज्ञेयः']

अत एव किल धर्मः परमदुर्ज्ञेय इत्युच्यते। नीतिस्तु न तथा दुर्ज्ञेयेत्युच्यते। वालिवधः नीतिविरुद्ध इति सामान्यतः सर्वैरुच्यते। यदि नीतिरेव धर्मः तर्हि तस्येदानीं सर्वजनविदितत्वेन 'सूक्ष्मः परम-दुर्ज्ञेयः'[1] इत्युक्तिर्वा कथं घटेत? 'धर्मस्य तत्त्वं निहितं गुहायाम्'[2] इत्यादि च कथम्? अतश्च वालिवधे मूलत इदमवधेयं, धर्मः अन्यः, नीतिश्चान्या इति। वालिवधः धर्मो वा? इति प्रश्नः अन्यः, स न्यायो वा इति प्रश्नश्चान्यः॥

तर्हि वालिवधः धर्मो वाऽधर्मो वा भवतु। नीतिविरुद्धस्तु स इत्यवश्यमभ्युपगन्तव्यं किल इति प्रश्नः समुन्मिषति। एतदपि विमृशामः॥

[नीतेः स्वरूपम्]

धर्मः आत्मस्थानापन्नः, नीतिः देहस्थानापन्नेत्यनुपदमुक्तम्। देहस्य, तत्साध्यस्य कृत्यस्य वा मौल्यं आत्माधीनमेव। न तु स्वतः तस्य मौल्यं किञ्चिदस्ति। घातुकोऽपि यं कञ्चित् शस्त्रेण कृन्तति, चिकित्सकोऽपि (Surgeon) कंचित् शस्त्रेण कृन्तति। क्रिया तु बाह्यतः समानैव। अथापि तयोः क्रिययोः मौल्यं नैकरूपम्। कामुकोऽपि लौल्यात् तरुणीं स्पृशति, चिकित्सकोऽपि तां परीक्षार्थं स्पृशति। क्रिया तु समाना, अन्तरं तु कियद्वर्तते! एतेन बाह्यक्रियाया मौल्यं आन्तरभावानुगुणं, न तु स्वतस्तस्या मौल्यमस्तीति स्पष्टम्॥

[भावस्य प्राधान्यम्]

'न कञ्चन शस्त्रेण कृन्तेत्', 'न परस्त्रियं स्पृशेत्' इति न्यायः चिकित्सकव्यतिरिक्तविषय एव वक्तव्यः। क्रियापेक्षया भावस्य स्थानं तावन्महत्तरं वर्तते॥

---

[1] रामा. किष्कि. 18-15. [2] महा. भा. वन. 314-119.

इतोऽपि सुसूक्ष्मं चिन्तने 'न कंचन शस्त्रेण कृन्तेत्', 'न परस्त्रियं स्पृशेत्' इत्यादौ श्रूयमाणं कृन्तनं स्पर्शनं च भावाशुद्धिपूर्वकमेव तत् अभिप्रैतीति चिकित्सककृन्तनस्पर्शनयोः न तत्रावसर इति उक्तन्यायस्य संकोचकल्पनस्यापि नावसर इत्येव तत्त्वम् ॥

['धर्मं परमं वदन्ति']

भावक्षेत्र एव एवं वैचित्र्यं चेत् ततोऽपि सूक्ष्मे धर्मक्षेत्रे किं वक्तव्यम् । 'धर्मो विश्वस्य जगतः प्रतिष्ठा'[1], 'तस्मात् धर्मं परमं वदन्ति'[2] । अतः बाह्यतः स्थूलदृष्ट्या अनीतित्वेन भासमाना क्रिया धर्मानुगुणा चेत् नानीतिः । तथैव नीतित्वेन भासमाना क्रिया धर्मविरुद्धा चेदनीतिरेव ॥

[धर्मं प्रमाणम्]

धर्मानुगुणत्वं अननुगुणत्वं वा कथं ज्ञेयमिति चेत् धर्मस्वरूपज्ञानेनैव तत् सुशकम् । धर्मश्च आत्मसंवेद्यः, न बुद्धिसंवेद्यः । 'हृदिस्थः सर्वभूतानामात्मा वेद शुभाशुभम्'[3], 'विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः । हृदयेनाभ्यनुज्ञातः यो धर्मस्तं निबोधत ॥'[4] इति धर्मस्य रागद्वेषरहितज्ञानिगम्यत्वमुच्यते ॥

नीतिरपि न सर्वेषामपि बुद्धिग्राह्या, किन्तु स्वार्थवासनारहितया सूक्ष्मया बुद्ध्यैव सा ग्राह्या । बाह्याया नीतेरपि सर्वैरपि निर्णेतुमशक्यत्वे आन्तरस्य बुद्ध्यतीतस्य धर्मस्य कथं सुज्ञत्वम् ? ततश्च वालिवधस्य धर्मत्वात् अनीतित्वशङ्काऽपि न तत्रावतरतीत्येव धर्मसूक्ष्ममवगन्तव्यम् ॥

---

[1], [2] तै. महा. नारायण. 22. [3] रामा. किष्कि. 18·15.
[4] मनुस्मृति 2·1.

[धर्मः प्रश्नातीतः]

श्रीरामोऽपि वस्तुत इममेवान्तिमं समाधानमभिधत्ते—

'दुर्लभस्य च धर्मस्य जीवितस्य सुखस्य च ।
राजानो वानरश्रेष्ठ प्रदातारो न संशयः ॥

तान्न हिंस्येन्न चाक्रोशेत् नाक्षिपेन्नाप्रियं वदेत् ।
देवा मनुष्यरूपेण विचरन्ति महीतले ॥ '[1]

इत्यादि द्रष्टव्यम् । एतद्विषये मनुवाक्यान्यपि संवादीनि द्रष्टव्यानि—

'इन्द्रानिलयमार्काणां अग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥

यस्मादेषां सुरेन्द्राणां मात्राभिर्निर्मितो नृपः । '[2]
'बालोऽपि नावमन्तव्यः मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ '[3]

'तस्माद्धर्म यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचालयेत् ॥ '[4]

[मानवदौर्बल्यानि]

मनुजस्य सहजमेकं दौर्बल्यं वर्तते । तत् प्रायः संपूर्णतया हा न शक्यते । येन केनापि प्रकारेण वासनारूपतो वा स्वार्थः मान स्ववशे करोत्येव ॥

---

[1] रामा. किष्कि. 18–42, 43. [2] मनुस्मृति 7–3, 4.
[3] मनुस्मृति 7–5. [4] मनुस्मृति 7–13.

अन्यच्च दौर्बल्यं तस्य, यत् कश्चित् विषयः स्वेन ज्ञातुं न शक्यते चेत्, परकीयेऽनुभवेऽपि तन्मनः विप्रतिपद्यते। इदं च अहंकारस्य फलम् ॥

एवमपरं च दौर्बल्यं तस्य, यत् प्रायः स्थूलमेव विषयं साक्षीकृत्य निर्णेतुं स प्रवर्तते, न तु तात्त्विकदृष्टया व्यापृणोति तस्य मनः ॥

अतः स्वार्थं, अहंकारं, उत्तानप्रज्ञतां च विहायैतत् परिशीलनीयम्, नो चेन्न धियमधिरोहेदिति नाधिकं वदामोऽत्र ॥

[वालिनो धर्मप्रज्ञा]

वाली तु प्रथमं राममधिक्षिपन्नपि दैवात् उक्तत्रिविधदौर्बल्यैः परित्यक्तः समाहितमना बभूव। इन्द्रांशसंभूतः किल सः। न केवलं समाहितमना बभूव; अज्ञानात्कृताय रामाधिक्षेपायान्वशोचदपि स दैवीसंपद्विशिष्टः। आदिकविर्ह्येवं वदति—

'एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम्।
न दोषं राघवे दध्यौ धर्मेऽधिगतनिश्चयः॥'[1] इति॥

अत्र 'धर्मेऽधिगतनिश्चयः', 'भृशं प्रव्यथितः' इति विशेषणद्वयं सम्यगवधेयम्। एतादृशसत्परिणामस्यैव फलं 'प्रभो'[2] इति संबोध्य 'प्रसादितस्त्वं क्षम मे नरेश्वर'[3] इति क्षमायाचनमपि। लेशतो वा धर्मवीर्यपरिचयवतामेव इदं सर्वं लेशतो वाऽवगन्तुं शक्यमिति दिङ्मात्रं प्रदर्श्य पुनःपुनर्लेखनीं न व्यापारयामः॥

[रामायणं धर्मग्रन्थोऽपि]

रामायणमिदं न केवलं काव्यम्, महान् धर्मग्रन्थ इति न कदापि विस्मर्तव्यम्। धर्मग्रन्थविमर्शोऽपि धर्ममूलक एव कार्यः।

---

[1] रामा.किष्कि. 18-45 [2], [3] रामा.किष्कि. 18-67

संगीतशास्त्रस्य विमर्शः न्यायशास्त्रमवलम्ब्य कर्तुं शक्यो वा ? युक्तो वा ? अतोऽत्रैव विरमामः ॥

एतद्भागसंपादनदृष्टया नाधिकं किञ्चिदस्त्यत्र वक्तव्यं पूर्वसंपुटाभिहितात् । व्याख्यासंशोधने परं (१) एतद्ग्रन्थभण्डारगता एका, (२) मद्रास् ओरियण्टल् मानेस्क्रिप्ट्लैब्ररीतः-प्राप्ता अपरा इति मातृकाद्वयमादृतम् । मातृकाद्वयस्याप्यत्यन्ताशुद्धत्वात् विशिष्य तयोः संज्ञा दातुमशक्याऽभूत् । एतद्रामायणग्रन्थमालाया अवशिष्टानपि भागान् यावच्छक्ति अचिरेण कालेन प्रकटीचिकीर्षवो वयम् ॥

मैसूरु
28–5–73

नव्यमङ्गलाभिजनः,
वरदाचार्यः

श्रीमद्वाल्मीकिरामायणकिष्किन्धाकाण्डस्य

विषयानुक्रमणिका

सर्गसंख्या	विषयः	पुटसंख्य
१	रामविलापः ...	१
२	सुग्रीवमन्त्रः ...	२७

श्लोकसंख्या	सर्गावान्तरविषयाः	
	१	
१	दृष्ट्वा पम्पां वियोगार्तः रामः प्रोवाच लक्ष्मणम् । ...	३
	पश्य, लक्ष्मण ! पम्पायाः सौन्दर्यं शुभदर्शनम् ॥ ...	५
२	किन्तु सीताविरहितं संतापयति मामिदम् । ...	७
	सीतामपश्यतो मेऽद्य जीविते न प्रयोजनम् ॥ ...	९
३	मया वियुक्ता सीतापि नूनं त्यक्ष्यति जीवितम् । ...	११
	शृणु, लक्ष्मण ! सन्नादं मधुरं मृगपक्षिणाम् ॥ ...	१३
४	उन्मादयति मे चित्तं रमणीयमिदं वनम् । ...	१५
	पोषयत्यस्य सौन्दर्यं वसन्तोऽयमृतुर्भृशम् ॥ ...	१७
५	यद्यद्य सीता पार्श्वे स्यात् न स्वर्गमपि कामये । ...	१९
	तया विना त्वहं प्राणान् कथं, लक्ष्मण ! धारये ॥ ...	२१
६	इत्येवं विलपन्तं तं बोधयामास लक्ष्मणः । ...	२३
	रामोऽपि बोधितस्तेन ययौ स्वां प्रकृतिं पुनः ॥ ...	२५
	२	
७	अथायान्तमपश्यत्तौ सुग्रीवो वानराधिपः । ...	२७
	तौ दृष्ट्वा धन्विनौ भीत्या चकम्पे वानरर्षभः ॥ ...	२९
८	सान्त्वयामास तं भीतं हनूमान् मन्त्रिसत्तमः । ...	३१
	न्ययुङ्क्त च हनूमन्तं सुग्रीवो रामसन्निधौ ॥ ...	३३

सर्गसंख्या	विषयः		पुटसंख्या
३	हनुमद्रामसङ्गमः	...	३४
४	रामस्य ऋश्यमूकगमनम्	...	४३
५	सुग्रीवसख्यम्	...	५०
६	रामेण सीताविभूषणविलोकनम्	...	५६

श्लोकसंख्या	सर्गावान्तरविषयाः		
	३		
९	हनूमानुपसर्प्याथ विनयाद्राममब्रवीत् ।	...	३५
	कौ युवामायुधधरौ किमर्थं चागताविह ॥	...	३७
१०	अस्मद्राजा तु सुग्रीवः युवाभ्यां सख्यमिच्छति ।	...	३९
	अङ्गीचकार रामोऽपि तत्सख्यं सकलं स्मरन् ॥	...	४१
	४		
११	लक्ष्मणोऽपि यथावृत्तं सर्वं तस्मै ततोऽब्रवीत् ।	...	४३
	कबन्धेन च यत् प्रोक्तं तदप्यकथयच्च सः ॥	...	४५
१२	हनूमानप्यकथयत् सुग्रीवस्य कथां तयोः ।	...	४७
	ततस्तौ प्रापयामास सुग्रीवं वानरोत्तमः ॥	...	४९
	५		
१३	हनुमद्वचनात् सोऽपि सुग्रीवस्तावपूजयत् ।	...	५१
	ततस्तौ चक्रतुस्सख्यमन्योन्यं त्वग्निसाक्षिकम् ॥	...	५३
१४	परस्परं च साहाय्ये प्रतिज्ञां तौ च चक्रतुः ।	...	५५
	६		
	सुग्रीवः स्वेन दृष्टं च सीताहरणमब्रवीत् ॥	...	५७
१५	भूषणं सीतया त्यक्तं रामायादर्शयच्च सः ।	...	५९
	सीताया भूषणं दृष्ट्वा रामो मूर्छामुपागमत् ॥	...	६१

सर्गसंख्या	विषय:	पुटसंख्या
७	सुग्रीवेण रामसमाश्वासनम् ...	६१
८	वालिवधप्रतिज्ञा ...	६७
९	वालिवैरानुकथनम् ...	७६
१०	सुग्रीवेण स्वराज्यभ्रंशकथनम् ...	८१

श्लोकसंख्या	सर्गावान्तरविषया:	
	७	
१६	सुग्रीव: सान्त्वयामास रामं धैर्यं प्रबोधयन् । ...	६३
	ततः प्रकृतिमापन्नः रामोऽपि प्रशशंस तम् ॥ ...	६५
	८	
१७	ततस्तुष्टस्तु सुग्रीव: राममेवं वचोऽब्रवीत् । ...	६७
	वालिना निकृतः, राम ! सदा भीतश्चराम्यहम् ॥ ...	६९
१८	मादृशानां तु खिन्नानां वयस्यः परमा गतिः । ...	७१
	हनुमत्प्रमुखान् ह्येतान् दृष्ट्वा प्राणान् धराम्यहम् ॥ ...	७३
	९	
१९	पुरा मायाविनं हन्तुं वाली भूबिलमाविशत् । ...	७५
	निरीक्ष्य बहुकालं तं मृतं मत्वाऽऽगमं पुरीम् ॥ ...	७७
२०	ततो वाली बहोः कालात् किष्किन्धां पुनराययौ । ...	७९
	१०	
	आगतं भ्रातरं दृष्ट्वा प्रीत्या प्रासादयं त्वहम् ॥ ...	८१
२१	किन्तु वाली क्रुधाऽऽविष्टः द्रोहिणं माममन्यत । ...	८३
	भार्यां हृत्वा च मे वाली कोपाद्राज्यात् व्यवासयत् ॥ ...	८५

सर्गसंख्या	विषयः		पुटसंख्या
११	वालिबलवर्णनम्	...	८७
१२	सुग्रीवप्रत्ययोत्पादनम्	...	१०६
१३	सप्तजनाश्रमवर्णनम्	...	११५

श्लोकसंख्या	सर्गावान्तरविषयाः		
	११		
२२	शृणु वीर्यं बलं चैव, राम! वक्ष्यामि वालिनः।	...	८७
	पुराऽऽसीत् दुन्दुभिर्नाम दैत्योऽमितपराक्रमः॥	...	८९
२३	स तु दर्पात्तु युद्धाय वालिनं समुपाह्वयत्।	...	९१
	तयोस्समभवद्युद्धं बलिनोर्वालिदैत्ययोः॥	...	९३
२४	हत्वा वाली तु दैत्यं तं आश्रमेऽस्मिन् न्यपातयत्।	...	९५
	तदा शप्तो मतङ्गेन वाली नात्र विविक्षति॥	...	९७
२५	तस्याप्रवेशं ज्ञात्वाहं वसाम्यत्र विना भयम्।	...	९९
	एवं वालिबलं प्रोच्य रामे संदिदिहे कपिः॥	...	१०१
२६	तत्प्रत्ययार्थं रामश्च प्राक्षिपद्दुन्दुभेस्तनुम्।	...	१०३
	किञ्चैकेन शरेणैव सालान् सप्त बिभेद सः॥	...	१०५
	१२		
२७	तत्सर्वं वीक्ष्य सुग्रीवः विस्मयं परमं गतः।	...	१०७
	ततो रामेण सुग्रीवः किष्किन्धां प्राप धैर्यवान्॥	...	१०९
२८	वालिनं चापि सुग्रीवः समराय समाह्वयत्।	...	१११
	किन्तु भ्रात्रा जितो भीतः सुग्रीवः स न्यवर्तत॥	...	११३
	१३		
२९	रामस्तु सान्त्वयित्वा तं पुनर्योद्धुं न्ययूयुजत्।	...	११५
	ऐक्षन्त ते च किष्किन्धामार्गे सप्तजनाश्रमम्॥	...	११७
३०	तस्मै सर्वे नमः कृत्वा किष्किन्धामगमन् पुरीम्।	...	११९

सर्गसंख्या	विषयः		पुटसंख्या
१४	सुग्रीवगर्जनम्	...	१२१
१५	ताराहितवचनम्	...	१२७
१६	वालिसंहारः	...	१३५
१७	रामाधिक्षेपः	...	१४३

श्लोकसंख्या	सर्गावान्तरविषयाः		
	१४		
	रामस्त्वात्मानमाच्छाद्य दूर एव व्यतिष्ठत ॥	...	१२१
३१	प्रोत्साहयित्वा सुग्रीवं प्रैषद्रामो रणाय तम् ।	...	१२३
	पुनर्युद्धाय सुग्रीवः वालिनं तं समाह्वयत् ॥	...	१२५
	१५		
३२	वाली पुनश्च संक्रुद्धः समागच्छद्बहिः पुरात् ।	...	१२७
	तदा तारा बहुविधं हितं प्राह कपीश्वरम् ॥	...	१२९
३३	पुनरागमने भ्रातुर्हेतुं युक्त्या जगाद सा ।	...	१३१
	तथापि वाली नाश्रौषत् तारोक्तं बिधिचोदितः ॥	...	१३३
	१६		
३४	तारां वाली समाधाय निरगात् समरोत्सुकः ।	...	१३५
	तयोर्युद्धमभूद्धोरं परस्परजयैषिणोः ॥	...	१३७
३५	हीयमानमथापश्यत् सुग्रीवं राघवो रणे ।	...	१३९
	ततस्तीक्ष्णं शरं रामो वालिवक्षस्यपातयत् ॥	...	१४१
३६	तेन विद्धस्तदा वाली पपात भुवि विह्वलः ।	...	१४३
	१७		
	ततो राममुवाचैवं वाली लब्ध्वा स्मृतिं शनैः ॥	...	१४५
३७	कथमन्येन युध्यन्तं अवधीर्मां, नरोत्तम ।	...	१४७
	ईदृशं कर्म कृत्वा त्वं किं ब्रूयाः पुरतस्सताम् ॥	...	१४९
३८	अपि चादृश्य एव त्वं कथं मामवधीर्वद ।	...	१५१
	शक्यं किं भवता वक्तुमुत्तरं साधु चिन्त्यताम् ॥	...	१५३

सर्गसंख्या	विषयः	पुटसंख्या
१८	वालिवधसमर्थनम् ...	१५४
१९	ताराऽऽगमनम् ...	१७३
२०	ताराविलापः ...	१८०

श्लोकसंख्या	सर्गावान्तरविषयाः	
	१८	
३९	तेनैवमुक्तो धृष्टेन रामो धर्म्यं वचोऽब्रवीत् । ...	१५५
	धर्मो हि सूक्ष्मः, स्वैरं त्वं धर्मं ब्रूषे, कपीश्वर! ...	१५७
४०	त्वं तु धर्मात्परिभ्रष्टः न धर्मं वक्तुमर्हसि । ...	१५९
	साक्षाद्भ्रातुर्महान् द्रोहः बुद्धिपूर्वं त्वया कृतः ॥ ...	१६१
४१	धर्मसूक्ष्ममविज्ञाय न मां गर्हितुमर्हसि । ...	१६३
	दैवेन विहितं विद्धि त्वद्वधं, वानरेश्वर! ...	१६५
४२	वाल्येवमुक्तो रामेण दैवाद्धर्मं प्रबुद्धवान् । ...	१६७
	क्षमां च याचयामास रामं धर्मस्वरूपिणम् ॥ ...	१६९
४३	रामोऽपि सान्त्वयामास बहुधा वालिनं तदा । ...	१७१
	१९	
	हतं तु वालिनं श्रुत्वा तारा शोकात्समाययौ ॥ ...	१७३
४४	कपीनपि सुसंत्रस्तान् सान्त्वयामास सा तदा । ...	१७५
	आगत्याथ ददर्शाथ पतिं निपतितं भुवि ॥ ...	१७७
४५	रामादीनप्यपश्यत् सा पार्श्वे एव च तिष्ठतः । ...	१७९
	२०	
	तारा तत्सर्वमालोक्य पर्यदेवयदातुरा ॥ ...	१८१
४६	हन्त! वीर! विधेः क्रौर्यात् न श्रुतं वचनं मम । ...	१८३
	अद्य नः का गतिर्वीर! त्वादृशोऽपि हतो यदि ॥ ...	१

सर्गसंख्या	विषयः	पृष्ठसंख्या
२१	तारासमाश्वासः ...	१८६
२२	वाल्यनुशासनम् ...	१९०
२३	वालिनिर्याणम् ...	१९९
२४	सुग्रीवादिशोकः ...	२०५

श्लोकसंख्या — सर्गावान्तरविषयाः

२१

४७ रुदन्तीं बहुधा तां तु हनुमान् पर्यसान्त्वयत् । ... १८७
ततः कथञ्चित् सुग्रीवं वाली सस्नेहमब्रवीत् ॥ ... १८९

२२

४८ युगपद्विहितं, तात ! न मन्ये सुखमावयोः । ... १९१
राज्यं लभस्व स्नेहेन रक्ष तारां तथाऽङ्गदम् ॥ ... १९३
४९ वाली सुग्रीवमुक्त्वैवं अङ्गदं चावदद्धितम् । ... १९५
कृतकृत्यस्ततो वाली प्रपेदे गतिमुत्तमाम् ॥ ... १९७

२३

५० व्यलपद्बहुधा शोकात् तारा दृष्ट्वा पतिं मृतम् । ... १९९
मृतं पतिं समालिङ्ग्य न पारं साऽगमच्छुचः ॥ ... २०१
५१ पश्यन्त्यास्तनयं तस्याः शोकोऽवर्धत दारुणः । ... २०३

२४

दृष्ट्वा च सर्वं सुग्रीवः विललापैवमातुरः ॥ ... २०५
५२ राम ! राज्यं न काङ्क्षेऽहं भ्रातरं वीक्ष्य मारितम् । ... २०७
वृथैव मारितो भ्राता मया मूर्खेण पापिना ॥ ... २०९
५३ प्रवेक्ष्याम्यहमद्यैव वह्निं भ्रातृवधोद्यतः । ... २११
तमार्तं वीक्ष्य रामोऽपि बभूव विमनाः क्षणम् ॥ ... २१३
५४ तदा ददर्श तारा च रामं सूर्यमिवोज्ज्वलम् । ... २१५
अथोपसृप्य रामं सा शोकतप्ताऽब्रवीदिदम् ॥ ... २१७
५५ नय मामपि, राम ! त्वं मत्पतिं पुण्यमस्तु ते । ... २१९

सर्गसंख्या	विषयः		पुटसंख्या
२५	सुग्रीवाद्याश्वासनं, वालिसंस्कारश्च	...	२२०
२६	सुग्रीवाभिषेकः	...	२३३
२७	माल्यवत्पर्वतनिवासः	...	२४०

श्लोकसंख्या	सर्गावान्तरविषयाः		
	२५		
	एवं सुशोचतस्तांस्तु सान्त्वयामास राघवः ॥	...	२२१
५६	कालस्य हि वशास्सर्वे स्वतन्त्रो न हि कश्चन ।	...	२२३
	अतो न शोच्यं, प्राप्तं यत् तद्भोक्तव्यं विवेकिना ॥	...	२२५
५७	क्रियतामस्य संस्कारः यथाबदविलम्बितम् ।	...	२२७
	श्रुत्वैतच्चक्रिरे सर्वं सर्वे कालोचितं तदा ॥	...	२२९
५८	चक्रे यथावत् सुग्रीवः वालिनश्चौर्ध्वदैहिकम् ।	...	२३१
	२६		
	ततो रामश्च सुग्रीवं अभिषेक्तुं समादिशत् ॥	...	२३३
५९	ततः प्रविविशुस्सर्वे किष्किन्धां हरियूथपाः ।	...	२३५
	अभ्यषिश्चन्त सुग्रीवं कपिराज्ये च मन्त्रिणः ॥	...	२३७
६०	अङ्गदं चापि ते सर्वे कपिराज्येऽभ्यषेचयन् ।	...	२३९
	२७		
	रामो ययौ ससौमित्रिः ततः प्रस्रवणं गिरिम् ॥	...	२४१
६१	रामस्तत्रावसद्भ्रात्रा वर्षासमयवासरान् ।	...	२४३
	तत्र सीतां स्मरन् रामः नाध्यगच्छत् सुखं क्षणम् ॥	...	२४५
६२	बहुधाऽसान्त्वयद्रामं तदा भ्राता तु लक्ष्मणः ।	...	२४७

सर्गसंख्या	विषयः		पुटसंख्या
२८	वर्षर्तुवर्णनम्	...	२४९
२९	सुग्रीवप्रतिबोधनम्	...	२६७

श्लोकसंख्या	सर्गावान्तरविषयाः		
	२८		
	विजजृम्भे ततस्तीव्रः वर्षाकालः क्रमागतः ॥	...	२४९
६३	गगनं जलदैर्व्याप्तमभूत् पर्वतसन्निभैः ।	...	२५१
	प्रियाभिस्सहिता हंसाः प्रस्थिता मानसं सरः ॥	...	२५३
६४	मेघानां गर्जनं श्रुत्वा मयूरा ननृतुर्मुदा ।	...	२५५
	मही जाताऽभिरामेयं पुष्टसस्यवनैर्वृता ॥	...	२५७
६५	मुक्तासकाशं सलिलं ववर्षाम्बुदवाहनः ।	...	२५९
	तटाकादीनि सर्वाणि पूरयामासुरम्बुदाः ॥	...	२६१
६६	दिवसस्य च रात्र्याश्च नैवान्तरमदृश्यत ।	...	२६३
	सर्वं वीक्ष्य स्मरन् सीतां शुशोचातीव राघवः ॥	...	२६५
६७	लक्ष्मणस्तूचितैर्वाक्यैः तदा राममसान्त्वयत् ।	...	२६७
	ततो हनूमान् सुग्रीवं बोधयामास कृत्यवित् ॥	...	२६९
	२९		
६८	कृतां प्रतिज्ञां रामाय स्मारयामास तस्य सः ।	...	२७१
	अथादिदेश सुग्रीवोऽप्यानेतुं सकलान् कपीन् ॥	...	२७३

सर्गसंख्या	विषयः	पुटसंख्या
३०	शरद्वर्णनम्	... २७५
३१	लक्ष्मणाक्रोशः	... २९७

श्लोकसंख्या सर्गावान्तरविषयाः

३०

६९ अथ वर्षास्वपेतासु शरत् प्राप्ता मनोहरा । ... २७५
चिन्तामवाप सुग्रीवं निष्क्रियं वीक्ष्य राघवः ॥ ... २७७

७० सीतां चापि स्मरन् रामः शुशोच बहुधा तदा । ... २७९
लक्ष्मणस्तथ्यया वाचा सान्त्वयामास राघवम् ॥ ... २८१

७१ प्रवृत्तां शरदं दृष्ट्वा रामः प्रोवाच लक्ष्मणम् । ... २८३
विसृज्य सलिलं श्रान्तान् मेघान् पश्याद्य लक्ष्मण ॥ ... २८५

७२ सर्वं वर्षेण संतृप्तं सर्वं च हरितं कृतम् । ... २८७
सरांसि च प्रसन्नानि विमलश्च निशाकरः ॥ ... २८९

७३ अथापि, सौम्य ! सुग्रीवः स्ववाक्ये नैव तिष्ठति । ... २९१
तत् त्वं गत्वाऽथ किष्किन्धां सुग्रीवं शाधि बालिशम् ॥ ... २९३

७४ तथा बोधय तं मत्तं कालातिक्रममेव च । ... २९५
एवं भ्रात्रा समादिष्टः किष्किन्धां लक्ष्मणो ययौ ॥ ... २९७

३१

७५ आगतं लक्ष्मणं रुष्टं कपयो वीक्ष्य तत्रसुः । ... २९९
केचित्तु कपयो गत्वा सुग्रीवाय तदब्रुवन् ॥ ... ३०१

७६ लक्ष्मणं सान्त्वयामास तत्रागत्याङ्गदस्तदा । ... ३०३
अथावाचाङ्गदो रुष्ट सुग्रीवाय तु लक्ष्मणम् ॥ ... ३०५

७७ अङ्गदस्य वचः श्रुत्वा सुग्रीवश्चकितोऽभवत् । ... ३०७

सर्गसंख्या	विषयः		पुटसंख्या
३२	हनुमन्मन्त्रालोचना	...	३०८
३३	लक्ष्मणसान्त्वनम्	...	३१३
३४	सुग्रीवतर्जनम्	...	३२८
३५	ताराप्रार्थनम्	...	३३२

श्लोकसंख्या	सर्गवान्तरविषयाः		
	३२		
	सचिवानप्यपृच्छत् सः सौमित्रेः कोपकारणम् ॥	...	३०९
७८	जातं प्रमादं हनुमान् कपीशाय न्यवेदयत् ।	...	३११
	३३		
	अथाज्ञया कपीशस्य किष्किन्धां लक्ष्मणोऽविशत् ॥	...	३१३
७९	आगतं लक्ष्मणं क्रुद्धं ज्ञात्वा सर्वे चकम्पिरे ।	...	३१५
	आदिशल्लक्ष्मणं द्रष्टुं तदा तारां कपीश्वरः ॥	...	३१७
८०	तारा तु नीतिनिपुणा सान्त्वयामास लक्ष्मणम् ।	...	३१९
	वाक्यं सनीतिचातुर्यं तारा लक्ष्मणमब्रवीत् ॥	...	३२१
८१	क्षमां चाऽयाचयत्तारा प्रमादाय च लक्ष्मणम् ।	...	३२३
	सान्त्वितं लक्ष्मणं ताराऽऽह्वयत् द्रष्टुं कपीश्वरम् ॥	...	३२५
८२	प्रविश्य लक्ष्मणोऽपश्यत् सुग्रीवं वानरेश्वरम् ।	...	३२७
	३४		
	तं दृष्ट्वा लक्ष्मणं क्रुद्धः भ्रातृदुःखात्तदाऽब्रवीत् ॥	...	३२९
८३	कृत्वा प्रतिज्ञां, सुग्रीव ! सर्वं विस्मृतवानसि ।	...	३३१
	३५		
	एवं वदन्तं सौमित्रिं पुनस्ताराऽब्रवीद्वचः ॥	...	३३३
८४	प्रसादये त्वां, धर्मज्ञ ! संरंभस्त्यज्यतामयम् ।	...	३३५
	त्वदधीना वयं सर्वे साधयामस्तव प्रियम् ॥	...	३३७

सर्गसंख्या	विषयः		पुटसंख्या
३६	लक्ष्मणसमाधानम्	...	३३८
३७	वानरसेनासंमेलनम्	...	३४२
३८	रामसमीपगमनम्	...	३४८
३९	वानरसेनानिवेशनम्	...	३५३

श्लोकसंख्या	सर्गावान्तरविषयाः		
	३६		
८५	तथैवमुक्तं सौमित्रिं सुग्रीवोऽप्यप्रसादयत् ।	...	३३९
	समाहितोऽभूत् सौमित्रिः उदारहृदयस्तदा ॥	...	३४१
	३७		
८६	अथादिदेश सुग्रीवोऽप्यानेतुं सर्ववानरान् ।	...	३४३
	आनेतुं वानरान् सर्वान् दूता नानादिशो ययुः ॥	...	३४५
८७	आययुः कोटिशो नानादिग्भ्यस्तूर्णं च वानराः ।	...	३४७
	३८		
	कपीशस्तैर्युतो राममाजगाम सलक्ष्मणः ॥	...	३४९
८८	न्यवेदयन्महत्सैन्यं तत् रामाय कपीश्वरः ।	...	३५१
	कृतोद्योगं च सुग्रीवं अभ्यनन्दत्स राघवः ॥	...	३५३
	३९		
८९	अपश्यद्वसुधां सर्वां रामः कपिमयीं तदा ।	...	३५५
	अनन्तकोटिसाहस्रैः व्याप्ताऽभूत् कपिभिर्धरा ॥	...	३५७
९०	रामं संप्रेक्ष्य ते सर्वे स्थिताः प्राञ्जलयस्तदा ।	...	३५९

सर्गसंख्या	विषयः		पुटसंख्या
४०	प्राचीदिक्प्रेषणम्		३६१
४१	दक्षिणदिक्प्रेषणम्	...	३७५
४२	प्रतीचीदिक्प्रेषणम्	...	३८४

श्लोकसंख्या	सर्गावान्तरविषयाः		
	४०		
	ततश्च सीतामन्वेष्टुं रामः सुग्रीवमादिशत् ॥	...	३६१
९१	रामानुमत्या सुग्रीवः विनतं प्राह यूथपम् ।	...	३६३
	त्वं प्रतिष्ठ दिशं पूर्वां बलिभिर्वानरैर्वृतः ॥	...	३६५
९२	मृग्यतां सावधानेन सर्वत्रापि च मैथिली ।	...	३६७
	मृग्या भवद्भिः सर्वं च देशा द्वीपाश्च सागराः ॥	...	३६९
९३	सर्वत्रान्विष्यतां सीता यावच्चोदयपर्वतम् ।	...	३७१
	मासेन च निवर्तध्वं नो चेत् वध्या भविष्यथ ॥	...	३७३
	४१		
९४	समादिदेश सुग्रीवो युवराजमथाङ्गदम् ।	...	३७५
	हनुमत्प्रमुखैर्युक्तः गच्छ त्वं दक्षिणां दिशम् ॥	...	३७७
९५	तत्र सर्वात्मना सीता मार्गितव्या विशेषतः ।	...	३७९
	अस्यां दिशि हि दुष्टात्मा नूनं वसति रावणः ॥	...	३८१
९६	अन्विष्य मासेनैकेन निवर्तध्वं, प्लवङ्गमाः !	...	३८३
	४२		
	अथादिदेश सुग्रीवः सुषेणप्रमुखान् कपीन् ॥	...	३८५
९७	प्रतीच्यां दिशि मार्गध्वं यूयं सर्वत्र मैथिलीम् ।	...	३८७
	तस्यां दिशि च ये देशाः विचेयास्ते तु सर्वशः ॥	...	३८९
९८	सम्यग्विचेयं युष्माभिः यावदस्तमहीधरम् ।	...	३९१
	मासेन च निवर्तध्वं नो चेद्वध्या भविष्यथ ॥	...	३९३

सर्गसंख्या	विषयः	पुटसंख्या
४३	उत्तरदिक्प्रेषणम् ...	३९५
४४	कार्यजयसूचना ...	४०७
४५	वानरप्रस्थानम् ...	४११
४६	भूमण्डलपरिचयकथनम् ...	४१४

श्लोकसंख्या	सर्गावान्तरविषयाः	
	४३	
९९	अथादिदेश सुग्रीवः वीरं शतबलिं कपिम् । ...	३९५
	दिशं ह्युदीचीं गच्छ त्वं वृतः शूरैः प्लवङ्गमैः ॥ ...	३९७
१००	तत्र सर्वत्र वैदेही मार्गितव्या प्रयत्नतः । ...	३९९
	विविधेषु च देशेषु मार्गध्वं राघवप्रियाम् ॥ ...	४०१
१०१	उत्तराः कुरवश्चापि वीक्षणीयाः प्रयत्नतः । ...	४०३
	ततः सोमगिरिं यावत् मार्गित्वा सन्निवर्तत ॥ ...	४०५
	४४	
१०२	स वदन्नपि चैवं तान् मनो दध्रे हनूमति । ...	४०७
	रामोऽप्यदादभिज्ञानं अङ्गुलीयं हनूमतः ॥ ...	४०९
	४५	
१०३	एवं कपीन् स प्राहैषीत् सुग्रीवः सकला दिशः । ...	४११
	स्वां स्वां दिशमभिप्रेत्य तेऽपि सर्वे प्रतस्थिरे ॥ ...	४१३
	४६	
१०४	रामस्त्वपृच्छत् सुग्रीवं देशानां ज्ञानकारणम् । ...	४१५
	वालिविद्वेषहेतुं च पुनरूचे कपीश्वरः ॥ ...	४१७
१०५	एवं प्रेष्य कपीन् ते तु निरीक्षन्तोऽवसन् गिरौ । ...	४१९

सर्गसंख्या	विषयः	पृष्ठसंख्या
४७	वानरप्रत्यागमनम् ...	४२०
४८	कण्डूवनाद्यन्वेषणम् ...	४२३
४९	रजतगिरिगवेषणम् ...	४२८
५०	ऋक्षबिलप्रवेशः ...	४३१
५१	स्वयंप्रभोपचारः ...	४३८

श्लोकसंख्या	सर्गावान्तरविषयाः	
	४७	
	अदृष्ट्वैवाययुस्सीतां इतरे वानरास्ततः ॥ ...	४२१
	४८	
१०६	ततो हनुमदाद्यास्तु विचिक्युर्दक्षिणां दिशम् । ...	४२३
	अथापि तेऽपि कुत्रापि नापश्यन् जनकात्मजाम् ॥ ...	४२५
१०७	श्रान्तान् प्रोत्साहयामास वानरानङ्गदस्तदा । ...	४२७
	४९	
	पुनर्विचिक्युस्ते सर्वे सीतां सर्वत्र कानने ॥ ...	४२९
	५०	
१०८	विचिन्वन्तस्तु ते सर्वे ययू ऋक्षबिलं तदा । ...	४३१
	दिदृक्षवस्तु ते सर्वे विविशुस्तद्बिलं महत् ॥ ...	४३३
१०९	ददृशुस्तत्र वृक्षादीन् चित्रान् विस्मयकारिणः । ...	४३५
	ददृशुश्चापि ते तत्र स्त्रियं कांचित्तपस्विनीम् ॥ ...	४३७
	५१	
११०	पृष्टा हनुमता सा तु प्रत्युवाच तपस्विनी । ...	४३९
	स्वयंप्रभेति मां वित्त रक्षामीदं बिलं महत् ॥ ...	४४१
१११	भुक्त्वा फलादीनत्रत्यान् स्ववृत्तं वक्तुमर्हथ । ...	४४३

सर्गसंख्या	विषयः		पुटसंख्या
५२	बिलप्रवेशकारणकथनम्	...	४४४
५३	ऋक्षबिलान्निर्गमनम्	...	४४७
५४	अङ्गदनिर्वेदः	...	४५०
५५	हनुमद्वचनम्	...	४५८
५६	वानरप्रायोपवेशः	...	४६५

श्लोकसंख्या	सर्गावान्तरविषयाः		
	५२		
	तथोक्तो हनुमान् सर्वं वृत्तमूचे तदाऽऽत्मनाम् ॥	...	४४५
	५३		
११२	स तु मार्गं च पप्रच्छ गन्तुं तस्मात् बिलाद्बहिः ।	...	४४७
	अथ स्वतेजसा सा तु तान् निनाय बहिः क्षणात् ॥	...	४४९
	५४		
११३	प्राप्तास्ते तूदधेस्तीरं चिन्तामापेदिरे ततः ।	...	४५१
	कालात्ययं च ते ज्ञात्वा बिभ्युः प्राणभयात्तदा ॥	...	४५३
११४	अङ्गदस्तु तदा प्राह वानरान् भयपीडितान् ।	....	४५५
	किष्किन्धां नैव गच्छामः वत्स्यामोऽत्रैव ते वयम् ॥	...	४५७
	५५		
११५	तच्छ्रुत्वा हनुमान् प्राह नीतियुक्तं तदा कपीन् ।	...	४५९
	नील्लङ्घ्यं शासनं राज्ञः सुग्रीवस्य बलीयसः ॥	...	४६१
११६	तद्गत्वा शरणं यामः सुग्रीवं वानरेश्वरम् ।	...	४६३
	५६		
	नाङ्गीचकार तद्वाक्यं सुग्रीवे शङ्कितोऽङ्गदः ॥	...	४६५
११७	किञ्च प्रायोपवेशेन मर्तुमैच्छत्तदाऽङ्गदः ।	...	४६७
	तद्दृष्ट्वा वानरास्सर्वे तमेवान्वययुस्तदा ॥	...	४६९

सर्गसंख्या		पुटसंख्या
५७	संपातिसंगमः ...	४७१
५८	अङ्गदवाक्यम् ...	४७७
५९	सीताप्रवृत्तिश्रवणम् ...	४८०
६०	सुपार्श्ववचनानुवादः ...	४८८

श्लोकसंख्या	सर्गावान्तरविषयाः	
	५७	
११८	तदा तत्राययौ गृध्रः संपातिर्भीषणाकृतिः । ...	४७१
	तं दृष्ट्वा भृशमुद्विग्नाः विलेपुर्वानरास्तदा ॥ ...	४७३
११९	स तान् पप्रच्छ संपातिः तत्रागमनकारणम् । ...	४७५
	५८	
	ते सर्वमादितः प्राहुर्वधं चापि जटायुषः ॥ ...	४७७
१२०	रावणेन हृतं ज्ञात्वा भ्रातरं तु शुशोच सः । ...	४७९
	५९	
	तत्प्रतीकारबुद्ध्या चावदत् गृध्रः स वानरान् ॥ ...	४८१
१२१	अहं जानामि सीताया हर्तारं रावणं शठम् । ...	४८३
	मध्येसमद्रं लंकायां स आस्ते राक्षसाधमः ॥ ...	४८५
१२२	इहस्थ एव पश्यामि रावणं जानकीमपि । ...	४८७
	६०	
	सुपार्श्वो मम पुत्रोऽपि जानाति निखिलं त्विदम् ॥ ...	४८९
१२३	ह्रियमाणा रावणेन सीताऽऽवाभ्यां विलोकिता । ...	४९१
	त्वर्यतां, वानराः ! कार्ये जयो वो भवति ध्रुवम् ॥ ...	४९३

सर्गसंख्या	विषय:	पुटसंख्या
६१	संपातिपुरावृत्तम् ...	४९५
६२	संपातिशोक: ...	४९९
६३	निशाकरमुनिवाक्यम् ...	५०३
६४	संपातिपक्षप्ररोह: ...	५०६
६५	समुद्रलङ्घनालोचनम् ...	५१०

श्लोकसंख्या	सर्गावान्तरविषया:	
	६१	
१२४	निशाकर: पूर्वमूचे दग्धं मां सूर्यरश्मिभि: । ...	४९५
	समागमं च भवतां, मत्कार्यमपि सोऽवदत् ॥ ...	४९७
	६२	
१२५	अहमप्यवदं सर्वं वृत्तान्तं मुनये तदा । ...	४९९
	श्रुत्वा वृत्तं समस्तं स: सान्त्वयामास मां तदा ॥ ...	५०१
	६३	
१२६	पुन: पक्षप्ररोहं चाप्यब्रवीन्मे निशाकर: । ...	५०३
	वचसा तस्य तु मुने: प्रतीक्षन्नस्मि वो ह्यहम् ॥ ...	५०५
	६४	
१२७	यदुक्तं तेन तत्कृत्यं अद्य निर्वर्तितं मया । ...	५०७
	साध्यतामिति चोक्त्वा स संपाति: प्रययौ तत: ॥ ...	५०९
	६५	
१२८	ततस्ते कपयो हृष्टा: ययुर्दक्षिणसागरम् । ...	५११
	स्तब्धा बभूवुस्ते सर्वे दृष्ट्वाऽपारं महोदधिम् ॥ ...	५१३

सर्गसंख्या	विषयः		पुटसंख्या
६६	लङ्घनशक्तिविचिकित्सा	...	५१५
६७	हनुमत्प्रभाववर्णनम्	...	५२१
६८	हनुमद्विजृम्भणम्	...	५२९

श्लोकसंख्या	सर्गावान्तरविषयाः		
	६६		
१२९	ततस्तल्लङ्घनोपायं ते समेत्य व्यचिन्तयन् ।	...	५१५
	न कश्चिदप्युपायं ते ददृशुर्वानरास्तदा ॥	...	५१७
१३०	तत आलोच्य सर्वं च जाम्बबानेवमब्रवीत् ।	...	५१९
	६७		
	हनूमानेव कार्येऽस्मिन् शक्तो नान्योऽस्ति कश्चन ॥	...	५२१
१३१	इत्युक्त्वा पूर्ववृत्तं च स्मारयामास जाम्बवान् ।	...	५२३
	जाम्बवांश्च हनूमन्तं तुष्टाव बहुधा तदा ॥	...	५२५
१३२	हनूमानपि सस्मार स्वशक्तिमतुलां तदा ।	...	५२७
	६८		
	उत्साहं तस्य दृष्ट्वा ते कपयो हर्षमाप्नुवन् ॥	...	५२९
१३३	जजृम्भे हनुमांश्चापि सागरं लङ्घितुं ततः ।	...	५३१
	साधयाम्यहमित्येवं घोषयामास मारुतिः ॥	...	५३३
१३४	स लङ्घितुं पयोधिं तं महेन्द्रगिरिमारुहत् ।	...	५३५
	विसिष्मियुर्वानराश्च तं दृष्ट्वाऽद्भुतवैभवम् ॥	...	५३७

॥ श्रीः ॥

॥ श्रीरामचन्द्रपरब्रह्मणे नमः ॥

श्रीमद्वाल्मीकिरामायणम्

श्रीमन्माधवयोगिविरचितया

अमृतकतकव्याख्यया समलङ्कृतम्

किष्किन्धाकाण्डः

प्रथमः सर्गः

[रामविलापः]

स तां पुष्करिणीं गत्वा *पद्मोत्पलझषाकुलाम् ।
रामः सौमित्रिसहितः विललापाकुलेन्द्रियः ॥ १ ॥

एवं महाषोढायाः धीस्वयम्भूप्रधानपूर्वार्धप्राधान्येन काण्डत्रयं सिद्धम् । अथ उत्तरकाण्डत्रयं शचीन्द्रप्रधानोत्तरार्धप्राधान्येन प्रवर्तते । तत्र आद्येन रामस्य पम्पादर्शनोद्रिक्तः कामः, तस्य सौमित्रिणा कृतोपरोधश्च प्रकाश्यते । स तामित्यादि । पुष्करिणीं—नदीम् ॥ १ ॥

---

* कमलेन्दीवरमत्स्यैः मुखनयनकटाक्षवत्याः कान्तायाः स्मारकत्वेन व्याकुलेन्द्रियः—गो.

[1] तस्य दृष्ट्वैव तां *हर्षात् इन्द्रियाणि चकम्पिरे ।
स कामवशमापन्नः सौमित्रिमिदमब्रवीत् ॥ २ ॥

तस्येत्यादि । तां पम्पां दृष्ट्वा तस्य इन्द्रियाणि पम्पानुभवजात् हर्षात् चकम्पिरे—उद्रिक्तविकाराण्यभवन् इत्यर्थः ॥ २ ॥

सौमित्रे! शोभते पम्पा वैडूर्यविमलोदका ।
फुल्लपद्मोत्पलवती शोभिता विविधैः द्रुमैः ॥ ३ ॥

वैडूर्यवत्—तत्प्रभावत् विमलं उदकं यस्याः सा तथा । वैडूर्यप्रभा तु श्यामा । तथा प्रतिभासः औपाधिकः उदकस्य । अतः तमेवोपाधिं दर्शयति—फुल्लेत्यादि ॥ ३ ॥

सौमित्रे! पश्य पम्पायाः काननं शुभदर्शनम् ।
यत्र भ्राजन्ति †[2] शैला वा द्रुमाः सशिखरा इव ॥ ४ ॥

यत्र वने वा द्रुमाः सशिखराः शैला इव भ्राजन्ति । शैला वा इति पाठः । वाशब्दो वाक्यालङ्कारे ॥ ४ ॥

मां तु शोकाभिसंतप्तं ‡[3] आधयः पीडयन्ति वै ।
§ भरतस्य च [4] दुःखेन वैदेह्या हरणेन च ॥ ५ ॥

आधयः पीडयन्ति वै इति पाठः । आधीनेव दर्शयति—भरतस्येत्यादि । दुःखेन । जटावल्कलधारणादिदुःखस्मरणेनेत्यर्थः ॥

---

* पंपासौन्दर्यदर्शनेन हर्षेऽपि, स एव हर्षः शोकायाभूदिति भावः । † शैला वा—शैला इव—ति. सशिखरा इव—सशृङ्गा इव स्थिताः अत एव शैलाभाः—गो. ‡ मां माधवः (पा)—वसन्तस्तु विशेषेण पीडयन्निव भवतीत्यर्थः वस्तुतः पीडाभावाद इवशब्दः—गो. § भरतस्य दुःखेन—मद्वियोगजनितभरतक्लेशस्मरणेन—रा.

[1] तस्य दृष्टवतो—ङ. तत्र दृष्ट्वैव तां—च. [2] शैलाभाः—ङ, झ. [3] व्याधयः पीडयन्ति वै—माधवः पीडयन्निव—ङ. [4] शोकेन—ङ.

*शोकार्तस्यापि मे पम्पा शोभते चित्रकानना ।
व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ॥ ६ ॥

शोभते । सुखावहा वर्तते इत्यर्थः ॥ ६ ॥

नलिनैरपि [1]संछन्ना ह्यत्यर्थं शुभदर्शना ।
सर्पव्यालानुचरिता मृगद्विजसमाकुला ॥ ७ ॥

व्यालः— श्वापदः ॥ ७ ॥

अधिकं प्रतिभात्येतत् †नीलपीतं तु शाद्वलम् ।
द्रुमाणां [2]उच्छ्रितैः पुष्पैः परिस्तोमैरिवार्पितम्[3] ॥ ८ ॥

नीलानुबद्धं पीतं नीलपीतम् । शाद्वलं—शादहरितप्रदेशः । शाद्वल एव वर्ण्यते— द्रुमाणामित्यादि । अर्पितं—युक्तं—व्याप्तमिति यावत् । उच्छ्रितैः—अधिकैः पुष्पैः परिस्तोमैः—कुथाभिरिव व्याप्तम् । "परिस्तोमः कुथो द्वयोः" अपि वा उच्छ्रितैः—उच्छ्रितगन्धैः परिस्तोमैः—परितः स्तोमभूतैः—राशीभूतैः इव स्थितैः पुष्पैः उपगूढमित्यर्थः ॥ ८ ॥

[4]नानापुष्पसमृद्धानि ‡शिखराणि समन्ततः ।
लताभिः पुष्पिताग्राभिः उपगूढानि सर्वतः ॥ ९ ॥

सुखानिलोऽयं, सौमित्रे ! कालः प्रचुरमन्मथः ।
गन्धवान् सुरभिर्मासः जातपुष्पफलद्रुमः ॥ १० ॥

---

* शोकार्तस्यापि मे—मयि शोकार्तेऽपि शोभते ; व्यर्थेयं शोभेति भावः—गो. वस्तुतः बाह्येन्द्रियेण सौन्दर्यानुभवः, तस्य अन्तश्शोके पर्यवसानं चोच्यते ॥
† नीलपीतमिति मयूरकण्ठवर्ण उच्यते—गो. ‡ शिखराणि—वृक्षाग्राणि—गो. ति.

[1] संकीर्णा-ङ. [2] विविधैः-ङ, झ. [3] एतदनन्तरं-नानाप्रख्यानकुसुमैः पश्याद्रुमांति लक्ष्मण-इत्यधिकं-झ. [4] पुष्पभार-ङ, ञ, झ.

उक्तार्थस्यैव विवरणम्—नानेत्यादि। उपगूढानि—व्याप्तानि। सुरभिर्मासः—मधुमासः ॥ ९ ॥

पश्य रूपाणि, सौमित्रे! वनानां पुष्पशालिनाम्।
***सृजतां पुष्पवर्षाणि[1] तोयं तोयमुचामिव ॥ ११ ॥**

† प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥ १२ ॥

प्रस्तरेषु—समतलपाषाणेषु ॥ १२ ॥

पतितैः पतमानैश्च पादपस्थैश्च मारुतः।
कुसुमैः पश्य, सौमित्रे! क्रीडन्निव समन्ततः ॥ १३ ॥

‡ विक्षिपन् विविधाः शाखाः[2] नगानां कुसुमोत्कचाः।
मारुतः चलितस्थानैः षट्पदैरनुगीयते ॥ १४ ॥

कुसुमरूपाः उद्भूताः कचाः—केशाः तथा। चलितस्थानैः इति आहिताग्न्यादिः। तत्तत् कुसुमस्थानतः चलितैरित्यर्थः। एवं भूतैः षट्पदैः अनुगीयते—पुष्पं हरन् मारुतः अनुसृत्य गीयते इत्यर्थः ॥ १४ ॥

§ मत्तकोकिलसंनादैः नर्तयन्निव पादपान्।
शैलकन्दरनिष्क्रान्तः[3] प्रगीत इव चानिलः ॥ १५ ॥

---

* तोयं सृजतां—त्यजतां तोयमुचां रूपाणीवेति पूर्णोपमा—**गो.** तोयं सृजतां तोयमुचामिव स्थितानां पुष्पवर्णाणि सृजतां पुष्पशालिनां वनानां रूपाणि—सौन्दर्याणि पश्य ॥ † गां—भुवं रम्येषु प्रस्तरेषु—शिलाप्रदेशेषु पुष्पैरवकिरन्ति। कृष्णवर्णानां शिलानामुपरि पुष्पवर्षेण शोभातिशयः प्रतिपादितः ॥ ‡ नगानां—वृक्षाणां शाखाः विक्षिपन् मारुत इत्यन्वयः ॥ § पादपान् नर्तयन्—नर्तयितुमिव, 'लक्षणहेत्वोः' इति शतृप्रत्ययः, मत्तकोकिलसन्नादैः प्रगीतः—प्रकृष्टगीत इव—**गो.**

[1] वर्ष—ङ. [2] द्रुमाणां—ङ. [3] प्रगीयत इवानिलः—ङ.

प्रगीतः—प्रगीतवानिव। तत्रोपाधिः—शैलकन्दरनिष्क्रान्तः इति ॥ १५ ॥

तेन विक्षिपताऽत्यर्थं पवनेन समन्ततः।
अमी संसक्तशाखाग्राः ग्रथिताः इव पादपाः ॥ १६ ॥

ग्रथिताः—कृतग्रथना इव ॥ १६ ॥

[1] स एष सुखसंस्पर्शः वाति चन्दनशीतलः।
गन्धमभ्यावहन् पुण्यं श्रमापनयनोऽनिलः ॥ १७ ॥

गन्धं अभ्यावहन् वातीत्यन्वयः ॥ १७ ॥

अमी पवनविक्षिप्ताः [2] विनदन्तीव पादपाः।
[3] षट्पदैरनुकूजन्तः वनेषु मधुगन्धिषु ॥ १८ ॥
गिरिप्रस्थेषु [4] रम्येषु पुष्पवद्भिर्मनोरमैः।
***संसक्तशिखराः शैलाः विराजन्ते महाद्रुमैः ॥ १९ ॥**

संसक्तशिखराः। संपन्नशेखरा इवेत्यर्थः ॥ १९ ॥

†पुष्पसंछन्नशिखराः मारुतोत्क्षेपचञ्चलाः।
अमी मधुकरोत्तंसाः प्रगीता इव पादपाः ॥ २० ॥

मधुकररूपः उत्तंसः-चूडा येषां ते तथा। प्रगीता इव। प्रकृष्टं तत्र गीतवन्तः इवेत्यर्थः ॥ २० ॥

---

* संसक्तशिखराः—परस्परसंश्लिष्टाग्राः शैला भान्ति-**गो.** पूर्वं 'ग्रथिता इव पादपाः' इति वर्णितत्वात्, अत्र 'महाद्रुमैः' इति दर्शनाच्च एवं व्याख्यानं युक्तं भाति ॥ †मधुकरा एव उत्तंसाः—शिखराणि येषां ते। पुष्पावृतशिखरोपरि नीलोष्णीषधारिणः सगीतिकं नृत्यन्त इव भान्तीत्यर्थः:-**गो.** मधुकरा एव उत्तंसाः—कर्णपूराः-**रा.**

[1] स एव-ङ. [2] विचरन्तीव-ङ. [3] षट्पदैरनुकूजद्भिः-ङ. झ. [4] संरूढैः-ङ.

पुष्पिताग्रांस्तु पश्येमान् कर्णिकारान् समन्ततः ।
हाटकप्रतिसंछन्नान् नरान् पीताम्बरानिव ॥ २१ ॥

अयं वसन्तः, सौमित्रे ! नानाविहगनादितः ।
सीतया विप्रहीणस्य शोकसन्दीपनो मम ॥ २२ ॥

मां हि शोकसमाक्रान्तं संतापयति मन्मथः ।
[1]हृष्टं *[2]प्रवदमानश्च [3]मामाह्वयति कोकिलः ॥ २३ ॥

हृष्टं यथा तथा प्रवदमानः—प्रवदन्–कूजन् इत्यर्थः । मां आह्वयति—स्पर्धां करोतीव ॥ २३ ॥

एष [4]नत्यूहको हृष्टः रम्ये मा वननिर्झरे ।
प्रणदन् मन्मथाविष्टं शोचयिष्यति, लक्ष्मण ! ॥ २४ ॥

नत्यूहकः—वञ्जुलकः–கக்கப்புள் । मा—मामित्यर्थः । वने विद्यमानो निर्झरः तथा ॥ २४ ॥

श्रुत्वैतस्य पुरा शब्दं आश्रमस्था मम प्रिया ।
मामाहूय प्रमुदिता परमं प्रत्यनन्दत ॥ २५ ॥

मामाहूयेति । प्रदर्शनार्थमिति शेषः ॥ २५ ॥

एवं विचित्राः [5]पतगाः नानारावविराविणः ।
वृक्षगुल्मलताः पश्य संपतन्ति ततस्ततः ॥ २६ ॥

पतगाः वृक्षगुल्मलताः संपतन्ति ; पश्येत्यन्वयः ॥ २६ ॥

विमिश्राः[6] विहगाः पुम्भिः † आत्मव्यूहाभिनन्दिताः[7] ॥

---

* प्रवदमानः—विजयघोषं कुर्वन् सन्–गो. † आत्मव्यूहाभिनन्दिताः—अनुरूपेण कान्तेन सहिताऽसीत्येवं सजातीयैः श्लाघिताः, भृङ्गराजप्रमुदिताः—भृङ्गराजझङ्कारश्रवणसंतुष्टाः–गो।

[1] हृष्टः–ङ. [2] प्रयतमानश्च–ङ. [3] समाह्वयति–ङ. [4] दात्यूहको–ज. झ. [5] विहगाः–ङ. [6] विहगैः–ङ. [7] पतदनन्तरं—विचित्राविहगा मत्ताः प्रवदन्ति मनस्सुखं—इत्यधिकं–ङ.

भृङ्गराजप्रमुदिताः, सौमित्रे! मधुरस्वराः[1]।
[2]अस्याः कूले प्रमुदिताः सङ्घशः शकुनास्त्विह ॥

पुम्भिः—पुंविहगैः विमिश्राः—संबद्धाः। आत्मव्यूहः—स्वस्वजातिसमूहः। भृङ्गराजप्रमुदिताः—कर्मधारयोऽयम्, प्रमुदितभृङ्गराजाः; आहिताग्न्यादिः। मधुरस्वराः सन्तः अस्याः कूले तिष्ठन्तीति शेषः। तथा प्रमुदितमधुरस्वराः भृङ्गाः भृङ्गयश्च अत्र तिष्ठन्ति। अथ अस्याः इह कूले शकुनाश्च प्रमुदिताः तिष्ठन्ति ॥ २७॥

[3]नत्यूहरुतविक्रन्दैः पुंस्कोकिलरुतैरपि।
स्वनन्ति पादपाश्चेमे ममानङ्गप्रदीपनाः ॥ २८ ॥

अशोकस्तबकाङ्गारः षट्पदस्वननिस्वनः।
मां हि पल्लवताम्रार्चिः वसन्ताग्निः प्रधक्ष्यति ॥ २९ ॥

अशोकस्तबकरूपः अङ्गारः यस्य स तथा। अग्नेरपि सशब्दत्वात् तदर्थमाह—षट्पदेत्यादि। पल्लवरूपाः ताम्राः अर्चिषो यस्य स तथा ॥ २९ ॥

न हि तां सूक्ष्मपक्ष्माक्षीं सुकेशीं मृदुभाषिणीम्।
अपश्यतो मे, सौमित्रे! जीवितेऽस्ति प्रयोजनम् ॥ ३० ॥

*अयं हि [4]दयितः तस्याः कालो रुचिरकाननः।
कोकिलाकुलसीमान्तः दयिताया ममानघ! ॥ ३१ ॥

अयं कालः—वसन्तकालः। कोकिलैः आकुलः—निबिडः। सीम्नां—वनसीम्नां अन्तः—मध्यप्रदेशः यस्य स तथा ॥ ३१ ॥

---

* अयं हि कालः दयिताया दयितः—इष्टः।

[1] एतदनन्तरं—अस्याः कूले प्रमुदिताः संघशः शकुनास्त्विह—इत्यधिकं-ङ.
[2] इदमर्धं कुण्डलितं-ङ. [3] दात्यूह-ङ. झ. [4] रुचिरः-ङ च. ज.

मन्मथायाससंभूतः वसन्तगुणवर्धितः ।
अयं मां धक्ष्यति क्षिप्रं शोकाग्निः नचिरादिव ॥ ३२ ॥

मन्मथायासेन संभूतः—उत्पन्नः । वसन्तगुणैः—मन्दानिलपुष्पितकाननत्वादिलक्षणैः वर्धितः—प्रज्वलितः ॥ ३२ ॥

अपश्यतः तां [1]दयितां पश्यतो रुचिरद्रुमान् ।
ममायमात्मप्रभवः भूयस्त्वमुपयास्यति ॥ ३३ ॥

आत्मप्रभवः—कामः । भूयस्त्वं—बहुत्वम् ॥ ३३ ॥

अदृश्यमाना वैदेही शोकं वर्धयते मम ।
दृश्यमानो वसन्तश्च * स्वेदसंसर्गदूषकः ॥ ३४ ॥

स्वेदसंसर्गः—कामविकारजः, तेन दूषयति मलिनीकरोतीति तथा ॥ ३४ ॥

मां ह्यद्य मृगशावाक्षी †चिन्ताशोकबलात्कृतम् ।
सन्तापयति, सौमित्रे ! क्रूरश्चैत्रो वनानिलः ‡ ॥ ३५ ॥

बलात्कृतं—बलात्कारेण पीडितम् ॥ ३५ ॥

अमी मयूराः शोभन्ते प्रनृत्यन्तस्ततस्ततः ।
स्वैः पक्षैः पवनोद्धूतैः § गवाक्षैः स्फाटिकैरिव ॥ ३६ ॥

---

* स्वेदसंसर्गदूषकः—मलयमारुतद्वारा स्वेदसम्बन्धनिवर्तकः—**गो**. † चिन्ताशोकबलात्कृतं—चिन्ताशोकाभ्यां बलात् कृतपीडं—**ति**. सन्ततस्मरणात् दुःखपरवशं—**ती**. चिन्ताशोकबलहेतुकविविधकृतिमन्तम्—**रा**. ‡ वनानिलः—अत्र चकारो द्रष्टव्यः—**गो**. वस्तुतस्तु मृगशावाक्षीचिन्ताशोकबलात्कृतमिति समस्तं पदं, सीतावियोगपीडितमिति भावः । § स्पष्टदृष्टशुभ्रनालजालत्वात् स्फाटिकैर्गवाक्षैरिव स्थितैः यद्वा स्फाटिकैः—स्फाटिकप्रधानैः, चन्द्रार्कपरंपरायास्तत्तुल्यत्वादिति भावः—**गो**. अत्र मयूराः—श्वेतमयूरा विवक्षिता वा । अतः पक्षाणां स्फटिकतुल्यत्वम् ॥

[1] वनिता—ङ. **च. ज**.

शिखिनीभिः परिवृताः त एते मदमूर्छिताः ।
[1] मन्मथाभिपरीतस्य मम मन्मथवर्धनाः ॥ ३७॥

शिखिनीभिः—मयूरीभिः ॥ ३७॥

पश्य, लक्ष्मण ! नृत्यन्तं मयूरमुपनृत्यति ।
शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुषु ॥ ३८॥

तामेव [2]मनसा रामां मयूरोऽप्युपधावति ।
वितत्य रुचिरौ पक्षौ रुतैरुपहसन्निव * ॥ ३९॥

वितत्य— विस्तार्य । उपहसन्निवेति । मामिति शेषः ॥३८-३९॥

मयूरस्य वने नूनं रक्षसा न हृता प्रिया ।
तस्मात् नृत्यति रम्येषु वनेषु सह कान्तया ॥ ४०॥
मम त्वयं विना वासः पुष्पमासे सुदुःसहः ॥ ४१॥

मयूरस्य प्रिया यतो नूनं न हृता तस्मादित्यन्वयः। मम त्वयं विना वासः इति। विना सीतां अयं वासः—वसन्तकालस्थितिः इत्यर्थः ॥ ४०—४१॥

पश्य, लक्ष्मण ! [3] संरागं तिर्यग्योनिगतेष्वपि ।
[4] यदेषा शिखिनी कामात् भर्तारं रमतेऽन्तिके ॥ ४२॥

संरागः—समीचीनो रागः ॥ ४२॥

[5] मामप्येवं विशालाक्षी जानकी जातसंभ्रमा ।
मदनेनाभिवर्तेत यदि नापहृता भवेत् ॥ ४३॥

---

* तां मयूरीं उपहसन्निव—इति वा।

[1] मन्मथाग्नि—ङ. [2] तरसा—ज. [3] संरागः—च.ज. [4] अधुना शिखिनी कामात् भर्तारमभिवर्तते—च.ज. [5] ममा प्ये व—ज.

पश्य, लक्ष्मण ! पुष्पाणि निष्फलानि भवन्ति मे ।
पुष्पभारसमृद्धानां वनानां शिशिरात्यये ॥ ४४ ॥

वनानां पुष्पाणि निष्फलानि इति । सीतायाः अभावात् भोगसाधनानि न भवन्तीत्यर्थः ॥ ४४ ॥

*रुचिराण्यपि पुष्पाणि पादपानामतिश्रिया ।
निष्फलानि महीं यान्ति समं मधुकरोत्करैः ॥ ४५ ॥

उत्करस्यैव विवरणं—रुचिराणीत्यादि । उत्करः—समूहः ॥ ४५ ॥

[1]वदन्ति [2]रावं मुदिताः शकुनाः [3]सङ्घशः कलम् ।
आह्वयन्त इवान्योन्यं कामोन्मादकरा मम ॥ ४६ ॥

आह्वयन्त इव वदन्तीत्यन्वयः । ममेति । तत् जायते इति शेषः ॥ ४६ ॥

वसन्तो यदि तत्रापि यत्र मे वसति प्रिया ।
नूनं परवशा सीता साऽपि शोचत्यहं यथा ॥ ४७ ॥

साऽपि शोचतीति । उभयोः सामरस्यादित्याशयः ॥ ४७ ॥

†नूनं ननु वसन्तोऽयं देशं स्पृशति यत्र सा ।
कथं ह्यसितपद्माक्षी वर्तयेत् सा मया विना ॥ ४८ ॥

वसन्तोऽपि तत्रास्ति नैसर्ग्यात् । अतः साऽपि शोचत्येवेत्याह—नूनमित्यादि । स्पृशति ननु—स्पृशत्येवेत्यर्थः ॥ ४८ ॥

---

* ग्राहकान्तराणामप्यभावात् पुष्पाणां वैयर्थ्यमेवेति बोधयन्नाह—रुचिराणीति—रा.

† गूढदेशप्रापणेन तद्देशे वसन्तप्रसङ्गाभावात् न तस्याः शोकप्रसक्तिरित्याशंक्य, वसन्ताभावेऽपि मां विना जीवितं न धारयिष्यतीत्याह—नूनमिति—गो. यद्यपि तत्र वसन्तो न भवेत् कदाचित्; तथापि मया विना सा कथं वर्तयेत्—जीवेत्। मद्विरह एव तन्नाशे पर्याप्त इति भावः—ति.

[1] नदन्ति—च. [2] कामं—ज. [3] सर्वशः—ड.

*अथ वा वर्तते तत्र वसन्तो यत्र मे प्रिया ।
किं करिष्यति सुश्रोणी सा तु निर्भर्त्सिता परैः ॥ ४९ ॥

अथ तत्र वसन्तप्रवृत्तिः अकिञ्चित्करी, परकृतपीडया कामप्रसङ्गस्य अनवकाशात् इत्याह—अथ वेत्यादि । किं करिष्यतीति । वसन्त इति शेषः ॥ ४९ ॥

†श्यामा पद्म[1]पलाशाक्षी मृदुपूर्वाभिभाषिणी ।
नूनं वसन्तमासाद्य परित्यक्ष्यति जीवितम् ॥ ५० ॥

परनिर्बन्धात् आत्मीयवियोगाच्च जीवितत्याग एव तस्याः प्राप्तः इत्याह—श्यामेत्यादि ॥ ५० ॥

दृढं हि हृदये बुद्धिः मम [2]संप्रति वर्तते ।
नालं वर्तयितुं सीता साध्वी मद्विरहं गता ॥ ५१ ॥

परित्यक्ष्यतीत्यस्यैव विवरणं—दृढमित्यादि ॥ ५१ ॥

मयि भावस्तु वैदेह्याः तत्त्वतो विनिवेशितः ।
ममापि भावः सीतायां सर्वथा विनिवेशितः ॥ ५२ ॥

मयि भाव इत्यादिना च उभयोरपि सामरस्यं दर्शितम् ॥

एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः ।
तां विचिन्तयतः कान्तां पावकप्रतिमो मम ॥ ५३ ॥

---

*वसन्तप्राप्तिमङ्गीकृत्याह—अथ वेति-गो. वसन्तः किं करिष्यति? परकृतपीडाकरे कामपीडाऽनवकाशादिति प्राञ्चः । परे तु, तत्र वसन्तो नास्त्येव । तत्सत्त्वे मया विना सा कथं तत्र तिष्ठेत्? आगतैव स्यादित्यर्थः । तदेव सूचयन्नाह—अथ वेति । परनिर्भर्त्सनवशात् नायातीत्याशय इत्याहुः-ति. †यतः परैः निर्भर्त्सिताऽऽगन्तुं न शक्नोति, अतः—श्यामेत्यादि ॥

[1] विशालाक्षी-ङ. [2] संपरिवर्तते-च.

अतः—एष पुष्पवह इत्यादि । हिमावहोऽपि पावकप्रतिमः तां चिन्तयतो मम जायते ॥ ५३ ॥

*सदा सुखमहं मन्मे यं पुरा सह सीतया ।
मारुतः स विना सीतां शोकं वर्धयते मम ॥ ५४ ॥
†तां विना स विहङ्गो यः पक्षी प्रणदितस्तथा ।

तां विनेत्यादि । 'प्रणदितस्तथा' इति, 'विहगः प्रीतिकारकः' इति च प्राचीनः पाठः । यः पक्षी तस्याः संयोगकाले तथा प्रणदितः—अतिसुखं प्रणदितवान्, स एवासौ विहङ्गमः पक्षी तां विना अन्यथा च दुःखप्रणादवानपि जायते इत्यर्थः ॥ ५४ ॥

वायसः पादपगतः प्रहृष्टमभि[1]कूजति ॥ ५५ ॥
एष वै तत्र वैदेह्याः विहगः प्रीतिकारकः ।
[2]पक्षी मां तु विशालाक्ष्याः समीपमुपनेष्यति ॥ ५६ ॥

यथा अस्य पक्षिणः स्वयं एकरूपो विनादः तत्संयोगवियोगोपाधिभ्यां सुखदुःखाभ्यां जायते मे, तस्या अप्येवमेव एतत् पक्षि-

---

* यं मारुतं सुखं—सुखावहं मन्ये, स मारुत इत्यन्वयः । † मध्ये यत्किञ्चिदाश्वासनं दृष्टमनुवदति द्वाभ्यां—तामिति । तदा—प्रथमदर्शनकाले, सीताया वियोगपूर्वकाले वा वायसः—पक्षी विहङ्गः—आकाशगतस्सन् यः प्रणदितः—परुषं वाशितवान्, स इदानीं तां विना—तद्विरहावस्थायां पादपगतस्सन् प्रहृष्टं यथा तथा अभिनर्दति । पूर्वं आकाशगतस्सन् परुषनादेन तद्विश्लेषं सूचितवान्, इदानीं पादपगतस्सन् प्रहृष्टनादेन अस्याः संश्लेषं सूचयतीत्यर्थः । प्रतिहारकः—नियोजकः—गो. अत्र आकाशगतस्य वायसस्य परुषं वाशितं इत्येकमनिष्टसूचकम् । वृक्षगतस्य तस्यैव सहर्षनर्दनमित्यपरं शुभसूचकं च कीर्तितम् । तदेतद्द्वयमपि उत्तरपद्येन यथाक्रमं पूर्वोत्तरार्धाभ्यां विव्रियत इति द्रष्टव्यम् । प्रतिहारकः विश्लेषसूचक इत्यर्थः । उपनेष्यति—भाविनं संयोगं सूचयतीति भावः—इति केचित् ।

[1] नर्दति—ङ. [2] पतिं—ङ.

नादो भविष्यतीति संभावयति—वायस इत्यादि। त्रयं एकं वाक्यम्। राक्षसादिवत् वायसशब्दः स्वार्थाणन्तः प्रसिद्धः। यः एषः पादपगतः वायसः पक्षी तत्र प्रहृष्टं अभिकूजति, मद्वियोगे वैदेह्याः प्रियकरः सोऽसौ तत्र च एतस्याः समीपेऽपि कूजिष्यति। अतश्चायं पक्षी मां विशालाक्ष्याः समीपं उपनेष्यति। साऽपि एतच्छब्दश्रवणे मां स्मृत्वा दुःखिता वत्स्यतीत्यर्थः। *अनामा तु 'प्रणादितस्तदा' इति 'विहगः प्रतिहा(का)रकः' इति च प्रकल्प्य कयाचन कष्टपिष्टया योजयति। तदसाङ्गत्यं स्पष्टमेव। तत्पृष्ठभाविनः सर्वेऽपि तथैव मदेनोद्धताः स्खलन्तीति विभावनीयम् ॥ ५६ ॥

[1]पश्य, लक्ष्मण! संनादं वने मदविवर्धनम्।
पुष्पिताग्रेषु वृक्षेषु द्विजानां उपकूजताम् ॥ ५७ ॥

विक्षिप्तां पवनेनैतां असौ तिलकमञ्जरीम्।
षट्पदः सहसाऽभ्येति मदोद्धूतामिव प्रियाम् ॥ ५८ ॥

कामिनामयमत्यन्तं अशोकः शोकवर्धनः।
स्तबकैः पवनोत्क्षिप्तैः तर्जयन्निव मां स्थितः ॥ ५९ ॥

अमी, लक्ष्मण! दृश्यन्ते चूताः कुसुमशालिनः।
†विभ्रमोत्सिक्तमनसः [2]साङ्गरागा नरा इव ॥ ६० ॥

विभ्रमोत्सिक्तमनसः—शृङ्गारोद्रिक्तचित्ताः ॥ ६० ॥

सौमित्रे! पश्य पम्पायाः चित्रासु वनराजिषु।
किंनराः, नरशार्दूल! विचरन्ति [3]ततस्ततः ॥ ६१ ॥

---

* अनामा—अनामधेय इति निन्दायाम्। महेश्वरतीर्थः स्यात्। †विभ्रमोत्सिक्तमनसः—विलासगर्वितमनसः—गो.

[1] श्रुणु—झ. [2] साङ्गरागाङ्गना इव—ङ. [3] समन्ततः—ङ.

इमानि शुभगन्धीनि पश्य, लक्ष्मण ! सर्वशः ।
नलिनानि प्रकाशन्ते *जले तरुणसूर्यवत् ॥ ६२ ॥

†एषा प्रसन्नसलिला पद्मनीलोत्पलायुता ।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकान्विता ॥ ६३ ॥

जले तरुणसूर्याभैः षट्पदाहतकेसरैः ।
पङ्कजैः शोभते पम्पा समन्तादभिसंवृता ॥ ६४ ॥

जले षट्पदाहतकेसरैः—जले भ्रमरपातितपुष्पधूलिभिः ‡ अभिसंवृता—व्याप्ता शोभते ॥ ६४ ॥

चक्रवाकयुता नित्यं चित्र[1]प्रस्थवनान्तरा[2] ।
मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ॥ ६५ ॥

चित्रप्रस्थानि वनान्तराणि यस्याः सा तथा । प्रस्थः इह प्रदेशवाची ॥ ६५ ॥

[3]पवनाहतवेगाभिः ऊर्मिभिः विमलेऽम्भसि ।
पङ्कजानि विराजन्ते §ताड्यमानानि, लक्ष्मण ! ॥ ६६ ॥

अम्भसि पङ्कजानि विराजन्ते इत्यन्वयः ॥ ६६ ॥

पद्मपत्रविशालाक्षीं सततं [4]पङ्कजप्रियाम् ।
अपश्यतो मे वैदेहीं जीवितं नाभिरोचते ॥ ६७ ॥

नाभिरोचत इति । ‖मदात्मेति शेषः ॥ ६७ ॥

---

* जले तरुणसूर्यवत्—प्रतितरङ्गं प्रतिफलितबालसूर्यवत्—गो. अभूतोपमैषा—रा.
† एषेत्यादि । शोभत इति शेषः—गो. ‡ एतद्रीत्या, पङ्कजैः इत्यस्य तत्सम्बन्धिभिरित्यर्थः । अथ वा 'पद्मजैः' इति पाठः स्यात् । § ताड्यमानानि—चलन्तीति यावत् ।
‖ अथ वा मे—मह्यं जीवनं नाभिरोचत इत्यन्वयः ।

[1] इ.ल—ङ. [2] एतदनन्तरं—क्रौञ्चसारससंघुष्टा विचित्रकुसुमोत्करा—इत्यधिकं—झ.
[3] पवनाहित—ङ. झ. [4] प्रियदर्शनाम्—ङ.

अहो! कामस्य वामत्वं यो गतामपि दुर्लभाम्।
स्मारयिष्यति कल्याणीं कल्याणतरवादिनीम्॥ ६८॥

कामस्य वामत्वं—कुटिलत्वम्। स्मारयिष्यतीति। स्मारयतीति यावत्॥ ६८॥

*शक्यो धारयितुं कामः भवेदद्यागतो मया।
यदि भूयो वसन्तो मां न हन्यात् पुष्पितद्रुमः॥ ६९॥

कामः—कामतापः। अद्यागतो वसन्तः भूयः—अत्यधिकं मां न हन्याचेत् इत्यर्थः॥ ६९॥

यानि स्म रमणीयानि तया सह भवन्ति मे।
तान्येवारमणीयानि जायन्ते मे तया विना॥ ७०॥

पद्मकोशपलाशानि [1]द्रष्टुं दृष्टिर्हि मन्यते।
सीताया नेत्रकोशाभ्यां सदृशानीति, लक्ष्मण!॥ ७१॥

पद्मकोशस्य पलाशानि दलानि तथा। नेत्रकोशाभ्यां—नेत्रपुटाभ्याम्॥ ७१॥

पद्मकेसरसंसृष्टः वृक्षान्तरविनिःसृतः।
निश्वास इव सीतायाः वाति वायुः मनोहरः॥ ७२॥

पद्मकेसरेत्यादिविशेषणाभ्यां कविसमयीयशैत्यसौरभ्यमान्द्यगुणप्रदर्शनम्॥ ७२॥

सौमित्रे! पश्य पम्पायाः दक्षिणे गिरिसानुनि।
पुष्पितां कर्णिकारस्य यष्टिं परमशोभनाम्॥ ७३॥

---

*वसन्तः मां न हन्याचेत्, कामः कथञ्चित् मया धारयितुं शक्यः। सदा स्थित एव हि कामः। परन्तु वसन्त एव उद्दीपको जात इत्यर्थः।

[1] द्रष्टुं—च. छ.

अधिकं शैलराजोऽयं धातुभिः सुविभूषितः ।
विचित्रं सृजते रेणुं वायुवेगविघट्टितम् ॥ ७४ ॥
*गिरिप्रस्थास्तु, सौमित्रे ! सर्वतः संप्रपुष्पितैः ।
निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः ॥ ७५ ॥

पम्पातीररुहाश्चेमे [1]संसिक्ता मधुगन्धिनः ।
†मालतीमल्लिकाषण्डाः करवीराश्च पुष्पिताः ॥ ७६ ॥

अत्र द्वित्राः प्रक्षिप्ताः क्वचित् दृश्यन्ते‡ । ते तु उपेक्ष्यन्ते । पम्पातीरे रुहन्तीति तथा । इगुपधलक्षणः कः । संसिक्ताः—सेकेन वर्धिताः । मालती—जातिः ॥ ७६ ॥

केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ।
[2]माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च सर्वशः ॥ ७७ ॥

वासन्ती—हेमपुष्पिका—சம்பூல்லை । माधवी—कुसुम्भिका—குருக்கி । कुन्दगुल्माः—गुल्मरूपकुन्दाः ॥ ७७ ॥

चिरिबिल्वाः मधूकाश्च वञ्जुलाः वकुलास्तथा ।
चम्पकास्तिलकाश्चैव नागवृक्षाः सुपुष्पिताः ॥ ७८ ॥

चिरिबिल्वाः—नक्तमालाः—குயில் । वकुलाः प्रसिद्धाः—மகிழ் ॥ ७८ ॥

नीपाश्च वरणाश्चैव खर्जूराश्च सुपुष्पिताः ।
पद्मकाश्चोपशोभन्ते नीलाशोकाश्च पुष्पिताः ॥ ७९ ॥

पद्मकाः—गन्धवृक्षविशेषाः ॥ ७९ ॥

---

* गिरिप्रस्थाः प्रदीप्ता इव—ज्वलन्त इव भान्तीत्यर्थः ॥ † अत्र सर्वत्र 'दृश्यन्ते' (श्लो. 81) इत्यस्याकर्षः ॥ ‡ सौमित्रे पश्य, अधिकं शैलराजोऽयं—इति श्लोकद्वयं स्यात्, यतः तिलकेनापि तत्र व्याख्यातम् ॥

[1] संसक्ताः-ङ. [2] मातुलिङ्गाश्च पूर्णाश्च-ङ.

लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिञ्जराः ।
अङ्कोलाश्च कुरण्टाश्च [1]पूर्णकाः पारिभद्रकाः ॥ ८० ॥

पूर्णकाः—शाल्मलिभेदाः । पारिभद्रकः—मन्दारः—கல்யாண-முருங்கை ॥ ८० ॥

चूताः पाटलयश्चैव कोविदाराश्च पुष्पिताः ।
मुचुलिन्दार्जुनाश्चैव दृश्यन्ते गिरिसानुषु ॥ ८१ ॥

'मुचुलिन्दस्तु निम्नगः'—எலும்பிச்சை ॥ ८१ ॥

*केतकोद्दालकाश्चैव शिरीषाः शिंशुपाः धवाः ।
शाल्मल्यः किंशुकाश्चैव रक्ताः कुरवकास्तथा ।
[2]तिमिशाः नक्तमालाश्च चन्दनाः [3]स्पन्दनास्तथा[4] ॥८२॥

उद्दालकः—सेलुः—நச்சுவிளி । कुरवकाः—सैरेयकाः—குறண் । स्पन्दनाः—तिमिशभेदाः ॥ ८२ ॥

पुष्पितान् पुष्पिताग्राभिः लताभिः परिवेष्टितान् ।
द्रुमान् पश्येह, सौमित्रे ! पम्पाया रुचिरान् बहून् ॥८३॥

वातविक्षिप्तविटपान् यथाऽऽसन्नान् द्रुमानिमान् ।
[5]लताः समनुवर्तन्ते मत्ता इव [6]वरस्त्रियः ॥ ८४ ॥

पादपात् पादपं गच्छन् शैलात् शैलं वनाद्वनम् ।
[7]वाति नैकरसास्वादः †संमोदित इवानिलः ॥ ८५ ॥

---

* अत्र 'दृश्यन्ते' इत्यस्यानुकर्षः. † संमोदित इव—जातानन्द इव—रा.

[1] चूर्णकाः—च. ज. [2] तिनिशाः—ङ. [3] स्यन्दना—ङ. [4] एतदनन्तरं—छिन्तालास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः— इत्यधिकं—ङ. झ. [5] वृताः—ङ. [6] पतिस्त्रियः—ङ. [7] याति—ङ.

केचित् पर्याप्तकुसुमाः पादपा मधुगन्धिनः ।
[1] केचिन्मुकुलसंवीताः श्यामवर्णा इवाबभुः ॥ ८६ ॥

इदं मृष्टमिदं स्वादु प्रफुल्लमिदमित्यपि ।
[2] रागमत्तो मधुकरः कुसुमेष्ववलीयते ॥ ८७ ॥

[3] निलीय पुनरुत्पत्य सहसाऽन्यत्र गच्छति ।
मधुलुब्धो मधुकरः पम्पातीरद्रुमेष्वसौ ॥ ८८ ॥

इयं कुसुमसङ्घातैः उपस्तीर्णा सुखाकृता ।
स्वयं निपतितैः भूमिः शयनप्रस्तरैरिव ॥ ८९ ॥

इयमित्यादि । स्वयं निपतितैः कुसुमसमूहैः उपस्तीर्णा इयं भूमिः शयनप्रस्तरैः — शयनार्थतल्पप्रसारणैरिव सुखाकृता — सुखकरी, 'सुखप्रियादानुलोम्ये' इति डच् ॥ ८९ ॥

विविधा विविधैः पुष्पैः तैरेव नगसानुषु ।
[4] विशीर्णाः पीतरक्ताभाः, सौमित्रे ! प्रस्तराः कृताः ॥

विविधा इत्यादि । नगसानुषु विशीर्णाः पीतरक्ताभाश्च तथा । तैः नानाविधैरेव पुष्पैः नानाविधाः प्रस्तराः—शय्याः कृताः इत्युत्प्रेक्षा ॥ ९० ॥

* हिमान्ते पश्य, सौमित्रे ! वृक्षाणां पुष्प[5] संभवम् ।
पुष्पमासे हि तरवः † संघर्षादिव पुष्पिताः ॥ ९१ ॥

---

* हिमान्ते - वसन्ते । विचित्रं पुष्पाणां संभवं पश्येत्यन्वयः ॥ † संघर्षादिव—परस्परस्पर्धयेव । स्पर्धासूचनमेव—षट्पदनादिताः अन्योन्यं आह्वयन्तः 'यूयमिव वयमपि पुष्पिताः' इत्यादिकलहाह्वानं कुर्वन्त इवेति ॥

[1] केचित्कुसुम—ङ. [2] रागयुक्तो—च. [3] निपीय—ङ. [4] विस्तीर्णाः—ङ. विशीर्णैः—झ. [5] संचयम्—ङ.

आह्वयन्त इवान्योन्यं नगाः षट्पदनादिताः ।
कुसुमोत्तंसविटपाः शोभन्ते [1] बहु, लक्ष्मण! ॥ ९२ ॥

कुसुममयोत्तंसयुक्ताः विटपिनस्तथा ॥ ९१–९२ ॥

एष कारण्डवः पक्षी विगाह्य सलिलं शुभम् ।
रमते कान्तया सार्धं काममुद्दीपयन् मम ॥ ९३ ॥
*मन्दाकिन्यास्तु यदिदं रूपमेवं मनोहरम् ।
स्थाने जगति विख्याताः गुणास्तस्या मनोरमाः ॥ ९४ ॥

मन्दाकिन्याः—पम्पानद्याः यदेवं मनोहरं रूपमस्ति, तस्मात् तस्याः ये गुणाः जगति विख्याताः तत् सर्वं स्थाने—युक्तम् ॥ ९४ ॥

यदि दृश्येत सा साध्वी यदि चेह [2] वसेमहि ।
स्पृहयेयं न शक्राय नायोध्यायै, रघूत्तम ! ॥ ९५ ॥

वसेमहीति । इहेति शेषः । शक्रायेति । तत्पदप्राप्तये इत्यर्थः ॥ ९५ ॥

न ह्येवं रमणीयेषु शाद्वलेषु तया सह ।
रमतो मे भवेच्चिन्ता न स्पृहाऽन्येषु वा भवेत् ॥ ९६ ॥

उक्त एवार्थः स्पष्टीक्रियते—न ह्येवमित्यादि । चिन्ता न भवेदिति । राज्यभ्रंशादिचिन्ता न भवेत् इत्यर्थः । अन्येषु—सुखान्तरेष्वपि न स्पृहा भवेत् ॥ ९६ ॥

अमी हि विविधैः पुष्पैः तरवो [3] रुचिरच्छदाः ।
काननेऽस्मिन् विना कान्तां [4] चित्तमुन्मादयन्ति मे ॥

---

* यदिदं पंपाया रूपं, एवं मन्दाकिन्याश्च मनोहरं रूपम् । कथमेतत्साद‍ृश्यं तस्या इत्यत्र—स्थान इति–गो.

[1] भुवि–ङ. [2] वसेम्मम–ङ. [3] विविध–च. ज. [4] चिन्तामुत्पादयन्ति मे–च.

पश्य शीतजलां चेमां, सौमित्रे! पुष्करायुताम्।
चक्रवाकानुचरितां कारण्डवनिषेविताम् ॥ ९८ ॥
प्लवैः क्रौञ्चैश्च [1] संपूर्णां [2] वराहमृगसेविताम्।

प्लवः—शकटलीलः—மரக்கால்நாரை ॥ ९८ ॥

अधिकं शोभते पम्पा विकूजद्भिः विहङ्गमैः।
दीपयन्तीव मे कामं विविधा मुदिताः द्विजाः ॥ ९९ ॥
श्यामां चन्द्रमुखीं*स्मृत्वा[3]प्रियां[4]पद्मनिभेक्षणाम् ॥१००॥

स्मृत्वा—स्मारयित्वा। मे †मनः दीपयन्तीव इत्यन्वयः ॥१००॥

पश्य सानुषु चित्रेषु मृगीभिः सहितान् मृगान्।
मां पुनः मृगशावाक्ष्या वैदेह्या विरहीकृतम् ॥ १०१ ॥
व्यथयन्तीव मे चित्तं सञ्चरन्तः ततस्ततः।

ततस्ततः सञ्चरन्तः इति। मृगाः इति शेषः ॥ १०१ ॥

अस्मिन् सानुनि रम्ये हि मत्तद्विजगणायुते ॥ १०२ ॥
पश्येयं यदि तां कान्तां ततः स्वस्ति भवेन्मम ॥
जीवेयं खलु, सौमित्रे! मया सह सुमध्यमा।
[6]सेवते यदि वैदेही पम्पायाः पवनं [6]सुखम् ॥ १०३ ॥
पद्मसौगन्धिकवहं शिवं शोकविनाशनम्।

---

*स्मृत्वा वर्तमानस्येति शेषः—गो. †अत्र मूले 'मनो मे दीपयन्तीव' इति पाठः स्यात्। अथवा मन इत्यध्याहारो वा।

[1] संकीर्णा—ङ. [2] महामृगनिषे—च. [3] मन्मथो वर्धते हि मे—ङ. [4] चन्द्रनिभे—ङ [5] सेवेत—च. [6] शुभम्—च.

'मम स्वस्ति भवेत्' इत्यस्यैव प्रपञ्चनं—जीवेयमित्यादि। उच्यमानविशेषणत्रयविशिष्टं पम्पायाः पानीयं मया सह सेवते यदि, तदा जीवेयमित्यन्वयः ॥ १०३ ॥

*धन्याः, लक्ष्मण ! सेवन्ते पम्पोपवनमारुतम् ॥ १०४ ॥

धन्याः इति। सस्त्रीकाः इति शेषः ॥ १०४ ॥

श्यामा पद्मपलाशाक्षी प्रिया विरहिता मया।
कथं धारयति प्राणान् †विवशा जनकात्मजा ॥ १०५ ॥

विवशा इति शत्रुवशगत्वादेव ॥ १०५ ॥

किं नु वक्ष्यामि राजानं धर्मज्ञं सत्यवादिनम्।
[1]जनकं पृष्टसीतं तं कुशलं ‡जनसंसदि ॥ १०६ ॥

पृष्टा सीता येन सः पृष्टसीतः। किं नु कुशलं वक्ष्यामि ? न किमपि ॥ १०६ ॥

या मामनुगता §मन्दं पित्रा [2]प्रव्राजितं वनम्।
सीता [3]सत्पथमास्थाय क्व नु सा वर्तते प्रिया ॥१०७॥

मन्दं—मन्दभाग्यम् ॥ १०७ ॥

तया विहीनः कृपणः कथं, लक्ष्मण ! धारये।
यामामनुगता राज्यात् भ्रष्टं [4]विगतचेतसम् ॥ १०८ ॥

कथं धारय इति। प्राणानिति शेषः ॥

---

* पद्मसौगन्धिकेत्याद्यर्धमत्रैवान्वितं भवेत्। गोविन्दराजोपि तथैवाह। † विवशा—प्राणत्यागेऽपि न स्वतन्त्रा—गो. ‡ चतुर्णां पुरतः किं वक्ष्यामीति लोकोक्तिः। § मन्दं—शनैः—रा.

[1] सीताया जनकं पृष्टः—ङ. झ. [2] प्रस्थापितं—ङ. च. [3] धर्मं समास्थाय—च.

[4] विहतचेतनम्—ङ.

तं *चार्चिताश्चित[1]पद्माक्षं सुगन्धि शुभमव्रणम् ।
अपश्यतो मुखं तस्याः †सीदतीव[2]मनो मम ॥ १०९ ॥

अञ्चिते–पूजिते पद्मतुल्ये आक्षिणी यस्य स तथा ॥ १०९ ॥

‡[3]सितहास्यान्तरयुतं गुणवन्मधुरं हितम् ।
वैदेह्या वाक्यमतुलं कदा श्रोष्यामि, लक्ष्मण ! ॥ ११० ॥

सितेन हास्येन—विनोदवचनेन च अन्तरे–गर्भे युतम् । गुणवत्–प्रसादवत् ॥ ११० ॥

[4]प्राप्य दुःखं वने श्यामा सा मां मन्मथकर्शितम् ।
नष्टदुःखेव हृष्टेव साध्वी साध्वभ्यभाषत ॥ १११ ॥

वने दुःखं प्राप्यापि नष्टदुःखेव साध्वी साधु अभ्यभाषत ॥

किं नु वक्ष्यामि कौसल्यां अयोध्यायां, नृपात्मज !
§क्व सा स्नुषेति पृच्छन्तीं कथं चातिमनस्विनीम् ॥

गच्छ, लक्ष्मण ! पश्य त्वं भरतं भ्रातृवत्सलम् ।
न ह्यहं जीवितुं शक्तः तामृते जनकात्मजाम्[5] ॥ ११३ ॥

इति रामं महात्मानं विलपन्तं अनाथवत् ।
उवाच लक्ष्मणो भ्राता वचनं [6]युक्तमव्ययम् ॥ ११४ ॥

अव्ययम्—अनपायार्थम् ॥ ११४ ॥

---

* अञ्चितानि—पूजितानि, स्निग्धानीति यावत्, पक्ष्माणि ययोस्ते—अञ्चितपक्ष्मणी अक्षिणी यस्य तत्–गो. † सीदतीव—विशीर्यत इव । ‡ सितहास्यान्तरयुतं—'कान्तस्मिता लक्ष्मण जातहासा' इत्युक्तरीत्या स्मितेन– नैसर्गिकस्मितेन, हास्यान्तरेण—आगन्तुकहास्येन च युक्तं-गो. § क्व सा स्नुषा ? कथं च सा वर्तत इति पृच्छन्तीमित्यर्थः ।

[1] पक्ष्माक्षं–ङ. झ. [2] मतिः–ङ. [3] मित–ङ. [4] प्राप्त–ङ.
[5] एतदनन्तरं—इति रामस्तु विलपन् हतनौरिव सागरे । न ददर्श तदा पारं शोकस्य पुरुषर्षभः—इत्यधिकं–ङ. [6] व्यक्त–ङ.

* संस्तम्भ, राम! भद्रं ते, मा शुचः, पुरुषोत्तम!
† नेदृशानां मतिर्मन्दा भवत्यकलुषात्मनाम् ॥ ११५ ॥

संस्तम्भ–निरुन्धि, शोकमिति शेषः। नेदृशानामिति। स्वतः अकलुषात्मनामपि ईदृशानां—एवं शोकोपलालनं कुर्वतां मतिः मन्दा—मन्दप्रज्ञा भवति ॥ ११५ ॥

‡ स्मृत्वा वियोगजं दुःखं त्यज स्नेहं प्रिये जने।
अतिस्नेहपरिष्वङ्गात् वर्तिरार्द्राऽपि दह्यते ॥ ११६ ॥

यदेवं, अतः—स्मृत्वेत्यादि। 'संयोगाः विप्रयोगान्ताः' इति न्यायेन प्रियजनविषये अवश्यंभाविवियोगजदुःखं स्मृत्वा तद्गतं स्नेहं अतिस्नेहसङ्गं त्यज। विपक्षे बाधकमाह–अतिस्नेहेत्यादि। आर्द्रा–जलसिक्ताऽपि वर्तिः अतिस्नेहपरिष्वङ्गेन दह्यत एव। एवं शान्तमपि चित्तं अतिस्नेहपरिष्वङ्गे तद्वियोगमूलशोकाग्निना सर्वथा तप्येतैवेत्यर्थः॥

यदि गच्छति पातालं ततोऽप्यधिकमेव वा।
सर्वथा [1]रावणस्तावत् न भविष्यति, राघव! ॥ ११७ ॥

ततोऽप्यधिकमिति। पातालादप्यधिकं गुप्तप्रदेशमिति यावत्। न भविष्यतीति। नशिष्यत्येवेत्यर्थः ॥ ११७ ॥

प्रवृत्तिर्लभ्यतां तावत् तस्य पापस्य रक्षसः।
ततो § हास्यति वा सीतां निधनं वा गमिष्यति ॥

प्रवृत्तिः—वृत्तान्तः। तावत्–प्रथमम् ॥ ११८ ॥

---

* संस्तंभ—धैर्यमवलम्बस्वेत्यर्थः–गो. संस्तंभ, आत्मानमिति शेषः। † अकलुषात्मनामपीदृशानां शोकमनसां मतिर्मन्दा नेति न, अपितु मन्दैव–ति. ‡ स्मृत्वा–एतावताऽनुभूतं, अनुभूयमानं च चिन्तयित्वेत्यर्थः॥ § हास्यतीत्यादौ रावण इत्यध्याहार्यम्। हास्यति–-दास्यतीति यावत्।

[1] रावणस्तात–ङ.

*यदि [1]याति दितेर्गर्भं रावणः सह सीतया ।
तत्राप्येनं हनिष्यामि न चेत् [2]दास्यति मैथिलीम् ॥

दितेः—असुरमातुः ॥ ११९ ॥

स्वास्थ्यं भद्रं भजस्वार्य ! त्यज्यतां कृपणा मतिः ।
अर्थो हि [3]नष्टकार्यार्थैः [4]अयत्नेनाधिगम्यते ॥ १२० ॥

स्वास्थ्यं—स्वस्वभावप्रतिष्ठाम् । नष्टकार्यार्थैः अर्थः—प्रयोजनं अयत्ने—यत्नाभावे नाधिगम्यते ॥ १२० ॥

उत्साहो बलवान्, आर्य ! नास्त्युत्साहात् परं बलम् ।
सोत्साहस्यास्ति लोकेऽस्मिन् न किंचिदपि दुर्लभम् ॥

अतः उत्साह एव कार्यः इत्याह—उत्साह इत्यादि । बलवानिति । कार्यसाधनसमर्थः इत्यर्थः ॥ १२१ ॥

उत्साहवन्तः पुरुषाः नावसीदन्ति कर्मसु ।
उत्साहमात्रमाश्रित्य सीतां प्रतिलभेमहि ॥ १२२ ॥

उत्साहमात्रमाश्रित्येति । शत्रुसंहारकाले पौरुषं अतः परं न संपाद्यं, अपि तु तत्प्रवृत्त्यन्तरायहर्तृ उत्साहमात्रं संपाद्यमित्यर्थः ॥१२२॥

त्यज्यतां †[5]कामवृत्तत्वं शोकं [6]संन्यस्य पृष्ठतः ।
‡महात्मानं कृतात्मानं आत्मानं [7]नावबुध्यसे ॥१२३॥

---

* अदितेर्गर्भमिति पाठे (गो) अदितेः—इन्द्रस्य मातुः—गो. तावत्सुरक्षितस्थानगमनेऽपीति भावः । † कामवृत्तत्वं—यथा प्रतिभाति तथा वर्तनं ; असंयम इति यावत् ॥ ‡ महात्मानं—महाधैर्यं, कृतात्मानं—शिक्षितमनस्कम्—गो. अत्र 'कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे' इति वाक्यं (युद्ध. 120-7) स्मर्तव्यम् ।

[1] यात्यदिते—ङ. [2] दास्यति जानकीम्—ङ. [3] नष्टधैर्यार्थैः—ङ. [4] नायत्नेना—ङ. कामवृत्तित्वं—ङ. [6] संत्यज्य—ङ. [7] किं न बुध्यसे—ङ.

कामवृत्तत्वम् । कामपरतन्त्रत्वमित्यर्थः । त्यज्यतामित्युक्तं त्यागं सकारणमाह—शोकमित्यादि । कामजशोकोपलालने तु कामो वर्धते । अतः तदुपलालनं पृष्ठीकार्यमित्यर्थः । महात्मा—महानुभावः । त्वं कृतात्मानं—गुरुभिः श्रुतिस्मृतिषु शिक्षितबुद्धिं आत्मानं—सदेवर्षिपूज्यनिरतिशयशौर्यवीर्यादिसकलकल्याणगुणस्वभावं त्वां किं न बुध्यसे ॥

एवं संबोधित[1]स्तत्र शोकोपहतचेतनः ।
[2]न्यस्य शोकं च मोहं च [3]ततो धैर्यमुपागमत् ॥ १२४ ॥

एवं द्वित्रवचनमात्रेण सत्त्वप्रकृतिकः आगन्तुकं तामसभावं विधूय स्वां प्रकृतिं प्राप्तवानित्याह—एवमित्यादि । मोहं—काममोहं, तज्जं शोकं च ॥ १२४ ॥

सोऽभ्यतिक्रामदव्यग्रः तामचिन्त्यपराक्रमः ।
रामः पम्पां सुरुचिरां रम्यपारिप्लवद्रुमाम् ॥ १२५ ॥

तां पम्पां अभ्यतिक्रामत् । अत्यक्रामदिति यावत् । पारिप्लवाः—वायुचञ्चलाः तीरद्रुमाः यस्याः सा तथा ॥ १२५ ॥

*निरीक्षमाणः सहसा महात्मा
सर्वं वनं [4]निर्झरकन्दरांश्च ।
उद्विग्नचेताः सह लक्ष्मणेन
विचार्य दुःखोपहतः प्रतस्थे ॥ १२६ ॥

विचार्य—अन्विष्य । अलाभादिति शेषः ॥ १२६ ॥

---

* सर्गार्थं पुनः संग्रहेण दर्शयति द्वाभ्यां—निरीक्षमाण इति—गो.

[1] स्तेन—च. [2] त्यज्य—च. [3] रामो—च, ज. [4] निर्दर—ङ.

तं मत्तमातङ्गविलास[1]गामी
गच्छन्तमव्यग्रमना महात्मा ।
स लक्ष्मणो राघव[2]मप्रमत्तः*
ररक्ष धर्मेण बलेन चैव ॥ १२७ ॥

धर्मेण—तद्बोधनेन । तत्तु 'संस्तम्भ राम' इत्युपदिष्टरूपम् । बलं— तद्बोधनम् । तत्तु 'यदि गच्छति पातालं' इत्याद्युक्तरूपम् ॥

तावृश्यमूकस्य समीपचारी
चरन् ददर्शाद्भुतदर्शनीयौ ।
† शाखामृगाणां अधिपः तरस्वी
[3]वितत्रसे नैव चिचेष्ट किञ्चित् ॥ १२८ ॥

एवं वृत्तमनूद्य वर्तिष्यमाणं संक्षिप्य दर्शयति—तावृश्येत्यादि । वितत्रसे इति । वितत्रासेति यावत् । वाल्यानीतत्वशङ्कया त्रासः । नैव चिचेष्टेति । चेष्टां नैव चकारेत्यर्थः । भीत्येति शेषः ॥ १२८ ॥

स तौ महात्मा गजमन्दगामी
शाखामृगः तत्र [4]चिरं चरन्तौ ।
दृष्ट्वा ‡विषादं परमं जगाम
चिन्तापरीतो भयभारमग्नः ॥ १२९ ॥

उक्तार्थ एव विव्रियते—स तावित्यादि ॥ १२९ ॥

---

* अप्रमत्तः—'रामे प्रमादं मा कार्षीः पुत्र ! भ्रातरि गच्छति ' इति सुमित्रया संदिष्टः-गो. † शाखामृगाणामधिपः—सुग्रीवः । ‡ विषादचिन्ताभयहेतवः उत्तरसर्गे व्यक्तीभविष्यन्ति-गो.

[1] गामिनम्-ङ. [2] मिष्टचेष्टः-च. [3] विभ्रान्तिमत् तस्य बभूव चित्तम्-ङ. [4] चरन्-च.

तमाश्रमं पुण्यसुखं शरण्यं
सदैव शाखामृगसेवितान्तम् ।
त्रस्ताश्च दृष्टाः हरयोऽभिजग्मुः
महौजसौ राघवलक्ष्मणौ तौ ॥ १३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे प्रथमः सर्गः

तमाश्रमं—मतङ्गशापात् वालिदुष्प्रवेशं मतङ्गाश्रमं अभयस्थानमपीत्यर्थः । सेवितः अन्तः—मध्यमः, परिसरो वा यस्य स तथा । अश्मक (१५८ १/२) मानः(?) सर्गः ॥ १३० ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे प्रथमः सर्गः

द्वितीयः सर्गः

[सुग्रीवमंत्रः]

तौ तु दृष्ट्वा महात्मानौ भ्रातरौ रामलक्ष्मणौ ।
वरायुधधरौ वीरौ सुग्रीवः शङ्कितोऽभवत् ॥ १ ॥

अथ रामात् शङ्कितेन सुग्रीवेण रामाभिप्रायपरिज्ञानाय हनूमत्प्रेषणम् । ताविल्यादि ॥ १ ॥

उद्विग्नहृदयः सर्वाः दिशः समवलोकयन् ।
न व्यतिष्ठत कस्मिंश्चित् देशे वानरपुङ्गवः ॥ २ ॥

न व्यतिष्ठत—न व्यवस्थितोऽभूत् ॥ २ ॥

नैव चक्रे मनः [1]स्थाने वीक्षमाणो महाबलौ ।
कपेः परमभीतस्य चित्तं व्यवससाद ह ॥ ३ ॥

---

[1] स्थातुं-च.

नैव चक्रे इति । मनः स्थाने प्रतिष्ठितं नैव अकरोत् इत्यर्थः । व्यवससाद—विषण्णं अभूत् ॥ ३ ॥

*चिन्तयित्वा स धर्मात्मा विमृश्य गुरुलाघवम् ।
सुग्रीवः परमोद्विग्नः [1]सर्वैरनुचरैः सह ॥ ४ ॥
†ततः स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः ।
शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ ॥ ५ ॥

गुरुलाघवं—अवस्थाने सौख्यस्य गुरुलाघवं, अन्यतो गमने च तदुभयं च अनुचरैः—सचिवैः सह विमृश्य सचिवेभ्यः प्रतिष्ठासया भयहेतुं शशंस ॥ ४-५ ॥

एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवम् ।
छद्मना चीरवसनौ प्रचरन्ताविहागतौ ॥ ६ ॥

तदेवोच्यते—एताविल्यादि । छद्मनेति । ऋषिवेषतो विश्वाससम्पादनार्थमित्यर्थः । अतः ज्ञात्वा प्रस्थातव्यमिह यथापूर्वं, न तु साहसात् प्रस्थातव्यमिति शशंसेति शेषः‡ ॥ ६ ॥

ततः सुग्रीवसचिवाः दृष्ट्वा परमधन्विनौ ।
जग्मुः गिरितटात् तस्मात् अन्यं शिखरमुत्तमम् ॥ ७ ॥

ततः—एवं सुग्रीवोक्त्यनन्तरं सुग्रीवसचिवाश्च परमधन्विनौ, अत एव शङ्काऽऽस्पदभूतौ दृष्ट्वा तस्मात् पूर्वस्थितात् गिरितटात् अन्यं

---

*अनुचरैः—मंत्रिभिस्सह चिन्तयित्वा—गुरुलाघवं विमृश्य-स्थाने पलायने वा गुरुलाघवं विमृश्य परमोद्विग्नोऽभूत-गो. †ततः—विचारानन्तरं प्रस्थानेच्छया सचिवेभ्यः शशंस, भयहेतुमिति शेषः-ति. रामलक्ष्मणौ शशंसेति वा । ‡वस्तुतस्तु हनुमद्वचनानन्तरमेव रामलक्ष्मणस्वरूपज्ञानार्थं प्रवृत्तिरिति उत्तरत्र स्पष्टमवगम्यते । अतो अत्र स्वरक्षार्थप्रवृत्तिरेव विवक्षिता ॥

[1] सर्वैस्तैर्वानरैस्सह—च. ज.

उत्तमं तस्यैव गिरेः शिखरं जग्मुः । सुग्रीवेण सहेति शेषः । लिङ्गम् अशिष्यमितिन्यायेन प्रयोगतः पुल्लिङ्गोऽपि शिखरशब्दः ॥ ७ ॥

ते क्षिप्रमभिगम्याथ यूथपाः यूथपर्षभम् ।
हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे ॥ ८ ॥

ते क्षिप्रं गिरिशिखरं अभिगम्य--प्राप्य वानरश्रेष्ठं सुग्रीवं परिवार्य उपतस्थिरे ॥ ८ ॥

*[1] एवमेकायनगताः प्लवमाना गिरेर्गिरिम् ।
प्रकम्पयन्तो वेगेन गिरीणां शिखराण्यपि ॥ ९ ॥
ततः शाखामृगाः सर्वे प्लवमानाः महाबलाः ।
बभञ्जुश्च नगांस्तत्र पुष्पितान् दुर्गसंश्रितान् ॥ १० ॥
आप्लवन्तो हरिवराः सर्वतस्तं महागिरिम् ।
मृगमार्जारशार्दूलान् त्रासयन्तो ययुस्तदा ॥ ११ ॥

उक्तार्थस्यैव विवरणं—एवमित्यादि 'सर्वतस्तं महागिरिम्' इत्यन्तम् । एवं—उक्तरीत्या एकायनगताः—स्थितौ गतौ भये अभये सुखे दुःखे च एकायनं—एकमार्गं—समानयोगक्षेमत्वं गताः ते गिरेः—प्रागवस्थितगिरितटात् गिरिं—तस्य शिखरान्तरं मृगादींस्त्रासयन्तः ययुः—गतवन्तः ॥ ९-११ ॥

ततः सुग्रीवसचिवाः [2]पर्वतेन्द्रं समाश्रिताः ।
संगम्य कपिमुख्येन सर्वे प्राञ्जलयः स्थिताः ॥ १२ ॥

---

* एकायनगताः—एकस्थानगताः एकं—एकाकिनं सुग्रीवं उपतस्थिर इत्यनुषङ्ग-गो.

[1] एक—ङ.   [2] पर्वतेन्द्रे समाहिताः—ङ.

ततस्तु [1]भयसंविग्नं* वालिकिल्बिषशङ्कितम् ।
उवाच हनुमान् वाक्यं सुग्रीवं [2]वाक्यकोविदः ॥ १३ ॥

वालिकिल्बिषशङ्कितं—वालिप्रवर्तितेन किल्बिषेण—वधेन शङ्कितः भीतः तथा ॥ १३ ॥

संभ्रमः त्यज्यतामेषः सर्वैः [3]वालिकृते महान् ।
† मलयोऽयं गिरिवरः भयं नेहास्ति वालिनः ॥ १४ ॥

संभ्रमः—चित्तक्षोभः । सर्वैः अस्माभिः । वालिकृते—वालिनिमित्तं । मलयः—मलयपर्याय ऋष्य(श्य)मूकः ॥ १४ ॥

यस्मात् उद्विग्नचेतास्त्वं प्रद्रुतः, हरिपुङ्गव !
तं क्रूरदर्शनं क्रूरं नेह पश्यामि वालिनम् ‡ ॥ १५ ॥

यस्मात्—वालिभयात् ‡ ॥ १५ ॥

यस्मात् तव भयं, सौम्य ! पूर्वजात् § पापकर्मणः ।
स नेह वाली दुष्टात्मा न ते पश्याम्यहं भयम् ॥ १६ ॥

यस्मादुद्विग्नेत्याद्युक्तार्थस्यैव विवरणं—यस्मात्तवेत्यादि । तस्मात् हेतोः भयं न पश्यामि इत्यन्वयः ॥ १६ ॥

---

* वालिकिल्बिषेण—वालिकपटेन शङ्कितम्—गो. † मलय इति पर्वतमात्रस्य नाम । अयं मलयः—अयं पर्वतः गिरिवरः—ऋश्यमूक इत्यर्थः—गो. दृश्यते च क्वचित् नदीसामान्यस्य गङ्गापदेन, कावेरीपदेन वा व्यवहारः लोके इति भावः । अत्र-5 सर्गस्याद्यः श्लोकः द्रष्टव्यः ॥ ‡ यद्यपि 'वालिप्रणिहितौ' (श्लो-6) इत्येव सुग्रीवेणोक्तम्, तथापि, वालिनोऽन्यत्र सुग्रीवस्य भयाप्रसक्त्या सुग्रीवभयं वालिहेतुकं मन्यमानेन हनुमता एवमुक्तम् । 'वालिप्रणिहितौ' (श्लो-6) इति कथनवेलायां प्रायः हनुमान् अनुपस्थितोऽभूदिति भावयितुमस्त्यवकाशः । अत एव हनूमता उपहसितः सुग्रीवः पुनः 'वालिप्रणिहितावेतौ' (श्लो-21) इत्यादि वदतीति प्रतिभाति ॥ § पापकर्मणः—अनुजभार्यापहारिणः—गो.

[1] भयसंत्रस्तं—च. [2] वाक्यकोविदम्—ङ. [3] वालिकृतो—ङ.

अहो शाखामृगत्वं ते व्यक्तमेव, प्लवङ्गम !
लघुचित्ततयाऽऽत्मानं न स्थापयसि [1]यो *मतौ ॥ १७ ॥

शाखामृगत्वमिति । बहुचेष्टचपलचित्तमर्कटस्वभावमित्यर्थः । तदेव विवृणोति—लघ्वित्यादि । लघु—चपलम् ॥ १७ ॥

†बुद्धिविज्ञानसम्पन्नः इङ्गितैः सर्वमाचर ।
न ह्यबुद्धिं गतो राजा सर्वभूतानि शास्ति हि ॥ १८ ॥

ननु अस्तु वालिभयाभावः इह । अपि तु तत्प्रेरितपुरुषात् किल बिभेमि इत्यत्राह—बुद्धीत्यादि । बुद्धिः—निश्चयात्मिका । इङ्गितैः आन्तराभिज्ञाव्यवहारगमकैः अभिवेदनार्थक्रियाव्यवहारविशेषैः बुद्धिविज्ञानेन पारक्याशयनिश्चयज्ञानेन संपन्नः सन् पश्चात् तदुचितं सर्वं आचर । सर्वभूतानीति । निजशासनीयप्रजाजातमित्यर्थः ॥ १८ ॥

सुग्रीवस्तु ‡शुभं वाक्यं श्रुत्वा सर्वं हनूमतः ।
ततः ‡शुभतरं वाक्यं हनूमन्तमुवाच ह ॥ १९ ॥

§दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ ।
कस्य न स्यात् भयं दृष्ट्वा ह्येतौ सुरसुतोपमौ ॥ २० ॥

---

* मतौ—सम्यग्विचारे—गो. † बुद्धिः—सामान्यतो ज्ञानं, विशेषोज्ञानं-विज्ञानम्—गो. ‡ हनुमतः वाक्यं शुभं, अथापि शुभतरं वाक्यं सुग्रीव उवाच ॥ § शुभतरं वाक्यं किमित्यत्र—दीर्घबाहू इत्यादि । "मद्भाव एव हनुमता न ज्ञातः । नाहं वाली समागत इति बिभेमि । किन्तु वालिप्रणिहितावेतौ इत्येव बिभेमि" ॥ ननु वालिनोऽन्यत्र कथं ते भयमिति चेत् ; सत्यम् ; परन्तु परमगंभीरमनयो रूपं दृष्ट्वा कस्य भयं न स्यात् । अतः अस्ति मम भयस्यावकाशः—इति सुग्रीवाशयः ॥

[1] मे—ङ.

हनुमदुक्तिमङ्गीकृत्य अनादिवासनावशजं मृत्युभयं तच्छंकाक्वास्पदेषु सर्वतोऽपि द्राक् सर्वस्य भवति ; अतः न मच्चापल्यमूलं इत्याह—दीर्घबाहू इत्यादि ॥ २० ॥

वालिप्रणिहितावेतौ शङ्केऽहं पुरुषोत्तमौ ।
राजानो बहुमित्राश्च विश्वासो नात्र हि क्षमः ॥ २१ ॥

ननु वनचारिणा वानरेण वालिना कुतः अनयोः जनपदवर्तिनोः नरयोः प्रवर्तना इत्यत्राह—राजान इत्यादि । बहुमित्रा इति । बहुषु जात्यन्तरेषु च मित्रवन्तो भवन्ति । यथा गृध्रराजस्य दशरथेन, तस्य च अनेन । एवं वालिनश्चापि नरमैत्र्याः संभवात् विश्वासः न अनयोः क्षमः ॥ २१ ॥

अरयश्च *मनुष्येण विज्ञेयाः [1]छन्नचारिणः ।
विश्वस्तानां अविश्वस्ताः [2]रन्ध्रेषु प्रहरन्ति हि ॥ २२ ॥

नन्वथापि तापसाभ्यां कुतो भीतिः ? इत्यत्राह—अरयश्चेत्यादि । किमर्थं छन्नचारिणा विज्ञेयाः इत्यत्राह —विश्वस्तानामिति । वञ्चनया प्राप्तविश्वासानामित्यर्थः ॥ २२ ॥

कृत्येषु वाली मेधावी राजानो [3]बहुदर्शनाः ।
भवन्ति परहन्तारः ते ज्ञेयाः प्राकृतैर्नरैः ॥ २३ ॥

उक्ता लोकस्थितिः प्रकृत उपनीयते—कृत्येष्वित्यादि । परहन्तारः राजानः बहुदर्शनाः—बहुप्रकारवञ्चनोपायज्ञानवन्तः भवन्ति । त एते प्राकृतैः—प्राकृतवेषैः—चारैरिति यावत् , ज्ञेयाः—ज्ञातव्यान्तराशयप्रयोजनाः इत्यर्थः ॥ २३ ॥

---

* ' मनुष्येण ' इति कथनं, सामान्यनीत्यनुवादरूपत्वात् घटते ।

[1] छद्म -च. [2] छिद्रेषु--ङ. [3] बहुदर्शिनः-च.

तौ त्वया *[1] प्राकृतेनैव गत्वा ज्ञेयौ, प्लवङ्गम !
इङ्गितानां प्रकारैश्च रूपव्याभाषणेन च ॥ २४ ॥

यद्येवं, अतः—तावित्यादि । इङ्गितानां—इङ्गितज्ञानसाधनानां प्रकारैः अर्थक्रियारूपैः, रूपव्याभाषणेन—तत्तत्प्रसङ्गसम्पाद्यमानतत्तदुचितसौम्यासौम्यहर्षविषादादिरूपेण तत्तत्प्रसङ्गाक्रियमाणतत्तत्प्रत्युत्तरेण च इत्यर्थः ॥ २४ ॥

[2] लक्षयस्व तयोर्भावं † प्रहृष्टमनसौ यदि ।
विश्वासयन् प्रशंसाभिः इङ्गितैश्च पुनः पुनः ॥ २५ ॥
ममैवाभिमुखं स्थित्वा [3] पृच्छ त्वं, हरिपुङ्गव !
प्रयोजनं प्रवेशस्य वनस्यास्य धनुर्धरौ ॥ २६ ॥

तयोर्भावं लक्षयस्व । अथ तौ आराद्वर्तिनि त्वयि प्रहृष्टमनसौ—उत्तरप्रत्युत्तरसन्तोषवन्तौ यदि, तदा तयोः अभिमुखं स्थित्वा ममैव प्रशंसादिभिः इङ्गितैः मामिकाभिप्रायबोधनैश्च तौ मां प्रति पुनः पुनः विश्वासयन् पश्चात् ‡ मां पृच्छ । किं प्रष्टव्यमित्यतः—प्रयोजनमित्यादि । धनुर्धरौ तौ पृच्छेत्यन्वयः ॥ २६ ॥

शुद्धात्मानौ यदि त्वेतौ जानीहि त्वं, प्लवङ्गम !
व्याभाषितैर्वा [4] रूपैर्वा विज्ञेया§दुष्टता तयोः ॥ २७ ॥

---

* प्राकृतः-पामरः-दीन इत्यर्थः । † प्रहृष्टमनसौ यदि—यदि शुद्धभावौ, तदा प्रशंसाभिः, तदनुकूलेङ्गितैश्च पुनःपुनः विश्वासयन् ममैव अभिमुखं-अनुकूलं यथा भवति तथा स्थित्वा-स्थापयित्वा—गो. प्रशंसादिभिः मम विषये तेषां यथा प्रीतिः स्यात् तथा त्वया वर्तितव्यमित्याशयेन वा 'ममैवाभिमुखं स्थित्वा' इत्युक्तिः ॥ ‡ मां—मामभिकूल्य पृच्छ ॥ § अदुष्टतेति पदच्छेदः—गो.

[1] प्राकृतेनेव—ङ. [2] लक्षयंश्च—ङ. [3] विद्धि—ङ. [4] विज्ञेया व्याहृताद्दुष्टता तयोः—ङ.

प्रश्नावसरं दर्शयति—शुद्धात्मानाविति । अस्मासु द्वेषरहिता-वित्यर्थः । यदि जानीहि तदैव प्रयोजनं तदभिमतं पृच्छ । उक्तार्थं उपसंहरति—व्याभाषितैरित्यादि । दुष्टता अदुष्टता चेति उभयथाऽपि तंत्रतः पदच्छेदः ॥ २७ ॥

इत्येवं कपिराजेन संदिष्टो मारुतात्मजः ।
चकार गमने बुद्धिं यत्र तौ रामलक्ष्मणौ ॥ २८ ॥

तथेति संपूज्य वचस्तु तस्य तत्
[1]कपेः *[2]सुभीमस्य दुरासदस्य च ।
महानुभावो हनुमान् ययौ तदा
स यत्र रामोऽतिबलश्च लक्ष्मणः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे द्वितीयः सर्गः

वीर(२९)मानः सर्गः ॥ २९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे द्वितीयः सर्गः

तृतीयः सर्गः

[हनुमद्रामसङ्गमः]

वचो विज्ञाय हनुमान् सुग्रीवस्य महात्मनः ।
पर्वतादृश्यमूकात्तु पुप्लुवे यत्र राघवौ ॥ १ ॥

अथ हनुमतो रामलक्ष्मणोपसत्तिपूर्वकं तदाशयपरिज्ञानम् । वच इत्यादि । विज्ञायेति । श्रुत्वेति यावत् ॥ १ ॥

---

* सुभीमस्य दुरासदस्येत्याभ्यां सुनीतित्वं सूचितम्—गो.

[1] कपिः—च. [2] सुभीतस्य—च.

कपिरूपं परित्यज्य हनुमान् मारुतात्मजः ।
[1] भिक्षुरूपं ततो भेजे * शठबुद्धितया कपिः ॥ २ ॥

भिक्षुरूपं—प्राकृतभिक्षुतापसवेषं, न तु संन्यासिवेषम् । तौ प्रणिपत्येति वचनात् । शठबुद्धितया—रामलक्ष्मणस्वरूपाविश्वासबुद्धितया ॥ २ ॥

ततः स हनुमान् वाचा श्लक्ष्णया सुमनोज्ञया ।
विनीतवदुपागम्य राघवौ † प्रणिपत्य च ॥ ३ ॥

---

* शठबुद्धितया—वञ्चकबुद्धितया—**गो.** अशठबुद्धितया—वानरत्वसूचितशठबुद्धित्वाभावेन—**रा.** शठबुद्धितयेत्यत्र वालिन इति शेषो वा । † अत्र भिक्षुरूपस्य हनुमतः प्रणामात् अन्यत्रापि भिक्षोः गृहस्थादिविषये प्रणामः कर्तव्य एवेति विज्ञायते । सन्यासिनः गृहस्थादिप्रणामनिषेधवचनानि अज्ञविषयाणीति मन्तव्यानि । यदि ज्ञानाधिकं दृष्ट्वा कर्ममात्रेणाधिको यतिः न प्रणमेत्, तर्हि ' विप्राणां ज्ञानतो ज्यैष्ठ्यम् ' इति मनुवचनं विरुध्येत । न हि तत्प्रणामनिषेधकं मनुवचनं किञ्चित् दृश्यते । किं त्वनारभ्याधीतं अदृष्टाकरं यत्किञ्चिद्यतिप्रणामनिषेधवचनं किंवदन्तीसिद्धं, तस्य च विषयः अज्ञगृहस्थादिरूपः । यत्तु कैश्चिदुक्तं अत्यद्भुतरामलक्ष्मणरूपदर्शनसंजाताप्तिविस्मयः सन् अङ्गीकृतं भिक्षुरूपं विस्मृत्य ' अवशाः प्रतिपेदिरे ' इतिवत् प्रणनामेति न विरोध इति—तन्न—उपक्रमविरोधात् । इङ्गितवचनादिभिः परहृदयज्ञानार्थं हि प्रेषितोऽयम् । न हि तथा नियुक्तः सुनिपुणमतिः सचिवधुरंधरः स्वकार्यविरोधकरं परिगृहीताकारविरुद्धं अविरुद्धमविस्रम्भहेतुत्वेन परेङ्गितानाविष्कारहेतुभूतं कार्यं कुर्यात् । **यदप्युक्तं** ' रूपमेवास्यैतन्महिमानं व्याचष्टे ' इतिन्यायेन दर्शनमात्रेणैतौ सुग्रीवविरोधिनिरसनदक्षाविति निश्चित्य परिगृहीतवेषान्तरस्य स्वस्य वानरत्वं प्रकटयितुं नमस्कारं कृतवानिति न दोष इति (तीर्थः)—तदपि न—तथा सति ' सुग्रीवो नाम ' इत्यादि वक्ष्यमाणमेव प्रथमं कथयेत् । **केचित्तु**—भिक्षुः ब्रह्मचारी, अतो न दोष इत्याहुः—तन्न—तादृशभिक्षुत्वस्य पूर्वमेव सिद्धत्वेन इदानीमपरिग्राह्यत्वात् । **अपरे** तु सर्वथा ' कपिरूपं परित्यज्य ' इत्युपक्रमात्, उपरिष्टात् प्रच्छन्नत्वोक्त्या च मानुषरूपाङ्गीकारावश्यंभावात् तद्रूपविशिष्टं ब्रह्मचर्यमेवात्र भिक्षुशब्देनोच्यत इति न विरोध इत्यूचिरे । तत्पक्षे तु पूर्वोक्तया दिशा दूषणं चिन्त्यम्—**गो.** भिक्षुरूपं—प्राकृततापसरूपम्—**ति.** ' किंदेशोऽयं ' इत्यादिविचिकित्साद्यनुदयार्थं तदनुगुणविरक्तरूपं न तु परमहंससन्यासिरूपं तत् इति तिलकाशयः ॥

[1] भिक्षुवद्ब्रह्मचारी च रामदर्शनलालसः—**ङ.**

आबभाषे तदा वीरौ यथावत् प्रशशंस च ।

विनीतवत्—विनीतः सन् यथावत् प्रशशंसेत्यर्थः । न तु वृथा स्तुतिः ॥ ३ ॥

संपूज्य [1]विधिवद्वीरः हनुमान् [2]मारुतात्मजः ॥ ४ ॥

उवाच कामतो वाक्यं मृदु सत्यपराक्रमौ ।

कामतः—तापसवेषच्छन्नत्वतः स्वेच्छया मृदु उवाच ॥ ४ ॥

राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ ॥ ५ ॥

*देशं कथमिमं प्राप्तौ भवन्तौ †वरवर्णिनौ ।

त्रासयन्तौ मृगगणान् अन्यांश्च वनचारिणः ॥ ६ ॥

पम्पातीररुहान् वृक्षान् वीक्षमाणौ समन्ततः ।

अन्यांश्च—रक्षोऽसुरादीन् । समन्ततः वीक्षमाणौ इति । किंचिद्वस्तु अन्वेषमाणौ इत्यर्थः ॥ ६ ॥

‡इमां नदीं शुभजलां शोभयन्तौ [3]तपस्विनौ ॥ ७ ॥

धैर्यवन्तौ §सुवर्णाभौ कौ युवां चीरवाससौ ।

सु—शोभनः वर्णः—आभा—कान्तिश्च ययोस्तौ तथा ॥ ७ ॥

निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः ॥ ८ ॥

¶ सिंहविप्रेक्षितौ वीरौ [4]सिंहातिबलविक्रमौ ।

---

* इमं दुर्गमं देशं कथं प्राप्तौ–गो. † वरवर्णिनौ—स्निग्धरूपवन्तौ–गो. ब्रह्मचारिश्रेष्ठौ–ति. ‡ इमां नदीमिति । विस्तृतत्वेन सरस्यपि नदीत्वोपचार इति केचित् । नद्येवेत्यन्ये–ति. पम्पायाः सरस्त्वेपि स्वल्पतया पूर्वापरप्रवाहवत्त्वेन नदीत्वमविरुद्धम्–गो. § सुवर्णाभौ—सुवर्णसदृशशरीरौ–रा. रामस्य श्यामत्वेऽपि लक्ष्मणस्य पीतवर्णत्वात् छत्रिन्यायात् सुवर्णकान्तित्वम्–गो. परन्तु 'सर्व एव सुवर्णः' 'हिरण्मयः पुरुषः' इत्यादिश्रुतयः चिन्तनीया अत्र ॥ ¶ सिंहविप्रेक्षितौ—सिंहस्येव विप्रेक्षितं—वीक्षणं ययोस्तौ–गो.

[1] विधिवद्वीरौ–च. ज. [2] वानरोत्तमः–च. [3] तरस्विनौ–च. [4] महाबलपराक्रमौ–ङ.

निःश्वसन्ताविति । किञ्चिद्दुःखवशेनेति शेषः । पीडयन्ता-
विति । त्रासयन्तौ स्वरूपमात्रेण इति यावत् ॥ ८ ॥

शक्रचापनिभे चापे गृहीत्वा [1]शत्रुसूदनौ ॥ ९ ॥
श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ ।
हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ * ॥ १० ॥
प्रभया पर्वतेन्द्रोऽयं युवयोरवभासितः ।
† राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ ॥ ११ ॥
पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ ।

कथं देशमिहागताविति । देशं हित्वा इह आगतावित्यर्थः । आकारतो महाराजत्वनिश्चयात् एवंवादः ॥ ११ ॥

अन्योन्यसदृशौ वीरौ देवलोकादिवागतौ ॥ १२ ॥
यदृच्छयेव संप्राप्तौ चन्द्रसूर्यौ वसुन्धराम् ।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ ॥ १३ ॥
सिंहस्कन्धौ [2]महोत्साहौ समदाविव गोवृषौ ।

समदौ—हृष्टौ गोवृषौ, वृषु सेचने, वृषौ—सेकक्षमौ । तरुण-वृषभाविति यावत् ॥ १३ ॥

‡ आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः ॥ १४ ॥
सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः ।
उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् ॥ १५ ॥
ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम् ।

---

* नरर्षभाविति—एतादृशौ युवां कौ इत्यन्वयः । † राज्येत्यादित्रयः श्लोका एकान्वयाः । कथं—किमर्थम्—गो. ‡ द्वयोर्बाहुचतुष्टयवत्त्वात् बहुवचनम्—गो.

[1] शत्रुनाशने—ङ. [2] महासत्त्वौ—ङ.

इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने ॥ १६ ॥
प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते।

चित्रे अनुलेपने—स्वर्णभूषणं ययोः ते तथा ॥ १६ ॥

संपूर्णा निशितैर्बाणैः तूणाश्च शुभदर्शनाः ॥ १७ ॥
जीवितान्तकरैर्घोरैः [1] श्वसद्भिरिव [2] पन्नगैः।
महाप्रमाणौ [3] विस्तीर्णौ तप्तहाटकभूषितौ ॥ १८ ॥
खड्गावेतौ विराजेते निर्मुक्ताविव पन्नगौ।
एवं मां परिभाषन्तं कस्माद्वै नाभिभाषथः ॥ १९ ॥

"निर्मुक्तो मुक्तकञ्चुकः"। कस्माद्वै—कस्मात् हेतोः नाभिभाषथः—प्रत्युत्तरं न वदतः ॥ १७–१९ ॥

* सुग्रीवो नाम धर्मात्मा कश्चिद्वानर[4]यूथपः।
वीरो विनिकृतो भ्रात्रा जगत् भ्रमति दुःखितः ॥ २० ॥

ननु तापसेन अकिञ्चित्करेण राज्ञा आभाषणानर्हेण किं प्रतिवचनमित्याशङ्क्य प्रत्युत्तरप्राप्तिहेतुभूतं सुग्रीवोपादिष्टं 'ममैव प्रशंसाभिः' इत्याद्युक्तमवलम्ब्य अक्षुद्रत्वबोधनायाह—सुग्रीवो नामेत्यादि। विनिकृतः—निरस्तः ॥ २० ॥

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना।
राज्ञा वानरमुख्यानां हनूमान् [5] नाम वानरः ॥ २१ ॥
युवाभ्यां [6] सह धर्मात्मा सुग्रीवः सख्यमिच्छति।
तस्य मां सचिवं [7] वित्तं वानरं पवनात्मजम् ॥ २२ ॥

---

* एवं स्ववाक्सौष्ठवेन तूष्णींभूतौ दृष्ट्वा स्वकार्यमावेदयति—सुग्रीव इत्यादिना—गो.

[1] ज्वलद्भिरिव—च. [2] पावकैः—ङ. [3] विवृतौ—ङ. [4] पुङ्गवः—च. [5] मारुतात्मजः—ङ. [6] स हि—च. [7] विद्धि—ङ.

ननु त्वदीयेन राज्ञा अस्मदन्तिकप्रेषणं किंनिमित्तं? इत्यत्राह—युवाभ्यामित्यादि ॥ २२ ॥

भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रिय[1]काम्यया ।
ऋश्यमूकादिह प्राप्तं कामगं [2]कामरूपिणम् ॥ २३ ॥

वानरसचिवस्य तव एवं मानुषं रूपं कुतः? इत्यत्राह—भिक्षुरूपेत्यादि । तत्रापि हेतुमाह—कामगं कामरूपिणमिति । वित्तमिति पूर्वेणान्वयः ॥ २३ ॥

एवमुक्त्वा तु हनुमान् तौ वीरौ रामलक्ष्मणौ ।
[3]वाक्यज्ञौ [4]वाक्यकुशलः पुनः नोवाच किंचन ॥ २४ ॥
एतच्छ्रुत्वा वचस्तस्य रामो *लक्ष्मणमब्रवीत् ।
प्रहृष्टवदनः श्रीमान् भ्रातरं पार्श्वतः स्थितम् ॥ २५ ॥
सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ।
तमेव कांक्षमाणस्य ममान्तिकमुपागतः ॥ २६ ॥

तमेव—सुग्रीवमेव ॥ २६ ॥

तमभ्यभाष, सौमित्रे! सुग्रीवसाचिवं कपिम् ।
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तं, [5]अरिन्दम! ॥ २७ ॥

तमभ्यभाषेति । अभिभाषस्वेति यावत् ॥ २७ ॥

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥ २८ ॥

नानृग्वेदेत्यादि । ऋग्वेदे हि विनयः—संहितापदक्रमाणां प्रत्येकं बहुस्वतंत्रत्वात् उपसंहिताप्रादुर्भावबाहुल्यात् तदपेक्षितप्रातिशाख्यपारिषदावित्यादिविनयपूर्वकः—शिक्षापूर्वकोऽभ्यासः अपेक्ष्यते ।

---

* मन्त्रिणा स्वामिनो वचनं न नीतिरिति सौमित्रिं नियोजयति—गो.

[1] कारणात्—च, ज. [2] कामचारिणम्—ङ. [3] वाक्यज्ञो—ङ
[4] वाक्यकुशलौ—ङ. [5] अरिन्दमम्—ङ.

तत्पाठशूरत्वे उक्तविनयपूर्वकत्वं सेत्स्यति। यजुर्वेदस्य बहुसंचारत्वात् विवेचनपूर्वकं धारणं दुष्करं, तदुभयपूर्वम्। सामवेदस्य स्वरूपमेव सहस्रवर्त्मत्वात् तथा। ऋग्वेदस्य दुर्बोधत्वात् तस्य तत्त्वबोधनमेव च दुष्करम्। विनयादियुक्ततया यस्य वेदत्रयधारणाध्यापनशक्तिः अस्ति, तेनैव एवं प्रभाषितुं शक्यम्; नान्येनेत्यर्थः। वेदविद्यानिष्णातत्वं सत्यस्तुतिप्रदर्शनार्थम् ॥ २८॥

नूनं व्याकरणं कृत्स्नं अनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम् ॥ २९ ॥

व्याकरणं बहुधा श्रुतमित्यत्र हेतुमाह—बह्वित्यादि ॥ २९ ॥

*न मुखे नेत्रयोर्वाऽपि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च [1]गात्रेषु दोषः संविद्यते क्वचित् ॥ ३० ॥

दोषो न संविद्यते इति। व्यवहारसमय इति शेषः ॥ ३० ॥

†[2]अविस्तरमसंदिग्धं अविलम्बितम[3]व्यथम्।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे ॥ ३१ ॥

---

*इङ्गितैरप्यसौ विश्वासयोग्य इत्याह—न मुखे इति—ति. शिक्षा चानेन श्रुतेत्याह चतुर्भिः—न मुख इत्यादिभिः। लोके केषाञ्चित् व्यवहारदशायां मुखादिषु सर्वत्र, यत्र कुत्रापि वा विकारो दृश्यते। न तथाऽत्रेति भावः। तदुक्तं शिक्षायां—गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥ न शिरः कम्पयेत् गात्रं भ्रुवौ चाप्यक्षिणी तथा। तैलपूर्णमिवात्मानं तत्तद्वर्णं प्रयोजयेत्' इति—गो. † उरःस्थं—मन्द्रं कण्ठगं—मध्यमम्। तादृशं वाक्यं मध्यमे स्वरे वर्तते। न मन्द्रं, न मध्यमं; न द्रुतं, न विलम्बितं चेत्यर्थः। इदं चतुर्दशदोषाभावानामुपलक्षणम्। तथाऽह शिक्षाकारः—शङ्कितं भीतमुद्घृष्टं अव्यक्तमनुनासिकम्। काकुस्वरं शीर्षगतं तथा स्थानविवर्जितम्। विस्वरं विरसं चैव विश्लिष्टं विषमान्वितम्। व्याकुलं तालुभिन्नं च पाठदोषाश्चतुर्दश' इति। अन्यत्राप्युक्तं—'उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्। निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम्'। इति—गो. उरःस्थं मध्यमारूपेण, कण्ठगं वैखरीरूपेण—ति. रा.

[1] सर्वेषु-च. [2] अविस्वर-ङ. [3] मद्रुतम्-क.

एवं व्यवहारापेक्षितान्तरस्थूलसौष्ठवे उक्त्वा वागिन्द्रियसौष्ठवमाह—अविस्तरमित्यादि। अव्यथं—अस्खलितम्। उरःस्थं—उरःस्थाक्षरविषये। कण्ठगं—कण्ठादितत्तत्स्थानगतम्। शेषवर्णविषये सर्वतो मध्यमे स्वरे—नादे वर्तते, न तु मन्द्रतारयोः ॥ ३१ ॥

*संस्कारक्रमसंपन्नां [1]अद्रुतामविलम्बिताम्।
उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥ ३२ ॥

संस्कारक्रमः—प्रथमं धातुपातिपदिकप्रकृतिः। ततः तिङादि। ततः आन्तरालिकाङ्गप्रत्ययादेशाः। ततः तेषां सन्धिः—इत्येवमात्मकः क्रमः। मध्यमस्वरेति विशेषणव्यावर्त्यांशः—अद्रुतामविलम्बितामिति ॥ ३२ ॥

†अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया।
कस्य नाराध्यते चित्तं उद्यतासेररेरपि ॥ ३३ ॥

त्रिस्थानव्यञ्जनस्थयेति। उरःकण्ठमुखलक्षणत्रिस्थानजनिमद्व्यञ्जनोपेतयेत्यर्थः ॥ ३३ ॥

एवंविधो यस्य दूतः न भवेत् पार्थिवस्य तु।
सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ! ॥ ३४ ॥

---

* संस्कारः—व्याकरणकृता शब्दशुद्धिः, व्यक्तपदत्वमिति यावत्। क्रमः—वर्णानां क्रमिकता, व्यक्ताक्षरत्वमिति यावत्। कल्याणीं—इतरगुणवतीं, हृदयहारिणीं—मधुरां वाणीम्। तदिदमुक्तं शिक्षायां—'माधुर्यमक्षरव्यक्तिः पदच्छेदस्तथाऽस्वरा। धैर्यं लयसमत्वं च षडेते पाठका गुणाः' इति—गो. †त्रिस्थानानि—उरःकण्ठशिरांसि, व्यज्यन्ते एषु वर्णा इति व्यञ्जनानि। त्रिस्थानरूपव्यञ्जनेषु तिष्ठतीति तथा। तथात्वं च न तदुपपन्नत्वम्। शिरस्यत्वस्य निषिद्धत्वात् 'शीर्षगतं तथा' इति ह्युदाहृतम्; किन्तु उदात्तानुदात्तस्वरितवत्त्वम्। तथोक्तं शिक्षायां—'अनुदात्तो हृदि ज्ञेयः मूर्ध्न्युदात्त उदाहृतः। स्वरितः कण्ठमूलीयः पार्श्वास्ये प्रचयस्य तु' इति—गो.

[1] अन्यूनाधिकविस्तराम्—ङ.

*एवं गुणगणै[1]र्युक्ताः यस्य स्युः कार्यसाधकाः ।
तस्य सिध्यन्ति सर्वार्थाः [2]दूतवाक्यप्रचोदिताः ॥ ३५ ॥

एवमुक्तस्तु सौमित्रिः सुग्रीवसचिवं कपिम् ।
अभ्यभाषत वाक्यज्ञः वाक्यज्ञं पवनात्मजम् ॥ ३६ ॥

विदिता नौ गुणाः, विद्वन्! सुग्रीवस्य महात्मनः ।
तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम् ॥ ३७ ॥

नौ — आवयोः । मार्गावः — मार्गयावः इति यावत् ॥ ३७ ॥

यथा ब्रवीषि, हनुमन्! सुग्रीववचनादिह ।
तत्तथा हि करिष्यावः वचनात् तव, सत्तम! ॥ ३८ ॥

यथा ब्रवीषीति । सख्यमिच्छतीति यदवादीः, तत्तथैव करिष्यावः इत्यर्थः ॥ ३८ ॥

तत् तस्य वाक्यं [3]निपुणं निशम्य
प्रहृष्टरूपः पवनात्मजः कपिः ।
मनः समाधाय †जयोपपत्तौ
सख्यं तदा कर्तुमियेष ताभ्याम् ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे तृतीयः सर्गः

जयोपपत्ताविति । सुग्रीवस्येति शेषः । बीगौ(३९)मानः सर्गः ॥ ३९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे तृतीयः सर्गः

---

* व्यतिरेकेण उक्तस्यैव अन्वयमुखेन कथनं—एवं गुणगुणैरिति ॥ † जयोपपत्तौ—वालिजयोपपत्तिनिमित्तम्—गो. सुग्रीवविजयसिद्धौ—रा.

[1] युक्तः यस्य स्यात्कार्यसाधकः—ङ. [2] हितवाक्य—ङ. [3] मधुरं—ङ.

चतुर्थः सर्गः

[रामऋश्यमूकगमनम्]

ततः प्रहृष्टो हनुमान् कृत्यवानिति तद्वचः ।
श्रुत्वा [1]मधुरभावं च सुग्रीवं मनसा गतः ॥ १ ॥

अथ अवगतसर्ववृत्तान्तेन हनुमता रामलक्ष्मणयोः सुग्रीव-समीपप्रापणम् । ततः प्रहृष्टइत्यादि । तद्वचः—तस्य रामस्य वचः—"सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः । तमेव कांक्षमाणस्य ममान्तिकमुपागतः" इत्येवंरूपं श्रुत्वा, तत्र एतद्वचसा 'कपीन्द्रस्य महात्मनः' इति सोपचारप्रयोगतः मधुरभावं—सुग्रीवविषये सौम्यभावं ; 'तमेव कांक्षमाणः' इत्यनेन सुग्रीवे किञ्चित् कृत्यवान् इति विज्ञाय प्रहृष्टो हनुमान् सुग्रीवं—सुग्रीवाभिमतसिद्धिं मनसा गतः—मनसा दृष्टवान् ॥ १ ॥

***[2]भव्यो राज्यागमस्तस्य सुग्रीवस्य महात्मनः ।**
[3]यदयं कृत्यवान् प्राप्तः कृत्यं चैतदुपागतम् ॥ २ ॥

तदेव विव्रियते—भव्य इत्यादि । सुग्रीवस्य राज्यागमः भव्यः—अवश्यंभावी । कुतः इत्यतः—यदयमित्यादि । यदयं महापुरुषः किञ्चित् प्रयोजनापेक्षी प्राप्तः—आगतः । तत्प्रयोजनं चैतत् उपागतं एनं सुग्रीवमाश्रितम्, अतः इत्यर्थः ॥ २ ॥

---

* यत्र अयं कृत्यवान्—सुग्रीवद्वारा यत्साधयितुं अपेक्षावान् रामः प्राप्तः तच्च कृत्यं उपागतं—प्राप्तकालं च, तस्मात् सुग्रीवस्य राज्यागमः भव्यः—कुशलः—दृढ इत्यर्थः ॥

[1] मधुरसंभाषं—ङ. [2] भाव्यो—च. [3] यद्रामः—ङ.

ततः परमसंहृष्टः हनुमान् प्लवगर्षभः ।
प्रत्युवाच ततो वाक्यं रामं वाक्य[1]विशारदः ॥ ३ ॥

किमर्थं त्वं वनं घोरं पम्पाकाननमण्डितम् ।
आगतः *सानुजो दुर्गं नानाव्यालमृगायुतम् ॥ ४ ॥

सौमुख्यावगत्यनन्तरं वनप्रवेशस्य प्रयोजनं पृच्छेति स्वस्वाम्युक्तमनुतिष्ठति—किमर्थं चेत्यादि । पम्पाकाननेन मण्डितं—अलङ्कृतम् । अन्यतो घोररूपम् ॥ ४ ॥

तस्य तद्वचनं श्रुत्वा लक्ष्मणो रामचोदितः ।
आचचक्षे महात्मानं रामं दशरथात्मजम् ॥ ५ ॥

रामचोदित इति । महाप्रभुत्वादेव तथा चोदनं रामेण ॥ ५ ॥

राजा दशरथो नाम द्युतिमान् धर्मवत्सलः ।
चातुर्वर्ण्यं स्वधर्मेण नित्यमेवाभ्यपालयत् ॥ ६ ॥

न द्वेष्टा विद्यते तस्य न च स द्वेष्टि कंचन ।
स च सर्वेषु [2]भूतेषु पितामह इवापरः ॥ ७ ॥
अग्निष्टोमादिभिः यज्ञैः इष्टवान् आप्तदक्षिणैः[3] ।

सर्वसेव्यत्वे सर्वानुग्राहकत्वे च पितामहदृष्टान्तः । देवासुरयोरशेषयोः अविशेषेण औरसपुत्रत्वात्, इन्द्ररावणादेः अविशेषेण स्वपितृपितामहप्रेम्णा सादरसदोपास्यत्वात्, तदुपासनानुरूपेण भगवदेकानुग्रहे रावणादेश्च अविवादात् ॥ ७ ॥

---

* अनुजत्वं आकारसाम्यात्, 'तमभ्यभाष' इति नियोजनाच्च-गो.

[1] विशारदम्-च. [2] लोकेषु-ङ. [3] एतदनन्तरं—अयोध्याधिपतिर्वीरः इक्ष्वाकूणां महारथः—इत्यधिकं-झ.

तस्यायं पूर्वजः पुत्रः रामो नाम जनैः श्रुतः ॥ ८ ॥
शरण्यः सर्वभूतानां पितुर्निर्देशपारगः ।

निर्देशः—नियोगः, तत्पारं गच्छतीति तथा। समाप्तकल्पत्वात् पूर्ववादः ॥ ८ ॥

[1]वीरो दशरथस्यायं पुत्राणां गुणवत्तमः ॥ ९ ॥
राजलक्षणसंपन्नः संयुक्तो राजसंपदा ।

संयुक्तः इति । संयुज्यमान इति यावत् * ॥ ९ ॥

राज्याद्भ्रष्टो वने वस्तुं † मया सार्धमिहागतः ॥ १० ॥
भार्यया च [2]महातेजाः सीतयाऽनुगतो वशी ।
‡ दिनक्षये महातेजाः प्रभयेव दिवाकरः ॥ ११ ॥

राज्याद्भ्रष्ट इति किञ्चिन्निमित्तवशात् ॥ १०-११ ॥

अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः ।
कृतज्ञस्य बहुज्ञस्य लक्ष्मणो नाम नामतः ॥ १२ ॥

भ्रातृशब्दस्य सामान्यवाचित्वात् अवरः इति ॥ १२ ॥

सुखार्हस्य महार्हस्य सर्वभूतहितात्मनः ।
ऐश्वर्येण च हीनस्य [3]वनवासाश्रितस्य च ॥ १३ ॥
रक्षसाऽपहृता भार्या रहिते कामरूपिणा ।
तच्च न ज्ञायते रक्षः पत्नी येनास्य सा हृता ॥ १४ ॥

---

* सहजतः राजसंपदा संयुक्त इति वा । † स्वस्याप्राधान्यद्योतनाय मया सार्धमित्युक्तिः । ‡ राज्यक्षयेऽपि सीताऽनुगमनेऽयं दृष्टान्तः ।

[1] ज्येष्ठो–च. [2] महाभाग–च. ज. [3] वनवासे रतस्य च–च.

रहिते इति । आवाभ्यां रहितकाले इत्यर्थः । न ज्ञायत इति । विशिष्येति शेषः ॥ १४ ॥

दनुर्नाम [1] दितेः पुत्रः शापात् राक्षसतां गतः ।
आख्यातस्तेन सुग्रीवः [2] समर्थो [3] वानरर्षभः ॥ १५ ॥

दनुः—कबन्धः ॥ १५ ॥

स ज्ञास्यति महावीर्यः तव भार्यापहारिणम् ।
एवमुक्त्वा दनुः स्वर्गं भ्राजमानो [4] गतः सुखम् ॥ १६ ॥
एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः ।
अहं चैव हि रामश्च सुग्रीवं शरणं गतौ ॥ १७ ॥
एष दत्त्वा च वित्तानि प्राप्य चानुत्तमं यशः ।
लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति ॥ १८ ॥

नाथमिच्छति—रक्षकं अपक्षते । दैवगत्या इति शेषः * ॥

[5] पिता यस्य पुरा ह्यासीत् शरण्यो धर्मवत्सलः ।
तस्य पुत्रः [6] शरण्यश्च सुग्रीवं शरणं गतः ॥ १९ ॥
सर्वलोकस्य धर्मात्मा शरण्यः शरणं पुरा ।
गुरुर्मे राघवः सोऽयं सुग्रीवं शरणं गतः [7] ॥ २० ॥
यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः ।
स रामो वानरेन्द्रस्य प्रसादमभिकांक्षते ॥ २१ ॥

---

* सुग्रीवद्वारैव सीतावाप्तेः कबन्धसूचितत्वादेवमुक्तिः ॥

[1] श्रियः—ङ. [2] सामात्यो—ङ. [3] वानराधिपः—ङ. च. [4] दिवं गतः—च. [5] सीता यस्य स्नुषा—च. ज. [6] शरण्यस्य—ङ. [7] एतदनन्तरं—इक्ष्वाकूणां कुले जातः रामो दशरथात्मजः । धर्मे निगदितश्चैव पितृन्निर्देशपालकः । तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः । रावणेन हृता भार्या सुग्रीवं शरणं गतः—इत्यधिकं—ङ.

येन सर्वगुणोपेताः पृथिव्यां सर्वपार्थिवाः ।
मानिताः सततं [1]राज्ञा सदा दशरथेन वै ॥ २२ ॥

तस्यायं पूर्वजः पुत्रः त्रिषु लोकेषु विश्रुतः ।
सुग्रीवं वानरेन्द्रं तु रामः शरणमागतः ॥ २३ ॥

सर्वगुणोपेताः मानिता इति । मूर्धाभिषिक्ता इति यावत् ॥

*शोकाभिभूते रामे तु शोकार्ते शरणं गते ।
कर्तुमर्हति सुग्रीवः प्रसादं [2]हरियूथपः ॥ २४ ॥

एवं ब्रुवाणं सौमित्रिं करुणं †साश्रुपातनम् ।
हनुमान् प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ २५

साश्रुपातनमिति । अस्माकमपि किञ्चिच्छरणप्रार्थना आगता किलेति दुःखवशात् ॥ २५ ॥

ईदृशाः बुद्धिसम्पन्नाः जितक्रोधा जितेन्द्रियाः ।
द्रष्टव्या वानरेन्द्रेण दिष्ट्या दर्शनमागताः ॥ २६ ॥

द्रष्टव्याः—द्रष्टुं योग्याः ॥ २६ ॥

स हि राज्यात् परिभ्रष्टः कृतवैरश्च वालिना ।
हृतदारो वने [3]त्यक्तः भ्रात्रा विनिकृतो भृशम् ॥ २७ ॥

एवं मित्रभावापन्नत्वात् द्रष्टव्या इति प्रागुक्तार्थे हेतुमाह—स हीत्यादि । सर्वात्मना स्वत्समानयोगक्षेमः इत्यर्थः ॥ २७ ॥

---

* शोकाभिभूते—शोकपरतन्त्रे, शोकार्ते—शोकपीडिते—गो. शोकाभिभूते—शोकाविष्टे—ति. † साश्रुपातनमिति रामदुःखदर्शनादुःखितत्वमुच्यते—गो.

[1] प्राज्ञाः—ङ. [2] हरियूथपैः—ङ., सह यूथपैः—च. [3] त्रस्तः—च.

करिष्यति स साहाय्यं युवयोः भास्करात्मजः ।
सुग्रीवः सह चास्माभिः सीतायाः परिमार्गणे ॥ २८ ॥

यदेवं, अतः—करिष्यतीत्यादि ॥ २८ ॥

इत्येवमुक्त्वा हनुमान् श्लक्ष्णं मधुरया गिरा ।
बभाषे[1] सोऽभिगच्छेम सुग्रीवमिति राघवम् ॥ २९ ॥

स हनुमानित्यन्वयः ॥ २९ ॥

एवं ब्रुवाणं धर्मात्मा हनुमन्तं स लक्ष्मणः ।
प्रतिपूज्य यथान्यायं इदं प्रोवाच राघवम् ॥ ३० ॥
कपिः कथयते हृष्टः यथावत् *मारुतात्मजः ।
कृत्यवान् सोऽपि संप्राप्तः कृतकृत्योऽसि, राघव! ॥३१॥

कपिरित्यादि । संप्राप्तः सोऽपि कृत्यवान् इति यतः कथयते, अतः—कृतकृत्योऽसि ॥ ३१ ॥

प्रसन्नमुखवर्णश्च व्यक्तं [2]हृष्टश्च भाषते ।
नानृतं वक्ष्यते वीरः हनूमान् मारुतात्मजः ॥ ३२ ॥

यथावत् कथयते इत्युक्तं अर्थं समर्थयति—प्रसन्नेत्यादि । मुखवर्णः—मुखशोभा ॥ ३२ ॥

[3]ततः स तु महाप्राज्ञः हनूमान् मारुतात्मजः[4] ।
भिक्षुरूपं परित्यज्य वानरं रूपमास्थितः ॥ ३३ ॥

---

*पूर्वमेव हनूमता 'पवनात्मजम्' (3–22) इत्युक्तम् ॥

[1] सौम्य गच्छामः–ङ., साधु गच्छामः–च. ज [2] हृष्टं च–ङ. [3] इदं पद्यं अधिकं–झ. [4] एतदनन्तरं 'जगामादाय' इत्याद्यर्धं–ङ. झ.

पृष्ठमारोप्य तौ वीरौ जगाम कपिकुञ्जरः ।
[1]जगामादाय तौ वीरौ हरिराजाय राघवौ ॥ ३४ ॥

वानरस्येदं वानरम्, आर्षः अण् । जगाम कपिकुञ्जरः इत्युक्तम् । क जगामेत्यतः—जगामादायेत्यादि । एवं पाठक्रमः*। कपिराजाय दर्शयितुं तत्समीपमिति शेषः ॥ ३३-३४ ॥

स हि विपुलयशाः कपिप्रवीरः
पवनसुतः [2]कृतकृत्यवत् प्रहृष्टः ।
गिरिवरमुरुविक्रमः प्रयातः
सुशुभ[3]मतिः सह रामलक्ष्मणाभ्याम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चतुर्थः सर्गः

उक्तार्थसङ्ग्रहः—स हीत्यादि । कृतकृत्यवत्—कृतकृत्यः सन् । आगतकार्यस्य सिद्धत्वात् तथात्वम् । गिरिवरं—ऋश्यमूकम् । रामलक्ष्मणाभ्यां सह प्रयातः । माला(३५)मानः सर्गः ॥ ३५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चतुर्थः सर्गः

---

* अत्र 'ततस्तु' इत्यनन्तरमेव 'जगामादाय' इत्यर्धं गोविन्दराजस्य सम्मतम् । अत एवमत्र कथनम् ।

[1] इदमर्धमधिकं-झ. [2] कृतकृत्यवान्-ङ. [3] सुखः-ङ.

पञ्चमः सर्गः

[सुग्रीवसख्यम्]

*ऋश्यमूकात्तु हनुमान् गत्वा तु मलयं गिरिम् ।
आचचक्षे तदा वीरौ कपिराजाय राघवौ ॥ १ ॥

अथ रामसुग्रीवयोः अग्निसाक्षिकसख्यसंपत्तिः । ऋश्यमूकात्तु इत्यादि । ऋश्यमूके सुग्रीवस्य यथापूर्वमावासस्थाने रामलक्ष्मणौ स्थापयित्वा तस्मात् सुग्रीवानयनार्थं मलयं गिरिं गत्वेत्यर्थः । उक्त एव अर्थः तुशब्दद्योतितः । अग्रे 'आख्याता वायुपुत्रेण' इत्युक्त्या, तथा निवेदनपूर्वकमेव प्रापणीयत्वाच्च ॥ १ ॥

†अयं रामो महाप्राज्ञः संप्राप्तो दृढविक्रमः ।
लक्ष्मणेन सह भ्रात्रा [1]रामोऽयं सत्यविक्रमः ॥ २ ॥

अयं रामः इति मलयस्थसुग्रीवदृष्टिपर्यावर्ती, स्वबीसंनिहितश्च निर्दिश्यते ॥ २ ॥

इक्ष्वाकूणां कुले जातः रामो दशरथात्मजः ।
धर्मे ‡निगदितश्चैव पितुर्निर्देश[2]पारगः ॥ ३ ॥

सत्यविक्रमः इत्यस्यानन्तरं इक्ष्वाकूणां कुले जातः इत्यादिना स्वरूपकथनम् । धर्मे निगदितः इति । सत्यपरिपालनरूपधर्मसिद्धि-

---

* ऋश्यमूके सुग्रीववासस्थाने राघवौ स्थापयित्वा, ततः सुग्रीवानयनार्थं ऋश्यमूकैकदेशं मलयाख्यं गिरिं गत्वेत्यन्वयः—रा. रामलक्ष्मणदर्शनभीतः सुग्रीवः ऋश्यमूकादुत्प्लुत्य गहनं मलयाख्यमृश्यमूकपर्यन्तपर्वतं गतः । हनूमान् रामलक्ष्मणौ तत्र प्रतिष्ठाप्य सुग्रीवं तत्रानीतवानिति बोध्यम्—गो. † सकृद्दर्शनेऽपि रामे जातप्रीतिर्हनुमान् भक्तयतिशयादेवमाह । अत एव रामपदावृत्तिरपि । ‡ निगदितः—प्रसिद्धः—गो. धर्मे—स्वसत्यपरिपालनरूपधर्मनिमित्तं निगदितः—प्रेरितः, पित्रेति शेषः—ति.

[1] शूरोऽयं—ङ. — [2] कारकः—च.

निमित्तं पित्रा निगदितः इत्यर्थः । अत एव तस्य पितुर्निर्देशकारकः, तत्पारगश्चायम् ॥ ३ ॥

[1] तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः ।
*[2] रावणेन हृता भार्या स त्वां शरणमागतः ॥ ४ ॥
राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः ।
दक्षिणाश्च तथोत्सृष्टाः गावः शतसहस्रशः ॥ ५ ॥
तपसा सत्यवाक्येन वसुधा येन पालिता ।
स्त्रीहेतोः तस्य पुत्रोऽयं रामस्त्वां शरणं गतः ॥ ६ ॥

धर्मे निगदित इत्युक्तमर्थं स्पष्टयति—राजसूयेत्यादि। स्त्रीहेतोः इति । स्त्रीदत्तवरपरिपालनहेतोरित्यर्थः ॥ ५-६ ॥

भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ ।
प्रतिगृह्यार्चयस्वैतौ पूजनीयतमावुभौ ॥ ७ ॥

प्रतिगृह्य—दर्शनाकांक्षिणोः दर्शनं दत्त्वा इत्यर्थः ॥ ७ ॥

श्रुत्वा हनुमतो वाक्यं सुग्रीवो [3] हृष्टमानसः ।
[4] भयं च राघवाद्घोरं प्रजहौ विगतज्वरः ॥ ८ ॥
स कृत्वा [5] मानुषं रूपं सुग्रीवः [6] प्लवगर्षभः ।
दर्शनीयतमो भूत्वा प्रीत्या प्रोवाच राघवम् ॥ ९ ॥

---

* यद्यपि पूर्वं 'रक्षसाऽपहृता भार्या' 'तच्च न ज्ञायते रक्षः' (4-14) इत्येतावदेव दृश्यते, अथापि अत्र रावणपददर्शनात् सर्वमपि तदा प्रोक्तमित्येव वक्तव्यम् । 'तच्च न ज्ञायते' इत्यस्य च तादृशराक्षसवासस्थानाद्यज्ञानमेवोच्यते, न तु नाम्नोपीति मन्तव्यम् । उत्तरवाक्यान्यप्येतत् द्रढयन्ति ।

[1] अयं श्लोकः कुत्रचित् ६ श्लोकानन्तरं पठ्यते—ङ. [2] रक्षसाप—ङ. [3] वानराधिपः—ङ. [4] एतदाद्यर्धद्वयं कुण्डलितम्—ज. [5] मानसं—च. [6] प्लवगाधिपः—ङ.

दर्शनेयितमो भूत्वा । *अभ्युपेत्येति शेषः ॥ ९ ॥

भवान् धर्मविनीतश्च [1]विक्रान्तः [2]सर्ववत्सलः ।
आख्याताः वायुपुत्रेण तत्त्वतो मे भवद्गुणाः ॥ १० ॥

धर्मे विनीतः—शिक्षितः तथा ॥ १० ॥

तन्ममैवैष सत्कारः लाभश्चैवोत्तमः, प्रभो !
यत्त्वमिच्छसि सौहार्दं वानरेण मया सह ॥ ११ ॥

एषः मम सत्कारः उत्तमो लाभश्च । एष इति कः इत्यपेक्षायामाह—यत् त्वमित्यादि । वानरेण मया—तिर्यग्योनिं गतेनापीत्यर्थः ॥ ११ ॥

रोचते [3]यदि वा सख्यं बाहुरेष प्रसारितः ।
गृह्यतां पाणिना पाणिः मर्यादा बध्यतां [4]ध्रुवा ॥ १२ ॥

यदि वेति । कार्यवशादिति शेषः । प्रसारितः इति । विश्वासाय केवलं दक्षिणो हस्तो दीयते इत्यर्थः । ध्रुवा—स्थिरा । मर्यादा—अनुल्लङ्घनीयोऽन्योन्यकार्यसम्पादनाविषयकनिश्चयश्च बध्यतां—प्रतिज्ञायतामित्यर्थः ॥ १२ ॥

एतत्तु वचनं श्रुत्वा सुग्रीवेण सुभाषितम् ।
स प्रहृष्टमना [5]हस्तं पीडयामास पाणिना ॥
[6]हृद्यं सौहृदमालम्ब्य पर्यष्वजत पीडितम् ॥ १३ ॥

हस्तं पीडयामासेति । दक्षिणहस्तं गृहीतवानिति यावत् । पीडितं पर्यष्वजतेति । गाढमालिङ्गितवानित्यर्थः ॥ १३ ॥

---

* मत्पार्श्वात् रामसमीपमभ्युपेत्येत्यर्थः ।

[1] श्रुतपाः—ङ. [2] सत्यविक्रमः—ञ. [3] यदि मे—च. [4] ध्रुवम्—ङ.
[5] पाणिं—ङ. [6] हृष्टः—च. ञ.

ततो हनूमान् संत्यज्य *भिक्षुरूपमरिन्दमः ।
काष्ठयोः † स्वेन रूपेण जनयामास पावकम् ॥ १४ ॥

अथ प्राप्तसौहार्दस्य स्थैर्याय; दनूरदेशाच्च अग्निसाक्षिकत्वसिद्ध्ये रामप्रेरितहनुमत्प्रवृत्तिः—तत इत्यादि । पूर्वमेव भिक्षुरूपं परित्यज्य स्थितः अरिन्दमः हनूमान् स्वेनरूपेण—स्वीयेन बलेन काष्ठयोः—अरण्योः मथनेन पावकं जनयामास ॥ १४ ॥

दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य ‡ [1]सत्कृतम् ।
तयोर्मध्येऽथ सुप्रीतः निदधे सुसमाहितः ॥ १५ ॥

ततः दीप्यमानं—ज्वलन्तं वह्निं तयोः मध्ये निदधे—निहितवान् । निहितं च तं पुष्पैः अभ्यर्च्य परिस्तरणादिसत्कृतं—संस्कृतं च अकरोत् ॥ १५ ॥

ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ।
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ§ ॥ १६ ॥

प्रदक्षिणं चक्रतुरिति । 'एकमिषे' इत्यादिमन्त्रैरिति शेषः ॥

ततः सुप्रीतमनसौ तावुभौ हरिराघवौ ।
अन्योन्यमभिवीक्षन्तौ न तृप्तिमुपजग्मतुः ॥ १७ ॥
त्वं वयस्योऽसि मे हृद्यः ह्येकं दुःखं समं च नौ ।
[2]सुग्रीवो राघवं वाक्यं इत्युवाच प्रहृष्टवत् ॥ १८ ॥

---

* 'तौ त्वया प्राकृतेनेव गत्वा ज्ञेयौ प्लवङ्गम' (2-24) इति सुग्रीवेणोक्तत्वात्, तत्समीपागमनसमये तद्विश्वासार्थं पुनः हनुमता भिक्षुरूपं गृहीतमिति—रा. ति. गो. गतसर्गान्ते 'भिक्षुरूपं परित्यज्य' इत्यादेः प्रक्षिप्तत्वपक्षे न क्लेशः । कतककारस्य तु 'भिक्षुरूपं सन्त्यज्य' इत्येतत् अनुवादरूपं मतम् । † स्वेनरूपेण—वानररूपेण—गो. ‡ सत्कृतमिति अभ्यर्च्येत्यस्यानुवादः—गो. § उपागतौ, अग्निसाक्षिकमिति शेषः—गो.

[1] पूजितम्—ङ. [2] सुग्रीवं राघवो—ङ. सुग्रीवो राघवश्चैवमूचतुस्तौ प्रहृष्टवत्—ङ.

हृद्यः—हृदयङ्गमः। तदेव दर्शयति—एकं दुःखमित्यादि। समानं दुःखमित्यर्थः। प्रहृष्टवत्—प्रहृष्टः सन्॥ १८॥

ततः स पर्णबहुलां छित्त्वा शाखां सुपुष्पिताम्।
सालस्यास्तीर्य सुग्रीवः निषसाद *सराघवः॥ १९॥

सालस्य वृक्षस्य। आस्तीर्येति। राघवायेति शेषः। सराघवः—राघवसहितः॥ १९॥

†लक्ष्मणायाथ संहृष्टः हनूमान् [1] प्लवगर्षभः।
शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम्॥ २०॥
ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा।
प्रत्युवाच तदा रामं हर्षव्याकुललोचनः॥ २१॥

अथ प्रागुक्तकार्यमर्यादाबन्धनाय प्रवृत्तिः—ततः प्रहृष्ट इत्यादि॥

अहं विनिकृतः, [2] राम! चरामीह भयार्दितः।
हृतभार्यो वने ‡त्रस्तः दुर्गमेतदुपाश्रितः॥ २२॥

इह वने इत्यन्वयः॥ २२॥

सोऽहं त्रस्तो वने भीतः वसाम्युद्भ्रान्तचेतनः।
वालिना निकृतो भ्रात्रा कृतवैरश्च, राघव!॥ २३॥
वालिनो मे, महाभाग! भयार्तस्याभयं कुरु।
कर्तुमर्हसि, काकुत्स्थ! भयं मे न भवेद्यथा॥ २४॥

अभयं कुरु—अभयदानप्रतिज्ञां कुरु इत्यर्थः॥ २४॥

---

* सराघव इत्यनेन एकासनत्वमुक्तम्—गो. † लक्ष्मणाय विषादपरिहारार्थं चन्दनशाखाऽऽस्तरणदानम्—ति. ‡ अत्रस्त इति वा—गो. वालिनः दुर्गमत्वात् अत्रस्त इत्याशयः।

[1] मारुतात्मजः—च. [2] भ्रात्रा—ङ.

एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः ।
प्रत्यभाषत काकुत्स्थः सुग्रीवं प्रहसन्निव ॥ २५ ॥

लीलाविसृष्टैकेषुमात्रसाध्यत्वात्—प्रहसन्निवेति ॥ २५ ॥

उपकारफलं मित्रं विदितं मे, महाकपे !
वालिनं तं वधिष्यामि तव भार्यापहारिणम् ॥ २६ ॥

उपकारः फलं यस्य तत् तथा ॥ २६ ॥

* अमोघाः सूर्यसङ्काशाः ममैते निशिताः शराः ।
तस्मिन् वालिनि दुर्वृत्ते निपतिष्यन्ति वेगिताः ॥ २७ ॥
† कङ्कपत्त्र[1]प्रतिच्छन्नाः महेन्द्राशनिसंनिभाः ।
तीक्ष्णाग्राः ऋजुपर्वाणः सरोषा[2] भुजगा इव ॥ २८ ॥
तमद्य वालिनं पश्य [3]क्रूरैः आशीविषोपमैः ।
शरैर्विनिहितं भूमौ विकीर्णमिव पर्वतम् ॥ २९ ॥
स तु तद्वचनं श्रुत्वा[4] राघवस्यात्मनो हितम् ।
सुग्रीवः परमप्रीतः [5]सुमहद्वाक्यमब्रवीत् ॥ ३० ॥
तव प्रसादेन, नृसिंह ! राघव !
प्रियां च राज्यं च समाप्नुयामहम् ।
तथा कुरु त्वं, नरदेव ! वैरिणं ‡
यथा[6] निहंस्यद्य रिपुं ममाग्रजम् ॥ ३१ ॥

---

* अमोघा इत्यादिश्लोकद्वयमेकान्वयम् । † कङ्कः— गृध्रविशेषः, तस्य पत्त्रैः प्रतिच्छन्नाः—मूलभागे आवृताः । बाणानां शीघ्रगमनार्थं तथा करणम् ॥ ‡ वैरिणं रिपुमिति द्विरुक्त्या वैरकृतं शात्रवं, न तु जात्येत्युक्तम्—गो.

[1] परिच्छन्नाः—ङ. [2] इव पन्नगाः—ङ. [3] तीक्ष्णैः—च.ज. [4] राघवस्य मनोहितम्—ङ. [5] परमं वाक्य—च. [6] न हिंस्यात्स पुनर्ममाग्रजम्—ज. निहंस्यद्य पुं ममाग्रजम्—झ.

वैरिणं तथा कुरु इत्यन्वयः। कथमित्यत:— यथेत्यादि ॥ ३१ ॥

सीताकपीन्द्रक्षणदाचराणां
राजीव*हेमज्वलनोपमानि।
सुग्रीवरामप्रणयप्रसङ्गे
वामानि नेत्राणि समं स्फुरन्ति ॥ ३२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चमः सर्गः

सीतादिभिः राजीवेत्यादेः क्रमादन्वयः। कपीन्द्रः—वाली। स्त्रीणां वामनेत्रस्पन्दः शुभशंसी†। लेख(३२) मानः सर्गः ॥ ३२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चमः सर्गः

षष्ठः सर्गः

[रामेण सीताभूषणविलोकनम्]

पुनरेवाब्रवीत् प्रीतः राघवं रघुनन्दनम्।
अयमाख्याति मे,[1] राम! सचिवो मंत्रिसत्तमः।
हनूमान् यन्निमित्तं त्वं निर्जनं वनमागतः ॥ १ ॥

अथ सुग्रीवेण सीताहरणस्वदर्शनोक्तिपूर्वं प्रत्यभिज्ञानार्थं सीताऽऽभरणप्रदानम्। पुनरित्यादि।‡ आख्याति—आख्यातवान्।

---

* वालिनः पिङ्गाक्षत्वात् वालिनेत्रं हेमोपमम्। † पुरुषाणां तु अशुभशंसीति शेषः। ‡ अतिसमीपकालवृत्तत्वात् लोके इव आख्यातीति वर्तमानतया कथनम्।

[1] वीर—च.

वर्तमानसामीप्ये लट्। किमाख्यातवानित्यतः—यन्निमित्तमित्यादि। यन्निमित्तं वनमागतः, तत् पितृवचनरूपं निमित्तं आख्यातवान् इत्यर्थः ॥ १ ॥

लक्ष्मणेन सह भ्रात्रा वसतश्च वने तव।
रक्षसाऽपहृता भार्या मैथिली जनकात्मजा ॥ २ ॥

अथ रक्षसा ते भार्याऽपहारः *स्वानुभवसिद्ध एवेत्याह—रक्षसेत्यादि। अपहृता—दृष्टापहारेत्यर्थः ॥ २ ॥

त्वया वियुक्ता [1]रुदती लक्ष्मणेन च धीमता।
अन्तरप्रेप्सुना तेन हत्वा गृध्रं जटायुषम् [2] ॥ ३ ॥

अन्तरप्रेप्सुनेत्याद्यनुवादः हनुमद्वचनादेव अवगतत्वात् ॥ ३ ॥

भार्यावियोगजं दुःखं नचिरात् त्वं विमोक्ष्यसे।
अहं तामानयिष्यामि नष्टां †[3]वेदश्रुतीमिव ॥ ४ ॥

अथ स्वकार्यसाधनं प्रतिज्ञातवते रामाय स्वयमपि रामकार्यसाधनं प्रतिजानीते—भार्येत्यादि। नचिरात्—अचिरादिति यावत्। नष्टां—मधुकैटभहृताम् ‡। देवस्य—धर्मब्रह्मतत्त्वज्ञानस्य सप्रपञ्चं साक्षात् साधनभूता श्रुतिः—त्रयी तथा। श्रुतीमिति दीर्घः छान्दसः ॥ ४ ॥

---

* अनन्तरश्लोकादिदर्शनेन अयमपि श्लोकः हनुमद्वचनानुवादरूप इति स्वरसम्।

† वेदश्रुतीं—वेदरूपश्रुतिं-गो, रा. ‡ मधुकैटभाभ्यां वेदेष्वपहृतेषु हयग्रीवरूपी भगवान् पुनः तान् आनयामासेति महाभारते मोक्षधर्मपर्वणि श्रूयते।

[1] वैदेही-ङ. [2] एतदनन्तरं—भार्यावियोगजं दुःखं प्रापितस्तेन रक्षसा—इत्यधिकं-ङ. [3] वेदश्रुतीमिव-ङ. वेदश्रुतिं यथा-झ.

रसातले वा वर्तन्तीं वर्तन्तीं वा नभःस्थले।
अहमानीय दास्यामि तव भार्यामरिन्दम! ॥ ५ ॥

वर्तन्तीमिति—वर्तमानामिति यावत् ॥ ५ ॥

इदं तथ्यं मम वचः त्वमवेहि च, राघव!
न शक्या सा *जरयितुं अपि सेन्द्रैः सुरासुरैः ॥ ६ ॥
तव भार्या, महाबाहो! भक्ष्यं विषकृतं यथा।

तथ्यं—तथ्यमेवेत्यर्थः। जरयितुं न शक्येति। आवयोः बलादिति शेषः। विषकृतं—विषमिश्रितम्। भुक्तमिति शेषः ॥ ६ ॥

त्यज शोकं, महाबाहो! तां कान्तामानयामि ते ॥ ७ ॥
अनुमानात्तु जानामि मैथिली सा न संशयः।

अथ प्रत्यक्षतो दृष्टहरणायाः त्वद्भार्यात्वं रामेत्याक्रोशालिङ्गात् निश्चिनोमीत्याह—अनुमानादित्यादि। या दृष्टा सेत्यर्थः ॥ ७ ॥

ह्रियमाणा मया दृष्टा रक्षसा [1]क्रूरकर्मणा ॥ ८ ॥
क्रोशन्ती राम रामेति लक्ष्मणेति च विस्वरम्।
स्फुरन्ती रावणस्याङ्के पन्नगेन्द्रवधूर्यथा ॥ ९ ॥

क्रोशन्तीति शतृप्रत्ययो हेतौ। यतः आक्रोशन्त्यभूत्, ततः इत्यर्थः ॥ ८-९ ॥

†आत्मना पञ्चमं मां हि दृष्ट्वा [2]शैलतटे स्थितम्।
उत्तरीयं तया त्यक्तं शुभान्याभरणानि च ॥ १० ॥

---

* जरयितुं—गोपयितुं—रा. आत्मसात्कर्तुं—गो. † अरण्यकाण्डे ८५ सर्गे आद्यश्लोकः द्रष्टव्यः।

[1] रौद्रकर्मणा—च, ज. [2] शैलतले—च.

इष्टेत्यत्र प्रमाणं प्रत्यभिज्ञानप्रदर्शनेन सम्पादयति—उत्तरीयमित्यादि। आत्मना पञ्चममिति। चतुर्मन्त्रिसहितस्य स्वस्य पञ्चसङ्ख्यापूरकत्वात्॥ १०॥

तान्यस्माभिः गृहीतानि निहितानि च, राघव!
आनयिष्याम्यहं तानि प्रत्यभिज्ञातुमर्हसि॥ ११॥

आनयिष्यामि—आनेष्यामि॥ ११॥

तमब्रवीत् ततो रामः सुग्रीवं [1]प्रियवादिनम्।
आनयस्व, सखे! शीघ्रं किमर्थं प्रविलम्बसे॥ १२॥
एवमुक्तस्तु सुग्रीवः शैलस्य गहनां गुहाम्।
प्रविवेश ततः शीघ्रं [2]राघवप्रियकाम्यया॥ १३॥

गहनां—दुष्प्रवेशाम्॥ १३॥

उत्तरीयं गृहीत्वा तु शुभान्याभरणानि च।
इदं पश्येति रामाय दर्शयामास वानरः॥ १४॥
ततो गृहीत्वा तद्वासः शुभान्याभरणानि च।
अभवद्बाष्पसंरुद्धः नीहारेणेव चन्द्रमाः॥ १५॥
सीतास्नेहप्रवृत्तेन स तु बाष्पेण दूषितः।
हा प्रियेति रुदन् धैर्यं उत्सृज्य न्यपतत् क्षितौ॥ १६॥
हृदि कृत्वा तु बहुशः तमलङ्कारमुत्तमम्।
निशश्वास भृशं सर्पः बिलस्थ इव रोषितः*॥ १७॥

---

* रोषितः सर्प इव निशश्वासेति निश्वासमात्रे दृष्टान्तः।

[1] प्रियदर्शनम्—ङ. [2] राघवप्रति—ङ.

अविच्छिन्नाश्रुवेगस्तु सौमित्रिं वीक्ष्य पार्श्वतः ।
परिदेवयितुं दीनं रामः समुपचक्रमे ॥ १८ ॥

पश्य, लक्ष्मण ! वैदेह्या संत्यक्तं ह्रियमाणया ।
उत्तरीयमिदं भूमौ शरीराद्भूषणानि च ॥ १९ ॥

शाद्वलिन्यां ध्रुवं भूम्यां सीतया ह्रियमाणया ।
उत्सृष्टं भूषणमिदं तथारूपं तु दृश्यते ॥ २० ॥

शाद्वलिन्यां—शाद्वलवत्यां भूम्यां उत्सृष्टमिति । अत्रत्यलिङ्गमाह–तथारूपं तु दृश्यते इति । अभग्नतया यथापूर्वं दृश्यते इत्यर्थः । २० ॥

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।
*नाहं जानामि केयूरे नाहं जानामि कुण्डले ॥ २१ ॥

नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात् ।
ततः स राघवो [1]दीनः सुग्रीवमिदमब्रवीत् ॥ २२ ॥

ब्रूहि, सुग्रीव ! कं देशं ह्रियन्ती लक्षिता त्वया ।
रक्षसा रौद्ररूपेण मम [2]प्राणैः प्रिया प्रिया ॥ २३ ॥

प्राणैः प्रियेति । प्राणेभ्योऽपीष्टेत्यर्थः ॥ २३ ॥

क्व वा वसति तद्रक्षः महद्व्यसनदं मम ।
†यन्निमित्तं [3]अहं सर्वान् नाशयिष्यामि राक्षसान् ॥

यन्निमित्तं—यस्याः अपहारनिमित्तेनेत्यर्थः ॥ २४ ॥

---

* ऊर्ध्वदृष्ट्या सीतायाः कराद्यदर्शनादिति भावः–ति. † यन्निमित्तं—प्रियापहारितन्निमित्तम्–ति.

[1] वाक्यं–ङ. [2]प्राणप्रिया–ख. [3] इमान्–ङ.

हरता मैथिलीं येन मां च रोपयता [1]भृशम् ।
आत्मनो जीवितान्ताय मृत्युद्वारमपावृतम् * ॥ २५ ॥

मम [2]दयिततरा हृता वनान्तात्
रजनिचरेण †विमथ्य येन सा ।
कथय मम रिपुं त्वमद्य वै
प्लवगपते ! [3]यमसादनं नयामि ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षष्ठः सर्गः

विमथ्य-वञ्चयित्वेति यावत् । चार (२६) मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षष्ठः सर्गः

सप्तमः सर्गः

[सुग्रीवेण रामसमाश्वासनम्]

स एवमुक्तः सुग्रीवः रामेणार्तेन वानरः ।
अब्रवीत् प्राञ्जलिः वाक्यं ‡सबाष्पं [4]बाष्पगद्गदः ॥ १ ॥

अथ सुग्रीवः राममाश्वास्य तेन स्वकार्यसाधने शपथपूर्वं प्रतिज्ञाते सिद्धं स्वकार्यं मन्यते । स एवमुक्तः इत्यादि ॥ १ ॥

---

* अपावृतं—उद्घाटितम् । स्वयं मृत्यवे स्वागतं दत्तमिति भावः । † विमथ्य—वञ्चनया अस्मान् पराभूय-रा. बलात्कृत्येति युक्तम् । ‡ 'एकं दुःखं सुखं च नौ' (5-17) इत्यस्य प्रथमोदाहरणमिदम्-गो.

[1] भुवम्-च. [2] दयिततमा-ज. [3] यमसन्निधिं-ङ. [4] बाष्पगद्गदम्-ङ.

*न जाने निलयं तस्य सर्वथा पापरक्षसः ।
सामर्थ्यं विक्रमं वाऽपि दौष्कुलेयस्य वा कुलम् ॥ २ ॥

दौष्कुलेयस्य तस्य कुलं सामर्थ्यादिकं सर्वथा जाने—जानाम्येव ॥ २ ॥

सत्यं ते प्रतिजानामि त्यज शोकमरिन्दम ।
करिष्यामि तथा यत्नं यथा प्राप्स्यसि मैथिलीम् ॥ ३ ॥

किं तदुपवर्णनेन शत्रोः ? अपि तु एतावदवबुध्यतामित्याह—सत्यं त्वित्यादि । अत्र दौष्कुलेयस्येति पदप्रयोगादेव रक्षःकुलजत्वं अवगतम् । अस्य निन्दात्वेन प्रयोगाश्रयेऽपि

---

*ननिवदं वक्ष्यमाणेन विरुध्यते । वक्ष्यति वानरप्रेषणावसरे 'द्वीपस्तस्यापरे पारे शतयोजनमायतः । अगम्यो मानुषैर्दैवैः तं मार्गध्वं समन्ततः । स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः । राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ' इति । तत्र हि रावणस्य निलयसामर्थ्यपराक्रमाः सुग्रीवेण स्पष्टमवगता इति गम्यते—सत्यम्—तथापि स्वकार्ये प्रथमं प्रवर्तयितुमेवमुक्तवान् सुग्रीवः । अत एव—'ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया ' इत्यस्यापि प्रतिवचनं नोक्तवान् । कथं गमनदेशमपि न जानीयात्, य एवमाह ' ह्रियमाणा मया दृष्टा ' इति । न चैवमादावेव मित्रद्रोहः कृतः स्यादिति वाच्यम् , दूरदर्शिना सुग्रीवेणैवं मनसि कृतम्—यदि मया रावणवृत्तान्तो ज्ञात इत्युक्तः स्यात् तदाऽतिव्यसनी रामोऽयं सीतान्वेषणे मां प्रथमं प्रवर्तयेत् । तच्चायुक्तं, वानराणां वालिवशंवदत्वेनास्मदधीनत्वाभावात् । कथञ्चित्केषाञ्चिद्वशीकरणेऽपि रावणेन कृतसख्यो वाली चास्मन्मनोरथानुरूपां प्रवृत्तिं कथं सहेत ? तथा चोभयकार्यभङ्ग इत्यभिनीतवान् सुमतिः सुग्रीवः । ननु इदानीं परमार्थतो न जानाति सुग्रीवः, पश्चात्तारया (35 सर्गे) ज्ञातवानिति किं न विकल्प्यत इति चेन्न—कामपरवशेन सुग्रीवेण रामकार्यपर्यालोचनाप्रसक्तेः-गो. (अधिकं तत्रैव द्रष्टव्यम्) । सर्वथा न जाने—सर्वप्रकारेण न जाने, किञ्चिज्जानामीत्यर्थः-ती. वस्तुतस्तु—सुग्रीवेण चतुर्दिक्ष्वपि सीतान्वेषणाय वानरप्रेषणदर्शनात्, सामान्यतो रावणविषयपरिज्ञानेऽपि रावणवधोद्योगपर्याप्तविषयपरिज्ञानाभावादेवमुक्तिरिति प्रतिभाति ॥

सीतान्वेषणाय हनुमदादिप्रेषणावसरे लङ्काद्वीपं निर्दिश्याह—'स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः। राक्षसाधिपतेर्वासः सहस्राक्ष-समद्युतेः' इत्येतद्वचनेन स्पष्टं आवाससामर्थ्यादिज्ञानम् ॥ ३ ॥

*रावणं सगणं हत्वा परितोष्यात्मपौरुषम् ।
तथाऽस्मि कर्ता नचिरात् यथा प्रीतो भविष्यसि ॥ ४ ॥

परितोष्यं—भवता परितोषणार्हं आत्मनः—सपरिवारस्य मम पौरुषं बलं अवलम्ब्येति शेषः। सगणं रावणं हत्वा तथा कर्ताऽस्मि नचिरात्, यथा प्रीतो भविष्यसीत्यन्वयः ॥ ४ ॥

अलं वैक्लब्यमालम्ब्य धैर्यमात्मगतं स्मर ।
[1]त्वद्विधानामसदृशं ईदृशं [2]विद्धि लाघवम् ॥ ५ ॥

असदृशं—अयुक्तम् ॥ ५ ॥

मयाऽपि व्यसनं प्राप्तं [3]भार्याहरणजं महत् ।
न चाहमेवं शोचामि न च धैर्यं परित्यजे ॥ ६ ॥

नाहं तामनुशोचामि प्राकृतो वानरोऽपि सन् ।
महात्मा च † विनीतश्च किं पुनः धृतिमान् [4]भवान् ॥

---

* सगणं—सपरिवारं रावणं हत्वा भवन्तं परितोष्य आत्मपौरुषं तथा कर्ताऽस्मि, यथा प्रीतो भविष्यसीत्यन्वयः—**गो.** आत्मपौरुषं—सेनां परितोष्य—संतोष्य—**रा.** आत्मपौरुषं परितोष्य—सगणरावणवधे कृत एव मत्पौरुषस्य तृप्तिः इत्यर्थो वा। मम मनसः तृप्तिः—इत्यादिवद्व्यवहारः। † विनीतः—वृद्धैः सुशिक्षितः—**गो.**

[1] त्वद्विधानां न सदृशं—**च.** [2] बुद्धि—**च.** [3] भार्याविरहजं—**ज.** [4] महान्—**च.**

बाष्पमापतितं धैर्यात् निग्रहीतुं त्वमर्हसि ।
मर्यादां * सत्त्वयुक्तानां धृतिं नोत्स्रष्टुमर्हसि ॥ ८ ॥

सत्त्वयुक्तानां—सत्त्वगुणयुक्तानाम् ॥ ८ ॥

व्यसने वाऽर्थकृच्छ्रे वा भये वा जीवितान्तके ।
विमृशन् वै स्वया बुद्ध्या धृतिमान् नावसीदति ॥ ९ ॥

व्यसनं—इष्टवियोगजम् । अर्थकृच्छ्रं—धननाशः । भयं—चोरव्याघ्रादिजम् । जीवितस्य अन्तं करोतीति जीवितान्तकरम् । विमृशन्—प्रारब्धवेगमिति शेषः † ॥ ९ ॥

बालिशस्तु नरो नित्यं वैक्लब्यं [1]योऽनुवर्तते ।
स मज्जत्यवशः शोके भाराक्रान्तेव नौर्जले ॥ १० ॥

भारेति । अतिभारेत्यर्थः ॥ १० ॥

एषोऽञ्जलिर्मया बद्धः प्रणयात् त्वां प्रसादये ।
पौरुषं श्रय, शोकस्य नान्तरं [2]दातुमर्हसि ॥ ११ ॥
ये शोकमनुवर्तन्ते न तेषां विद्यते सुखम् ।
तेजश्च क्षीयते तेषां न त्वं शोचितुमर्हसि ॥ १२ ॥
शोकेनाभिप्रपन्नस्य जीविते चापि संशयः ।
स शोकं त्यज, राजेन्द्र ! धैर्यमाश्रय केवलम् ॥ १३ ॥

---

* सत्वयुक्तानां—व्यवसायवतां, ‘द्रव्यासुव्यवसायेषु सत्वमह्री च जन्तुषु’—गो.

† तन्निवर्तनोपायं विमृशन्निति वा। अन्यथा ‘सत्त्ववतां’ इत्यस्वरसम् ॥

[1] योऽनुगच्छति—ङ. [2] गन्तु—ङ.

हितं वयस्यभावेन ब्रूमि नोपदिशामि ते ।
*वयस्यतां पूजयन्मे न त्वं शोचितुमर्हसि ॥ १४ ॥

ब्रूमि— ब्रवीमीति यावत् ॥ १४ ॥

मधुरं सान्त्वितस्तेन सुग्रीवेण स राघवः ।
मुखमश्रु परिक्लिन्नं वस्त्रान्तेन प्रमार्जयत् ॥ १५ ॥

प्रमार्जयत्—प्रामार्जयदिति यावत् ॥ १५ ॥

प्रकृतिस्थस्तु काकुत्स्थः सुग्रीववचनात् प्रभुः ।
संपरिष्वज्य सुग्रीवं इदं वचनमब्रवीत् ॥ १६ ॥
यत् कर्तव्यं वयस्येन स्निग्धेन च हितेन च ।
अनुरूपं च युक्तं च कृतं, सुग्रीव! [1] तत् त्वया ॥ १७ ॥

यत्कर्तव्यमिति । शोकापनोदनार्थं इत्यर्थः ॥ १७ ॥

एष च प्रकृतिस्थोऽहं अनुनीतः त्वया, सखे!
दुर्लभो हीदृशो बन्धुः अस्मिन् काले विशेषतः ॥ १८ ॥

अस्मिन् काल इति । व्यसनकाले इति यावत् ॥ १८ ॥

किं तु यत्नः त्वया कार्यः मैथिल्याः परिमार्गणे ।
राक्षसस्य च रौद्रस्य रावणस्य दुरात्मनः† ॥ १९ ॥

दुरात्मनः इति । संहारे चेति शेषः ॥ १९ ॥

---

* मे वयस्यतां-सख्यं पूजयन्—मानयन्नित्यर्थः । † रावणस्य वशंगतायाः इति शेषः । राक्षसस्येत्यपि परिमार्गणेऽन्वेति—रा.

[1] मे त्वया—ङ.

मया च यदनुष्ठेयं विस्रब्धेन तदुच्यताम् ।
वर्षास्विव च सुक्षेत्रे सर्वं संपद्यते [1] मयि ।। २० ।।

मया च यदनुष्ठेयमिति । तवेति शेषः । वर्षास्विव च सुक्षेत्र इति । उप्तं बीजमिति शेषः । संपद्यत इति । फलितं भविष्यतीत्यर्थः ।।

मया च यदिदं वाक्यं *अभिमानात् समीरितम् ।
तत् त्वया, हरिशार्दूल ! तत्त्वमित्युपधार्यताम् ।। २१ ।।

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।
एतत्ते प्रतिजानामि सत्येनैव च † ते शपे ।। २२ ।।

एतदिति । अनृतवचनाभावमित्यर्थः । सत्येनेति । तत्साक्षितयेत्यर्थः ।। २२ ।।

ततः प्रहृष्टः सुग्रीवः वानरैः सचिवैः सह ।
राघवस्य वचः श्रुत्वा ‡प्रतिज्ञातं विशेषतः ।। २३ ।।

एवमेकान्तसंपृक्तौ ततस्तौ [2]नरवानरौ ।
उभावन्योन्य[3]सदृशं [4] सुखं दुःखं प्रभाषताम् ।। २४ ।।

संपृक्तौ--कृतसख्यसम्पन्नौ । प्रभाषतां—प्राभाषतामिति यावत् ।। २४ ।।

---

* अभिमानात्--शौर्याभिमानात्, त्वय्यभिमानाद्वा—**गो.** † ते—तुभ्यम् ।

‡ विशेषतः प्रतिज्ञातं वचः श्रुत्वा—**रा.** राघवस्य वचः—'कर्तव्यं यद्वयस्येन' इत्यादि श्रुत्वा, विशेषतः प्रतिज्ञातं च श्रुत्वेति वा ।

[1] तव—**च.** [2] हरिवानरौ—**ङ.** [3] सदृशौ —**ङ.** [4] सुसुखं प्रत्यभाषताम्—**ङ.**

महानुभावस्य वचो निशम्य
[1]हरिर्नराणामृषभस्य तस्य ।
कृतं स मेने हरिवीरमुख्यः
तदा स्वकार्यं हृदयेन विद्वान् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे सप्तमः सर्गः

विद्वान् सन् स्वकार्यं कृतमित्येव हृदयेन मेने । शाखा(२५)मानः सर्गः ॥ २५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे सप्तमः सर्गः

अष्टमः सर्गः

[वालिवधप्रतिज्ञा]

परितुष्टस्तु सुग्रीवः तेन वाक्येन [2]वानरः ।
[3]लक्ष्मणस्याग्रतो रामं इदं वचनमब्रवीत् ॥ १ ॥

अथ सुग्रीवेण वालिभये वैरमूले अभिहिते अभयदानपूर्वं रामेण वैरकारणप्रश्नः । परितुष्टः इत्यादि । तेन वाक्येनेति । 'अनृतं नोक्तपूर्वं' इत्याद्युक्तवाक्येनेत्यर्थः ॥ १ ॥

सर्वथाऽहं *अनुग्राह्यः देवतानामसंशयः ।
[4]उपपन्नः गुणोपेतः सख्या यस्य भवान् मम ॥ २ ॥

सख्यौ-सखित्वे उपपन्नः-संपन्नः ॥ २ ॥

शक्यं खलु भवेत, राम! सहायेन त्वयाऽनघ!
सुरराज्यमपि प्राप्तुं स्वराज्यं किं पुनः, प्रभो! ॥ ३ ॥

* देवानुग्रहविषयोऽहं, अन्यथा त्वत्सख्यं कथं मम लभ्यं स्यादित्यर्थः ।

[1] हरिर्नृपाणामधिपस्य—च.　[2] हर्षितः—च.　[3] लक्ष्मणस्याग्रजं शूरं—ज.

[4] उपपन्नगुणो—ङ.

सोऽहं सभाज्यो बन्धूनां सुहृदां चैव, राघव!
यस्याग्निसाक्षिकं मित्रं लब्धं राघववंशजम् ॥ ४ ॥

सभाज्यः–पूज्यः ॥ ४ ॥

अहमप्यनुरूपस्ते वयस्यः ज्ञास्यसे शनैः ।
न तु वक्तुं समर्थोऽहं [1]स्वयमात्मगतान् गुणान् ॥ ५ ॥

अनुरूपः–सदृशः । ज्ञास्यस इति । आनुरूप्यमिति शेषः । न तु समर्थ इति । 'आत्मप्रशंसा मरणम्' इति न्यायेनेत्याशयः ॥

महात्मनां तु भूयिष्ठं त्वद्विधानां कृतात्मनाम् ।
निश्चला भवति प्रीतिः धैर्य[2]मात्मवतामिव ॥ ६ ॥

भूयिष्ठं–अत्यधिकं प्रीतिः निश्चला भवति ॥ ६ ॥

*रजतं वा सुवर्णं वा [3]वस्त्राण्याभरणानि च ।
अविभक्तानि † साधूनां अवगच्छन्ति साधवः ॥ ७ ॥

साधूनां—वयस्यानामिति शेषः ॥ ७ ॥

आढ्यो वाऽपि दरिद्रो वा दुःखितः सुखितोऽपि वा ।
निर्दोषो वा सदोषो वा वयस्यः परमा गतिः ॥ ८ ॥

वयस्यः परमा गतिः, वयस्यस्येति शेषः ॥ ८ ॥

धनत्यागः सुखत्यागः देहत्यागोऽपि वा पुनः ।
वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम् ‡ ॥ ९ ॥

तथाविधमिति । सुखधनादित्यागप्रवर्तकमित्यर्थः ॥ ९ ॥

---

*वयस्यभावप्राशस्त्यमाह—रजतं वेत्यादित्रिभिः ॥ † साधूनां मित्राणां साधवो मित्राणि–गो. ‡ अनया सुग्रीववचनभङ्ग्या आवाभ्यामेवं वर्तितव्यमिति व्यवस्था द्योत्यते–गो.

[1] त्वयि आत्मगतान्–ङ. [2] मात्मवतां वरा–ङ. [3] शुभान्याभरणानि–च.

तत्तथेत्यब्रवीद्रामः सुग्रीवं [1] प्रियवादिनम् ।
लक्ष्मणस्याग्रतो * लक्ष्म्या वासवस्येव धीमतः ॥ १० ॥

तत्तथेति । यदुक्तं वयस्ययोः धनाविभागादिकं तत् ममापि संमततरमित्यब्रवीत् इत्यर्थः । वासवस्येव लक्ष्म्या—वीरलक्ष्म्या—महदैश्वर्येण युतः रामः धीमतः लक्ष्मणस्य अग्रतः सुग्रीवमब्रवीत् इत्यन्वयः ॥ १० ॥

† ततो रामं स्थितं दृष्ट्वा लक्ष्मणं च महाबलम् ।
सुग्रीवः सर्वतः चक्षुः वने लोलं अपातयत् ॥ ११ ॥

स्थितं दृष्ट्वेति । केवलभूमाविति शेषः ॥ ११ ॥

स ददर्श ततः सालं अविदूरे हरीश्वरः ।
‡ सुपुष्पमीषत् पत्राढ्यं भ्रमरैरुपशोभितम् ॥ १२ ॥

ईषत् सुपुष्पं पत्राढ्यं—पत्रबहुलम् ॥ १२ ॥

तस्यैकां पर्णबहुलां भङ्क्त्वा शाखां [2] सुपुष्पिताम् ।
[3] सालस्यास्तीर्य सुग्रीवः निषसाद सराघवः ॥ १३ ॥

सराघवः सुग्रीवः निषसादेति । पूर्वदिवस इव द्वितीयदिवसेऽपीति शेषः ॥ १३ ॥

तावासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणम् ।
सालशाखां समुत्पाट्य § विनीतमुपवेशयत् ॥ १४ ॥

---

* लक्ष्म्या—कान्त्या वासवस्येव स्थितस्य लक्ष्मणस्याग्रतः—**गो.** लक्ष्म्या—स्वतःसिद्धसंपत्त्या उपलक्षितः रामः वासवस्येव लक्ष्मणस्याग्रतः—**रा.** † ततः—तद्दिनापगमोत्तरं द्वितीयदिन इत्यर्थः—**ति.** स्थितं—भूषणग्रहण कालात्प्रभृति तिष्ठन्तमित्यर्थः । लोलं चक्षुरपातयदिति । समीचीनशाखालाभार्थं सर्वत्रान्वेषयामासेत्यर्थः—**गो.** ‡ ईषत्पत्राढ्यं—ईषत्पत्रैः—ह्रस्वत्पर्णैः संपन्नं—**रा.** पल्लवप्रचुरं—**गो.**
§ विनीतं—एकासने स्थितिमनङ्गीकुर्वन्तं—**गो.**

[1] प्रियदर्शनम्—**च.** [2] सुशोभनाम्—**ङ.** [3] रामस्या—**च.**

*सुखोपविष्टं रामं तु प्रसन्नमुदधिं यथा ।
[1]फलपुष्पसमाकीर्णे तस्मिन् गिरिवरोत्तमे ॥ १५ ॥

सुखोपविष्टं रामं तु । दृष्ट्वेति शेषः ॥ १५ ॥

ततः प्रहृष्टः सुग्रीवः [2]श्लक्ष्णं मधुरया गिरा ।
उवाच प्रणयात् रामं हर्षव्याकुलिताक्षरम् ॥ १६ ॥
अहं विनिकृतो भ्रात्रा चराम्येष भयार्दितः ।
ऋश्यमूकं गिरिवरं हृतभार्यः सुदुःखितः ॥ १७ ॥

अहं विनिकृतः इत्यादि पूर्वदिवसोक्तार्थस्यैव स्मारणम् † ॥१७॥

सोऽहं त्रस्तो भये मग्नः [3]वसाम्युद्भ्रान्तचेतनः ।
वालिना निकृतो भ्रात्रा कृतवैरश्च, राघव! ॥ १८ ॥
वालिनो मे भयार्तस्य, सर्वलोकाभयङ्कर! ।
ममापि त्वं अनाथस्य प्रसादं कर्तुमर्हसि ॥ १९ ॥
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः ।
प्रत्युवाच स काकुत्स्थः सुग्रीवं [4]प्रहसन्निव ॥ २० ॥

स एवार्थोऽनुष्ठेयः शतवारोक्तयाऽपीत्याह—एवमुक्त इति ॥२०॥

उपकारफलं मित्रं अपकारोऽरिलक्षणम् ।
‡अद्यैव तं [5]हनिष्यामि तव भार्यापहारिणम् ॥ २१ ॥

---

* सुखोपविष्टमित्यादि श्लोकद्वयमेकान्वयम् । द्वितीयरामपदमभिरामार्थकम् । प्रसन्नमुदधिं यथा—तद्वत्प्रसन्नगंभीरमित्यर्थः—गो. सुखोपविष्टं रामं ददर्शेति शेषः—रा. † पञ्चमसर्गे (२१–२५) एतदादिश्लोकचतुष्टयपाठात् एवं व्याख्यानम् । ‡ पञ्चमसर्गे 'वालिनं तं वधिष्यामि' (२६) इति सामान्यत उक्तं, अत्र तु 'अद्यैव तं हनिष्यामि' इति विशेषः ।

[1] सालपुष्प—च. [2] श्लक्ष्णया शुभया—च. [3] वने संभ्रान्त—ज. [4] वानरोत्तमम्—ङ. [5] वधिष्यामि—च.

इमे हि मे [1]महावेगाः पत्रिणः तिग्मतेजसः ।
*कार्तिकेयवनोद्भूताः शरा हेमविभूषिताः ॥ २२ ॥
कङ्कपत्रप्रतिच्छन्नाः महेन्द्राशनिसंनिभाः ।
सुपर्वाणः सुतीक्ष्णाग्राः सरोषाः [2]भुजगा इव ॥ २३ ॥

कार्तिकेयस्य—स्कन्दस्य उत्पत्तिहेतुभूतं वनं—शरवणं तथा। शोभनानि पर्वाणि येषां ते सुपर्वाणः ॥ २२-२३ ॥

[3]भ्रातृसंज्ञं अमित्रं ते [4]वालिनं कृतकिल्बिषम् ।
शरैर्विनिहतं पश्य विकीर्णमिव पर्वतम् ॥ २४ ॥

शरैर्विनिहतं पश्येति । निश्चिन्वित्यर्थः ॥ २४ ॥

राघवस्य वचः श्रुत्वा सुग्रीवो †[5]वाहिनीपतिः ।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत् ॥ २५ ॥
राम! [6]शोकाभिभूतोऽहं शोकार्तानां भवान् गतिः ।
‡वयस्य इति कृत्वा हि त्वय्यहं परिदेवये ॥ २६ ॥

दुःखातिशयवशात् पुनराह— रामेत्यादि। त्वयि — त्वत्संनिधौ ॥

त्वं हि पाणिप्रदानेन वयस्यो मेऽग्नि[7]साक्षिकम् ।
कृतः प्राणैः [8]बहुमतः सत्येनापि शपामि ते ॥ २७ ॥

---

* एतेन तेषाममेयत्वं बोधितम् । तदुद्भूतशराणां अमेयत्वेन प्रसिद्धत्वात्-रा.

† वाहिनी—वानरसेना । भाविदृष्ट्या व्यपदेशः । ‡ वयस्य इति चेत्यर्थः-गो. शोकार्तानां वयस्यः खलु गतिः । अतः वयस्यो भवानिति कृत्वा त्वदग्रतः परिदेवय इति वा ॥

[1] महाभाग-ञ. [2] इव पन्नगाः-ङ. [3] वालिसंज्ञं-च. [4] भ्रातरं-च.
[5] वानराधिपः-ङ. [6] शोकाभितप्तो-ङ. [7] साक्षिकः-ङ. [8] प्रियतमः-ङ.

अग्निसाक्षिकं—अग्निसाक्षिपूर्वं संपादितः वयस्यः कृतः इति यतः, अतः—प्राणैरित्यादि ॥ २७ ॥

वयस्य इति कृत्वा च *[1] विस्रब्धं प्रवदाम्यहम् ।
दुःखमन्तर्गतं यन्मे मनो [2] हरति नित्यशः ॥ २८ ॥

प्रवदामीति । प्रकर्षेण पुनः पुनः वदामीत्यर्थः ॥ २८ ॥

† एतावदुक्त्वा वचनं बाष्पदूषितलोचनः ।
[3] बाष्पोपहतया वाचा [4] नोच्चैः शक्नोति भाषितुम् ॥ २९ ॥

बाष्पवेगं तु सहसा नदीवेगमिवागतम् ।
धारयामास धैर्येण सुग्रीवो रामसंनिधौ ॥ ३० ॥

संनिगृह्य तु तं बाष्पं प्रमृज्य नयने शुभे ।
विनिःश्वस्य च तेजस्वी राघवं वाक्यमब्रवीत् ॥ ३१ ॥

पुराऽहं वालिना, राम! राज्यात् स्वादवरोपितः ।
परुषाणि च संश्राव्य ‡ निर्धूतोऽस्मि बलीयसा ॥ ३२ ॥

अथ वालिना विनिकृतः इत्युक्त एवार्थः किञ्चिद्विव्रियते—पुराऽहमित्यादि । स्वात् राज्यात्—स्वीयात् मामकात् वानरराज्यपदात् इत्यर्थः । अवरोपितः—निवर्तितः—अपहृतराज्य इति यावत् । निर्धूतः—भर्त्सितः ॥ ३२ ॥

---

* अवक्तव्यमपि वयस्य इति कृत्वा विस्रब्धः—विश्वस्तः वदामि—ति. † एवं सामान्यतः स्वसंकटे कथिते, विशिष्य भार्यापहारादिकं विवक्षुः, तत्स्मरणात् उच्चैर्वक्तुं नाशकदिति भावः । ‡ निर्धूतः—निस्सारितः—रा. स्वात् राज्यात्— यौवराज्यात् निर्धूतः—निरस्तः—गो.

[1] विस्रब्धः—च. [2] दहति—ङ. [3] बाष्पदूषितया—ज. [4] न च शक्तोऽभि—ङ.

हृता भार्या च मे तेन प्राणेभ्योऽपि गरीयसी ।
सुहृदश्च मदीया ये संयता बन्धनेषु ते ॥ ३३ ॥

संयताः—बद्धाः । बन्धनेषु—अधिकरणे ल्युट्, कारागृहेषु इत्यर्थः ॥ ३३ ॥

*यत्नवांश्च सुदुष्टात्मा मद्विनाशाय, राघव !
[1]बहुशः तत्प्रयुक्ताश्च वानरा निहता मया ॥ ३४ ॥
शङ्कया त्वेतया चेह दृष्ट्वा त्वामपि, राघव !
नोपसर्पाम्यहं भीतः भये सर्वे हि बिभ्यति ॥ ३५ ॥

एतया शङ्कयेति । वालिना मद्वधाय प्रेरितत्वशङ्कयेत्यर्थः । नोपसर्पामीति । वर्तमानसामीप्ये भूते लट्, नोपासर्पमित्यर्थः । भये—भयस्थाने† ॥ ३५ ॥

केवलं हि सहाया मे हनुमत्प्रमुखास्त्विमे ।
अतोऽहं धारयाम्यद्य प्राणान् कृच्छ्रगतोऽपि सन् ॥ ३६ ॥
एते हि कपयः स्निग्धाः मां रक्षन्ति [2]समन्ततः ।
सह गच्छन्ति गन्तव्ये नित्यं तिष्ठन्ति च स्थिते ॥ ३७ ॥
‡संक्षेपस्त्वेष [3]मे, राम ! किमुक्त्वा [4]विस्तरं हि ते ।
स मे ज्येष्ठो रिपुर्भ्राता वाली विश्रुतपौरुषः ॥ ३८ ॥

संक्षेपस्त्वेष मे इत्येतच्छब्दार्थः—स मे ज्येष्ठः इत्यादि ॥ ३८ ॥

---

* यत्नवानिति । सदा मद्वधाय यतमान एवास्त इत्यर्थः । † भयहेताविति यावत् । ‡ संक्षेप इत्यादि द्वयमेकान्वयम्—गो. रा.

[1] बहवः—ङ. [2] सदोद्यताः—ङ. [3] ते राम—ङ. [4] बहुविस्तरैः—ङ.

तद्विनाशाद्धि मे दुःखं प्रणष्टं[1] स्यादनन्तरम् ।
सुखं मे जीवितं चैव तद्विनाशनिबन्धनम् ॥ ३९ ॥

अनन्तरं—दुःखनिवृत्त्यनन्तरम् ॥ ३९ ॥

एष मे, राम! *[2]शोकान्तः शोकार्तेन निवेदितः ।
[3]दुःखितः सुखितो वाऽपि सख्युर्नित्यं सखा गतिः ॥४०॥

एष मे इति । उक्तरूप इत्यर्थः ॥ ४० ॥

श्रुत्वैतद्वचनं रामः सुग्रीवमिदमब्रवीत् ।
किंनिमित्तमभूद्वैरं श्रोतुमिच्छामि तत्त्वतः ॥ ४१ ॥
†सुखं हि कारणं श्रुत्वा वैरस्य तव, वानर!
[4]आनन्तर्यात् विधास्यामि संप्रधार्य बलाबलम् ॥ ४२ ॥

सुखमित्यादि । हे वानर! तव वालिनश्च वैरकारणं श्रुत्वा तेन त्वन्निराकृतिसाधनं युवयोः बलाबलं च श्रुत्वा आनन्तर्यात्—अनन्तरोत्पन्नेन विमर्शेन संप्रधार्य—निश्चित्य त्वद्दुःसंपादं तव सुखं हि—प्रसिद्धप्रतिज्ञं विधास्यामीत्यर्थः ॥ ४२ ॥

---

* शोकान्तः—शोकविध्वंसोपायः—रा. शोकावसानकः वृत्तान्त इति वाऽर्थः ।
† तव सुखं विधास्यामि । स्वल्पापराधे प्रबलवैरं तेन कृतं चेत् तमद्यैव हत्वा तव सुखं विधास्यामि । अनल्पापराधे स्वल्पवैरं चेत् समाधानमुखेन सुखं विधास्यामीति भावः—गो. अथवा वैरकारणे श्रुते तदनन्तरं बलाबलं निश्चित्य अनन्तरकर्तव्यं सुखं—सुलभतया विधास्यामि निर्णेष्यामीति भावः । 11-3 श्लोकोऽत्र द्रष्टव्यः ॥

[1] स्यादनन्तकम्—ङ. [2] शोकाग्निः—ङ. [3] दुःखितोऽदुःखितो—ङ.
[4] आनन्तर्यं—ङ.

बलवान् हि ममामर्षः श्रुत्वा त्वामवमानितम् ।
[1]वर्धते हृदयोत्कम्पी *प्रावृड्वेग इवाम्भसः ॥४३॥

प्रावृडिति लुप्तसप्तमीकम्—प्रावृषि अम्भसो वेग इवेत्यर्थः ॥४३॥

हृष्टः कथय विस्रब्धः यावदापूर्यते धनुः ।
†[2]सृष्टश्च हि मया बाणः निरस्तश्च रिपुस्तव ॥४४॥

धनुरापूर्यते यावदिति । 'यावत्पुरा' इति लट्, आपूरयिष्यामि । अथ मया हि बाणः सृष्टः—विसृष्टश्चेत् तव रिपुश्च तत्क्षणे निरस्त एव, भविष्यतीति शेषः ॥ ४४ ॥

एवमुक्तस्तु सुग्रीवः काकुत्स्थेन महात्मना ।
प्रहर्षमतुलं लेभे ‡चतुर्भिः सह वानरैः ॥ ४५ ॥

ततः प्रहृष्टवदनः सुग्रीवो लक्ष्मणाग्रजे ।
वैरस्य कारणं तत्त्वं आख्यातुमुपचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे अष्टमः सर्गः

तत्त्वं—तात्त्विकं वैरस्य कारणं आख्यातुं उपचक्रमे । चण्ड (४६) मानः सर्गः ॥ ४६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे अष्टमः सर्गः

---

* प्रावृषि वेगः—प्रावृड्वेगः-गो.   † सर्वं सिद्धप्रायमेवेति भावः ।   ‡ सर्वेऽपि प्रहर्षं लेभुरिति भावः ।

[1] वर्तते-ङ.   [2] सृष्टश्चेद्धि-ङ.

नवमः सर्गः

[वालिवैरानुकथनम्]

[1]वाली नाम मम भ्राता ज्येष्ठः [2]शत्रुनिषूदनः ।
पितुर्बहुमतो नित्यं ममापि च तथा पुरा ॥ १ ॥

अथ उपचक्रम इति कृतप्रस्तावोऽर्थः प्रतिपाद्यते । वाली नामेत्यादि । पितुर्बहुमतः इति । पाण्डोः भीमधर्मादिवत् एकक्षेत्रजत्वेन * पितृभेदेऽपि भ्रातृत्वं, पाण्डुवत् क्षेत्रियः पिता उभयोः, अतः पितुर्बहुमतः इत्यादिवादः ॥ १ ॥

पितर्युपरतेऽस्माकं ज्येष्ठोऽयमिति मंत्रिभिः ।
कपीनामीश्वरो राज्ये कृतः परम[3]संमतः ॥ २ ॥

कपीनां राज्ये इत्यन्वयः ॥ २ ॥

राज्यं प्रशासतस्तस्य † पितृपैतामहं महत् ।
अहं सर्वेषु कालेषु प्रणतः प्रेष्यवत् स्थितः ॥ ३ ॥

पितृपतामहं—पितृपितामहपरम्परागतम् । उत्तरपदवृद्धिः छान्दसी॥

‡ मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः ।
तेन तस्य महद्वैरं स्त्रीकृतं विश्रुतं पुरा ॥ ४ ॥

---

* बालकाण्डे 17 सर्गे वालिनः इन्द्रपुत्रत्वेन, सुग्रीवस्य सूर्यपुत्रत्वेन च कथनादेवं व्याख्यातम् । वालिसुग्रीवयोरुत्पत्तिकथा तु उत्तरकाण्डे प्रक्षिप्तसर्गे दृश्यते । † पितृपैतामहं—स्वपितुः ऋक्षरजसः पित्रा ब्रह्मणा दत्तत्वात्—गो. ‡ मायावीति । दुन्दुभेः पूर्वजः—अग्रजः, सुतः मयस्येति शेषः । वक्ष्यत्युत्तर काण्डे मयः 'मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरः' (उत्त. 12-13) इति—गो.

[1] एतत्पूर्वं—श्रूयतां राम यद्वृत्तं आदितः प्रभृति त्वया । यथा वैरं समुद्भूतं यथा चाहं निराकृतः—इत्यधिकं—ङ. [2] शक्र—ङ. [3] सत्तमः—ङ.

तेनेति । अन्वर्थमायावीनामकासुरेणेत्यर्थः । तस्येति । वालिनः इत्यर्थः । स्त्रीकृतं—स्त्रीनिमित्तम् ॥ ४ ॥

स तु [1]सुप्तजने रात्रौ किष्किन्धाद्वारमागतः ।
नर्दति स सुसंरब्धः वालिनं चाह्वयद्रणे ॥ ५ ॥

रात्रौ चतुर्यामायां सुप्तजने काले—अर्धरात्रे इत्यर्थः । आह्वयत्—आह्वयतेति यावत् । रणे—रणनिमित्तम् ॥ ५ ॥

प्रसुप्तस्तु मम भ्राता [2]नर्दितं भैरवस्वनम् ।
श्रुत्वा न ममृषे वाली निष्पपात जवात् तदा ॥ ६ ॥

स तु वै [3]निःसृतः क्रोधात् तं हन्तुमसुरोत्तमम् ।
वार्यमाणः ततः स्त्रीभिः मया च प्रणतात्मना ॥ ७ ॥

स तु निर्धूय सर्वान् नः निर्जगाम महाबलः ।
ततोऽहमपि सौहार्दात् निःसृतो वालिना सह ॥ ८ ॥

स तु मे भ्रातरं दृष्ट्वा * मां च दूरादवस्थितम् ।
असुरो जातसंत्रासः प्रदुद्राव ततो भृशम् ॥ ९ ॥

तस्मिन् द्रवति संत्रस्ते ह्यावां द्रुततरं गतौ ।
प्रकाशश्च कृतो मार्गः चन्द्रेणोद्गच्छता† तदा ॥ १० ॥

स तृणैरावृतं दुर्गं धरण्या विवरं महत् ।
प्रविवेशासुरो वेगात् आवामासाद्य [4]विष्ठितौ ॥ ११ ॥

---

* 'स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः । प्राद्रवत् भयसंत्रस्तः' (10-15) इति भविष्यति स्पष्टम् ॥ † उद्गच्छता—उदयमानेन—गो.

[1] सुप्ते जने—च. [2] नर्दतो—च. [3] निर्गतः—ङ. [4] तिष्ठतौ—ङ.

आवृतं–छन्नम् । विवर–बिलम् । आसाद्येति । बिलद्वारमिति शेषः ॥ ११ ॥

तं प्रविष्टं रिपुं दृष्ट्वा बिलं रोषवशं गतः ।
मामुवाच तदा वाली वचनं क्षुभितेन्द्रियः ॥ १२ ॥
इह त्वं तिष्ठ, सुग्रीव! बिलद्वारि समाहितः ।
[1]यावत् तत्र प्रविश्याहं निहन्मि [2]सहसा रिपुम् ॥ १३ ॥

सहसा–बलेन, वेगेन च ॥ १३ ॥

मया त्वेतद्वचः श्रुत्वा * याचितः स परंतपः ।
शापयित्वा तु मां पद्भ्यां प्रविवेश बिलं महत् ॥ १४ ॥

एतद्वच इति । रिपुवधाय बिलप्रवेशवचनमित्यर्थः । पद्भ्यामिति । स्वपादाभ्यां शापयित्वेति योजना । बिलद्वारं मुक्त्वा यावन्मदागमनं अन्यत्र न गच्छामीति मत्पादौ स्पृशेति पादौ स्पर्शयित्वेत्यर्थः ॥ १४ ॥

तस्य प्रविष्टस्य बिलं साग्रः संवत्सरो गतः ।
स्थितस्य [3]मम च द्वारि स कालोऽप्यत्यवर्तत ॥ १५ ॥

साग्रः–संवत्सरादप्यधिकं किञ्चित्कालयुक्तः । स कालोऽपि–साग्रः संवत्सरकालोऽपि द्वारे स्थितस्यैव सतः अत्यवर्तत ॥ १५ ॥

अहं तु नष्टं ज्ञात्वा तं स्नेहादागतसंभ्रमः ।
भ्रातरं न च पश्यामि पापाशङ्कि च मे मनः ॥ १६ ॥

---

* याचितः, सह प्रवेशनमिति शेषः–गो.

[1] यावदत्र–च. [2] समरे–ज. [3] च बिलद्वारि–च.

आगतसंभ्रमः—आगतक्षोभः । न पश्यामि यदा तदेति योजना ॥ १६ ॥

अथ दीर्घस्य कालस्य बिलात् तस्मात् विनिःसृतम् ।
सफेनं रुधिरं *[1]रक्तं अहं दृष्ट्वा सुदुःखितः ॥ १७ ॥
नर्दतामसुराणां च ध्वनिर्मे श्रोत्रमागतः ।
†[2]निरस्तस्य च संग्रामे क्रोशतो निःस्वनो गुरोः ॥
अहं त्ववगतो बुद्ध्या चिह्नैस्तैर्भ्रातरं [3]हतम् ।
पिधाय च बिलद्वारं शिलया गिरिमात्रया ॥ १९ ॥
शोकार्तश्चोदकं कृत्वा किष्किन्धामागतः, सखे!

चिह्नैरिति । बिलद्वाररुधिरसंग्रामक्रोशादिभिः इत्यर्थः ॥ १९ ॥

‡गूहमानस्य मे तत्त्वं यत्नतो मंत्रिभिः श्रुतम् ॥ २० ॥
ततोऽहं तैः समागम्य [4]संमतैरभिषेचितः ।

तत्त्वं—वालिवृत्तान्तविषयकं मंत्रिभिः यत्नतः श्रुतम् ॥

राज्यं प्रशासतस्तस्य [5]न्यायतो मम, राघव! ॥ २१ ॥
[6]आजगाम रिपुं हत्वा [7]वाली तमसुरोत्तमम् ।
अभिषिक्तं तु मां दृष्ट्वा [8]वाली संरक्तलोचनः ॥ २२ ॥

---

* रक्तं—रक्तवर्णं—गो. †संग्रामे रतस्य क्रोशतोऽपि गुरोः—वालिनः स्वनः न श्रोत्रमागतः—रा. ‡स्वस्य स्वतः राज्यापेक्षा नासीदिति प्रकटनायेयमुक्तिः ।

[1] दृष्ट्वा ततोऽहं भृशदुःखितः—ज. [2] न रतस्य—ङ. [3] गतम्—ङ. [4] समेतै—च. [5] न्यायेन—ङ. [6] एतदादिश्लोकद्वयं अधिकं—झ. [7] दानवं स तु वानरः—च. [8] क्रोधात्—च.

मदीयान् मंत्रिणो बद्ध्वा परुषं वाक्यमब्रवीत् ।

मदीयान् मंत्रिणो बद्ध्वेति । अभिषेककर्तृनिति शेषः ॥

***निग्रहेऽपि [1] समर्थस्य तं पापं प्रति, राघव! ॥ २३ ॥**
न प्रावर्तत मे बुद्धिः भ्रातुगौरवयंत्रिता ।

निग्रह इत्यादि । पापस्य तस्य निग्रहे समर्थस्यापि मे बुद्धिः भ्रातृगौरवयंत्रिता—संकुचिता सती तं पापं प्रति निग्रहाय न प्रावर्तत ॥ २३ ॥

हत्वा शत्रुं स मे भ्राता †प्रविवेश पुरं तदा ॥ २४ ॥
मानयंस्तं महात्मानं यथावच्चाभ्यवादयम् ।
उक्ताश्च नाशिषस्तेन संतुष्टेनान्तरात्मना ॥ २५ ॥

उक्तानुवादपूर्वं अवशिष्टव्यापारकथनं—हत्वा शत्रुमित्यादि ॥

नत्वा पादावहं तस्य मुकुटेनास्पृशं, प्रभो! [2]
‡अपि वाली मम क्रोधात् न प्रसादं चकार सः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे नवमः सर्गः

प्रभो इति रामसंबुद्धिः । मम प्रसादं इत्यन्वयः । चोर (२६) मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे नवमः सर्गः

---

* अन्ततः वञ्चनामार्गेण वा निग्रहे समर्थस्येति भावः । अथवा केवलवीरवादो वाऽयम् । 10–27 श्लोकोऽत्र द्रष्टव्यः ॥ † ‘प्रविवेश पुरं’ इत्युक्त्या मन्त्रिबन्धनादिकं पुराद्बहिरिति ज्ञेयम्–**गो**. ‡ अपि–तथापि–**ति**.

[1] समर्थं च–ङ. [2] एतदनन्तरं–कृताञ्जलिरुपागम्य स्थितोऽहं तस्य पार्श्वतः–इत्यधिकं–**झ**.

दशमः सर्गः

[सुग्रीवेण स्वराज्यभ्रंशकथनम्]

ततः क्रोधसमाविष्टं संरब्धं तमुपागतम् ।
अहं प्रसादयांचक्रे भ्रातरं [1]हितकाम्यया ॥ १ ॥

अथ कथाशेषपूरणम् । ततः क्रोधेत्यादि । समाविष्ट अत एव संरब्धं—क्षुभितचित्तम् । हितकाम्यया—आत्महितेच्छया ॥

दिष्ट्याऽसि [2] कुशली प्राप्तः निहतश्च त्वया रिपुः ।
अनाथस्य हि मे नाथः त्वमेको मित्रनन्दनः ॥ २ ॥

मित्रनन्दनः—मित्रं नन्दयतीति तथा ॥ २ ॥

इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम् ।
छत्रं सवालव्यजनं प्रतीच्छस्व [3] मयोद्यतम् ॥ ३ ॥
आर्तश्चाथ बिलद्वारि स्थितः *संवत्सरं, नृप !
दृष्ट्वाऽहं शोणितं द्वारि बिलाच्चापि समुत्थितम् ॥ ४ ॥
[4] शोकसंविग्नहृदयः भृशं व्याकुलितेन्द्रियः ।
† [5] अपिधाय बिलद्वारं शैलशृङ्गेण तत्तथा ॥ ५ ॥
तस्माद्देशादपाक्रम्य किष्किन्धां प्राविशं पुनः ।
विषादात्त्विह मां दृष्ट्वा पौरैर्मन्त्रिभिरेव च ॥ ६ ॥

---

* संवत्सरमिति भयात् न्यूनोक्तिः, 'साग्रः संवत्सरो गतः' इति ह्युक्तम् ।
† अपिधाय–आच्छाद्य–**गो.** पिधानापिधानपदे पर्याये ।

[1] प्रियकाम्यया–ङ. [2] कुशलं–ङ. [3] मया धृतम्–**च.** [4] शोक-संरक्तनयनः–ङ. [5] पिधाय च–ङ.

अभिषिक्तो न *कामेन तन्मे त्वं क्षन्तुमर्हसि ।

विषादात् प्राविशम् । न कामेनेति । स्वकराज्यलिप्सया नाभिषिक्तः इत्यर्थः । तत्–तस्मात् । मे इति । दैवादागतं अपराधमिति शेषः ॥ ६ ॥

त्वमेव राजा मानार्हः सदा चाहं यथापुरम् ॥ ७ ॥
†[1]राजभावनियोगोऽयं [2]मया त्वद्विरहात् कृतः ।

राजभावेन नियोगः—स्वराज्यशिक्षणं तथा ॥ ७ ॥

सामात्यपौरनगरं स्थितं निहतकण्टकम् ॥ ८ ॥
न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम् ।
मा च रोषं कृथाः, सौम्य ! मयि, शत्रुनिबर्हण ! ॥९॥
याचे त्वां शिरसा, राजन् ! मया बद्धोऽयमञ्जलिः ।

निर्यातयामि—समर्पयामि, अतः मा रोषं कृथाः इत्यन्वयः ॥९॥

बलादस्मि समागम्य मंत्रिभिः पुरवासिभिः ॥ १० ॥
राजभावे नियुक्तोऽहं ‡शून्यदेशजिगीषया ।

शून्यस्य—राजशून्यस्य देशस्य जिगीषया—राजमूलसर्वव्यवहारप्रवर्तनेच्छया ॥ १० ॥

---

* कामेन—स्वेच्छया नाभिषिक्तः—रा. † राजभावनियोगः—राजत्वेन राज्यशासनम्—गो. राजभावे नियोगः अमात्यैः कृत इत्यर्थः । ‡ शून्यदेशस्य—राजहीनदेशस्य या परेषां जिगीषा, तया—तन्निवृत्तिहेतुना । 'मशकार्थो धूमः' इतिवदयं प्रयोगः—ति. शून्यदेशजिगीषया—राजशून्यदेशवशीकरणेच्छया—गो.

[1] राजभावे—च. [2] मम—ङ.

स्निग्धमेवं ब्रुवाणं मां स तु निर्भर्त्स्य वानरः ॥ ११ ॥
धिक् त्वामिति च मामुक्त्वा बहु *तत्तदुवाच ह ।

बहु तत्तदिति । अवाच्यवचनजातमित्यर्थः ॥ ११ ॥

प्रकृतीश्च समानीय मंत्रिणश्चैव संमतान् ॥ १२ ॥
मामाह सुहृदां मध्ये वाक्यं परमगर्हितम् ।

प्रकृतीः—स्वीयप्रजाः । मां प्रति परमं विगर्हितमाह ॥ १२ ॥

विदितं वो यथा रात्रौ मायावी स महासुरः ॥ १३ ॥
मां समाह्वयत [1]क्रूरः युद्धकांक्षी सुदुर्मतिः ।

तथा विगर्हहेतुं च सभासदामाहेत्याह—विदितं वः इत्यादि । यथा—युष्मदनुभवेनैव विदितं-स मां समाह्वयतेति वो विदितमित्यन्वयः ॥ १३ ॥

तस्य तद्वचनं श्रुत्वा निःसृतोऽहं नृपालयात् ॥ १४ ॥
अनुयातश्च मां तूर्णं अयं भ्राता सुदारुणः ।

किं तत इत्यतः तस्येत्यादि ॥ १४ ॥

[2]स तु दृष्ट्वैव मां रात्रौ सद्वितीयं [3]महाबलः ॥ १५ ॥
प्राद्रवत् भयसंत्रस्तः वीक्ष्यावां [4]तमनुद्रुतौ ।
[5]अनुद्रुतश्च वेगेन प्रविवेश महाबिलम् ॥ १६ ॥

सद्वितीयं—द्वितीयेन भ्रात्रा सहितम् ॥ १५-१६ ॥

---

* लोकरीत्या एवमुक्तिः ।

[1] क्रुद्धः—ङ. [2] इदमर्धं अधिकं—झ. [3] महाबलम्—झ. [4] समुपागतौ—च.
[5] अभिद्रुतश्च—च.

तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम् ।
अयमुक्तोऽथ मे भ्राता मया तु क्रूरदर्शनः ॥ १७ ॥

अहत्वा नास्ति मे * शक्तिः प्रतिगन्तुमितः पुरीम् ।
बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम् ॥ १८ ॥

शक्तिः—इच्छाशक्तिः । प्रतीक्ष–प्रतीक्षस्वेति यावत् ॥ १८ ॥

स्थितोऽयमिति मत्वा तु प्रविष्टोऽहं दुरासदम् ।
तं च मे मार्गमाणस्य गतः संवत्सरस्तदा ॥ १९ ॥

स्थितोऽयमितीति । बिलद्वारीति शेषः ॥ १९ ॥

स तु दृष्टो मया शत्रुः † अनिर्वेदात् भयावहः ।
निहतश्च मया तत्र सोऽसुरो बन्धुभिः सह ॥ २० ॥

अनिर्वेदात्—निर्वेदः–ज्ञानम्, संवत्सरान्वेषणेऽपि दर्शनाभावात् भयावहः—दुःखावहः स तु मया कथंचित् दृष्टो निहतश्च ॥ २० ॥

तस्यास्यात्तु प्रवृत्तेन रुधिरौघेण तद्बिलम् ।
‡ पूर्णमासीत् दुराक्रामं स्तनतः तस्य भूतले ॥ २१ ॥

दुराक्राममिति । दुराक्रममिति यावत् । भूतले–भुवः रसायाः तलं—पातालमित्यर्थः ॥ २१ ॥

---

* 'तूष्णीं स्थातुं न शक्नोमि' इत्यादिवत् अत्रार्थः ज्ञेयः । † अनिर्वेदात्—संवत्सरान्वेषणेऽपि दर्शनाभावात् भयावहः–ति. अनिर्वेदात्—अक्लेशात्–गो. संवत्सरकालान्वेषणेऽपि अदर्शनेन यो निर्वेदः, तदभावसंपादनहेतोः दैवात् स दृष्ट इति वा । ‡ दुराक्रामं तद्बिलं रुधिरौघेण पूर्णमासीत्; तद्बिलं रुधिरौघेन पूर्णं, दुराक्राममासीदिति वा ।

सूदयित्वा तु तं शत्रुं [1] विक्रान्तं [2] तमहं सुखम् ।
निष्क्रामन्नेव पश्यामि बिलस्य पिहितं मुखम् ॥ २२ ॥

विक्रान्तं—शूरम् । सुखं यथा तथा निष्क्रामन्नेव—तत्काल एव ॥ २२ ॥

विक्रोशमानस्य तु मे सुग्रीवेति पुनःपुनः ।
यदा प्रतिवचो नास्ति ततोऽहं भृशदुःखितः ॥ २३ ॥

पादप्रहारैस्तु मया [3] बहुभिः तद्विदारितम् ।
ततोऽहं तेन निष्क्रम्य [4] पथा पुरमुपागतः ॥ २४ ॥

तेन पथा । बिलमार्गेणेत्यर्थः ॥ २४ ॥

तत्रानेनास्मि संरुद्धः राज्यं [5] मृगयताऽऽत्मनः ।
सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम् ॥ २५ ॥

आत्मनः राज्यं मृगयता—मार्गयता अनेन तत्र बिलद्वारे अहं संरुद्धः—निरुद्धगतिकः कृतः ॥ २५ ॥

एवमुक्त्वा तु मां तत्र वस्त्रेणैकेन वानरः ।
निर्वासयामास तदा वाली विगतसाध्वसः ॥ २६ ॥

वस्त्रेणैकेनेति । अन्यत् सर्वमपहृत्येत्यर्थः ॥ २६ ॥

तेनाहमपविद्धश्च * हृतदारश्च, राघव !
तद्भयाच्च [6] मही कृत्स्ना क्रान्तेयं सवनार्णवा ॥ २७ ॥

अपविद्धः—निरस्तः ॥ २७ ॥

---

* अपविद्धः-ताडितः-गो.

[1] बलिनं दुन्दुभेरसुतम्—ङ. [2] तं महासुरम्—झ. [3] बहुशः—ङ. [4] यथा-पुरमिहा—ङ. [5] प्रार्थयता—ङ. [6] महीं कृत्स्नां क्रान्तवान् सवनार्णवाम्—च.

ऋश्यमूकं गिरिवरं भार्याहरणदुःखितः ।
प्रविष्टोऽस्मि *दुराधर्षं [1]वालिनः कारणान्तरे ॥ २८ ॥

ऋश्यमूकं प्रविष्टोऽस्मीति । अन्यत्र कुत्रापि भूचक्रे निर्भयस्थितिं अलभमानः इति शेषः । अत्र च कथं निर्भयस्थितिः? इत्यत आह—दुराधर्षमित्यादि । कारणान्तरे—दुराधर्षत्वकारणविशेषमतङ्गशापलक्षणे सति । तत एव वालिनः ऋश्यमूकः दुराधर्षः ॥ २८ ॥

एतत्ते सर्वमाख्यातं वैरानुकथनं महत् ।
अनागसा मया प्राप्तं व्यसनं पश्य, राघव ! ॥ २९ ॥

†वालिनस्तु भयार्तस्य, [2]सर्वलोकाभयङ्कर !
कर्तुमर्हसि मे, वीर ! प्रसादं तस्य निग्रहात् ॥ ३० ॥

एवमुक्तस्तु तेजस्वी धर्मज्ञो [3]धर्मसंहितम् ।
वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव ॥ ३१ ॥

अमोघाः सूर्यसंकाशाः ममैते निशिताः शराः ।
तस्मिन् वालिनि दुर्वृत्ते [4]पतिष्यन्ति रुषान्विताः ॥ ३२ ॥

रुषान्विताः—कुपितेन मया विसृष्टाः इत्यर्थः । निमित्तनिमित्तिनोः अभेदोपचारात् ताच्छब्द्यम् ॥ ३२ ॥

यावत् तं नाभिपश्यामि तव भार्यापहारिणम् ।
तावत् स जीवेत् पापात्मा वाली चारित्रदूषकः ॥ ३३ ॥

चारित्रदूषक इति भ्रातृदारग्राहित्वात् ॥ ३३ ॥

---

*अनन्तरसर्गे ५२ इत्यादिश्लोकाः द्रष्टव्याः । †वालिन इति पञ्चमी ।

[1] वालिना—ङ. [2] सर्वभूतभयापह—ङ. [3] धर्मवत्सलः—ङ. [4] निपतिष्यन्ति वेगिताः—ङ.

*आत्मानुमानात् पश्यामि[1] मग्नं त्वां शोकसागरे ।
त्वामहं तारयिष्यामि[2] कामं प्राप्स्यसि पुष्कलम् ॥३४॥

आत्मानुमानादिति । विमतोऽयं शोकमग्नो भवितुमर्हति, रिपुहृतदारत्वात्, आत्मवत्, इत्यनुमानादित्यर्थः ॥ ३४ ॥

तस्य तद्वचनं श्रुत्वा[3] राघवस्यात्मनो हितम् ।
सुग्रीवः परमप्रीतः सुमहत् वाक्यमब्रवीत् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे दशमः सर्गः

मार्ग (३५) मानः सर्गः ॥ ३५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे दशमः सर्गः

एकादशः सर्गः

[वालिबलवर्णनम्]

रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम् ।
सुग्रीवः पूजयांचक्रे राघवं प्रशशंस च ॥ १ ॥

एवं सुग्रीवः वैरकारणमुक्त्वा, अथ 'बलाबलं संप्रधार्य त सुखं विधास्यामि' इति राघवेणोक्तत्वात् वालिनो बलं, तत्प्रसङ्गे ऋष्यमूकाधर्षणकारणं प्राक् सूचितं चाह । रामस्येत्यादि । वचनं–वालिवधविषयकं वचनं पूजयांचक्रे इत्यन्वयः ॥ १ ॥

---

* आत्मानुमानात्—मदनुभववशादिति भावः ।

[1] मग्नस्त्वं–च. [2] बाढं–च. सुखं–ङ. [3] हर्षपौरुषवर्धनम्–च. राघवस्य मनोहितम्–ङ.

असंशयं प्रज्वलितैः तीक्ष्णैः *मर्मातिगैः शरैः ।
त्वं दहेः कुपितो लोकान् युगान्त इव भास्करः ॥ २ ॥

राघवं प्रशशंसेत्येतावदेव प्रदर्श्यते—असंशयमित्यादि ॥ २ ॥

वालिनः पौरुषं यत्तत् यच्च वीर्यं धृतिश्च या ।
तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्तरम् ॥ ३ ॥

पौरुषं—बुद्धिबलवैभवसामर्थ्यम् । वीर्यं—परसंहारशक्तिः । धृतिः—रणधैर्यम् ॥ ३ ॥

†समुद्रात् पश्चिमात् [1] पूर्वं दक्षिणादपि [2] चोत्तरम् ।
क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः ॥ ४ ॥

समुद्रादित्यादिना बलादिवैभवं दर्शयति । तथा वक्ष्यते उत्तरकाण्डे—'चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण ! इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम्' इति । अनुदिते सूर्ये क्रामति । ब्राह्मे मुहूर्ते उत्थायेति शेषः ॥ ४ ॥

अग्राण्यारुह्य शैलानां शिखराणि महान्त्यपि ।
ऊर्ध्व[3]मुत्क्षिप्य तरसा प्रतिगृह्णाति वीर्यवान् ॥ ५ ॥

शिखराणि महान्त्यपीति । उत्पाट्येति शेषः ॥ ५ ॥

---

* मर्मातिगैः—मर्मभेदिभिरिति यावत् । † इदं व्यक्तमुत्तरकाण्डे (उत्त. 34–28–29) । ननु कथं चतुर्ष्वप्येकसंध्याकरणम्—उच्यते—एकस्मिन् तडाके पार्श्वभेद इव स्नानाचमनार्घ्यप्रदानजपानां कर्तुं शक्यत्वात् । अनुदिते सूर्ये इत्युत्तरावधिः अभिहितः । पूर्वावधिस्तु ब्राह्मे मुहूर्ते उत्थायेत्यनुष्ठानाङ्गत्वेन विहितः कालः । चतुस्समुद्रपरिक्रमस्यानुष्ठानार्थत्वं 'चतुर्भ्योऽपि समुद्रेभ्यः सन्ध्यामन्वास्य रावण । इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकं' (उत्त. 34-6) इत्युत्तररामायणतारावचनादवगम्यते-गो.

[1] पूर्वात्—ङ. [2] चोत्तरात्—ङ [3] मुत्पाट्य—ज.

बहवः सारवन्तश्च वनेषु विविधा द्रुमाः ।
वालिना तरसा भग्नाः बलं[1] प्रथयताऽऽत्मनः[2] ॥ ६ ॥

*[3] महिषो दुन्दुभिर्नाम [4]कैलासशिखरप्रभः[5] ।
बलं नागसहस्रस्य धारयामास वीर्यवान् ॥ ७ ॥

वीर्योत्सेकेन दुष्टात्मा वरदानाच्च मोहितः ।
जगाम सुमहाकायः समुद्रं सरितां पतिम् ॥ ८ ॥

ऊर्मिमन्तमतिक्रम्य सागरं रत्नसंचयम् ।
[6] मह्यं युद्धं प्रयच्छेति तमुवाच महार्णवम् ॥ ९ ॥

ऊर्मिमन्तं—ऊर्मिमत्त्वाद्याकारवन्तं समुद्रं अतिक्रम्य—अविगणय्य तं तदधिष्ठातृमहादेवताकारं महार्णवं उवाच ॥ ९ ॥

ततः समुद्रो धर्मात्मा समुत्थाय महाबलः ।
अब्रवीद्वचनं, राजन्! असुरं कालचोदितम् ॥ १० ॥

समर्थो नास्मि ते दातुं युद्धं, युद्धविशारद!
श्रूयतां चाभिधास्यामि यस्ते युद्धं प्रदास्यति ॥ ११ ॥

शैलराजो महारण्ये तपस्विशरणं परम् ।
शङ्करश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ १२ ॥

---

* महिषः—तद्रूपधरः -गो. ति. रा. उत्तरत्र 25-27 श्लोका द्रष्टव्याः । पूर्वमेव (9-4) अस्य दुन्दुभेः प्रस्तावः कृतः ।

[1] दर्शयता—ङ.   [2] एतदनन्तरं—शृणु चापि रघुश्रेष्ठ विस्तरेण कथामिमाम्—इत्यधिकं—ङ.   [3] माहिषो—ङ.   [4] वीर्यवान् सुमहाबलः-ङ.   [5] एतदनन्तरं—यथा सन्निहितः पापो वालिना क्रूरकर्मणा ।   आसीन्महासुरः कश्चित् दुन्दुभिर्नाम नामतः—इत्यधिकं—ङ.   [6] मम—च.

[1] गुहाप्रस्रवणोपेतः बहुकन्दर*निर्दरः ।
स समर्थः तव प्रीतिं अतुलां [2] कर्तुमाहवे ॥ १३ ॥

तं भीत इति विज्ञाय समुद्रमसुरोत्तमः ।
हिमवद्वनमागच्छत् शरश्चापादिव च्युतः ॥ १४ ॥

ततः तस्य गिरेः श्वेताः गजेन्द्रविपुलाः शिलाः ।
चिक्षेप बहुधा भूमौ दुन्दुभिः विननाद च ॥ १५ ॥

गजेन्द्रः—ऐरावतः ॥ १५ ॥

ततः श्वेताम्बुदाकारः सौम्यः प्रीतिकराकृतिः ।
हिमवान् अब्रवीद्वाक्यं स्व एव शिखरे स्थितः ॥ १६ ॥

स्वे—स्वीये ॥ १६ ॥

क्लेष्टुमर्हसि मां न त्वं, दुन्दुभे धर्मवत्सल !
रणकर्मस्वकुशलः [3] तपस्विशरणं ह्यहम् ॥ १७ ॥

तस्य तद्वचनं श्रुत्वा गिरिराजस्य धीमतः ।
उवाच दुन्दुभिर्वाक्यं रोषात् संरक्तलोचनः ॥ १८ ॥

यदि युद्धेऽसमर्थस्त्वं † मद्भयाद्वा निरुद्यमः ।
तमाचक्ष्व प्रदद्यान्मे योऽद्य युद्धं युयुत्सतः ॥ १९ ॥

युद्धे असमर्थ इति पदम् ॥ १९ ॥

---

* निर्दराः—विदीर्णपाषाणरन्ध्राणि—गो. † सामान्यतः समर्थोऽपि मद्भयात् निरुद्यमः—इत्यर्थः ।

[1] महा—ज. [2] दातु—ङ. [3] तपस्वी शरणोऽस्म्यहम्—ङ.

हिमवानब्रवीद्वाक्यं श्रुत्वा वाक्यविशारदः ।
*अनुक्तपूर्वं धर्मात्मा [1]क्रोधात् तमसुरोत्तमम् ॥ २० ॥

अनुक्तपूर्वं—इतः पूर्वं अनुक्तः युद्धप्रदाता यस्य असुरस्य स तथा । अप्राप्तद्वन्द्वयुद्धोचितोपदेष्टारमित्यर्थः ॥ २० ॥

वाली नाम महाप्राज्ञः [2]शक्रतुल्यपराक्रमः ।
अध्यास्ते वानरः श्रीमान् किष्किन्धा[3]मतुलप्रभाम् ॥२१॥

स समर्थो महाप्राज्ञः †तव युद्धविशारदः ।
द्वन्द्वयुद्धं महद्दातुं नमुचेरिव वासवः ॥ २२ ॥

तं शीघ्रमभिगच्छ त्वं यदि युद्ध‡मिहेच्छसि ।
स हि [4]दुर्धर्षणो नित्यं शूरः समरकर्मणि ॥ २३ ॥

श्रुत्वा हिमवतो वाक्यं क्रोधाविष्टः स दुन्दुभिः ।
जगाम तां पुरीं तस्य किष्किन्धां वालिनस्तदा ॥ २४ ॥

धारयन् माहिषं [5]रूपं तीक्ष्णशृङ्गो भयावहः ।
प्रावृषीव महामेघः तोयपूर्णो नभस्तले ॥ २५ ॥

ततः तद्द्वारमागम्य किष्किन्धाया महाबलः ।
ननर्द कंपयन् भूमिं दुन्दुभिः दुन्दुभिर्यथा ॥ २६ ॥

समीपस्थान् द्रुमान् भञ्जन् वसुधां दारयन् खुरैः ।
विषाणेनोल्लिखन् दर्पात् तद्द्वारं द्विरदो यथा ॥ २७ ॥

---

* अनुक्तपूर्वं—इतः पूर्वं केनाप्यनुक्तं वाक्यं, अत एव क्रोधात्-गो. †तव द्वन्द्वयुद्धमित्यन्वयः । ‡इह—अद्य ।

[1] रोषात्-ङ. [2] शक्रपुत्रः प्रतापवान्-च. [3] मतुलप्रभः-ङ. [4] दुर्मर्षणो-च.
[5] वेषं-च.

अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः ।
निष्पपात सह स्त्रीभिः ताराभिरिव चन्द्रमाः ॥ २८ ॥

मितं व्यक्ताक्षरपदं तमुवाचाथ दुन्दुभिम् ।
*हरीणामीश्वरो वाली सर्वेषां वनचारिणाम् ॥ २९ ॥

हरीणामीश्वरः इति । अहमस्मीति शेषः ॥ २९ ॥

किमर्थं नगरद्वारं इदं रुद्ध्वा विनर्दसि ।
दुन्दुभे! विदितो मेऽसि रक्ष प्राणान्, महाबल! ॥ ३० ॥

मे विदितोऽसि, 'क्तस्य च वर्तमाने' इति षष्ठी, मया ज्ञायमानबलवानेवासि त्वं, ते बलं मयि न प्रभवति, अतः प्राणान् रक्ष ॥ ३० ॥

तस्य तद्वचनं श्रुत्वा वानरेन्द्रस्य धीमतः ।
उवाच दुन्दुभिर्वाक्यं रोषात् संरक्तलोचनः ॥ ३१ ॥

[1]न त्वं स्त्रीसंनिधौ, वीर! वचनं वक्तु[2]मर्हसि ।
मम युद्धं प्रयच्छाद्य ततो ज्ञास्यामि ते बलम् ॥ ३२ ॥

†अथ वा धारयिष्यामि क्रोधमद्य निशामिमाम् ।
गृह्यतामुदयः‡ स्वैरं कामभोगेषु, वानर! ॥ ३३ ॥

---

* हरीणां—वानराणां सर्वेषां वनचारिणां च ईश्वरो वाली तं दुन्दुभिमुवाच—रा.

† 'विदितो मेऽसि' इत्युपहसितः दुन्दुभिः प्रत्युपहासं करोति—अथ वेति ।

‡ उदयः—आसक्तिः स्वैरं गृह्यताम्—रा. उदयः—सूर्योदयः, गृह्यतां—अवधित्वेन गृह्यताम्—गो.

[1] किं त्वं—ङ. [2] मिच्छसि—ङ.

स्त्रीगोष्ठीगतः युद्धाय नाह्वयितव्यः इति पक्षान्तरमाह—अथ वेत्यादि । स्वैरं कामभोगेषु उदयः मया प्रोक्तः मयि गृह्यताम् । उदयपर्यन्तं प्रतीक्ष इत्यर्थः । तत्र हेतुं 'यो हि मत्तं' इत्यादिना वक्ष्यति ॥ ३३ ॥

दीयतां संप्रदानं च परिष्वज्य च वानरान् ।
सर्वशाखामृगेन्द्रस्त्वं *[1] संसाधय सुहृज्जनान् ॥ ३४ ॥

संप्रदानं—प्रीतिदानं, वानरान् संपरिष्वज्य तेभ्यः इति शेषः । संसाधय । मंत्रयस्वेति यावत् ॥ ३४ ॥

[2] सुदृष्टां कुरु किष्किन्धां कुरुष्वात्मसमं पुरे ।
क्रीडस्व च सह स्त्रीभिः अहं ते दर्पनाशनः ॥ ३५ ॥

सुदृष्टां—सम्यगनुभूताम् । पुरे आत्मसमं पुत्रादिकं रक्षार्थं कुरु, क्रीडस्व च आ उदयं इति शेषः ॥ ३५ ॥

यो हि मत्तं प्रमत्तं वा [3] सुप्तं वा † रहितं भृशम् ।
हन्यात् स भ्रूणहा लोके त्वद्विधं मदमोहितम् ॥ ३६ ॥

मदेन—मदकरवस्तुभेदेन स्त्र्यादिलक्षणेन मोहितः तथा ॥ ३६ ॥

स प्रहस्याब्रवीन्मन्दं क्रोधात् तमसुरोत्तमम् ।
विसृज्य ताः स्त्रियः सर्वाः ताराप्रभृतिकास्तदा ॥ ३७ ॥

---

* संसादय—कञ्चित्कालं संगच्छस्व—गो. † मत्तं मधुपानादिना, प्रमत्तं—अनवहितं, रहितं—आयुधादिशून्यं मदमोहितं—मदनमोहितम्—गो.

[1] संसादय—ङ. [2] सुहृष्टां—ङ. [3] मग्नं—ङ.

मत्तोऽयं इति मा मंस्थाः यद्यभीतोऽसि संयुगे ।
*मदोऽयं संप्रहारेऽस्मिन् वीरपाणं समर्थ्यताम् ॥ ३८ ॥

मदोऽयमिति । स्त्रीगोष्ठीजनितः इत्यर्थः । वीरपाणमिति । 'वा भावकरणयोः' इति णत्वम्, वीरैः रणे मनस्समुद्धरणार्थं क्रियमाणः पानविशेषः वीरपाणम् । समर्थ्यताम्— ज्ञायतामित्यर्थः ॥ ३८ ॥

तमेवमुक्त्वा संक्रुद्धः †मालामुत्क्षिप्य काञ्चनीम् ।
पित्रा दत्तां महेन्द्रेण युद्धाय व्यवतिष्ठत ॥ ३९ ॥

उत्क्षिप्य— प्रतिमुच्येति यावत् । काञ्चनीं मालां—दिव्यां सङ्ग्रामविजयदामित्यर्थः ॥ ३९ ॥

विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसंनिभम् ।
आविध्यत तदा वाली विनदन् कपिकुञ्जरः ॥ ४० ॥

आविध्यत—क्षिप्तवानित्यर्थः ॥ ४० ॥

वाली ‡ [1]व्यापादयाञ्चक्रे ननर्द च महास्वनम् ।
श्रोत्राभ्यामथ रक्तं तु [2]तस्य सुस्राव §पात्यतः ॥ ४१ ॥

व्यापादयाञ्चक्रे—संहारं कृतवान् ॥ ४१ ॥

---

* स्त्रीसंगजनितोऽयं मद एव अस्मिन् युद्धे वीरपाणत्वेन गृह्यतामित्यर्थः । 'वीरपाणं तु यत् पानं वृत्ते भाविनि वा रणे' इत्यमरः । † एतत्काञ्चनमालाधारणकाले यः पुरो युद्धायागच्छति तस्य बलं सर्वं तवैव भविष्यतीति महेन्द्रेण दत्तामित्यर्थः-गो. इयं कथा उत्तरकाण्डीयप्रक्षिप्तसर्गे दृश्यते । ‡ व्यापातयाञ्चक्रे भूमौ पातयामास-गो. § पात्यतः-पात्यमानस्य-गो. रा. ति.

[1] व्यापातयाञ्चक्रे-ङ. [2] बहु-ङ.

तयोस्तु क्रोधसंरम्भात् परस्परजयैषिणोः ।
युद्धं समभवद्धोरं दुन्दुभेः वानरस्य च ॥ ४२ ॥

अस्यैव प्रपञ्चः—तयोस्त्वित्यादि ॥ ४२ ॥

[1] अयुध्यत तदा वाली शक्रतुल्यपराक्रमः ।
मुष्टिभिः जानुभिश्चैव शिलाभिः पादपैस्तथा ॥ ४३ ॥
परस्परं घ्नतोस्तत्र वानरासुरयोस्तदा [2] ।
[3] आसीत् हीनोऽसुरो युद्धे शक्रसूनुः व्यवर्धत ॥ ४४ ॥

हीनः—हीनबल इत्यर्थः ॥ ४४ ॥

[4] व्यापारवीर्यधैर्यैश्च परिक्षीणं पराक्रमैः ।
तं तु दुन्दुभि* [5] मुत्पाट्य धरण्यामभ्यपातयत् ॥ ४५ ॥

व्यापारः—युद्धप्रवृत्तिः । व्यापारादिभिः संपाद्यैः पराक्रमैः क्षीणं उत्पाट्य—उत्पाटितविषाणं कृत्वा इत्यर्थः ॥ ४५ ॥

युद्धे प्राणहरे तस्मिन् निष्पिष्टो दुन्दुभिस्तदा ।
[6] स्रोतोभ्यो बहु रक्तं तु तस्य सुस्राव पात्यतः ॥ ४६ ॥
पपात च [7] महाकायः क्षितौ पञ्चत्वमागतः [8] ।

स्रोतोभ्यः—नासादिद्वारेभ्यः । पात्यतः—पात्यमानस्येति यावत् ॥

---

* उत्पाट्य बलात् भूमेरूर्ध्वं गृहीत्वा ।

[1] आविध्यत—ङ. [2] एतदनन्तरं—स्रोतोभ्यो बहु रक्तं तु—इत्यर्धं पठितं—झ. [3] आसीददसुरो—ङ. आसीद्दीनोऽसुरो—च. [4] इदमर्धमधिकं—झ. [5] मुद्यम्य—ङ. [6] इदमर्धं कुण्डलितं—ङ. [7] महाबाहुः—ङ. [8] एतदनन्तरं —तस्मिन् पञ्चत्वमापन्ने वाली क्रोधेन चान्वितः । तत्कायं लोष्टवत् क्षेप्तुं आरब्धो वीर्यवांस्तदा—इत्यधिकं—ङ.

तं तोलयित्वा बाहुभ्यां गतसत्व[1] मचेतनम् ॥ ४७॥
चिक्षेप[2] बलवान् वाली वेगेनैकेन *योजनम् ।

तोलयित्वा—चालयित्वा ॥ ४७॥

तस्य वेगप्रविद्धस्य[3] वक्त्रात् क्षतजबिन्दवः ॥ ४८॥
प्रपेतुः मारुतोत्क्षिप्ताः मतङ्गस्याश्रमं प्रति ।
तान् दृष्ट्वा पतितांस्तस्य मुनिः शोणितविप्रुषः[4] ॥ ४९ ॥
क्रुद्धस्तत्र महाभागः चिन्तयामास †को न्वयम् ।

तस्येति । विप्रुष इत्यर्थः । कर्तारमिति शेषः ॥ ४९ ॥

[5] येनाहं सहसा स्पृष्टः शोणितेन दुरात्मना ॥ ५० ॥
कोऽयं दुरात्मा दुर्बुद्धिः अकृतात्मा च बालिशः ।

को न्वयमिति चिन्तयामासेत्युक्तायाः चिन्ताया एवाभिनयः— येनेत्यादि । सहसा—बलात्कारेण ॥ ५० ॥

इत्युक्त्वाऽथ विनिष्क्रम्य ददर्श मुनिपुङ्गवः ॥ ५१ ॥
महिषं पर्वताकारं गतासुं पतितं भुवि ।
स तु विज्ञाय तपसा[6] वानरेण कृतं हि तत् ॥ ५२ ॥
उत्ससर्ज महाशापं क्षेप्तारं[7] वालिनं प्रति ।
इह तेनाप्रवेष्टव्यं प्रविष्टस्य वधो भवेत् ॥ ५३ ॥

---

* एकेन वेगेन—अल्पेन वेगेन—रा. एकप्रयत्नेन—गो. † 'को न्वयं' इति लोकवत् कथनम् ।

[1] मचेतसम्—ङ. [2] वेगवान्—ज. [3] मुखात्—ङ. [4] एतदनन्तरं—मतङ्गश्च महाप्राज्ञः क्रुद्धः कस्येति चाब्रवीत्—इत्यधिकं—ङ. [5] येनायमाश्रमः—ङ. [6] वानरेन्द्र—ङ. [7] वानरं—च.

वनं [1] मत्संश्रयं येन दूषितं रुधिरस्रवैः ।
संभग्नाः पादपाश्चेमे क्षिपतेहासुरीं तनुम् ॥ ५४ ॥

क्षिपता—विसृष्टवता ॥ ५४ ॥

समन्ताद्योजनं पूर्णं आश्रमं मामकं यदि ।
[2] आगमिष्यति दुर्बुद्धिः व्यक्तं स न भविष्यति ॥ ५५ ॥

न भविष्यति—नशिष्यतीत्यर्थः ॥ ५५ ॥

ये चापि [3] सचिवास्तस्य संश्रिता मामकं वनम् ।
न च तैरिह वस्तव्यं श्रुत्वा यान्तु यथासुखम् ॥ ५६ ॥

तैरिति । वालिसचिवैः इत्यर्थः । श्रुत्वेति । मद्वचः इति शेषः ॥ ५६ ॥

यदि तेऽपीह तिष्ठन्ति शपिष्ये तानपि ध्रुवम् ।
वनेऽस्मिन् मामके नित्यं पुत्रवत् परिरक्षिते ॥ ५७ ॥
* पत्राङ्कुरविनाशाय फलमूलाभवाय च ।

शपिष्ये इति प्रतिज्ञां हेतूपन्यासपूर्वकं संपादयति—वनेऽस्मिन् इत्यादि । फलमूलानां अभवः—विनाशः तस्मै जायन्ते यतः, अतः शपिष्ये ॥ ५७ ॥

[4] दिवसश्चास्य मर्यादा यं द्रष्टा श्वोऽस्मि † वानरम् ॥ ५८ ॥
बहुवर्षसहस्राणि स वै शैलो भविष्यति ।

---

* वानराः खलु पत्राङ्कुरादिकमपि समये भक्षन्ति । † अस्मीति अहमित्यर्थे विभक्तिप्रतिरूपकम् । यं वानरं अहं श्वो द्रष्टा स शैलो भविष्यतीत्यन्वय इति केचित् ।

[1] मत्संश्रितं—ङ. [2] आक्रमिष्यति—च. [3] सचिवाः केचित्—ङ.

[4] दिवसश्चाद्य- च.

अस्य—वक्ष्यमाणशापस्य प्रवृत्तेः मर्यादा च अयं दिवस एव। अयमेवार्थो विव्रियते—यं द्रष्टेत्यादि। श्वः य वानरं द्रष्टा—दृष्टवानस्मि ॥ ५८ ॥

ततस्ते वानराः श्रुत्वा गिरं मुनिसमीरिताम् ॥ ५९ ॥
निश्चक्रमुः वनात् तस्मात् तान् दृष्ट्वा वालिरब्रवीत्।
किं भवन्तः समस्ताश्च मतङ्गवनवासिनः ॥ ६० ॥
मत्समीपमनुप्राप्ताः अपि स्वस्ति वनौकसाम्।
ततस्ते कारणं सर्वं तथा शापं च वालिनः ॥ ६१ ॥
शशंसुर्वानराः सर्वे वालिने हेममालिने।
एतत् श्रुत्वा तदा वाली वचनं वानरेरितम् ॥ ६२ ॥
स महर्षिं तदाऽऽसाद्य याचते स्म कृताञ्जलिः।

याचते स्म। शापविमोक्षमिति शेषः ॥ ६२ ॥

महर्षिस्तमनादृत्य प्रविवेशाश्रमं तदा।
शाप[1]धारणभीतस्तु वाली विह्वलतां गतः ॥६३॥

शापधारणेन—शापदोषधारणेन भीतः तथा ॥ ६३ ॥

ततः शापभयाद्भीतः ऋश्यमूकं महागिरिम्।
प्रवेष्टुं नेच्छति हरिः द्रष्टुं वाऽपि, नरेश्वर! ॥ ६४ ॥
तस्याप्रवेशं ज्ञात्वाऽहं [2]इदं, राम! महावनम्।
विचरामि सहामात्यः *विषादेन विवर्जितः ॥ ६५ ॥

---

* विषादेन विवर्जितः—निर्वृत इत्यर्थः।

[1] कारण–ङ. [2] इमं राम महागिरिम्–ङ.

*एषोऽस्थिनिचयस्तस्य दुन्दुभेः संप्रकाशते।
वीर्योत्सेकान्निरस्तस्य [1]गिरिकूटोपमो महान् ॥ ६६ ॥

इमे च विपुलाः सालाः सप्त †शाखावलम्बिनः।
यत्रैकं घटते वाली ‡निष्पत्रयितुमोजसा ॥ ६७ ॥

विपुलाः—विशालमूलस्कन्धाः। शाखावलम्बिनः—प्रशस्तबहुशाखावन्तः इत्यर्थः। निष्पत्रयितुं—अतिव्यथयितुम्। यत्र येषु सप्तसालेषु एकं ओजसा निष्पत्रयितुं घटते त इमे सालाः इत्यन्वयः। 'सपत्रानिष्पत्रादातिव्यथने' इति प्रसिद्धः अतिव्यथनार्थः। ननु अहो केनातिव्यथिनं? बाणेन। कथं कपेर्बाणः? अप्राकृतकपित्वात्। स्वबलप्रकाशनार्थं बाणव्यापारस्य संभवात्। तथा तोमरादिना च ॥ ६७ ॥

एतदस्यासमं वीर्यं मया, राम! [2]प्रकीर्तितम्।
कथं तं वालिनं हन्तुं समरे शक्ष्यसे, नृप! ॥ ६८ ॥

उक्तं वालिवीर्यमुपसंहरति—एतदित्यादि ॥ ६८ ॥

तथा ब्रुवाणं सुग्रीवं प्रहसन् लक्ष्मणोऽब्रवीत्।
कस्मिन् कर्मणि निर्वृत्ते श्रद्दध्या वालिनो [3]वधम् ॥ ६९ ॥

---

* सुग्रीवावस्थितदेशस्य मतङ्गाश्रमान्तर्गतत्वात् 'एषः' इति निर्देशः। † शाखावलम्बिनः—लम्बितशाखाः—**गो.** ‡ यत्र—येषु तरुषु एकं तरुं निष्पत्रयितुं—पत्रविहीनं कर्तुं ओजसा—ओजोहेतुकमूलग्रहणपूर्वककम्पनेन वाली घटते—शक्नोति—**रा.** यत्र सालेषु एकं सालं ओजसा, न तु धनुषा, निष्पत्रयितुं निर्गतशरपत्रं कर्तुं घटते—शक्नोति। एकं साल भित्त्वा शरो निष्पत्रं यथा तथा वृक्षान्तरासक्तमूलं गच्छति, तथा वेद्धुं समर्थ इत्यर्थः। धनुर्विना केवलबाणेन एकं सालं विध्यतीत्यर्थः। स्वजातिविरुद्धत्वेन युद्धे धनुर्ग्रहणाभावेऽपि लीलार्थं धनुरस्तीति ध्येयम्—**गो.**

[1] गिरिकूटनिभो—**च.** [2] प्रकाशितम्—**ज.** [3] वधे—**ङ.**

प्रहसन्निति । भगवद्वीर्यवैभवापरिज्ञानादेव वादः इत्याशयात् प्रहसन् इत्यर्थः । बध्यमिति । रामेणेति शेषः ॥ ६९ ॥

तमुवाचाथ सुग्रीवः सप्तसालानिमान् पुरा ।
एवमेकैकशो वाली विव्याधाथ स चासकृत् ॥ ७० ॥

एकैकशः विव्याध । सप्त अपीति शेषः । अथ च अनन्तरमपि काकतालीयत्वव्युदासाय असकृच्च विव्याध ॥ ७० ॥

रामोऽपि दारयेदेषां बाणेनैकेन चेत् द्रुमम् ।
वालिनं निहतं मन्ये दृष्ट्वा रामस्य विक्रमम् ॥ ७१ ॥
हतस्य महिषस्यास्थि पादेनैकेन, लक्ष्मण !
[1] उत्क्षिप्याथ प्रक्षिपेच्चेत् तरसा* द्वे धनुश्शते ॥ ७२ ॥

पादेन उत्क्षिप्येति †हस्तस्पर्शायोग्यत्वात् । तरसा—बलेन । प्रक्षिपेच्चेत् तदा च रामस्य विक्रमं दृष्ट्वा वालिनं निहतं मन्ये इत्यन्वयः ॥ ७२ ॥

‡ एवमुक्त्वा तु सुग्रीवः रामं रक्तान्त[2] लोचनम् ।
ध्यात्वा मुहूर्तं काकुत्स्थं पुनरेव वचोऽब्रवीत् ॥ ७३ ॥

ध्यात्वा मुहूर्तमिति । समरे रामवीर्यस्य अप्रत्यक्षत्वात् रामेण वालिवधः शक्योऽशक्यो वेति सञ्चिन्त्य मित्रं प्रति वस्तुतत्त्वं आख्यातव्यं इत्याशयेन पुनरेवाब्रवीत् ॥ ७३ ॥

---

* द्वे धनुश्शते—धनुश्शतद्वयदूरम् । धनुर्नाम चतुर्हस्तमानम् । 'किष्कुः-स्यादवटो हस्तः चतुर्विंशतिरङ्गुलः । चतुर्हस्तो धनुर्दण्डः धनुर्धन्वन्तरं युगम्' इति वैजयन्ती—**गो.** † वस्तुतस्तु 'तं तोलयित्वा बाहुभ्यां' इति वालिना हस्तद्वयेन कृतं कर्म रामेणानायासेन कर्तव्यमिति प्रदर्शनार्थमेवं कथनम् । ‡ एवमविश्वासकरणे सुहृद दुर्मनायेतेत्यालोच्य यथा रामः सन्तुष्यति तथा वदति—एवमुक्त्वेत्यादिना—**गो.**

[1] उद्यमाथ—ङ. [2] लोचनः—ङ.

शूरश्च [1] शूरघाती च प्रख्यातबलपौरुषः ।
बलवान् वानरो वाली संयुगेष्वपराजितः ॥ ७४ ॥

किमब्रवीत ; इत्यतः—शूरश्चेत्यादि ॥ ७४ ॥

दृश्यन्ते चास्य कर्माणि दुष्कराणि सुरैरपि ।
यानि संचिन्त्य भीतोऽहं ऋश्यमूकं समाश्रितः ॥ ७५ ॥

यानि—तदीयकर्माणि संचिन्त्य भीतः ॥ ७५ ॥

तमजय्यमधृष्यं च वानरेन्द्रममर्षणम् ।
विचिन्त्य यं न मुञ्चामि ऋश्यमूकमहं [2] त्विमम् ॥ ७६ ॥

उक्तार्थस्यैव विवरणं—तमजय्यमित्यादि । यमिति पदम् । यं विचिन्त्येत्यन्वयः ॥ ७६ ॥

उद्विग्नः शङ्कितश्चापि विचरामि महावने ।
अनुरक्तैः सहामात्यैः हनुमत्प्रमुखैर्वरैः ॥ ७७ ॥
उपलब्धं च मे श्लाघ्यं संमित्रं, मित्रवत्सल !
त्वामहं, पुरुषव्याघ्र! *हिमवन्तमिवाश्रितः ॥ ७८ ॥

समीचीनं मित्रं संमित्रं । त्वामिति । मित्रभूतमित्यर्थः ॥ ७८ ॥

किन्तु तस्य बलज्ञोऽहं दुर्भ्रातुर्बलशालिनः ।
अप्रत्यक्षं तु मे वीर्यं समरे तव, राघव ! ॥ ७९ ॥

---

*पर्वता हि अचलाः । हिमवांश्च अचलश्रेष्ठः । अतस्तदाश्रित्य तिष्ठतः न चलनावकाश इति भावः ।

[1] शूरमानी च—ङ.　　[2] गिरिम्—ङ.

यदि हिमवन्तमिव मामाश्रितः, तर्हि त्यज वालिभयं इत्यत आह--किं त्वित्यादि। तद्बलं ज्ञातं, त्वद्बलं च न ज्ञातं, अतो मे भयमित्यर्थः ॥ ७९ ॥

न खल्वहं त्वां *तुलये नावमन्ये न भीषये ।
कर्मभिस्तस्य भीमैस्तु कातर्यं जनितं मम ॥ ८० ॥

त्वां न तुलये—नोपमीये। †शत्रुणो निरवधिकं बलमिति शेषः। अत एव नावमन्ये न भीषये च, एवं व्यापारस्य मित्रे अनुचितत्वात्। तर्हि पुनः पुनः कथनं किमर्थं? इत्यत आह—कर्मभिरिति ॥ ८० ॥

कामं, राघव! ते ‡वाणी प्रमाणं धैर्यमाकृतिः ।
सूचयन्ति परं तेजः भस्मच्छन्नमिवानलम्[1] ॥ ८१ ॥

ते वाणी, वालिवधविषयेत्यर्थः। प्रमाणं—विश्वसनीयेत्यर्थः। तत्र हेतुमाह—धैर्यमित्यादि। अकातर्येण तृणीकृत्यवादः धैर्यम्। आकृतिः—स्वानुभवसिद्धदिव्यमङ्गलविग्रहः। एतदुभयं ते परं तेजः—सकलजगदाधारादिसंहारसामर्थ्यं सूचयति। भस्मच्छन्नमिवानलमिति गुप्तावस्थितमहाशक्तिमत्त्वे दृष्टान्तः ॥ ८१ ॥

---

*तुलनं नाम उभयोर्मध्ये कतरः श्रेष्ठः इति परीक्षणम्। एवं परीक्षणं हि वीराणामपमानकरम्। †अल्पवीर्येणेति विशेषः। ‡तव वचनमेकमेव पर्याप्तं प्रमाणम्। धैर्यादिकं च भवतः परं तेजः तदनुगुणमेव सूचयन्तीति भावः।

[1] एतदनन्तरं—स्निग्धानां प्रीतियुक्तानां सुहृदां सुहृदं प्रति। कातरं हृदयं, राम! प्रत्ययं नाधिगच्छति। यदि बाणेन भेत्ता त्वं सालान् सप्त, राघव! वालिनं समरे हन्तुं समर्थः स्यात्ततो भवान्—इत्यधिकं—ङ.

तस्य तद्वचनं श्रुत्वा सुग्रीवस्य महात्मनः ।
स्मितपूर्वमथो रामः प्रत्युवाच हरिं प्रभुः ॥ ८२ ॥

स्मितप्रयोगः उक्तभावः*। हरिं—सुग्रीवं, प्रभुः—रामः ॥ ८२ ॥

यदि न प्रत्ययोऽस्मासु विक्रमे तव, वानर !
प्रत्ययं [1]समरे श्लाघ्यं अहमुत्पादयामि ते ॥ ८३ ॥
एवमुक्त्वा तु सुग्रीवं †[2]सान्त्वं लक्ष्मणपूर्वजः ।
राघवो दुन्दुभेः कायं ‡पादाङ्गुष्ठेन [3]लीलया ॥ ८४ ॥
[4]तोलयित्वा महाबाहुः चिक्षेप दशयोजनम् ॥ ८५ ॥

भूयः अभ्यधिकं धृत्वा चालनं—तोलनम् ॥ ८५ ॥

[5]असुरस्य तनुं [6]शुष्कं पादाङ्गुष्ठेन वीर्यवान् ।
क्षिप्तं दृष्ट्वा ततः कायं सुग्रीवः पुनरर्थवत् ॥ ८६ ॥
[7]लक्ष्मणस्याग्रतो रामं तपन्तमिव भास्करम् ।
हरीणामग्रतो वीरं इदं वचनमब्रवीत् ॥ ८७ ॥

अर्थवत्— उपपत्तिमत् । इदं वचनमब्रवीदिति । अनुत्पन्नप्रत्यय इति शेषः ॥ ८६–८७ ॥

---

*5–25 श्लोकव्याख्यायां हासस्य भावः उक्तपूर्व इत्यर्थः । † सान्त्वमित्यनेन प्रत्ययप्रश्नेन सुग्रीवस्य दुःखितत्वं द्योत्यते-गो. वस्तुतस्तु ‘मत्पौरुषं शङ्कते किल’ इति न रामस्य कोपो जातः इति सूच्यते । ‡ सुग्रीवेण ‘पादेनैकेन लक्ष्मण । उद्यम्य प्रक्षिपेच्चापि तरसा द्वे धनुश्शते’ (72 श्लो) इति कथिते रामः पादाङ्गुष्ठेन दशयोजनं क्षिप्तवान् ॥

[1] समरश्लाघ्यं–ङ. [2] सान्त्वयन् लक्ष्मणाग्रजः–च. [3] तोलयन्–ङ. [4] पुनश्च लीलया रामः–ङ. [5] इदमर्धमधिकं–ङ. [6] शुष्कां–झ. [7] एतदर्धद्वयस्थाने— लक्ष्मणस्याग्रतो राममिदं वचनमब्रवीत्–ङ.

आर्द्रः समांसः प्रत्यग्रः क्षिप्तः कायः पुरा, सखे !
लघुः संप्रति निर्मांसः तृणभूतश्च, राघव ! ॥ ८८ ॥

तदेव दर्शयति—आर्द्र इत्यादि । प्रत्यग्रः—नूतनः ॥८८॥

*परिश्रान्तेन मत्तेन भ्रात्रा मे वालिना तदा ।
क्षिप्तमेवं प्रहर्षेण भवता, रघुनन्दन !
नात्र शक्यं बलं ज्ञातुं तव वा तस्य वाऽधिकम् ॥ ८९ ॥

मत्तेनेति । युद्धश्रान्तिपरवशकरणग्रामेणेत्यर्थः । प्रहर्षेण वेति योजना । असमोपलक्षितेनेत्यर्थः ॥ ८९ ॥

†आर्द्रं शुष्कमिति ह्येतत् सुमहत् राघवान्तरम् ।
स एव संशयः, तात ! तव तस्य च [1]यद्बले ॥ ९० ॥
सालमेकं तु निर्भिन्द्या [2]भवेद्व्यक्तिर्बलाबले ॥ ९१ ॥

बलाधिक्यनिर्णायकमाह—आर्द्रमित्यादि । यद्बल इति । यदित्यव्ययम् । तव तस्य च बलविषये यः संशयः अस्थिक्षेपात् पूर्वं स्थितः, स एवाद्यापि वर्तते, न तु कर्मणा निवृत्त इत्यर्थः । तर्हि किं प्रत्यायिकं कर्तव्यं ? इत्यत आह—सालमित्यादि ॥ ९०–९१ ॥

कृत्वेदं कार्मुकं सज्यं हस्तिहस्त[3]मिवाततम् ।
आकर्णपूर्णमायम्य विसृजस्व महाशरम् ॥ ९१ ॥

आततं—दीर्घं ॥ ९१ ॥

---

* कर्मतारतम्यमुक्त्वा कर्तृतारतम्यमप्याह—परिश्रान्तेनेत्यादि । †'अहमपि वनपर्यटनादिना सुश्रान्त एव' इति यदि रामो ब्रूयादिति मत्वा, कर्तृवैलक्षण्याभावेऽपि कर्मवैलक्षण्यं तु दुरपह्नवमेवेत्येतदर्थं तमंशं पुनरनुवदति—आर्द्रमित्यादि ।

[1] यद्बलम्—च. [2] भवेद्व्यक्ते बलाबले—ङ. [3] मिवापरम्—ञ.

†इमं हि सालं [1]सहितस्त्वया शरः
न संशयोऽत्रास्ति विदारयिष्यति ।
अलं विमर्शेन ‡[2]मम प्रियं ध्रुवं
कुरुष्व, [3]राजात्मज! शापितो मया ॥ ९२ ॥

सालभेदने त्वया विमर्शो न कर्तव्यः, भेदनसामर्थ्यं समग्रमस्त्येव ते । अपि तु अपरोक्षदर्शनजसंतोषार्थं सख्या मया शापितो नियुक्तः कुर्विति नियुङ्क्ते सखित्वात्—इमं हीत्यादि ॥ ९२ ॥

यथा हि तेजस्सु वरः सदा रविः
यथा हि शैलो हिमवान् महाद्रिषु ।
यथा चतुष्पात्सु च केसरी वरः
तथा नराणामसि विक्रमे वरः ॥ ९३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकादशः सर्गः

विक्रमे वर इति । श्रेष्ठत्वेन मे अभिमतो भवसीत्यर्थः । सालभेदने सतीति शेषः । बाधामानः (९३) सर्गः ॥ ९३ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकादशः सर्गः

---

* पुनर्निर्बन्धेन कुपितो भवेदिति सान्त्वयति—इममिति । सहितः—संहितः 'समो वा हिततयोः' इति मलोपः—गो. †मम प्रियं, न तु त्वत्परीक्षार्थम्—गो.

[1] प्रहित—च. [2] तव—ङ. [3] राजन् प्रतिशापितो—च. राजंस्त्वयि शापितो—ङ.

द्वादशः सर्गः

[सुग्रीवप्रत्ययोत्पादनम्]

एतच्च वचनं श्रुत्वा सुग्रीवेण *सुभाषितम् ।
प्रत्ययार्थं महातेजाः रामो जग्राह कार्मुकम् ॥ १ ॥

अथ सप्तसालभेदनप्रत्ययितविक्रमस्य वालिरणप्रेषितस्य ततो वालिप्रहरणप्रहतस्य खिन्नस्य समाश्वासपूर्वं साभिज्ञानं पुनः रामेण वालिरणप्रेरणम् । एतच्चेत्यादि ॥ १ ॥

स गृहीत्वा धनुर्घोरं शरमेकं च मानदः ।
†सालमुद्दिश्य चिक्षेप ज्यास्वनैः पूरयन् दिशः ॥ २ ॥
स विसृष्टो बलवता बाणः स्वर्णपरिष्कृतः ।
भित्त्वा सालान्[1] गिरिप्रस्थे सप्त भूमिं विवेश ह ॥ ३ ॥

भित्त्वेत्यादि । सप्त सालान्, ततः तत्पृष्ठवर्तिनं गिरिमेकं च भित्त्वा, ततः पश्चात्तनीं भूमिं च भित्त्वा विवेश । ह—सर्वानुभवप्रसिद्धमित्यर्थः ॥ ३ ॥

[2]प्रविष्टश्च मुहूर्तेन [3]रसां भित्त्वा [4]महाजवः ।
[5]निष्पत्य च पुनस्तूर्णं स्वतूणीं प्रविवेश ह‡ ॥ ४ ॥

रसां—भूमिम् । निष्पत्य चेति । भूमेरिति शेषः । स्वतूणीं—स्वनिलयभूतां पुनः आविशत् । ननु कथं अचेतनस्य पुनः तूणीर-

---

* प्रत्यक्षतोऽनुभूतवालिबलस्य, अप्रत्यक्षीकृतरामबलस्य एवं कथनं युक्तमेवेति भावनया—'सुभाषितं' इत्युक्तम् । † सालमित्येकवचनेन एकसालोद्देशेन प्रयुक्त एव शरः तावत्कार्यमकरोदिति सूच्यते । ‡ मन्त्रप्रभावेनाचेतनस्यापि पुनरागमनम्—गो.

[1] गिरिप्रस्थं—ञ. [2] सायकस्तु—च. [3] सालान्—च, धरां—ङ. [4] महाशरः—ङ. [5] निपत्य—ङ.

प्राप्तिः ? रुद्रबाणवत् रामबाणानां परमशक्तिमत्परचेतनदेवताधिष्ठानत्वात् ताभिरेव पुनः प्रापणमपि । तत एव अक्षयबाणेषुधित्वं च रामस्य ॥ ५ ॥

तान् दृष्ट्वा *सप्त निर्भिन्नान् सालान् वानरपुङ्गवः ।
रामस्य शरवेगेन विस्मयं परमं गतः [1] ॥ ५ ॥
†स मूर्ध्ना न्यपतत् भूमौ प्रलम्बीकृतभूषणः ।
सुग्रीवः परमप्रीतः राघवाय कृताञ्जलिः ॥ ६ ॥

साष्टाङ्गप्रणामवशात् प्रलम्बितभूषणः — लम्बमानावस्थासंपन्नानि उरःकण्ठवर्तिहारादिभूषणानि यस्य स तथा । कृताञ्जलिरिति । उत्थानानन्तरमिति शेषः ॥ ६ ॥

इदं चोवाच धर्मज्ञं कर्मणा तेन [2] हर्षितः ।
रामं सर्वास्त्रविदुषां श्रेष्ठं शूरमवस्थितम् ॥ ७ ॥
सेन्द्रानपि सुरान् सर्वान् त्वं बाणैः, पुरुषर्षभ !
समर्थः समरे हन्तुं किं पुनर्वालिनं, प्रभो ! ॥ ८ ॥
येन सप्त महासालाः गिरिर्भूमिश्च दारिताः ।
बाणेनैकेन, काकुत्स्थ ! स्थाता ते को रणाग्रतः ॥ ९ ॥

---

*तान् दृष्ट्वेत्यनेन अल्पज्ञत्वात्सुग्रीवः सालानेव भिन्नान् ददर्श, सप्तभूमिप्रवेशं त्वहमेव (वाल्मीकिरेव) धर्मवीर्येण पश्यामीति भावः—गो. परन्तु ९ श्लोको द्रष्टव्यः । †रामशक्त्यतिशयदर्शनेन, तस्य परीक्षणार्थं प्रवृत्तिं स्मरतोऽवशात्प्रणामः कृतः ।

[1] एतदनन्तरं—अहो शरनिपातोऽयं रामस्याक्लिष्टकर्मणः । यमदण्डोपमो ह्येतव मृत्युपाशसमन्वितः ॥ विस्मयन्तश्च ते सर्वे हनूमत्प्रमुखास्तदा । गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ शोभनं शोभनं राम ! कृतं कर्म सुदुष्करम् । यस्य ते शरवेगेन त्रयो लोकाः प्रकम्पिताः —इत्यधिकं—ङ. [2] तोषितः—ङ.

अद्य मे विगतः शोकः प्रीतिरद्य परा मम।
सुहृदं त्वां समासाद्य महेन्द्रवरुणोपमम्॥ १० ॥
तमद्यैव प्रियार्थं मे वैरिणं भ्रातृरूपिणम्।
वालिनं जहि, काकुत्स्थ! मया बद्धोऽयमञ्जलिः ॥११॥
ततो रामः परिष्वज्य सुग्रीवं प्रियदर्शनम्।
अस्मादुच्छेम किष्किन्धां क्षिप्रं गच्छ त्वमग्रतः।
गत्वा चाह्वय, सुग्रीव! वालिनं† भ्रातृगन्धिनम्॥ १२ ॥

अस्माद् गच्छामेति। ऋष्यमूकादित्यर्थः। भ्रातृगन्धिनमिति। अनर्थकभ्रातृव्यपदेशमित्यर्थः॥ १२ ॥

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिनः पुरीम्।
वृक्षैरात्मानमावृत्य व्यतिष्ठन् गहने वने॥ १३ ॥
प्रत्युवाच महाप्राज्ञः *[1]लक्ष्मणानुमतं वचः[2] ॥ १४ ॥

आत्मानं – स्वदेहम् ॥ १४ ॥

---

* लक्ष्मणानुमतमिति क्रियाविशेषणम् गो. लक्ष्मणानुगतं– तत्सममित्यर्थः। यद्वा लक्ष्मणवत्प्रियत्वेनानुगतं—स्वीकृतं सुग्रीवं—ति. † भ्रातृगन्धिनं—भ्रातृहिंसकं, 'गन्धनावक्षेपण' इत्यत्र तथाप्रयोगात्—गो. गन्ध अर्दने इति धातुः।

[1] लक्ष्मणानुगतं—च. [2] एतदनन्तरं—स रामो वृक्षसंछन्ने वनोद्देशे वनप्रियः। आवृतः स च सौमित्रिमिदं वचनमब्रवीत्॥ पश्य लक्ष्मण सौमित्रे! भ्रातृणां राज्यकारणात्॥ व्यसनं घोरमुत्पन्नं गर्हितं प्रतिभाति मे॥ राज्यं नाम महाव्याधिः अचिकित्सो विनाशनः। भ्रातरं वा सुतं वाऽपि त्यजन्ति खलु भूमिपाः॥ एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत्। ईदृशो राज्यवृत्तान्तः राज्यहेतोर्न संशयः॥ भ्रातॄन् पुत्रांश्च दारांश्च त्यजन्ते राज्यकारणात्। लुब्धास्त्वेवं प्रकुर्वन्ति लोभमोहवशंगताः॥ पूर्वमासीन्महाराजा(जो) लोष्टको नाम भूमिपः। राज्यार्थं तेन पुत्राश्च भ्राता वैरनिराकृतः॥ अन्यैरपि च दुर्वृत्तैः कृतमेव न संशयः। राज्यहेतोर्विशालाक्ष वैरसंग्रहणाय च। मा विषादं कृथा वीर! नैतत् क्षत्रिय चेष्टितम्। न विनन्दन्ति राजानः दृष्ट्वाऽऽत्मानं तथाविधम्॥—इत्यधिकं—झ.

सुग्रीवो व्यनदद्घोरं वालिनो ह्वानकारणात् ।
गाढं परिहितो वेगात् नादैर्भिन्दन्निवाम्बरम्[1] ॥ १५ ॥

ह्वानकारणात्—आह्वाननिमित्तमित्यर्थः । गाढं परिहितः—वस्त्रेण कृतपरिधानः । वस्त्रेण कटिं दृढं बद्ध्वा इत्यर्थः । वेगात् नादैरिति । नादकारणप्राणवेगवशात् , उत्पन्नैरिति शेषः ॥ १५ ॥

तं श्रुत्वा निनदं भ्रातुः क्रुद्धो वाली महाबलः ।
निश्चक्राम सुसंरब्धः *[2] भास्करोऽस्ततटादिव ॥ १६ ॥

अस्ततटादिवेति । अस्तशब्देन तत्प्रतिसंबन्धी उदयपर्वतो लक्ष्यते । निष्पपातेत्युक्तिसामर्थ्यात् ॥ १६ ॥

ततः सुतुमुलं युद्धं वालिसुग्रीवयोरभूत् ।
गगने ग्रहयोर्घोरं वज्रगोकर्णयोरिव[3] ॥ १७ ॥

दृष्टान्तान्तरं—वज्रगोकर्णयोर्यथेति । बुधाङ्गारकयेरिवेति पाठे 'कयो 'रित्यत्र गुरुव्यत्यासः आर्षः । वज्रगोकर्णौ—तदाख्यपर्वतौ । यथा एवमित्यन्वयः । †महेन्द्रारिष्टौ च पर्वतौ ॥ १७ ॥

---

* भास्करः अस्ततटादतिदूरमप्युदयपर्वतं अत्यल्पेन कालेन याति । एवमदृश्यस्थानतया तत्तुल्यगुहातः क्षणेन बहिरागत इत्यर्थः यत्तु अस्तपदेनोदयगिरिलक्षणं (कतक) यदपि मेरूत्तरवासिनोऽधिकृत्येयमुक्तिरिति व्याख्यान—(ती). तत् क्लिष्टमसंगतं चेति स्पष्टं सुधियाम्—ति. यथा सूर्यः अस्ततटादवतरन् अदृष्टरश्मिर्भवति, तथेदानीं किष्किन्धानिर्गमनं वालिनोऽत्यल्पकालेन नाशहेतुरिति द्योतनार्थं अस्ततटादि युक्तम् । अस्मद्देशोदयगिरिप्रदेशान्तरापेक्षया अस्तगिरिरित्यप्याहुः—गो. † अत्र 'हिमवद्विन्ध्ययोश्चैव महेन्द्रारिष्टयोर्यथा ' इति अधिकः पाठः व्याख्यासम्मतः प्रतिभाति ।

[1] एतदनन्तरं—ननाद सुमहानादं पूरयन् वै नभःस्थलम्—इत्यधिकं.—झ.
[2] भास्करोद्रितटादिव—झ. [3] एतदनन्तरं—अग्न्यर्कयोर्यथाऽऽकाशे मेरुमन्दरयोरिव । हिमवद्विन्ध्ययोश्चैव मैनाकक्रौञ्चयोरिव । वज्रगोकर्णयोरेव महेन्द्रारिष्टयोरिव—इत्यधिकं—झ.

तलैरशनिकल्पैश्च वज्रकल्पैश्च मुष्टिभिः ।
जघ्नतुः समरेऽन्योन्यं भ्रातरौ क्रोधमूर्छितौ ॥ १८ ॥

अशनिः—दम्भोलिः । वज्रं—वज्रायुधम् ॥ १८ ॥

ततो रामो धनुष्पाणिः तावुभौ समुदीक्ष्य तु ।
अन्योन्यसदृशौ वीरौ उभौ देवाविवाश्विनौ ॥ १९ ॥
[1]यन्नावगच्छत् सुग्रीवं वालिनं नाऽपि राघवः ।
ततो न कृतवान् बुद्धिं मोक्तुमन्तकरं शरम् ॥ २० ॥

यत्—यस्मात् । नावगच्छदिति । विविच्येति शेषः ॥ २० ॥

एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना ।
अपश्यन् राघवं नाथं ऋश्यमूकं प्रदुद्रुवे ॥ २१ ॥

नाथं अपश्यन्—रक्षकं अनुपलभमानः ॥ २१ ॥

क्लान्तो रुधिरसिक्ताङ्गः प्रहारैः जर्जरीकृतः ।
वालिनाभिद्रुतः क्रोधात् प्रविवेश महावनम् ॥ २२ ॥
तं प्रविष्टं वनं दृष्ट्वा वाली शापभयार्दितः ।
मुक्तो ह्यसि त्वमित्युक्त्वा [2] संनिवृत्तो महाद्युतिः[3] ॥ २३ ॥

वनं प्रविष्टमिति । ऋष्यमूकस्य वनं इत्यर्थः ॥ २३ ॥

राघवोऽपि सह भ्रात्रा [4] सह चैव हनूमता ।
तदेव वनमागच्छत् सुग्रीवो यत्र वानरः ॥ २४ ॥

---

[1] यन्नाध्यगच्छत्—ङ. [2] स निवृत्तो महाबलः—ङ. [3] एतदनन्तरं—निवृत्तः स्वपुरीं प्राप क्रोधाविष्टो महाबलः—इत्यधिकं—ङ. [4] सचिवैश्च—ङ.

तं समीक्ष्यागतं रामं सुग्रीवः सहलक्ष्मणम् ।
***ह्रीमान् दीनमुवाचेदं वसुधामवलोकयन् ॥ २५ ॥**

ह्रीमान् । काले अकृतरक्षणस्य मुखं कथं पश्यमीति लज्जावानित्यर्थः ॥ २५ ॥

आह्वयस्वेति मामुक्त्वा † दर्शयित्वा च विक्रमम् ।
वैरिणा घातयित्वा च किमिदानीं त्वया कृतम् ॥ २६ ॥

विक्रमं दर्शयित्वेति । सालभेदनादिनेति शेषः । घातयित्वेति । युद्धप्रेरणद्वारेति शेषः । किं कृतमिति । अनुचितमेव कृतमित्यर्थः ॥ २६ ॥

‡ तामेव वेलां वक्तव्यं त्वया, राघव ! तत्त्वतः ।
वालिनं न निहन्मीति ततो नाहमितो व्रजे[1] ॥ २७ ॥

तामेव वेलामिति । सप्तम्यर्थे द्वितीया । वालिना युद्धप्रेरणवेलायामित्यर्थः । ततः—तदेत्यर्थः । इतः—ऋष्यमूकात् वनात् ॥ २७ ॥

तस्य चैवं ब्रुवाणस्य सुग्रीवस्य महात्मनः ।
करुणं § दीनया वाचा राघवः पुनरब्रवीत् ॥ २८ ॥
सुग्रीव ! श्रूयतां, तात ! क्रोधश्च व्यपनीयताम् ।
कारणं येन बाणोऽयं न मया स विसर्जितः ॥ २९ ॥

सः बाणः इति । अरातिसंहारप्रयोजनकः इत्यर्थः ॥ २९ ॥

---

*ह्रीमान्—सम्मानितमित्रस्य पुरतः परिभूतत्वात् लज्जावान् । † 'दर्शयित्वा च विक्रमम्' इति व्यतिरेकोक्तिः । त्वया किं कृतं, किं चिन्तितमित्यर्थः—**गो.**
‡ तामेव वेलां—तदानीमेवेत्यर्थः । § स्वस्मिन्नपराधाङ्गीकारसूचनाय दीनयेति ।

[1] एतदनन्तरं—किन्तु तत्कारणं येन शक्तेनापि न गण्यते—इत्यधिकं—ङ. झ.

*अलङ्कारेण वेषेण प्रमाणेन गतेन च ।
त्वं च, सुग्रीव! वाली च सदृशौ स्थः परस्परम् ॥ ३० ॥

तदेव कारणमाह—अलङ्कारेणेत्यादि ॥ ३० ॥

विक्रमेण च वाक्यैश्च व्यक्तिं वां नोपलक्षये ।
स्वरेण[1] वर्चसा चैव प्रेक्षितेन च, वानर! ॥ ३१ ॥

वर्चसा—शरीरकान्त्या । वां व्यक्तिमिति । युवयोः भेदमित्यर्थः । यद्यपि ऋश्यमूकं प्रति पलायनसमये व्यक्तिरस्ति । अथापि विमृश्यकारितया, तत्कालं बालिदुरदृष्टापरिपाकाद्वा इति समाधेयम् ॥ ३१ ॥

ततोऽहं रूपसादृश्यात् मोहितः, वानरोत्तम !
नोत्सृजामि महावेगं शरं शत्रुनिबर्हणम् ॥ ३२ ॥
जीवितान्तकरं घोरं सादृश्यात्तु विशङ्कितः ।
मूलघातो न नौ स्याद्धि द्वयोरपि कृतो मया ॥ ३३ ॥

---

* ननु काञ्चनमालारूपो वालिनो विशेषोऽस्ति—सत्यम्—तस्मिन् दिने तन्न धृत्वाऽऽगतवानिति ज्ञेयम् (द्वितीयवारागमनवेलायामेव 'शालिनं हेममालिनं' (16–18) इति दर्शनादिति भावः)। यद्यप्यत्र मत्तत्वभोगचिह्नाश्रान्तत्वपुरनिर्गतत्वादिकं बाल्यसाधारणमस्ति । समीपस्था हनुमदादयश्च प्रष्टुं शक्याः । स्वयं च सूक्ष्मज्ञः, 'प्रेक्षितज्ञास्तु कोसलाः' इत्युक्तेः—तथापि 'त्वया मया च कुन्त्या च' इति न्यायेनासाधारण्यं परिहर्तुं दृष्टहेतून् कांश्चिदुक्तवान् राम इति ज्ञेयम्—**गो.** नन्विदमनुचितं यत् भगवतो मोहः, अमोहे मोह इत्यनृतकथनं च । किञ्च पलायनसमये ऋश्यमूकाभिमुखधावनेन व्यक्तिरस्त्येवेति चेन्न—वालिन आयुर्दायासमाप्त्या तथाकरणेऽपि सुग्रीवसन्तोषाय स्वस्मिन् मानुष्यबुद्ध्युत्पादनाय च आत्मनि मोहोत्प्रेक्षया समाधानादक्षतेः । मोहित इत्यस्य इवेति शेषः । ईदृशे विषये एवं विधानृतवचनं न दोषायेत्यप्यनेन ध्वनितम्—**ति.**

[1] वचसा—**च.**

नोत्सृजामीति। नोदसृजमिति यावत्। विशङ्कितः—कर्तरि निष्ठा, शङ्कावानहमित्यर्थः। नौ—आवयोः। द्वयोरपि मूलघातः न स्यात्—मा भूत् इत्येवमर्थं मया कृतः, शरानुत्सर्ग इति शेषः॥३२-३३॥

त्वयि वीरे विपन्ने हि अज्ञानाल्लाघवान्मया।
मौढ्यं च मम बाल्यं च ख्यापितं स्यात्, [1]हरीश्वर!
दत्ताभयवधो नाम पातकं [2]महदुच्यते॥ ३४॥

अविमृश्य प्रवृत्तौ मूलघातप्रसङ्गमेव दर्शयति—त्वयीत्यादि। अज्ञानात्—अनिश्चयप्रवृत्त्या, लाघवात्—चापल्यात्। दत्तं अभयं यस्मै सः दत्ताभयः, तस्य वधः तथा। नामशब्दः महापातकत्वप्रसिद्धौ॥ ३४॥

अहं च लक्ष्मणश्चैव सीता च वरवर्णिनी।
त्वदधीना वयं सर्वे वनेऽस्मिन् शरणं भवान्॥ ३५॥
तस्मात् युध्यस्व भूयस्त्वं *[3]मा मा शङ्कीश्च, वानर!
एतन्मुहूर्ते, सुग्रीव! पश्य वालिनमाहवे॥ ३६॥
निरस्तमिषुणैकेन वेष्टमानं महीतले॥ ३७॥

मा मा इति आबाधे द्विर्वचनम्॥ ३६-३७॥

अभिज्ञानं कुरुष्व त्वं आत्मना [4]वानरेश्वर!
येन त्वामभिजानीयां द्वन्द्वयुद्धमुपागतम्॥ ३८॥
गजपुष्पीमिमां फुल्लां उत्पाट्य शुभलक्षणाम्।
कुरु, लक्ष्मण! कण्ठेऽस्य सुग्रीवस्य महात्मनः॥ ३९॥

---

* मा मा शंकीरिति। मा—मां प्रति मा शंकीः—शंकां मा कुरु—गो.

[1] कपीश्वर—ङ. [2] महदद्भुतम्—ङ. [3] मा शंकां गन्तुमर्हसि—ङ., निश्शंको वानरेश्वर—झ. [4] वानरोत्तम—ङ.

गजपुष्पी—नागपुष्पी—कुन्दलतेति यावत्—कुरुक्कत्ति। शुभं सम्यक् लक्षयतीति शुभलक्षणा ॥ ३९ ॥

ततो गिरितटे जातां [1]उत्पाट्य कुसुमाकुलाम्।
लक्ष्मणो *गजपुष्पीं तां तस्य कण्ठे [2]व्यसर्जयत् ॥ ४० ॥

व्यसर्जयत् – निसृष्टवान्। समर्पितवानित्यर्थः † ॥ ४० ॥

स तया शुशुभे श्रीमान् [3]लतया कण्ठसक्तया।
‡ [4]विपरीत इवाकाशे सूर्यो नक्षत्रमालया ॥ ४१ ॥

स तयेति। शुक्लपुष्पकुन्दलतयेत्यर्थः ॥ ४१ ॥

मालयेव बलाकानां [5]ससंध्य इव तोयदः।
विभ्राजमानो वपुषा रामवाक्यसमाहितः ॥ ४२ ॥
जगाम सह रामेण किष्किन्धां [6]वालिपालिताम् ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे द्वादशः सर्गः

———

ससन्ध्यः—संध्यारागसहितः तोयद इव स्थितः। बलाकानां मालया इव तया लतया शुशुभे इत्यन्वयः। रामवाक्ये—तत्कारणे समाहितः – युक्तः इत्यर्थः। ग्रीवा(४३)मानः सर्गः ॥ ४३ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे द्वादशः सर्गः

———

* गजपुष्पीं—नागपुष्पीं नाम लताम्—गो. † बबन्धेत्यर्थः। ‡ विपरीत इवेत्यादि उपरि (१४-९) विव्रियते—गो.

[1] समुत्पाटय सुपुष्पिताम्—ङ. [2] न्यवेशयत्—ङ. [3] मालया—ङ. [4] इदमर्धमधिकं—झ. [5] सन्ध्याताम्रो वलाहकः—ङ. [6] पुनरपि सः—ङ.

त्रयोदशः सर्गः

[सप्तजनाश्रमवर्णनम्]

ऋश्यमूकात् स धर्मात्मा किष्किन्धां लक्ष्मणाग्रजः ।
[1]जगाम सहसुग्रीवः वालिविक्रमपालिताम् ॥ १ ॥

अथ किष्किन्धागमने प्रसङ्गात् सप्तजनाश्रमवर्णनम् । ऋश्यमूकादित्यादि ॥ १ ॥

समुद्यम्य महच्चापं रामः काञ्चनभूषितम् ।
शरांश्चादित्यसंकाशान् गृहीत्वा रणसाधकान् ॥ २ ॥
अग्रतस्तु ययौ तस्य राघवस्य महात्मनः ।
सुग्रीवः *संहतग्रीवः [2]लक्ष्मणश्च महाबलः ॥ ३ ॥
पृष्ठतो हनुमान् वीरः नलो नीलश्च [3]वानरः ।
तारश्चैव महातेजाः हरियूथपयूथपः ॥ ४ ॥

हरियूथपानामपि यूथं पातीति तथा ॥ ४ ॥

ते वीक्षमाणा वृक्षांश्च पुष्पभारावलम्बिनः ।
प्रसन्नाम्बुवहाश्चैव सरितः सागरङ्गमाः ॥ ५ ॥

सागरङ्गमाः इति । 'गमेः सुप्युपसंख्यानम्' इति खजादि ॥

---

*संहतग्रीवः—दृढबन्धबद्धग्रीवः–ति. निबिडकण्ठ इत्यर्थः, इदं स्वरूपकीर्तनम् । गजपुष्पी बन्धनेन वा–गो.

[1] जगाम सहसुग्रीवः लक्ष्मणश्च महाबलः–झ. [2] लक्ष्मणस्य–ज. [3] वीर्यवान्–च.ज.

*कन्दराणि च शैलांश्च निर्दराणि गुहास्तथा ।
शिखराणि च मुख्यानि दरीश्च प्रियदर्शनाः ॥ ६ ॥

कन्दराणि—शिलामन्दिराणि निर्दराणि—स्फुटितशिलाविवराणि । गुहाः—देवखातगिरिबिलानि । दर्यः—गह्वराणि ॥ ६ ॥

वैडूर्यविमलैः [1]पर्णैः पद्मैश्चाकोशकुट्मलैः† ।
शोभितान् सजलान् मार्गे तटाकांश्च व्यलोकयन् ॥ ७ ॥

अकोशाः कुट्मलाश्च तथा । विकसिताः अविकसिताश्चेत्यर्थः ॥ ७ ॥

कारण्डैः ‡सारसैर्हंसैः वञ्जुलैर्जलकुक्कुटैः ।
चक्रवाकैस्तथा चान्यैः शकुनैरुपनादितान् ॥ ८ ॥

कारण्डैः— कारण्डवैरिति यावत् । वञ्जुलः— நச்சுப்புள் ॥

मृदुशष्पाङ्कुराहारान् निर्भयान् वन[2]गोचरान् ।
[3]चरतः [4]सर्वतोऽपश्यन् स्थलीषु हरिणान् स्थितान् ॥ ९ ॥

मृदूनां शष्पाङ्कुराणां—बालतृणाङ्कुराणां आहारः येषु ते तथा । वनगोचरान्—वनप्रचारान् । अपश्यन् इति पदम् ॥ ९ ॥

---

* कन्दराणि—गृहाकारगुहाविशेषान् । दरीः—गुहाविशेषान्-**गो.** गुहाः—देवनिलयीभूतगिरिविवराणि । दर्यः—भयंकरगुहाः-**रा.** † आकोशं—अग्रभागपर्यन्तं कुड्मलैः मुकुलरूपैः—ईषद्विकसितैः-**ति.** ईषद्विकसितमुकुलैः-**गो.** ‡ सारसैः—सरोनिवासैः शकुनैः— **गो.**

[1] तोयैः-**झ.** [2] चारिणः-**ङ.** [3] चारिणाम्-**ज.** [4] पर्वते-**ङ.**

तटाकवैरिणश्चापि शुक्लदन्तविभूषितान् ।
घोरानेकचरान् वन्यान् द्विरदान् * कूलघातिनः ॥ १० ॥

तटाकवैरिणः इति । तटाकसेतुघातकान् इत्यर्थः ॥ १० ॥

मत्तान् † गिरितटोत्कृष्टान् पर्वतानिव जङ्गमान् ।
[1] वारणान् वारिदप्रख्यान् महीरेणुसमुक्षितान् ॥ ११ ॥

वने वनचरांश्चान्यान् खेचरांश्च विहङ्गमान् ।
पश्यन्तस्त्वरिता जग्मुः सुग्रीववशवर्तिनः ॥ १२ ॥

तेषां तु गच्छतां तत्र त्वरितं रघुनन्दनः ।
द्रुमषण्डं वनं दृष्ट्वा रामः सुग्रीवमब्रवीत् ॥ १३ ॥

द्रुमाणां षण्डः—समूहः यस्मिन् तत् तथा ॥ १३ ॥

एष मेघ इवाकाशे वृक्षषण्डः प्रकाशते ।
‡ मेघसंघात[2]विपुलः पर्यन्तकदली[3]वृतः ॥ १४ ॥

किमेतद् ज्ञातुमिच्छामि, सखे ! कौतूहलं हि मे ।
कौतूहलापनयनं कर्तुमिच्छाम्यहं त्वया ॥ १५ ॥

कौतूहलस्य—औत्सुक्यस्य अपनयनं—निवर्तनं त्वया कृतं भवतु इति इच्छामीति योजना ॥ १५ ॥

तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ।
गच्छन्नेवाचचक्षेऽथ सुग्रीवस्तन्महद्वनम् ॥ १६ ॥

---

* कूलघातित्वादेव तटाकवैरित्वम्—ति. तटाकवैरिणः—कलुषीकरणात्—गो. † गिरितटोत्कृष्टान्—उल्लिखितगिरितटान्—गो. ‡ 'मेघसंघातविपुलं' इत्यादिपाठे, तादृशं एतत् किं—इत्यन्वयः ॥

[1] वानरान् द्विरदप्रख्यान्—ज. [2] विपुलं—ज. [3] वृतम्—ज.

एतत्, राघव! विस्तीर्णं आश्रमं श्रमनाशनम्।
***उद्यानवनसंकीर्णं स्वादुमूलफलोदकम् ॥ १७ ॥**

उद्यानैः—उपवनैः केवलवनैश्च संकीर्णं तथा ॥ १७ ॥

अत्र सप्तजना नाम मुनयः संशितव्रताः।
सप्तैवासन्नधःशीर्षाः [1] नियतं जलशायिनः ॥ १८ ॥

सप्तजना नामेति। प्रसिद्धाः इत्यर्थः। अधःशीर्षाः—तपोऽर्थं भूप्रतिष्ठापितशिरसः इत्यर्थः ॥ १८ ॥

† [2] सप्तरात्रकृताहाराः [3] वायुना, वनवासिनः।
दिवं वर्षशतैर्याताः सप्तभिः सकलेबराः ॥ १९ ॥

सप्तेति। वायुनैव केवलं सप्तरात्रात् परमेव च कृतः आहारः यैः ते तथा। सप्तभिः वर्षशतैः सकलेबराः सन्तः दिवं याताः ॥

तेषा[4]मेवंप्रभावानां ‡ द्रुमप्राकारसंवृतम्।
आश्रमं सुदुराधर्षं अपि सेन्द्रैः सुरासुरैः ॥ २० ॥
पक्षिणो § वर्जयन्त्येतत् तथाऽन्ये वनचारिणः।
विशन्ति मोहाद्ये तत्र निवर्तन्ते न ते पुनः ॥ २१ ॥

वर्जयन्ति—न प्रविशन्तीत्यर्थः। पुनः न निवर्तन्त इति। अत्रैव म्रियन्ते इत्यर्थः ॥ २१ ॥

---

* उद्यानवनैर्निबिडम्—**रा.** † सप्तरात्रकृताहाराः वायुना—सप्तरात्रस्य एकवारं कृताहाराः—**गो.** सप्तरात्रे (**पा.**), व्यतीते सतीति शेषः—**रा.** ‡ द्रुमप्राकारसंवृतं—द्रुमरूपप्राकारप्रावृतम्—**रा.** § वर्जयन्ति, अतितेजोदर्शनजनितभिया न गच्छन्तीत्यर्थः—**रा.**

[1] नियताः—**ङ.** [2] सप्तरात्रे—**ञ.** [3] वायुनाऽचलवासिनः—**ञ.** [4] मेतत्प्रभावेण—**च. ञ.**

*विभूषणरवाश्चात्र श्रूयन्ते सकलाक्षराः ।
तूर्यगीत[1]स्वनाश्चात्र गन्धो दिव्यश्च, राघव! ॥ २२ ॥

विभूषणरवाश्चात्र अद्य श्रूयन्ते इति। दिव्याप्सरसामिति शेषः। सकलाक्षराः—मधुरवर्णसहिताः, वाचश्चेति शेषः। अत्र गन्धो दिव्यश्च, राघव! अनुभूयते। अप्सरसामिति शेषः ॥ २२ ॥

त्रेताग्नयोऽपि दीप्यन्ते धूमो ह्यत्र प्रकाशते ।
वेष्टयन्निव वृक्षाग्रान् कपोताङ्गारुणो घनः ॥ २३ ॥

न केवलं भोगभूमिः, अपि तु कर्मभूमिश्चेत्याह—त्रेतेत्यादि। वेष्टयन्निव—प्रथयन्निव। अरुणः—धूसरः ॥ २३ ॥

एते वृक्षाः प्रकाशन्ते मधुसंसक्तमस्तकाः।
मेघजालप्रतिच्छन्नाः वैडूर्यगिरयो यथा ॥ २४ ॥

वैडूर्यवत् श्यामाः गिरयः—वैडूर्यगिरयः ॥ २४ ॥

कुरु प्रणामं, धर्मात्मन्! [2]तान् † समुद्दिश्य, राघव!
लक्ष्मणेन सह भ्रात्रा प्रयतः [3]संयताञ्जलिः ॥ २५ ॥

तानिति। सप्तजनाख्यमुनीन् उद्दिश्येत्यर्थः ॥ २५ ॥

---

*दिवं गताः शरीरान्तरेण पुनरत्रागत्याप्सरोभिः क्रीडन्तीत्याशयेनाह—विभूषणेत्यादिना। सकलाक्षरा इति गीतस्वनविशेषणम्—**गो.** † समुद्दिश्य—किञ्चित्फलमुद्दिश्य, तेषां प्रणामं कुरु—**गो.** तेषां—सप्तजनानां, प्रीतिमिति शेषः—**रा.**

[1] स्वरा—**ङ.** [2] तेषामुद्दिश्य—**च. ज.** [3] संहताञ्जलिः—**ञ.**

प्रणमन्ति हि ये *तेषां [1]मुनीनां भावितात्मनाम् ।
न तेषामशुभं† किञ्चित् शरीरे, राम ! [2]दृश्यते ॥ २६ ॥

ये तेषां प्रणमन्तीति । तान् प्रणमन्तीति यावत् ॥ २६ ॥

ततो रामः सह भ्रात्रा लक्ष्मणेन कृताञ्जलिः ।
समुद्दिश्य ‡महात्मानः तान् ऋषीनभ्यवादयत् ॥ २७ ॥

अभिवाद्य तु धर्मात्मा रामो भ्राता च लक्ष्मणः ।
सुग्रीवो वानराश्चैव जग्मुः संहृष्टमानसाः ॥ २८ ॥

वानराः—हनुमदादयः चत्वारः ॥ २८ ॥

ते गत्वा दूरमध्वानं तस्मात् सप्तजनाश्रमात् ।
ददृशुस्तां दुराधर्षां किष्किन्धां वालिपालिताम् ॥ २९ ॥

ततस्तु रामानुजरामवानराः
प्रगृह्य § शस्त्राण्यु[3]दितोग्रतेजसः ।
पुरीं सुरेशात्मजवीर्यपालितां
वधाय शत्रोः पुनरागताः सह ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे त्रयोदशः सर्गः

नग(३०)मानः सर्गः ॥ ३० ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे त्रयोदशः सर्गः

---

* सम्बन्धसामान्यविवक्षया षष्ठी—रा. † अशुभं—व्याध्यादिकं-गो. शोकादिकं—रा. ‡ महात्मानः—महात्मनः-गो. ति. रा. § शस्त्राणि—वानराणां शस्त्रं शिलादि—ति.

[1] ऋषीणां—ज. [2] विद्यते—ज. [3] दिताग्रय—ङ.

चतुर्दशः सर्गः

[सुग्रीवगर्जनम्]

*सर्वे ते त्वरितं गत्वा किष्किन्धां [1]वालिपालिताम् ।
†वृक्षैरात्मान[2]मावृत्य व्यतिष्ठन् गहने वने ॥ १ ॥

अथ रामप्रेरितसुग्रीवेण पुनः वाल्याह्वानम् । सर्वे त इत्यादि । गहने—निबिडे निष्प्रवेशे चेत्यर्थः ॥ १ ॥

[3]विचार्य सर्वतो दृष्टिं कानने काननप्रियः ।
सुग्रीवो विपुलग्रीवः क्रोधमाहारयन् भृशम् ॥ २ ॥

ततः स निनदं घोरं कृत्वा युद्धाय चाह्वयत् ।
परिवारैः परिवृतः नादैर्भिन्दन्निवाम्बरम् ।
गर्जन्निव महामेघः वायुवेगपुरस्सरः ॥ ३ ॥

आह्वयत्—आह्वयतेति यावत् । वायोः वेगः पुरःसरः यस्य मेघस्य स तथा ॥ ३ ॥

अथ बालार्कसदृशः दृप्तसिंहगतिस्तदा ।
दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत् ॥ ४ ॥

बालार्कसदृश इति । वर्णेन प्रतापेन चेति शेषः ॥ ४ ॥

---

*अथ वाल्याह्वानभीतं सुग्रीवं निश्वासयति रामः—सर्व इत्यादि—**गो.**
† वृक्षैरात्मानमाच्छाद्य—घर्मनिवारणार्थं वृक्षाधः स्थित्वा—**रा.**

[1] वालिनः पुरीम्—**च. ज.** [2] माच्छाद्य—**ज.** [3] विसार्य—**च. ज.**

*हरिवागुरया व्याप्तां तप्तकाञ्चन[1]तोरणाम् ।
[2]प्राप्ताः [3]प्राकारयन्त्राढ्यां किष्किन्धां [4]वालिनः पुरीम् ॥

हरिवागुरा—हरीणां—शत्रुवानराणां प्राकारोपरि प्लवननिरोधिनी प्राकाराग्रप्रतिष्ठापिता वागुरा तथा, तया व्याप्तप्राकारपरिक्षेपाम् । प्राकारयुद्धापेक्षितानि यंत्राणि—प्राकारयंत्राणि, तैः आढ्या तथा ॥ ५ ॥

प्रतिज्ञा या त्वया, वीर! कृता वालिवधे पुरा ।
सफलां तां कुरु क्षिप्रं †लतां काल इवागतः ॥ ६ ॥

आगतः कालः—ऋतुविशेषलक्षणः, सः यथा लतां प्राक् सपुष्पां सफलां करोति, तथा त्वत्कृतप्रतिज्ञां त्वमपि सफलां कुरु इत्यर्थः ॥ ६ ॥

एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः ।
तमथोवाच सुग्रीवं वचनं शत्रुसूदनः ॥ ७ ॥
कृताभिज्ञानचिह्नस्त्वं अनया ‡ [5]नागसाह्वया ।
लक्ष्मणेन समुत्पाट्य यैषा कण्ठे कृता तव ॥ ८ ॥

कृतं अभिज्ञानसाधकं चिह्नं यस्य स तथा । नागेन-गजेन समाना आह्वा—संज्ञा यस्याः सा तथा, तया नागसाह्वया । "आख्याह्वे अभिधानं च" । कण्ठे कृतेति । कल्पितेति यावत् ॥ ८ ॥

---

*हरिवागुरया व्याप्तां—वागुराकारतया स्थितहरिकां—ति. हरय एव वागुरा—मृगग्रहणपाशः, तया व्याप्तां, इतरदुष्प्रवेशामित्यर्थः । यद्वा हरिवागुरया—हरिग्रहैः, जात्येकवचनम्—गो. † लतां पुष्पितवल्लरीं—रा. फलशब्दस्य प्रयोजन-सामान्यवाचित्वात्, लतां कालः यथा कुसुमितां करोति तथेति वा । ‡ गजपुष्प्यामेव गजसा शब्दः । यद्वा गजेन समा आह्वा यस्याः—गो.

[1] भूषणाम्—च. ज. [2] पश्य प्राकारयंत्राढ्यां—झ. [3] रम ध्वजयंत्राढ्यां—ङ. ज.
[4] वालिपालिताम्—ङ. [5] गजसाह्वया—ङ.

शोभसे ह्यधिकं, वीर! लतया कण्ठसक्तया।
***विपरीत इवाकाशे सूर्यो नक्षत्रमालया ॥ ९ ॥**

†तरुणार्कवर्णस्य कण्ठे शुक्लपुष्पलतया संवेष्टितस्य सुग्रीवस्य उपमा उच्यते--"विपरीत इवाकाशे सूर्यो नक्षत्रमालया" इति। अभूतोपमेयम्। सूर्यः नक्षत्रमालया सप्तविंशतिनक्षत्रचक्रेण आकाशे विपरीतः--विशेषेण परीतः—वेष्टितः यदि भवति तद्वदित्यर्थः। अत्र ‡यद्वाभट्टाः असंगतं यत्किञ्चित् प्रलपंति—तदुपेक्ष्यम् ॥ ९ ॥

[1]अद्य वालिसमुत्थं ते भयं वैरं च, वानर!
एकेनाहं §प्रमोक्ष्यामि बाणमोक्षेण संयुगे ॥ १० ॥

एकेनेति। न द्वितीयेनेति महाबलत्वात् प्रतिजानीते ॥ १० ॥

मम दर्शय, सुग्रीव! वैरिणं भ्रातृरूपिणम्।
[2]वाली विनिहतो यावत् वने पांसुषु [3]वेष्टते ॥ ११ ॥

---

*विपरीते—रात्रौ। सूर्यः—पूर्णचन्द्रः, 'परीतं तु दिवा प्रोक्तं विपरीतं तु शर्वरी। राकामध्यगतश्चन्द्रः सूर्य इत्यभिधीयते' इति वचनात्। यद्वा नक्षत्रमालया विपरीतः—विशेषेण परिवृतः सूर्य इव—चन्द्र इव। अन्यशब्देनान्यस्याभिधानं कथमिति चेत्, 'नवो नवो भवति' इति श्रुतौ अह्नां केतुः—सूर्यः चन्द्राप्यायकत्वात् चन्द्रमा इत्युच्यते। तद्वत् चन्द्रोऽपि सूर्यकिरणानुप्रवेशायत्तप्रकाशविशेषवत्त्वात् सूर्यशब्देनाभिधीयत इति। यद्वा विशेषेण परीतः—विपरीतः—नक्षत्रावृतः सूर्य इवेत्यभूतोपमा। विपरीत इत्यनेन तात्कालिकतेजोवत्त्वमुच्यते। यद्वा विपरीते—विपरीतकाले सूर्यो नक्षत्रमालयेवानया लतया शोभसे। उत्पातकाले हि मध्याह्ने नक्षत्राणि दृश्यन्त इत्युच्यते ज्योतिश्शास्त्रे—'रात्राविन्द्रधनुर्दर्शे दिवा नक्षत्रदर्शने। तद्राष्ट्रनाथनाशः स्यात् इति गर्गस्य भाषितम्' इति-**गो.** †'सुग्रीवो हेमपिङ्गलः' (किष्कि. 14-19) इत्यादि अत्र स्मर्तव्यम्। ‡गोविन्दराजः। §प्रमोक्ष्यामि—प्रमोचयिष्यामि-**ति.**

[1] अद्येत्यर्धं नास्ति-**झ.** [2] क्षिप्रं-**ङ.** [3] चेष्टते-**ज.**

विनिहतः पांसुषु वेष्टते यावत्——विलुठिष्यतीत्यर्थः । मद्दर्शनानन्तरमेवेति शेषः ॥ ११ ॥

यदि दृष्टिपथं प्राप्तः जीवन् स विनिवर्तते ।
*ततो दोषेण [1] मा गच्छेत् सद्यो गर्हेच्च मा भवान् ॥१२॥

उक्त एवार्थः स्पष्टीक्रियते——यदीत्यादि । यदि जीवन् भूत्वा निवर्तते ततः——तदा भवान् मा——मां दोषेण—मिथ्याप्रतिज्ञत्वदोषेण उपलक्षितं गच्छेत्—अवगच्छेत्, तत एव मा——मां गर्हेच्च ॥ १२ ॥

†प्रत्यक्षं सप्त ते सालाः मया बाणेन दारिताः ।
तेनावेहि बलेनाद्य वालिनं निहतं [2] मया ॥ १३ ॥

नेदानीं त्वया किमपि वक्तव्यं, अपि तु मद्बलस्य दृष्टत्वात् वालिनं निहतमेवावेहीत्याह—प्रत्यक्षमित्यादि ॥ १३ ॥

अनृतं नोक्तपूर्वं मे, [3] वीर! कृच्छ्रेऽपि तिष्ठता ।
धर्मलोभपरीतेन न च वक्ष्ये कथं च न ॥ १४ ॥

कृच्छ्रेऽपि—प्राणसंकटेऽपि तिष्ठता मे इति । मयेत्यर्थः । धर्मलोभेन—धर्मप्रेप्सया परीतेन—व्याप्तचित्तेन अनृतं नोक्तपूर्वं इति पूर्वेणान्वयः ॥ १४ ॥

सफलां च करिष्यामि प्रतिज्ञां, जहि संभ्रमम् ।
‡[4] प्रसूतं कलमं क्षेत्रे वर्षेणेव शतक्रतुः ॥ १५ ॥

---

*यदि पुनः अहं तूष्णीं भवेयं, तर्ह्यागच्छ मां यथेच्छं निन्द—इति लोकवदुक्तिः ।
†ते प्रत्यक्षमित्यन्वयः । ‡ 'लतां काल इवागतः' इति सुग्रीवेण प्रार्थने, ततोऽपि विशिष्टं फलं संपादयामीत्याशयेनाह—प्रसूतमित्यादि । कलमं—व्रीहिसस्यम् ।

[1] मां—ज. [2] रणे—ज. [3] कृच्छ्रे महति—ङ. चिरं कृच्छ्रेऽपि-ज.
[4] प्रभूतकलमं क्षेत्रं—ङ. प्रसूतं कलमं क्षेत्रं—च. ज.

सफलां करिष्यामीत्यत्र दृष्टान्तः—प्रसूतमित्यादि । अङ्कुरितमिति यावत् ॥ १५ ॥

तदाह्वाननिमित्तं त्वं वालिनो हेममालिनः ।
सुग्रीव ! कुरु तं शब्दं निष्पतेद्येन वानरः ॥ १६ ॥

*[1] जितकाशी बलश्लाघी त्वया चाधर्षितः [2] पुरा ।
निष्पतिष्यत्यसङ्गेन वाली स प्रियसंयुगः ॥ १७ ॥

जितकाशी—जितभयः । त्वया आधर्षितश्च सन् पुरा येन निष्पतेत्, तं शब्दं कुरु इत्यन्वयः । असङ्गेन—स्त्र्यादिसङ्गपरित्यागेन । प्रियं संयुगं यस्य स तथा ॥ १७ ॥

रिपूणां [3] धर्षणं शूराः मर्षयन्ति न संयुगे ।
जानन्तस्तु स्वकं [4] वीर्यं † स्त्रीसमक्षं विशेषतः ॥ १८ ॥

संयुगे—संयुगविषये । विशेषत इति । न मर्षयन्तीत्यनुषङ्गः ॥ १८ ॥

स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः ।
ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम् ॥ १९ ॥

---

* जितेन—जयेन काशते—प्रकाशत इति जितकाशी असङ्गेन–अविलम्बेन–**गो.** असङ्गेन— सर्वान्यपरित्यागेन । अत्र वाली नूनं पुनरागच्छेदित्यत्र हेतुः—त्वया चाधर्षित इति । यतः त्वया पूर्वं न पराजितः, अतः विना भयमागच्छेदिति वा । † स्त्रीसमक्षमित्यनेन तदानीं सायंकाल इत्यवगम्यते, ‘प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया । सायं कामेन पीडयन्ते जन्तवो निशि निद्रया’ इति वचनात्–**गो.**

[1] जयश्लाघी–**ङ.** [2] पुरात्–**ङ. ज.** [3] धर्षितं–**च. ज.** [4] धैर्यं–**ङ.**

तस्य शब्देन वित्रस्ताः * गावो यान्ति [1] हतप्रभाः ।
† राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः ॥ २० ॥

गावः—धेनवः बलीवर्दाश्च, हतप्रभाः—हतशक्तयः । राज्ञो दोषेण—रागदोषेण परामृष्टाः स्पृष्टाः । अपि च राज्ञः प्रजारक्षणाभावदोषेण परैः—अन्यपुरुषैः आमृष्टाः तथा ॥ २० ॥

द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः ।
पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः ॥ २१ ॥

ग्रहाः—देवाः इत्यर्थः ॥ २१ ॥

ततः स जीमूत [2] गणप्रणाद:
नादं ह्यमुञ्चत् त्वरया प्रतीतः ।
सूर्यात्मजः शौर्यविवृद्धतेजाः
‡ सरित्पतिर्वाऽनिलचञ्चलोर्मिः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चतुर्दशः सर्गः

शौर्ये पराक्रमकरणे विवृद्धं तेजः यस्य स तथा । सरित्पतिर्वा- समुद्र इवेत्यर्थः । खर(२२)मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चतुर्दशः सर्गः

---

* गावः इत्यनेन गवां पुरप्रवेशकालसूचनात् तत्कृतस्य सायंतनत्वं गम्यते—गो.

† राजदोषेण—अराजकत्वरूपदोषेण परैः—परपुरुषैः आमृष्टाः—केशेषु गृहीताः—गो.

‡ सरित्पतिर्वा—समुद्र इव—ति.

[1] गत—ङ. [2] कृत—च. ज.

पञ्चदशः सर्गः

[ताराहितवचनम्]

अथ तस्य निनादं तु सुग्रीवस्य * महात्मनः ।
शुश्रावान्तःपुरगतः वाली भ्रातुरमर्षणः ॥ १ ॥

अथ युद्धाय विनिष्क्रान्तं वालिनं नानान्यायतो वारयति तारा । अथ तस्येत्यादि ॥ १ ॥

श्रुत्वा तु तस्य निनदं सर्वभूतप्रकम्पनम् ।
† मदश्चैकपदे नष्टः क्रोध [1] श्चापादितो महान् ॥ २ ॥

एकपदे—तत्क्षणे । आपादितः—संपादितः ॥ २ ॥

स तु रोषपरीताङ्गः वाली [2] संध्यातपप्रभः ।
उपरक्त इवादित्यः सद्यो ‡ निष्प्रभतां गतः ॥ ३ ॥

स त्वित्यादि । स्वतः कनकप्रभस्य क्रोधवशात् आरुण्ये सति सहजप्रभायाः नष्टत्वतः उपरक्तादित्यदृष्टान्तः ॥ ३ ॥

§ वाली दंष्ट्राकरालस्तु क्रोधात् दीप्ताग्नि [3] संनिभः ।
भात्युत्पातितपद्माभः समृणाल इव ह्रदः ॥ ४ ॥

उत्पतितानि—उत्पाटितानि पद्मानि यस्य सः उत्पतितपद्मः । अयं शब्दः आवर्तते । उत्पतितपद्मत्वात् उत्पतिता—नष्टा पद्माभा—

---

* महात्मनः—महाधैर्यस्य-गो. † एकपदे—तस्मिन्नेव क्षणे मदः—मत्तः सर्वेऽपि बिभ्यतीति गर्वः-रा. अन्तःपुरगतत्वात् तदधीनबुद्ध्यपारवश्यं वा मदः । ‡ अनेन प्रथमवारसुग्रीवगर्जनापेक्षया वैलक्षण्यं सूचितम् । § दंष्ट्राणां मृणालतुल्यत्वं कोपसंरक्तमुखस्य पद्मत्वं च बोध्यम् ।

[1] आपतितो-ङ. [2] स कनकप्रभः-च. ज. [3] लोचनः-ज. झ.

पद्मजनितशोभा यस्य स तथा। समृणाल इति वालिनोऽपि शुक्ल-दंष्ट्राकरालत्वात् उपमानम् ॥ ४ ॥

शब्दं दुर्मर्षणं श्रुत्वा निष्पपात ततो हरिः।
वेगेन चरणन्यासैः दारयन्निव मेदिनीम् ॥ ५ ॥

दुर्मर्षणं—मर्षितुमशक्यम्। वेगेन—वेगोपेततया ॥ ५ ॥

तं तु तारा परिष्वज्य स्नेहाद्दर्शितसौहृदा।
उवाच त्रस्तसंभ्रान्ता हितोदर्कमिदं वचः ॥ ६ ॥

दर्शितसौहृदा—दर्शितमैत्री। त्रस्तसंभ्रान्ता इति *पुंवद्भावः। त्रस्ता-भीता, संभ्रान्ता-क्षुभितचित्ता। हितं उदर्के-उत्तरकालफलं यस्मिन् तत् तथा ॥ ६ ॥

साधु क्रोधमिमं, वीर! नदीवेगमिवागतम्।
शयनादुत्थितः काल्यं त्यज भुक्तामिव स्रजम् ॥ ७ ॥

साधु त्यज—सम्यक् परित्यज। तत्र दृष्टान्तः—काल्यं शयनादुत्थितः भुक्तां स्रजमिवेति। काल्यं—प्रातःकाले ॥ ७ ॥

काल्यमेतेन संग्रामं करिष्यसि च, वानर!
†वीर! ते शत्रुबाहुल्यं [1]लघुता वा न विद्यते ॥ ८ ॥
सहसा तव निष्क्रामः मम तावन्न रोचते।
श्रूयतां चाभिधास्यामि यन्निमित्तं [2]निवार्यसे ॥ ९ ॥

---

* पुंवद्भाव इति। कर्मधारयसमास इति शेषः। † ते—तव शत्रोः बाहुल्यं आधिक्यं, त्वत्त इति शेषः। तव शत्रुः यद्यपि न त्वत्तोऽपि प्रबलः, न वा त्वं तदपेक्षया दुर्बलः।

[1] फल्गुता—ङ. [2] निवार्यते—ज.

तथा काल्यं--प्रातःकाल एव तेन सह संग्रामं करिष्यसि, नेदानीं रात्रौ। हे वीर! यद्यपि ते संग्रामे शत्रुबाहुल्यं-शत्रोः भूयस्त्वं वा, तव लघुता-अल्पता वा न विद्यते, अथापि सहसा-हठात् तावत्-अद्य निष्क्रामः-निष्क्रमणं मम न रोचते। कुतः इत्यत आह—श्रूयतामित्यादि ॥ ८-९॥

*पूर्वमापतितः क्रोधात् स त्वामाह्वयते युधि।
निष्पत्य च [1]निरस्तस्ते हन्यमानो दिशो गतः ॥ १०॥

पूर्वं क्रोधादापतितः सुग्रीवः यदा त्वां युधि-युद्धे-युद्धनिमित्तं आह्वयते स्म, तदा त्वया च निष्पत्य निरस्तः, ते-त्वया हन्यमानः दिशः गतः--गतवान् ॥ १०॥

त्वया तस्य निरस्तस्य पीडितस्य विशेषतः।
इहैत्य पुनराह्वानं शङ्कां जनयतीव मे ॥ ११॥

किं ततः? इत्यत आह—त्वयेत्यादि। त्वया निरस्तस्य—पूर्वमेव निराकृतस्य विशेषतः इदानीं पीडितस्य च सतः पुनश्च इदानीं एत्य-आगत्य आह्वानं मे शङ्कां जनयतीव--जनयत्येव ॥ ११॥

दर्पश्च व्यवसायश्च यादृशस्तस्य नर्दतः।
[2]निनादस्यापि संरम्भः, †नैतदल्पं हि कारणम् ॥१२॥

---

* श्लोकद्वयमेकान्वयम्। पूर्वमापतितः ते—त्वया क्रोधान्निष्पत्य यो युधि निरस्तः, हन्यमानो दिशो गतश्च, स त्वामाह्वयते-**गो.**   † एतत्—एतस्य-**ति. रा.** अस्य एतत्कारणं-**गो.**

[1] निरस्यस्ते-**ङ.**   [2] निनादश्चापि-**ङ.**

कुतः इत्यत आह--दर्प इत्यादि। नर्दतः तस्य दर्पश्च--गर्वश्च पुनरपि युद्धे व्यवसायश्च यादृशः अनुभूयते, ईदृशदर्पाद्यनुमापकस्य तस्य निनादस्य संरंभः--प्रवृद्धिः हि--यस्मात् वर्तते, तस्मात् एतदुपपादककारणं अल्पं न॥ १२॥

नासहायमहं मन्ये सुग्रीवं तमिहागतम्।
***अवष्टब्धसहायश्च यमाश्रित्यैष गर्जति॥ १३॥**

विमतः संरंभः कारणविशेषपूर्वकः भवितुं अर्हति, कार्यविशेषत्वात् इति सामान्यानुमितं कारणविशेषं निष्कृष्य दर्शयति--नासहायमित्यादि। अवष्टब्धः--परिगृहीतः सहायो येन स तथा। चः अवधारणे। अवष्टब्धसहाय एव--सर्वथा सहायावष्टंभमूल एवायं संरंभः इत्यर्थः। यं--सहायावष्टंभम्॥ १३॥

प्रकृत्या निपुणश्चैव बुद्धिमांश्चैव वानरः।
[1]नापरीक्षितवीर्येण सुग्रीवः [2]सख्यमेष्यति॥ १४॥

तस्य सुसहायसंपादनादौ सामर्थ्यं च सम्भावितमेवेत्याशयेनाह--प्रकृत्येत्यादि। निपुणः--उचितकृत्यनिष्पादनसमर्थः, तत्प्रवर्तनक्षमबुद्धिमांश्च। नन्वस्तु सहायः कश्चित्, तस्यापि एकोऽङ्गुलिर्भविष्यतीति का मे भीतिः? इति मन्यमानं प्रत्याह--नापरीक्षितेति। अपरीक्षितशत्रुसंहारवीर्यवता पुरुषेण सह सुग्रीवः सख्यं नैति, अतः शङ्कनीय एव तत्सहायभूतः पुमान्॥ १४॥

पूर्वमेव [3]मया, वीर! श्रुतं कथयतो वचः।
अङ्गदस्य कुमारस्य वक्ष्यामि त्वा †हितं वचः॥ १५॥

---

* अवष्टब्धसहायः--आश्रितसहायः। † हितं--सुग्रीवस्य सखायं कथयतः--रा.

[1] अपरीक्षित--ङ. झ. [2] सह नैष्यति--ङ. झ. [3] महावीर--ङ.

न केवलं मया अनुमितं तत्सहायप्राबल्यं, अपि तु शब्दप्रमाणमपीत्याह––पूर्वमेवेत्यादि। कथां कथयतः अङ्गदस्य कुमारस्य यद्वचो मया श्रुतं, तव हितं तद्वचः त्वां प्रति वक्ष्यामि ॥ १५ ॥

अङ्गदस्तु कुमारोऽयं * वनान्तमुपनिर्गतः।
प्रवृत्तिस्तेन कथिता चारै[1]राप्तैर्निवेदिता ॥ १६ ॥

प्रतिज्ञातं प्रतिपादयति–अङ्गदस्त्वित्यादि। वनान्तं–वनमध्यम्। प्रवृत्तिः–सुग्रीववृत्तान्तः ॥ १६ ॥

अयोध्याधिपतेः पुत्रौ शूरौ समरदुर्जयौ।
इक्ष्वाकूणां कुले जातौ [2]प्रथितौ रामलक्ष्मणौ ॥
सुग्रीवप्रियकामार्थं प्राप्तौ तत्र दुरासदौ ॥ १७ ॥

तत्र––तयोर्मध्ये ॥ १७ ॥

† तव भ्रातुर्हि विख्यातः सहायो रण[3]कर्कशः।
रामः परबलामर्दी युगान्ताग्निरिवोत्थितः ॥ १८ ॥
‡ निवासवृक्षः साधूनां आपन्नानां परा गतिः।
आर्तानां संश्रयश्चैव यशसश्चैकभाजनम् ॥ १९ ॥

---

* वनान्तं–वनसमीपं गत्वेति शेषः–**रा.** † एकस्य स्वरूपकथनेनान्यस्यापि स्वरूपमर्थादुक्तं भवतीति मत्वा प्रधानभूतरामस्वरूपमाह––तवेति–**गो.** ‡ यथा वृक्षः प्रथमं तापमपहृत्य पुष्पफलादिना सर्वेन्द्रियतर्पणः तथाऽयमित्यर्थः। अत्र 'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन! आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ' (गी.७–१६) इत्युक्ताश्चतुर्विधाधिकारिण उच्यन्ते। साधूनां–जिज्ञासूनां, आपन्नानां–अपूर्वैश्वर्यकामानां, आर्तानां—भ्रष्टैश्वर्यकामानां, यशसः—'ज्ञानी त्वात्मैव मे मतम्' इत्युक्तयशोयुक्तस्य–**गो.**

[1] राप्तीन्निवेदिता–**ज.** [2] प्रस्थितौ–**च. ज.** [3] कर्मणि–**च. ज.**

निवासवृक्षः—अचलाश्रयभूतः । साधूनां—सात्त्विकानाम् । विशिष्य आपन्नानां—शरणागतानां परा गतिः—प्रतिष्ठा । आर्तानां—शत्रुपीडितानां तद्विनाशाय संश्रयः—संश्रयणार्हः ॥ १९ ॥

*ज्ञानविज्ञानसंपन्नः निदेशे निरतः पितुः ।
धातूनामिव शैलेन्द्रः गुणानामाकरो महान् ॥ २० ॥

ज्ञानविज्ञाने ब्रह्मधर्मविषये ॥ २० ॥

तत् †[1]क्षमं न विरोधस्ते सह तेन महात्मना ।
दुर्जयेनाप्रमेयेन रामेण रणकर्मसु ॥ २१ ॥

तत्—तस्मात् तेन—उच्यमानगुणकेन रामेण सह विरोधः ते—तव न क्षमं—अयुक्तम् , अव्ययमिदम् ॥ २१ ॥

शूर! वक्ष्यामि ते किञ्चित् ‡ न चेच्छाम्यभ्यसूयितुम् ।
श्रूयतां क्रियतां चैव तव वक्ष्यामि यद्धितम् ॥ २२ ॥

किञ्चिदिति वक्ष्यमाणलक्षणम् । त्वया अभ्यसूयितुं नेच्छामि, "देवदत्तं भोक्तुमिच्छामि" इत्यादिवत् क्वचित् असमानकर्तृकेषु तुमुन् । कथं इयं मां प्रति वक्ति? इति अभ्यसूया न कर्तव्येत्यर्थः ॥

---

* ज्ञानं—ब्रह्मज्ञानं, विज्ञानं—धर्मविषयं, शिल्पनैपुणं वा—ति. ज्ञानेन—सकलशास्त्रविषयकबोधेन, विज्ञानेन—वेदवर्णितसकलवस्तूनां साक्षादनुभवेन च संपन्नः—रा. ज्ञानं लौकिकज्ञानं, विज्ञानं—शास्त्रजन्यज्ञानम्—गो. † न क्षमं—न शक्यं इति वा। ‡ त्वया अभ्यसूयितुं नेच्छामि—कथमियं मां प्रति वदतीति मय्यसूया न कर्तव्येत्यर्थः—ति. त्वद्विषये अभ्यसूयितुं—दोषाविष्करणं कर्तुं कदाचिदपि नेच्छामीत्यर्थः। यद्वा मया वक्ष्यमाणे हिते त्वयाऽभ्यसूया न कार्येत्यर्थः—गो. अथवा अभ्यसूयितुमिति अन्तर्भावितणिः। असूयामुत्पादयितुं रामगुणा न वर्णिताः, किन्तु वस्तुस्थितिरुक्तेत्यर्थः ॥

[1] क्षमो—च. ज.

यौव[1]राज्येन सुग्रीवं तूर्णं साऽभिषेचय ।
[2]विग्रहं मा कृथाः, वीर! भ्रात्रा, राजन्! [3]बलीयसा ॥

अस्तु, किं तत्? इत्यपेक्षायामाह—यौवराज्येनेत्यादि । * बलीयसा रामेणेत्यन्वयः ॥ २३ ॥

अहं हि ते क्षमं मन्ये तेन रामेण सौहृदम् ।
सुग्रीवेण च संप्रीतिं वैरमुत्सृज्य दूरतः ॥ २४ ॥
लालनीयो हि ते भ्राता यवीयानेष वानरः ।
तत्र वा सन्निहस्थो वा सर्वथा बन्धुरेव ते ॥ २५ ॥

तत्र—तस्मिन् देशे वा सन्—विद्यमानः, इह—त्वत्समीपे वा ॥

न हि तेन समं बन्धुं भुवि पश्यामि कञ्चन ।
दानमानादिसत्कारैः कुरुष्व †प्रत्यनन्तरम् ॥ २६ ॥

प्रत्यनन्तरं—समीपस्थं ॥ २६ ॥

वैरमेतत् समुत्सृज्य तव पार्श्वे स तिष्ठतु ।
सुग्रीवो विपुलग्रीवः [4]तव बन्धुः सदा मतः ॥ २७ ॥
‡भ्रातुः सौहृद[5]मालम्ब्य नान्या गतिरिहास्ति ते　८ ॥

इह—अस्मिन् तत्सहायसंपात्तिकाले ॥ २८ ॥

---

* उत्तरश्लोकस्थरामपदेनेत्यर्थः । प्रबलरामाश्रितत्वात् बलीयसा भ्रात्रा—इति वा ।

† प्रत्यनन्तरं—त्वदनन्तरं समीपवर्तिनं—गो. प्रत्यनन्तरं—स्वाधीन—ति. ‡ भ्रातुः सौहृदमालम्ब्यैव तव गतिः, नान्या गतिरस्ति—ति. भ्रातुः सौहृदमालम्ब्य वर्तमानस्य तव—रा. आलम्ब(पा.)—आलम्बस्व—गो.

[1] राज्ये तु—ङ. [2] विरोधं—ङ. [3] यवीयसा—च. ज [4] महान् बन्धुर्मतस्तव—च, ज. [5] मालम्ब—ङ.

यदि *ते मत्प्रियं कार्यं यदि चावैषि मां हिताम् ।
याच्यमानः [1]प्रयत्नेन साधु वाक्यं कुरुष्व मे ॥ २९ ॥

यदि ते इति । त्वयेत्यर्थः ॥ २९ ॥

प्रसीद पथ्यं शृणु जल्पितं हि मे
न रोषमेवानुविधातुमर्हति ।
क्षमो हि ते कोसलराजसूनुना
न विग्रहः †शक्रसमानतेजसा ॥ ३० ॥

तदा हि तारा हितमेव वाक्यं
तं वालिनं पथ्यमिदं बभाषे ।
न रोचते तद्वचनं हि तस्य
कालाभिपन्नस्य विनाशकाले ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चदशः सर्गः

तदा हीत्यादि कविवाक्यम् । काल(३१)मानः सर्गः ॥ ३१ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चदशः सर्गः

---

* ते—तव—**रा.** ते हितां मां इत्यप्यन्वयः । †अनेन बालिनो रामस्याविक्रयमुक्तम्—**गो.** वाली हि शक्रपुत्रः ।

[1] प्रियत्वेन—**च. ज.**

षोडशः सर्गः

[वालिसंहारः]

तामेवं ब्रुवतीं तारां ताराधिपनिभाननाम् ।
वाली निर्भर्त्सयामास वचनं चेदमब्रवीत् ॥ १ ॥

अथ वालिवधः । तामेवमित्यादि ॥ १ ॥

गर्जतोऽस्य [1]च *संरब्धं भ्रातुः शत्रोर्विशेषतः ।
मर्षयिष्याम्यहं केन कारणेन, वरानने ! ॥ २ ॥

संरब्धमिति भावे निष्ठा । केनेति । न केनापि कारणेन त्वदुक्तेनेत्यर्थः ॥ २ ॥

अधर्षितानां शूराणां [2]समरेष्वनिवर्तिनाम् ।
धर्षणामर्षणं, भीरु ! मरणादतिरिच्यते ॥ ३ ॥

धर्षणायाः मर्षणं तथा । 'न्यासश्रन्थ' इति स्त्रीत्वात युच् ॥ ३ ॥

सोढुं न च समर्थोऽहं युद्धकामस्य संयुगे ।
सुग्रीवस्य च संरम्भं †हीनग्रीवस्य [3]गर्जतः ॥ ४ ॥

संयुगे संरम्भमित्यन्वयः ॥ ४ ॥

न च कार्यो विषादस्ते राघवं प्रति मत्कृते ।
धर्मज्ञश्च कृतज्ञश्च कथं ‡पापं करिष्यति ॥ ५ ॥

---

* सुसंरब्धं (पा.)— गर्वं–**रा.** † हिशब्द एवार्थे । इ- ग्रीवस्य— इना— श्रेष्ठा— विपुला ग्रीवा यस्य तस्य–**रा.** हीनग्रीवस्येति परुषोक्तिः–**गो.** सुग्रीवपद-प्रतिकोटितया लोकवत् आक्रोशादेवमुक्तिः । ‡ पापं–निरपराधवधं–**गो.**

[1] सुसंरम्भं–**ङ.** [2] संयुगेष्व–**ङ.** [3] गर्जितम्–**च. ज.**

राघवं प्रतीति। राघवनिमित्तभयमालक्ष्य मत्कृते ते—त्वया विषादः न कार्यः। कुत एवं? इत्यतः—धर्मज्ञ इत्यादि ॥ ५ ॥

निवर्तस्व सह स्त्रीभिः कथं [1] भूयोऽनुगच्छसि?।
सौहृदं दर्शितं, तारे! मयि भक्तिः कृता त्वया ॥ ६ ॥

कथं भूयोऽनुगच्छसीति। निवर्तस्वेत्युच्यमानेऽपीति शेषः। भक्तिः—अनुरागः ॥ ६ ॥

प्रतियोत्स्याम्यहं गत्वा सुग्रीवं, जहि संभ्रमम्।
[2] दर्पं चास्य विनेष्यामि *न च प्राणैः [3] विमोक्ष्यते ॥ ७ ॥

दर्पं च—दर्पमेव। न विमोक्ष्यते—न विमोचयिष्यते। सोदरत्वात्, अलस(क्ष्य)त्वात्, स्वसुखानपहारकत्वात् तदसमर्थत्वा-च्चेत्याशयः ॥ ७ ॥

अहं ह्याजिस्थितस्यास्य करिष्यामि †[4] यथेप्सितम्।
वृक्षैर्मुष्टिप्रहारैश्च पीडितः प्रतियास्यति ॥ ८ ॥

उक्तमेवार्थं विवृणोति—अहं हीत्यादि। यथेप्सितमिति। यथा कर्तुमभीप्सितं तथा करिष्यामि। दर्पमेव मोचयिष्यामीत्यर्थः। तदेव दर्शयति—वृक्षैरित्यादि। वृक्षप्रहारैरित्यर्थः ॥ ८ ॥

---

* 'सर्वथा बन्धुरेव सः' इति तारोक्तेरुत्तरमाह—न चेत्यादि। † यद् त्वया ईप्सितं (पा.)—अस्य वधो न भवेदिति वाञ्छितं, तदहं करिष्यामि—**रा.** यथेप्सितं—ईप्सितं तत्प्राणरक्षणमनतिक्रम्य—**गो.**

[1] मामनु—**ङ.** [2] दर्पमात्रं—**ङ.** [3] वियोक्ष्यते—**ङ.**, वियोक्ष्यते—**च. ज.** [4] यदीप्सितम्—**च. ज.**

[1] न मे * गर्वितमायस्तं [2] सहिष्यति दुरात्मवान् ।
कृतं, तारे ! सहायत्वं सौहृदं दर्शितं मयि ॥ ९ ॥
शापिताऽसि मम प्राणैः निवर्तस्व [3] जनेन च ।
† अलं जित्वा निवर्तिष्ये तमहं भ्रातरं रणे ॥ १० ॥

गर्वितं—दर्पप्रवृत्तं, आयस्तं, भावे निष्ठा, दृढयत्नम् । सहायत्वमिति । बुद्धिसाचिव्यमित्यर्थः । निवर्तस्व जनेन—स्वपरिवारजनेन सहेत्यर्थः । अलं जित्वा—जयित्वा ॥ ९–१० ॥

तं तु तारा परिष्वज्य वालिनं प्रियवादिनी ।
चकार रुदती मन्दं दक्षिणा सा प्रदक्षिणम् ॥ ११ ॥
ततः स्वस्त्ययनं कृत्वा ‡ [4] मंत्रविद्विजयैषिणी ।
अन्तःपुरं सह स्त्रीभिः प्रविष्टा शोकमोहिता ॥ १२ ॥

मंत्रवित्—स्वस्त्ययनमंत्रविदित्यर्थः । दैवतांशत्वादेव तथाऽवगतिः ॥ १२ ॥

प्रविष्टायां तु तारायां सह स्त्रीभिः स्वमालयम् ।
नगरान्निर्ययौ क्रुद्धः महासर्प इव श्वसन् ॥ १३ ॥
[5] स निःश्वस्य [6] महातेजाः वाली [7] परमरोषणः ।
सर्वतश्चारयन्§ दृष्टिं शत्रुदर्शनकांक्षया ॥ १४ ॥

---

* गर्वितं—गर्वविशिष्टं मे आयस्तं—प्रवृत्तिं–रा. गर्वितं–गर्वं— आयस्तं—आयासं, प्रयत्नमिति यावत्–गो. † अलं जित्वा—जयमात्रं कृत्वा निवर्तिष्ये, न तु तद्वधमित्यर्थः । 'अहं जित्वा' इति पाठ(गो.)स्त्वसांप्रदायिकः–ति. अलमिति पूर्वार्धान्वयि वा । ‡ मंत्रवत् (पा.) – स्वस्त्ययनमंत्रवत् । मंत्रश्च वैदिकादन्य इति ज्ञेयः–गो. § चारयन् , प्रस्थित इति शेषः–गो. चारयन् सुग्रीवं ददर्शेति वा ।

[1] नाहं–ङ. [2] सहिष्यामि दुरात्मनः–ङ. [3] जयेन च–ङ. च. [4] मंत्रवत्–ङ. [5] समुत्पत्य–ङ. [6] महारोषः–च., महावेगः–ङ. [7] परमवेगवान्–च.

स ददर्श ततः श्रीमान् सुग्रीवं हेमपिङ्गलम् ।
सुसंवीतमवष्टब्धं* दीप्यमानमिवानलम् ॥ १५ ॥

सुसंवीतं--बद्धकक्ष्यम् । अवष्टब्धं--सन्नद्धम् ॥ १५ ॥

स तं दृष्ट्वा [1] महावीर्यं सुग्रीवं [2] पर्यवस्थितम् ।
गाढं परिदधे वासः वाली [3] परमरोषणः ॥ १६ ॥
स वाली गाढसंवीतः मुष्टिमुद्यम्य [4] वीर्यवान् ।
सुग्रीवमेवाभिमुखः ययौ योद्धुं कृतक्षणः[5] ॥ १७ ॥

गाढसंवीतः--दृढबद्धकक्ष्यः । कृतक्षणः--कृतोत्साहः ॥ १७ ॥

[6] श्लिष्टमुष्टिं समुद्यम्य संरब्धतरमागतः ।
सुग्रीवोऽपि तमुद्दिश्य वालिनं हेममालिनम् ॥ १८ ॥

सुग्रीवोऽपि वालिनं समुद्दिश्य श्लिष्टमुष्टिं समुद्यम्य संरब्धतरं स्थितः इत्यनुकर्षः ॥ १८ ॥

तं वाली क्रोध[7]ताम्राक्षः सुग्रीवं रणपण्डितम् ।
आपतन्तं महावेगं इदं वचनमब्रवीत् ॥ १९ ॥
एष मुष्टि[8]र्मया बद्धः गाढः संनिहिताङ्गुलिः ।
मया वेगविमुक्तस्ते प्राणानादाय यास्यति ॥ २० ॥

वेगविमुक्त इति । त्वदुपरीति शेषः ॥ २० ॥

---

* अवष्टब्धं—युयुत्सया भूमिमाक्रम्य स्थितम्—**गो.**

[1] महाबाहुं–ङ., महाबाहुः—**च.** [2] समुपस्थितम्—**ङ.** [3] समरदुर्मदः—**ङ.** [4] दाक्षिणम्—**ङ.** [5] एतदनन्तरं—सुग्रीवो गाढसंवीतो मुष्टिमुद्यम्य वीर्यवान्। इन्द्रपुत्रं समाहूय ययौ योद्धुं कृतक्षणः ॥–इत्यधिकं **ज. झ.** [6] क्लिष्टमुष्टिं–ङ. [7] ताम्राक्षं—**च.** [8] महान्—**च.**

एवमुक्तस्तु सुग्रीवः क्रुद्धो वालिनमब्रवीत् ।
तवैव चाहरन् प्राणान् मुष्टिः पततु मूर्धनि ॥ २१ ॥

एवमुक्त इति । वालिनेति शेषः । आहरन्—अत्यर्थं हरन् तवैव मूर्ध्नि मुष्टिः पततु । मामकी इति शेषः । पततु इत्यब्रवीदित्यन्वयः ॥ २१ ॥

ताडितस्तेन संक्रुद्धः [1]समभिक्रम्य [2]वेगतः ।
अभवच्छोणितोद्गारी [3]सोत्पीड इव पर्वतः ॥ २२ ॥

ताडित इत्यादि । अथ तं सुग्रीवमभिक्रम्य स्थितेन तेन वालिना वेगतः ताडितः, अत एव संक्रुद्धः बालिप्रहारात् शोणितोद्गारी चासौ सोत्पीडः—सनिर्झरोद्गारः पर्वत इवाभवत् ॥ २२ ॥

सुग्रीवेण तु *[4]निःसङ्गं सालमुत्पाट्य तेजसा ।
गात्रेष्वभिहतो वाली वज्रेणेव महागिरिः ॥ २३ ॥

अथैवंभूतेन सुग्रीवेण तु निःसङ्गं—शोणितोद्गारजदुःखबन्धरहितं यथा तथा वाली अभिहतः अभूत् ॥ २३ ॥

स तु [5]वाली प्रचलितः सालताडनविह्वलः ।
गुरुभार[6]समाक्रान्ता नौः ससार्थेव सागरे ॥ २४ ॥

सागरे नौरिव विह्वलः—परवशः अभवत् ॥ २४ ॥

---

* निस्सङ्गं—बन्धुस्नेहरहितं यथा तथा अभिहत इति वा ।

[1] समतिक्रम्य–ङ. [2] वेगितः–ङ. [3] सापीड–च. [4] निश्शङ्कं–च. [5] वृक्षेण निर्भग्नः–च. [6] समाक्रान्तः नौसार्थ इव–ङ.

तौ भीमबलविक्रान्तौ [1]सुपर्णसमवेगितौ ।
[2]प्रयुद्धौ घोरवपुषौ चन्द्रसूर्याविवाम्बरे ॥
परस्परममित्रघ्नौ छिद्रान्वेषणतत्परौ ॥ २५ ॥

सुपर्णेन समं वेगितं—वेगः ययोस्तौ तथा । प्रकृष्टं युद्धं ययोस्तौ तथा । चन्द्रः—पूर्णचन्द्रः । अमूतोपमा ॥ २५ ॥

ततोऽवर्धत वाली तु बलवीर्यसमन्वितः ।
सूर्यपुत्रो महावीर्यः सुग्रीवः [3]परिहीयते ॥ २६ ॥
वालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ।
वालिनं प्रति सामर्षः दर्शयामास *[4]लाघवम् ॥ २७ ॥
†वृक्षैः सशाखैः सशिखैः वज्रकोटिनिभैर्नखैः ।
मुष्टिभिर्जानुभिः पद्भिः बाहुभिश्च पुनःपुनः ॥ २८ ॥
तयोर्युद्धमभूद्धोरं वृत्रवासवयोरिव ।
तौ [5]शोणिताक्तौ युध्येतां वानरौ वनचारिणौ ॥ २९ ॥
मेघाविव महाशब्दैः तर्जयानौ परस्परम् ॥ ३० ॥

युध्येतां— अयुध्येतामिति यावत् ॥ ३० ॥

हीयमानमथोऽपश्यत् सुग्रीवं वानरेश्वरम् ।
वीक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥ ३१ ॥

---

*राघवं (पा.) दर्शयामास—स्वहानिं बोधयामास—ति. रा. † सिंहावलोकन-न्यायेन तयोर्युद्धमेव वर्णयति—वृक्षैरिति—रा.

[1] सुपर्णानिल—ङ. [2] प्रवृद्धौ—ङ. [3] परिहीयत—च. [4] राघवम्—च. झ. [5] शोणिताक्षौ—ङ.

ततो रामो महातेजाः आर्तं दृष्ट्वा हरीश्वरम् ।
*[1]स शरं वीक्षते वीरः वालिनो वध[2]कारणात् ॥ ३२ ॥

स रामः शरं वीक्षते स्म ॥ ३२ ॥

ततो धनुषि संधाय शरमाशीविषोपमम् ।
पूरयामास तच्चापं †कालचक्रमिवान्तकः ॥ ३३ ॥
तस्य ज्यातलघोषेण त्रस्ताः पत्त्ररथेश्वराः ।
प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥ ३४ ॥
मुक्तस्तु वज्रनिर्घोषः प्रदीप्ता[3]शनिसंनिभः ।
राघवेण महाबाणः वालिवक्षसि पातितः ॥ ३५ ॥

मुक्तो बाणः पातित इति । पतित इति यावत् ॥ ३५ ॥

ततस्तेन महातेजाः [4]वीर्योत्सिक्तः कपीश्वरः ।
वेगेनाभिहतो वाली निपपात महीतले ॥ ३६ ॥
इन्द्रध्वज इवोद्धूतः पौर्णमास्यां महीतले ।
‡आश्वयुक्समये मासि [5]गतश्रीको विचेतनः [6] ॥ ३७ ॥

---

* हरीश्वरं दृष्ट्वा शरं वीक्षते–इति संरंभकाले लोकस्वभावोक्तिः । † कालचक्रं—यमस्यायुधविशेषः–गो. ‡ आश्विनमासे उत्क्षिप्तः इन्द्रध्वजः यथा भूमौ पतेत्, तथा वाली ग्रीष्मान्ते पतित इत्यर्थः । अत एव सुग्रीवाभिषेकसमये श्रावणो मासोऽधुना वर्तत इति वचनेन (२६–१४) न विरोधः–रा. गौडदेशे कस्मिंश्चिदुत्सवे आश्विनपूर्णिमायामिन्द्रमुद्दिश्य ध्वजं संस्थाप्य उत्सवोत्तरं प्रक्षिपन्तीति प्रसिद्धम्–रा.

[1] सज्यं चक्रे धनुः, शरं च वीक्षते–ङ. [2] काङ्क्षया च. [3] नल–ङ. [4] वीर्ययुक्तः–च. ज. [5] गतसत्त्वः–च. ज. [6] एतदनन्तरं—बाष्पसंरुद्धकण्ठस्तु वाली चार्तस्वरः शनैः— इत्यधिकम्–ङ. च. ज.

उद्धूत—उत्क्षिप्तः इन्द्रध्वजो महीतल इव वाली महीतले पपात। पातकालो लक्ष्यते, रामस्य वनवाससमाप्तिवर्षे अतीतकालपरिज्ञानाय—पौर्णमास्यामित्यादि। आश्वयुजा—आश्वयुज्या पौर्णमास्याः समयः—सङ्गमः यस्य मासस्य सोऽयं आश्वयुक्समयः, एवंविशेषणके मासि—आश्वयुजमास इत्यर्थः। तत्रापि मासे पौर्णमास्यां गतश्रीकः विचेतनः—विसंज्ञः पपात। एवं योजना सुग्रीवाभिषेकानुमतिसमये श्रावणो मासः वर्तते इति वचनात्। उक्तलक्षणे काले इन्द्रध्वज इवेति च योजनीयम्॥ ३७॥

*नरोत्तमः [1]कालयुगान्तकोपमं
शरोत्तमं काञ्चन[2]रूप्यभूषितम्।
ससर्ज दीप्तं तममित्र[3]मर्दनं
सधूममग्निं मुखतो यथा हरः॥ ३८॥

उक्तार्थोपसंहारः—नरोत्तम इत्यादि। मुखतः इत्यादि। मुखस्थललाटनेत्रेणेत्यर्थः॥ ३८॥

अथोक्षितः शोणिततोयविस्रवैः
सुपुष्पिताशोक[4]इवानिलोद्धतः।

---

* नन्वत्र एकवचनात् एकेन बाणेन वाली हत इत्युक्तम्। इदं उत्तरत्र तारावचनेन 'रामेण प्रहितै रौद्रैर्मार्गणैर्दूरपातिभिः' इत्यनेन (19-9) विरुध्यते—नैवम्—व्याकुलवचनत्वात्तस्य-गो. तारा हि वालिनं हतं श्रुत्वैव इदं वचनं वदति, न तु दृष्ट्वेतीत्यवधेयम्॥ अत्र—प्रतिज्ञानिर्वाहाय छद्मनाऽपि वालिवधः कृतः-गो.

[1] काल इवा-ङ. [2] रूपभासितम्-ङ., रूपभूषितम्-च. [3] कर्शनं-ङ.
[4] इवाचलोद्धतः, इवातिलोहितः-ङ.

विचेतनो वासवसूनुराहवे
विभ्रंशितेन्द्रध्वजवत् क्षितिं गतः ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षोडशः सर्गः

शोणितस्य तोयस्य विस्रवाः—स्रुतयः तथा । धीगौ(३९)-मानः सर्गः ॥ ३९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षोडशः सर्गः

सप्तदशः सर्गः

[रामाधिक्षेपः]

ततः शरेणाभिहतः रामेण रणकर्कशः ।
*पपात सहसा वाली निकृत्त इव पादपः ॥ १ ॥

अथ वालिना रामगर्हणम् । ततः शरेणेत्यादि ॥ १ ॥

स भूमौ न्यस्तसर्वाङ्गः तप्तकाञ्चनभूषणः ।
अपतद्देवराजस्य मुक्तरश्मिरिव ध्वजः ॥ २ ॥

मुक्तरश्मिः—मुक्तरथरज्जुबन्धनः, मुक्तप्रभश्चेत्यपि ॥ २ ॥

तस्मिन् निपतिते भूमौ [1] वानराणां गणेश्वरे ।
नष्टचन्द्रमिव व्योम न व्यराजत मेदिनी ॥ ३ ॥

मेदिनी—तद्देशभूमिरित्यर्थः ॥ ३ ॥

---

* उक्तार्थानुवादोऽयमुत्तरवक्तव्याय ।

[1] हर्यृक्षाणां—च ज.

भूमौ निपतितस्यापि तस्य देहं महात्मनः ।
न श्रीर्जहाति न प्राणाः न तेजो न पराक्रमः ॥ ४ ॥

शक्रदत्ता वरा माला काञ्चनी [1] वज्रभूषिता ।
दधार हरि[2]मुख्यस्य प्राणान् तेजः श्रियं च सा ॥ ५ ॥

श्रियाद्यप्रहाणे कारणमाह—शक्रेत्यादि ॥ ५ ॥

स तया मालया वीरः हेमया हरियूथपः ।
[3] संध्यानुरागपर्यन्तः पयोधर इवाभवत् ॥ ६ ॥

हेमयेति । हैम्येति यावत् । संध्यानुरागः पर्यन्ते यस्य स तथा । हेममालासंबन्धमात्रे अयं दृष्टान्तः । स च पयोधरस्य श्यामत्वात् वालिदेहस्य पीतत्वात् तदंशे ॥ ६ ॥

तस्य माला च देहश्च मर्मघाती च यः शरः ।
त्रिधेव रचिता लक्ष्मीः पतितस्यापि शोभते ॥ ७ ॥

त्रिधा रचितेवेति । त्रिधा विभक्तेवेत्यर्थः ॥ ७ ॥

तदस्त्रं तस्य वीरस्य स्वर्गमार्ग*प्रभावनम् ।
रामबाणासनाक्षिप्तं आवहत् परमां गतिम् ॥ ८ ॥

स्वर्गमार्गस्य प्रभावनं—प्रकाशकं सत् । परमां गतिं—ब्रह्मलोकगतिमित्यर्थः । आवहत्—प्रापयति स्म । बाणः अस्यते अनेनेति बाणासनं—धनुः ॥ ८ ॥

---

* प्रभावनं—प्रापकं, भूप्राप्तौ—गो.

[1] रत्न—च. ज. [2] राजस्य—ङ. [3] सन्ध्यानुरक्त—ङ.

तं [1]तदा पतितं संख्ये गतार्चिषमिवानलम् ।
बहुमान्य च तं वीरं *वीक्षमाणं शनैरिव ॥ ९ ॥

तं तदा शनैरिव—शनैरेव वीक्षमाणम् ॥ ९ ॥

ययातिमिव पुण्यान्ते देवलोकात् परिच्युतम् ।
आदित्यमिव कालेन युगान्ते भुवि पातितम् ॥ १० ॥
† महेन्द्रमिव दुर्धर्षं [2]महेन्द्रमिव दुःसहम् ।
महेन्द्रपुत्रं पतितं वालिनं हेममालिनम् ॥ ११ ॥
[3]सिंहोरस्कं महाबाहुं दीप्तास्यं हरिलोचनम् ।
[4]लक्ष्मणानुगतो रामः ददर्शोपससर्प च[5] ॥ १२ ॥

हरिलोचनं—पीतनेत्र, 'हरिद्राभः पालाशो हरितो हरित्' ॥

तं दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम् ।
अब्रवीत् प्रश्रितं वाक्यं परुषं ‡ धर्मसंहितम्[6] ॥ १३ ॥
स भूमावल्पतेजोऽसुः निहतो गतचेतनः ।
अर्थसंहितया वाचा गर्वितं [7]रणगर्वितम्[8] ॥ १४ ॥

---

* शनैः—वेदनातिशयात् मन्दं वीक्षमाणं-**गो.** वीक्ष्यमाणं (**पा.**)—दृष्टिपथं प्राप्तं तं वालिनं भ्रातरौ रामलक्ष्मणौ शनैरुपगतौ-**रा.** † महेन्द्रं—उपेन्द्रस्यैव वृत्रवधोत्तरमिदं नामेत्येके। महेन्द्रः आजानदेवः, उपेन्द्रः कर्मदेव इत्यन्ये-**ति.** महेन्द्रमिव दुर्धर्षं, उपेन्द्र—वामनमिव दुस्सहं-**रा.** ‡ धर्मसंहितं—उत्सर्गधर्मयुक्तम् ।

[1] तथा-**च.** [2] उपेन्द्र-**च. ज.** [3] व्यूढोरस्कं-**च.** [4] लक्ष्मणानुचरो-**च.** [5] एतदनन्तरं—तं तथा पतितं वीरं गतार्चिषमिवानलम् । बहुमान्य च तं वीरं वीक्षमाणं शनैरिव ॥ उपयातौ महावीर्यौ भ्रातरौ रामलक्ष्मणौ--इत्यधिकं-**ङ.** [6] एतदनन्तरं—बाष्पसंरुद्धकण्ठस्तु वाली सार्तस्वरं शनैः ।—इत्यधिकं-**ङ.** [7] रणगर्वितः-**ङ.** [8] एतदनन्तरं-उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः ।—इत्यधिकं-**ङ.**

अल्पं तेजः असुश्च यस्य स तथा। गतचेतनः—गतचेष्टः। गर्वितं—गर्वोपेतं यथा तथा अब्रवीत् इत्यन्वयः॥ १४॥

त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः।
कुलीनः सत्त्वसंपन्नः तेजस्वी चरितव्रतः॥ १५॥
*पराङ्मुखवधं कृत्वा को नु प्राप्तस्त्वया गुणः?
यदहं युद्धसंरब्धः [1]शरेणोरसि ताडितः।
रामः †करुणवेदी च प्रजानां च हिते रतः॥ १६॥

पराङ्मुखवधमिति। युयुत्सया स्वानभिमुखवधमित्यर्थः। तदेव दर्शयति—यदहमित्यादि। युद्धाय अन्यस्मै संरब्धः—क्रुद्धः तथा॥१६॥

सानुक्रोशो [2]जितोत्साहः ‡समयज्ञो दृढव्रतः।
इति ते सर्वभूतानि कथयन्ति यशो भुवि॥ १७॥
§दमः शमः क्षमा धर्मः धृतिः [3]सत्यं पराक्रमः।
पार्थिवानां गुणाः, राजन्! दण्डश्चा[4]प्यपराधिषु॥ १८॥

शमदमौ बहिरन्तरिन्द्रियनिग्रहार्थौ। क्षमा—शक्यप्रतिक्रियापकारसहिष्णुता॥ १८॥

तान् गुणान् संप्रधार्याहं अग्र्यं चाभिजनं तव।
तारया प्रतिषिद्धोऽपि सुग्रीवेण समागतः॥ १९॥

आभिजनं—महाकुलप्रसूतत्वम्॥ १९॥

---

* पराङ्मुखवधं—परयुद्धासक्तवधम्। युद्धसंरब्धः—अन्ययुद्धपराङ्मुख इत्यर्थः—**गो.** † करुणवेदी—करुणं—दयावन्तं वेत्ति स्वकीयत्वेन जानाति, तच्छीलः—**रा.** कारुण्यज्ञः—**गो.** ‡ समयज्ञः—उचितानुचितकालज्ञः—**ति.** आचारज्ञः—**गो.** § 'शमश्चित्तप्रशान्तिः स्यादम इन्द्रियनिग्रहः'—**गो.**

[1] त्वत्कृते निधनं गतः—**च. ज.** [2] महोत्साहः—**च. ज.** [3] सत्त्वं—**च. ज.** [4] प्यपकारिषु—**च.**

न मामन्येन [1]संयुक्तं *प्रमत्तं [2]योद्धुमर्हसि ।
इति [3]मे बुद्धिरुत्पन्ना बभूवादर्शने तव † ॥ २० ॥

अन्येन संयुक्तं, अत एव त्वयि प्रमत्तं—असावधानम् । नार्हसीति मे बुद्धिरुत्पन्ना । तारया प्रतिषिध्यमानस्य मे इति शेषः ॥

न त्वां ‡विनिहतात्मानं धर्मध्वजमधार्मिकम् ।
जाने पापसमाचारं तृणैः कूपमिवावृतम् ॥ २१ ॥

विनिहतात्मानं——नष्टात्मानम् ॥ २१ ॥

सतां वेषधरं पापं प्रच्छन्नमिव पावकम् ।
नाहं त्वामभिजानामि धर्मच्छद्माभिसंवृतम् ॥ २२ ॥

प्रच्छन्नमिति । भस्मनेति शेषः । छद्म—व्याजः ॥ २२ ॥

विषये वा पुरे वा ते §यदा [4]नापकरोम्यहम् ।
न च [5]त्वामवजाने च कस्मात् मां हंस्यकिल्बिषम् ॥२३॥

यदा—यस्मात् ॥ २३ ॥

‖फलमूलाशनं नित्यं [6]वानरं वनगोचरम् ।
मामिहाप्रतियुध्यन्तं अन्येन च समागतम् ॥ २४ ॥

---

* प्रमत्तं युद्धपरवशं–गो. † तव अदर्शने—इदानीं त्वद्दर्शनात्पूर्वं एवं ज्ञातवानहं, अद्य तु विपरीतमभूदिति भावः । ‡ विनिहतात्मानं—अधर्माचरणाभ्रष्टात्मानं–ति. विशेषेण निहतबुद्धिं–गो. § लोक इव 'यदा' इत्युक्तिः । ‖ फलेत्यस्य श्लोकस्य 'मां' इति पूर्वेण सम्बन्धः–गो.

[1] संरब्धं–ङ. [2] वेद्धु–च. ज. [3] ते–ङ. [4] पापं–च.
[5] त्वां प्रतियुध्येऽहं–ङ. [6] राजानं च वनौकसाम्–ङ.

लिङ्गमप्यस्ति ते, राजन्! दृश्यते *धर्मसंहितम्।
कः क्षत्रियकुले जातः श्रुतवान् †नष्टसंशयः ॥ २५ ॥
धर्मलिङ्गप्रतिच्छन्नः क्रूरं कर्म समाचरेत् ॥ २६ ॥

लिङ्गमप्यस्तीति। अधर्माच्छादनभूतमिति शेषः। अस्तीत्यत्र किं प्रमाणमित्यत्रानुभव एवेत्याह—दृश्यते धर्मसंहितमिति। जटावल्कलधरत्वादिकं लिङ्गमिति शेषः ॥ २६ ॥

[1]राम! राजकुले जातः धर्मवानिति विश्रुतः।
‡अभव्यो भव्यरूपेण किमर्थं परिधावसि? ॥ २७ ॥

अभव्यः—अशुभाचारः ॥ २७ ॥

साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ।
पार्थिवानां गुणाः, राजन्! दण्डश्चाप्यप[2]राधिषु ॥ २८ ।
वयं वनचराः, राम! मृगा मूलफलाशनाः।
एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वरः ॥ २९ ॥

प्रकृतिः—स्वभावः ॥ २९ ॥

भूमिर्हिरण्यं [3]रूप्यं च विग्रहे कारणानि च।
अत्र कस्ते वने [4]लोभः मदीयेषु फलेषु वा? ॥ ३० ॥

---

* अधर्मसंहितं—अधर्मयुक्तं लिङ्गमपि ते अस्ति, दृश्यते च—स्पष्टमवगम्यते चेत्यर्थः। कुत इत्यत्राह—क इति—गो. † यतः श्रुतवान्, तत एव नष्टसंशयः—धर्माधर्मविषयकनिर्णयवान्। ‡ अभव्यः—क्रूरः भव्यरूपेण—सौम्यरूपेण—गो.

[1] त्वं राघवकुले—ङ. [2] कारिषु—च. [3] रूपं—ङ. [4] लाभः—ङ.

कारणानि चेति। आहुरिति शेषः। तत्र तथाऽस्तीत्यर्थः। ते—राज्ञस्तव वने विद्यमानेषु मदीयेषु मूलेषु फलेषु वा को लोभः—अपेक्षा। न कोऽपीत्यर्थः। भूम्यादावेव किल राज्ञोऽपेक्षेत्यर्थः॥

*नयश्च विनयश्चोभौ निग्रहानुग्रहावपि।
राजवृत्तिरसंकीर्णा न नृपाः कामवृत्तयः॥ ३१॥

नयः—नीतिः। विनयः—प्रश्रयः। असङ्कीर्णेति। निग्रहानुग्रहादिविषये विपरीतप्रवृत्तिरहितेत्यर्थः॥ ३१॥

त्वं तु कामप्रधानश्च कोपनश्चानवस्थितः।
[1]राजवृत्तैश्च संकीर्णः †शरासनपरायणः॥ ३२॥

संकीर्णः—क्षिप्तः, रहित इत्यर्थः। शराणां असनं—यत्र कुत्रापि मोक्षणं, तत्परायणस्तथा॥ ३२॥

न तेऽस्त्यपचितिर्धर्मे नार्थे बुद्धिरवस्थिता।
इन्द्रियैः कामवृत्तः सन् कृष्यसे, मनुजेश्वर!॥ ३३॥

अपचितिः—पूजा॥ ३३॥

हत्वा बाणेन, काकुत्स्थ! मामिहानपराधिनम्।
किं वक्ष्यसि सतां मध्ये कर्म कृत्वा [2]जुगुप्सितम्॥३४॥

---

* ननु स्वतन्त्रत्वात् यथेच्छं मम क्रियेत्यत्राह—नय इति—रा. नयः अनुग्रहश्च सद्राजधर्मौ। विनयः—विपरीतनयः निग्रहश्च कुराजधर्मौ। इत्येषा राजवृत्तिः असंकीर्णा ग्राह्या—गो. † शरासनपरायणः—आयुधपर इति लोकवदुक्तिः।

[1] राजवृत्तेरसमुत्तीर्णः—ङ. राजवृत्तेषु संकीर्णः—च. [2] सुदुष्करम्—ङ.

*राजहा ब्रह्महा गोघ्नः चोरः प्राणिवधे रतः ।
नास्तिकः परिवेत्ता च सर्वे निरयगामिनः ॥ ३५ ॥

परिवेत्ता—ज्येष्ठे अकृतदारे कृतदारोऽनुजः ॥ ३५ ॥

†सूचकश्च कदर्यश्च मित्रघ्नो गुरुतल्पगः ।
[1]लोकं पापात्मनामेते गच्छन्ते नात्र संशयः ॥ ३६ ॥

गच्छन्ते—गच्छन्तीति यावत् ॥ ३६ ॥

अधार्यं चर्म मे सद्भिः रोमाण्यस्थि च ‡वर्जितम् ।
अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः ॥ ३७ ॥

यद्यपि क्षत्रियस्य मृगहननमस्ति; अथापि मद्विषयकमिद-मप्रयोजनमित्याह—अधार्यमित्यादि ॥ ३७ ॥

पञ्च पञ्चनखा भक्ष्याः ब्रह्मक्षत्रेण, राघव !
§शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः ॥ ३८ ॥

अभक्ष्याणीत्यत्र प्रमाणमाह—पञ्चेत्यादि । ब्रह्मक्षत्रेणेत्येक-वद्भावः । नियमविधिनियतान् भक्ष्यान् पञ्च पञ्चनखान् परिगण-यति—सल्यक इत्यादि । शल्यकः—शल्यं अस्थिकीलं सूक्ष्मास्थि-कीलावृतत्वग्वान् प्राणिविशेषः-அளுங்கு । श्वाविधः—कण्टकाकार-दीर्घरोमभिः श्वानं विध्यतीति श्वाविधः । 'नहिवृति' इत्यादिना दीर्घः । पृषोदरादित्वात साधुः ॥ ३८ ॥

---

* तेषु प्रकृते राजहत्वं दोषो बोध्यः–ति. † सूचकः–पिशुनः, कदर्यः–लुब्धः–गो. ‡ वर्जितं–अस्पृश्यं–गो. रा. ति. § शल्यकः—खड्गी । शुक्तिका-कारशल्यावृतसर्वाङ्गः जन्तुविशेष इत्यन्ये–ति. ब्रह्मक्षत्रेणेत्युपलक्षणं, त्रैवर्णिकेनेत्यर्थः । शल्यकश्वाविधौ वराहविशेषौ–गो.

[1] लोके–च.

चर्म चास्थि च मे, [1] राजन्! न स्पृशन्ति मनीषिणः ।
अभक्ष्याणि च मांसानि सोऽहं पञ्चनखो हतः ॥ ३९ ॥

सोऽहं पञ्चनखो हतः इति । अभक्ष्यपञ्चनखोऽहं निष्प्रयोजनं हत इत्यर्थः ॥ ३९ ॥

तारया वाक्यमुक्तोऽहं सत्यं सर्वज्ञया हितम् ।
तदतिक्रम्य मोहेन कालस्य वशमागतः ॥ ४० ॥

त्वया नाथेन, काकुत्स्थ! न सनाथा वसुन्धरा ।
प्रमदा शील[2]संपन्ना धूर्तेन पतिना यथा ॥ ४१ ॥

त्वं तु राज्यार्हो न भवसीत्याह—त्वयेत्यादि ॥ ४१ ॥

* शठो नैकृतिकः क्षुद्रः मिथ्याप्रश्रितमानसः ।
कथं दशरथेन त्वं जातः पापो महात्मना ॥ ४२ ॥

शठः—गूढविप्रियकृत् । मिथ्यैव प्रश्रितमानसः—जितान्तः-करणः ॥ ४२ ॥

† छिन्नचारित्रकक्ष्येण सतां धर्मातिवर्तिना ।
त्यक्तधर्माङ्कुशेनाहं निहतो रामहस्तिना ॥ ४३ ॥

छिन्ना चारित्रस्य कक्ष्या–मर्यादा येन स तथा ॥ ४३ ॥

अशुभं चाप्ययुक्तं च सतां चैव विगर्हितम् ।
‡ वक्ष्यसे चेदृशं कृत्वा सद्भिः सह समागतः ॥ ४४ ॥

वक्ष्यसे इति । किं वक्ष्यसे इति योजनीयम् ॥ ४४ ॥

---

* शठः—मूर्खः नैकृतिकः—अनृजुरिति वा । † छिन्नं चारित्रमेव कक्ष्यं—इभबन्धनं येन स तथा । धर्मातिवर्तिना—अतिक्रान्तमर्यादेन–**गो**. ‡ वक्ष्यकार: किमर्थे–**रा**. वक्ष्यसे–निन्दसे इति वा ।

[1] राम–**च**. [2] संपूर्णा पत्येव च विधर्मणा–**च**.

उदासीनेषु योऽस्मासु विक्रमस्ते प्रकाशितः ।
अपकारिषु [1]तं, राजन्! न हि पश्यामि विक्रमम् ॥४५॥

अपकारिष्विति । दारापहारिष्वित्यर्थः ॥ ४५ ॥

दृश्यमानस्तु युध्येथाः मया [2]यदि, नृपात्मज!
अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥ ४६ ॥

त्वयाऽदृश्येन तु रणे निहतोऽहं दुरासदः ।
प्रसुप्तः पन्नगेनेव नरः [3]पानवशं गतः ॥ ४७ ॥

त्वयेत्यादि । मया रणे अदृश्येन—अप्राप्तदर्शनेन तु त्वया उच्यमानदृष्टान्तवन्निहतः ॥ ४७ ॥

मामेव यदि पूर्वं त्वं एतदर्थमचोदयः ।
*मैथिलीमहमेकाह्ना [4]तव चानीतवान् भवेत् ॥ ४८ ॥

एतदर्थं—सीताया आहरणरूपप्रयोजनमुद्दिश्य मामेव पूर्वं प्राप्य यद्यचोदयः, तर्हि तव मैथिलीमहं एकाह्ना आनीतवान् भवेत्—भवेयमिति यावत् ॥ ४८ ॥

[5]राक्षसं च दुरात्मानं तव भार्यापहारिणम् [6]।
सुग्रीवप्रियकामेन [7]यत्कृतेऽस्मि हतस्त्वया ॥ ४९ ॥
कण्ठे बद्ध्वा [8]प्रदद्यां तेऽनिहतं रावणं रणे ॥ ५० ॥

---

* सुग्रीवसख्यनिमित्तभूतं मैथिल्यानयनं च तारया पूर्वं निवेदितमिति ज्ञेयम्—गो.

[1] ते राम—च. [2] युधि—च. ज. [3] पाप—ङ. [4] त्वानयिष्याम्यसंशयम्—ङ.
[5] इदमर्धं कुण्डलितं—ङ. [6] एतदनन्तरं—ग्रीवायां तु दशग्रीवं बध्वा संप्रददे तव—इत्यधिकं—झ. [7] यदहं निहत—ङ. [8] दशग्रीवं दद्यां ते—ङ.

राक्षसं चेति। आनीतवान् भवेयमित्यनुकर्षः। उक्त एवार्थो विव्रियते—सुग्रीवेत्यादि। यदिति। यत्संहारप्रयोजनमुद्दिश्येत्यर्थः। तं रावणं अनिहतमेव जीवग्राहं गृहीत्वा कण्ठे बद्धा प्रदद्याम्। यदि मां पूर्वं अचोदयः इत्यनुषज्यम् ॥ ४९-५० ॥

न्यस्तां सागरतोये वा पाताले वाऽपि मैथिलीम्।
आनयेयं तवादेशात् श्वेतामश्वतरीमिव ॥ ५१ ॥

सागरतोय इति। तन्मध्यवर्तिद्वीप इति यावत्। श्वेतामश्वतरीमिव—श्वेताश्वतररूपिणीं श्रुतिं मधुकैटभाभ्यां पातालनिगृहीतां यथा हयग्रीवो भुवमानयति स्म, तद्वदित्यर्थः ॥ ५१ ॥

†युक्तं यत् प्राप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि।
अयुक्तं यदधर्मेण त्वयाऽहं निहतो ‡रणे ॥ ५२ ॥
काममेवं[1]विधो लोकः कालेन विनियुज्यते।
§क्षमं चेत् भवता प्राप्तं उत्तरं साधु चिन्त्यताम् ॥ ५३ ॥

काममित्यादि। कालेन—कालधर्मेण मृत्युना लोकः प्राणिमात्रं विनियुज्यते—विशेषेण संयुज्यते इति यतः, एवंविधस्वभावः काममस्तु ममापि। भवता राज्यं प्राप्तं चेत्, तदा मद्वधकारणप्रश्ने क्षमं युक्तं उत्तरं साधु—सम्यक् विचिन्त्यताम् ॥ ५३ ॥

---

* 'सागरतोये वा' इति लोकवदुक्तिः। †राज्यार्थं सुग्रीवो मां हतवानित्येतद्युक्तं, ज्ञातीनामेवंविधकृत्यस्य स्वाभाविकत्वात्। त्वं तु मां हतवानित्येतत्त्वयुक्तं—**गो.** ‡अरणे इति वा। त्वया रणाभावेऽपीत्यर्थः। §भवता प्राप्तं—अदृश्यतया प्रहरणं प्रति, क्षमं चेत् साधूत्तरं चिन्त्यताम्—**गो.**

[1] विधे—**ङ.**

*इत्येवमुक्त्वा परिशुष्कवक्त्रः
शराभिघातात् व्यथितो महात्मा ।
समीक्ष्य रामं रविसंनिकाशं
तूष्णीं बभूवामरराजसूनुः[1] ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे सप्तदशः सर्गः

उपसंहारेण वादः—इत्येवमित्यादि । वाम(५४)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे सप्तदशः सर्गः

अष्टादशः सर्गः

[वालिवधसमर्थनम्]

इत्युक्तः प्रश्रितं वाक्यं †धर्मार्थसहितं हितम् ।
परुषं वालिना रामः निहतेन विचेतसा ॥ १ ॥

अथ रामेण न्यायावगमितनिजवध्यत्वेन वालिना स्वकृतगर्हण-क्षमापणपूर्वं पुत्रस्य रक्षार्थं रामाय प्रदानम् । इत्युक्त इत्यादि ।

---

* अस्य सर्गस्य **तीर्तेन** रामस्तुतिपरतया यद्योजनं, तन्न कविनिबद्धस्य वक्तुर्वालिनः तात्पर्यविषयभूतम् । 'यदयुक्तं मया पूर्वं प्रमादाद्वाक्यमप्रियम् । तत्रापि खलु मे दोषं कर्तुं नार्हसि राघव' (१८–४६) इत्यग्रे वाल्युक्तेः–**ति.** † अत्र 'धर्मार्थसहितं' इति विशेषणं रामवाक्यस्य 'धर्मार्थगुणसंपन्नं' इति विशेषणं च द्रष्टव्यम् । धर्मस्योत्सर्गापवाद-जटिलत्वेन दुर्ज्ञेयत्वमनेन सूच्यते । रामवाक्यस्य 'अनुत्तमं' इत्यपि विशेषणात् तस्यैव परमधर्मत्वमुच्यते । अतो न कोऽपि विरोधः ॥

[1] एतदनन्तरं—तमुक्तवन्तं प्रवरं हरीणां अथोत्तरं वाक्यमुवाच रामः । हितं च तत्त्वं वचनं प्रसक्तं ससाम धर्मार्थसमाहितं च ॥ —इत्यधिकं–ङ. झ.

प्रश्रितं—प्रश्रयाभासोपेतम् । धर्मार्थसहितत्वं हितत्वं च आभासरूपम् । तत्र 'मामेव पूर्वं' इत्यादि हिताभासः, अर्थाभासश्च । धर्माभासस्तु 'राजहा' इत्यादि । 'विषये वा पुरे वा ते' इत्यादिः प्रश्रयाभासः । परुषत्वं मुख्यमेव । निहतेन—विद्धेन । अत एव—विचेतसा वालिना इति । परुषं उक्तोऽभूदित्यनुवादेनान्वयः ॥

तं निष्प्रभमिवादित्यं मुक्ततोयमिवाम्बुदम् ।
उक्तवाक्यं हरिश्रेष्ठं उपशान्तमिवानलम् ॥ २ ॥
धर्मार्थगुणसम्पन्नं हरीश्वरमनुत्तमम् ।
अधिक्षिप्तस्तदा रामः पश्चाद्वालिनमब्रवीत् ॥ ३ ॥

धर्मार्थगुणसम्पन्नमित्यादिकं वास्तवम् । अधिक्षिप्तः—परुषितः ॥ ३ ॥

धर्ममर्थं च कामं च *समयं चापि लौकिकम् ।
अविज्ञाय कथं बाल्यात् [1]मामिहाद्य विगर्हसे ॥ ४ ॥

लौकिकं समयं—लौकिकव्यवहारम् ॥ ४ ॥

अपृष्ट्वा बुद्धिसम्पन्नान् [2]वृद्धानाचार्यसम्मतान् † ।
सौम्य ! वानरचापल्यात् किं मां वक्तुमिहेच्छसि ॥ ५ ॥

अविज्ञायेत्यत्र कारणमाह—अपृष्ट्वेत्यादि । आचार्यसंमतानिति । स्वकुलाचार्यपरिगृहीतानित्यर्थः । वानरत्वादेतदभावः स्पष्टः । वानरत्वप्रयुक्तं चापल्यं तथा ॥ ५ ॥

---

* लौकिकं समयं—शिष्टाचारं—रा. † आचार्यसम्मतान्—स्वकुलाचारशिक्षकान्—ति. आचार्यानुकूलान्—रा. आचार्यत्वेन सम्मतानिति आचार्यसदृशानिति वा ।

[1] मां धर्षयितुमिच्छसि—ङ. [2] आचार्यान् धर्मसंहितान्—वृद्धानाचारसंमतान्—ङ.

इक्ष्वाकूणामियं भूमिः सशैलवनकानना ।
मृगपक्षिमनुष्याणां *[1]निग्रहप्रग्रहेष्वपि ॥ ६ ॥

अविज्ञाय चापल्यादुक्तमिति प्रतिज्ञैव समर्थ्यते—इक्ष्वाकूणामित्यादि । इयं भूमिरिति । मनुना प्रजापतिना अस्माकं कूटस्थेन दत्तेति शेषः । अपि च अत्रत्यानां मृगपक्षिमनुष्याणां निग्रहप्रग्रहेषु—निग्रहानुग्रहेष्वपि अधिकारो दत्त इति शेषः ॥ ६ ॥

तां पालयति धर्मात्मा भरतः सत्यवागृजुः ।
धर्मकामार्थतत्त्वज्ञः निग्रहानुग्रहे रतः ॥ ७ ॥

अस्तु, किं ततः ? इत्यतः—तां पालयतीत्यादि । पितृपितामहक्रमागतां भुवमित्यर्थः । निग्रहानुग्रह इति । दुष्टशिष्टप्रजयोरिति शेषः ॥ ७ ॥

नयश्च विनयश्चोभौ यस्मिन् सत्यं च सुस्थितम् ।
विक्रमश्च †यथादृष्टः स राजा देशकालवित् ॥ ८ ॥

यथादृष्टः—अपरोक्षानुभवसिद्धः । स राजेति । एतस्मिन् काल इति शेषः ॥ ८ ॥

‡तस्य धर्मकृतादेशाः वयमन्ये च पार्थिवाः ।
चरामो वसुधां कृत्स्नां धर्म[2]सन्तानमिच्छवः ॥ ९ ॥

---

* मृगादिनिग्रहानुग्रहावपि इक्ष्वाकूणामेव, कृतमिति शेषः–**गो**. भूमिः, निग्रहानुग्रहावपि इक्ष्वाकूणामेवेति लोकवदुक्तिः । † यथादृष्टः—शास्त्रविहितः विक्रमश्च, एतत्सर्वं यस्मिन् सुस्थितं–**गो**. ‡ यद्यपि भरतेन नादेशः कृतः, तथापि नेदमसत्यम् । भरतेन राज्यभरणस्य स्वीकृतत्वात्, तदन्येषां तत्कुलीनानां तदादिष्टत्वं सिद्धमिति हृदयम्–**गो**.

[1] निग्रहानुग्रहेष्वपि–**च**. [2] संस्थान–**ङ**.

अस्तु, किं ततः ? इत्यतः—तस्येत्यादि । धर्माय कृतः—सम्पादितः आदेशः—नियोगस्तथा । धर्मसन्तानं—धर्मवृद्धिम् ॥ ९ ॥

तस्मिन् नृपतिशार्दूले भरते धर्मवत्सले ।
पालयत्यखिलां भूमिं कश्चरेत् धर्म[2]निग्रहम् ॥ १० ॥

धर्मनिग्रहं—धर्मपीडां कश्चरेत्—शक्यार्थे लिङ्, कः आचरितुं शक्नुयात् ? न कोऽपीत्यर्थः ॥ १० ॥

[3]ते वयं धर्मविभ्रष्टं स्वधर्मे परमे स्थिताः ।
भरताज्ञां पुरस्कृत्य [4] निगृह्णीमो यथाविधि ॥ ११ ॥

ते वयं इदानीं तन्मूलप्रभुनिदेशवर्तिनः धर्मविभ्रष्टं भरताज्ञां पुरस्कृत्य निगृह्णीमः ॥ ११ ॥

त्वं तु *[5]संक्लिष्टधर्मा च कर्मणा च विगर्हितः ।
कामतंत्रप्रधानश्च न स्थितो राजवर्त्मनि ॥ १२ ॥

अस्तु, प्रकृते किमायातम् ? इत्यत्राह—त्वं त्वित्यादि । च—यस्मात् कर्मणा—चरित्रेण विगर्हितः—लोकनिन्दितः, तस्मात् त्वं संक्लिष्टधर्मा—संक्लिष्टः–पीडितः धर्मः येन स तथा, 'धर्मादनिच्' इत्यनिच् । कामतन्त्रः—कामपुरुषार्थः ॥ १२ ॥

ज्येष्ठो भ्राता पिता चैव यश्च विद्यां प्रयच्छति ।
त्रयस्ते पितरो ज्ञेयाः धर्मे पथि हि वर्तिनः ॥ १३ ॥

---

* संक्लिष्टधर्मा—धर्मविलोपकृत । कर्मणा च विगर्हितः—अकृत्यकारी–**गो.** वक्ष्यमाणरीत्या भ्रातरि पुत्रवद्वर्तनरूपकृत्यमपि न कृतं, स्नुषागमनरूपपापमपि कृतमित्यर्थः ॥

[1] सत्यविक्रमे–**ङ.** [2] विप्रियं–**च.** [3] न वयं मार्गविभ्रष्टाः–**ङ.**, ते वयं मार्गविभ्रष्टं–**च. ज.** [4] चिन्तयामो–**च. ज.** [5] संकीर्णधर्मश्च–**ङ.**

क्लिष्टधर्मत्वमेव दर्शयितुं लोकस्थितिमाह—ज्येष्ठ इत्यादि। विद्यां—त्रिपदां ब्रह्मविद्याम्। वर्तः—वर्तनं अस्यास्तीति वर्ती, तस्य ॥१३॥

[1] यवीयानात्मनः पुत्रः शिष्यश्चापि [2] गुणोदितः।
पुत्रवत्ते त्रयश्चिन्त्याः [3] धर्मश्चेदत्र* कारणम् ॥१४॥

ते त्रयश्चिन्त्या इति। ज्येष्ठादिभिः क्रमात् कनीयःप्रमुखाः इत्यर्थः। धर्मइत्यादि। अत्र अस्मिन् पुरुषे धर्मः कारणं—प्रमाणं चेत् ॥

सूक्ष्मः †[4] परमविज्ञेयः सतां धर्मः, प्लवङ्गम!
हृदिस्थः सर्वभूतानां आत्मा वेद [5] शुभाशुभम् ॥१५॥

धर्मत्वप्रमाणज्ञानं च न सर्वसुलभमित्युच्यते—सूक्ष्म इत्यादि। सतां—सात्त्विकानां सूक्ष्मो धर्मः—तन्त्रमन्त्रज्ञानरहस्यरूपः परमविज्ञेयः—परमात्मश्रीमदादिगुरुकृपया परमाचार्यैः श्रीमद्भिः व्यासजैमिन्यादिभिरेव विज्ञेयः, इतरैस्तु परं—अत्यर्थं अविज्ञेय एव। साक्षात् धर्मतत्त्वज्ञानं तु श्रीमदादिब्रह्मण एवेत्युच्यते—हृदिस्थ इत्यादि। सर्वभूतानां—सपरिकरसर्वस्रोतसां असंकोचोपचारेणोपादानत्वतः आत्मा तत्तत्प्रत्यक्तत्त्वभूतः, अत एव हृदिस्थः सन् सर्वं शुभाशुभं पापं पुण्यं च वेद, ज्ञानमात्रस्य तदेकायत्तत्वात्। अतः सदाचार्यवरिवस्यासिद्धा एव राजादीनां धर्मं विदुः ॥१५॥

चपलश्चपलैस्सार्धं वानरैरकृतात्मभिः।
जात्यन्ध इव जात्यन्धैः मंत्रयन् ‡[6] रक्षसे नु किम् ॥

---

* अत्र—अस्मिन् विषये इति वा ॥ † परा—सद्गुरूपदेशजा मा—शोभा येषां, तैरेव विज्ञेयः—ति. परमदुर्ज्ञेयः(पा.)—ज्ञातुमत्यन्तमशक्यः—रा. गो. ‡ किं नु द्रक्ष्यसे—न किमपि द्रक्ष्यसीत्यर्थः—गो. द्रष्टुं शक्नोषि किमित्यर्थः ॥

[1] यवीयान् सोदरः—ङ. [2] गुणान्वितः—ङ. [3] धर्मश्चैवात्र—च. ञ
[4] परमदुर्ज्ञेयः—ङ. [5] शुभाशुभे—ङ. [6] द्रक्ष्यसे—ङ., प्रेक्षसे—ञ.

त्वं तु धर्मज्ञानप्रसक्तिरहित एवेत्युच्यते—चपल इत्यादि। जात्यन्धो जात्यन्धैरिव चपलैः अकृतात्मभिः—आचार्याशिक्षितैः सह अकृतात्मा चपलः त्वं किं मंत्रयन्—किंनु राजधर्मं मंत्रयन्—निश्चिन्वन् किं नु स्वरक्षणीयप्रजाजातं रक्षसे? न किमपि। अतो धर्मविभ्रष्टः राजदण्ड्यः त्वं इति अर्थादुक्तं भवति ॥ १६ ॥

अहं तु व्यक्ततामस्य वचनस्य ब्रवीमि ते।
न हि मां केवलं रोषात् त्वं विगर्हितुमर्हसि ॥ १७ ॥

अत्र प्रागुक्तन्यायेन सूक्ष्मज्ञानासामर्थ्यात् धर्मभ्रष्टत्वमस्य व्यक्तमेव वक्तव्यमिति, तत् प्रतिज्ञापूर्वं प्रतिपाद्यते—अहं तु व्यक्ततामित्यादि। अस्य वचनस्येति। चपलश्चपलैरित्युक्तवचनस्येत्यर्थः। व्यक्तता—व्यक्तार्थता, तत्सिद्ध्यर्थं ते ब्रवीमि ॥ १७ ॥

तदेतत् कारणं पश्य यदर्थं त्वं मया हतः।
भ्रातुर्वर्तसि भार्यायां [1] त्यक्त्वा धर्मं सनातनम् ॥ १८ ॥

पश्येति। मया प्रतिपाद्यमानं त्वद्वधकारणं स्वानुभवेनैव तत्त्वमतत्त्वं वेति चिन्तयेत्यर्थः। भ्रातुः भार्यायां वर्तसीति। वर्तसे इति यावत् ॥

†अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः।
रुमायां वर्तसे [2] कामात् स्नुषायां पापकर्मकृत् ॥ १९ ॥

उक्त एवार्थः स्पष्टीक्रियते—अस्य त्वमित्यादि। अस्य तु सुग्रीवस्य धरमाणस्य—प्राणान् धारयतः एव—जीवत एव पत्न्यां—

---

* अस्य वचनस्य—'यवीयानात्मनः' इति पूर्वोक्तवचनस्य—**गो.** एवं सामान्याकारेणोत्तरदानमस्तु! विशिष्य प्रकृतानुगुणं सुस्पष्टमेव वदामि, वृथा म निन्दितुं नार्हसीति लोकवदेवोक्तिः। †ननु 'भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतीं महिषीं प्रियाम्। धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः॥' **किष्कि**—५५—३) इत्यग्रे [अनन्तरपुटे-

[1] दण्डोऽयं प्रतिपादितः—ङ. [2] कामं—ङ.

तव स्नुषाभूतायामेव रुमायां यतो वर्तसे, अतः त्वं स्पष्टं पापकर्मकृत् । सुग्रीवस्तु त्वन्मृतिबुद्ध्या तारायां त्वत्स्त्रियां प्रागवर्तिष्ट, त्वं तु तस्मिन् जीवत्येव तत्स्त्रियां वर्तसे इति पापकर्मकृत् इति विशेषः वरमाणस्येति पदेन सूचितः । त्रैवर्णिकेष्वपि देवरन्यायेन च यथाकथंचित् मृतभ्रातृस्त्रियां वृत्तिदर्शनात् तिर्यग्योनिषु मृतभ्रातृस्त्रीग्रहणे न दोषः इति भगवदाशयः । यद्यपि शास्त्रस्य मनुष्याधिकारकत्वं, अथापि मनुष्यवदेव तिर्यग्योनेरपि राजादिव्यवहारदर्शनात् राजोचितधर्मानुष्ठानं आवश्यकं इत्याशयः ॥ १९ ॥

तद्व्यतीतस्य ते धर्मात् कामवृत्तस्य, वानर !
[1]भ्रातृभार्याविमर्शेऽस्मिन् दण्डोऽयं प्रतिपादितः ॥ २० ॥

उक्तार्थस्योपसंहारः—तदित्यादि । तस्मात्—धर्मात् व्यतीतस्य—धर्मभ्रष्टस्येत्यर्थः ॥ २० ॥

***न हि [2]धर्मविरुद्धस्य लोकवृत्तादपेयुषः ।**
दण्डा[3]दन्यत्र पश्यामि निग्रहं, हरियूथप !
[4]न हि ते मर्षये पापं क्षत्रियोऽहं [5]कुलोद्भवः ॥ २१ ॥

प्रायोपवेशसमयेऽङ्गदोक्तेः सुग्रीवस्यापि ज्येष्ठभ्रातुः पितृसमस्य भार्याविमर्शनं तुल्यमित्यत आह—अस्य त्वमिति । निश्चीयमानजीवनस्यैव पत्न्यां तव स्नुषाभूतायां रुमायां यतो वर्तसे, अतस्त्वं पापकर्मकृत् । सुग्रीवस्तु तव जीवननिश्चयाभावात् त्वत्पत्न्यां तारायां प्रागवर्तिष्ट, वर्त्स्यति च । .... न च मनुष्याधिकारस्य निषेधादिशास्त्रस्य कथं तिर्यक्षु प्रवृत्तिरिति वाच्यम् , तिर्यग्योनेरपि मनुष्यवद्राजादिव्यवहारदर्शनेन मनुष्यतुल्यज्ञानवत्त्वादस्त्येवायं दोष इत्याशयात्—**ति.** अनेन जीवतो भ्रातुर्भार्या भ्रात्रा न ग्राह्या, मृतस्य तु ग्राह्येति तत्कुलधर्म इति प्रतीयते—**गो.**

*तर्हि शिक्षैव कर्तव्या । किमर्थमवधीरित्यत्राह—न हीति—**गो.**

[1] भ्रातुर्भार्या—**ङ.** [2] लोक—**च.** [3] दन्यद्विपश्यामि—**ङ.** [4] न चेदमर्थये—**ङ.**
[5] कुलोद्गतः—**च.**

लोकवृत्तात्—लोकसंमतव्यवहारमर्यादायाः अपेयुषः—अपगतवतः। क्षत्रियोऽहमिति। पापनिग्रहाधिकारीत्यर्थः ॥ २१ ॥

***औरसीं भगिनीं वाऽपि भार्यां वाऽप्यनुजस्य यः।**
प्रचरेत नरः कामात् तस्य दण्डो वधः स्मृतः ॥ २२ ॥

दण्डादन्यत्र निग्रहं न पश्यामीत्युक्तार्थे स्मृतिं प्रमाणयति—औरसीमित्यादि। 'कामात् प्रचरेत' इत्यनेन कुलतन्तुविषयदेवरन्यायः परिहृतः ॥ २२ ॥

भरतस्तु महीपालः वयं त्वादेशवर्तिनः।
[1]त्वं तु धर्मादतिक्रान्तः कथं [2]शक्य उपेक्षितुम् ॥ २३ ॥
† [3]गुरुधर्मव्यतिक्रान्तं प्राज्ञो धर्मेण पालयन्।
भरतः [4]कामवृत्तानां निग्रहे पर्यवस्थितः ॥ २४ ॥

गुरुधर्मेति। गुरुः—जगदाधारभूतः महान् यो धर्मः तद्व्यतिक्रान्तं—तत्प्रच्युतं, निघ्नन्निति शेषः। प्राज्ञः—विद्वान्। धर्मेण पालयन्निति; धर्मेण युक्तमिति शेषः ॥ २४ ॥

वयं तु [5]भरतादेशं विधिं कृत्वा, हरीश्वर!
त्वद्विधान् भिन्नमर्यादान् [6]नियन्तुं पर्यवस्थिताः ॥२५॥

विधिं कृत्वेति। प्रमाणं कृत्वेत्यर्थः। ननु कथं मृषाऽऽह रामः भरतादेशमिति? न मृषा। राज्ये तत्कालवर्तिमूलप्रभौ स्थिते सर्ववर्णानां

---

* औरसीं—पुत्रीं प्रचरेत—गच्छेत्—गो. † धर्मव्यतिक्रान्तं—धर्मव्यतिक्रमात् पालयन्—परामृशन् गुरुः भरतश्च निग्रहे पर्यवस्थितः—गो.

[1] त्वां च धर्मादतिक्रान्तं—च. [2] शक्यं—च. ञ. [3] गुरुधर्मव्यतिक्रान्तं—गुरुवृत्तानतिक्रान्तः—ङ. [4] कामयुक्तानां—च. ञ. [5] भरतादेशावधिं—ङ. च. ञ. [6] निग्रहीतुं व्यवस्थिताः—ङ.

स्वे स्वे कृत्ये तदाज्ञा अनुक्तसिद्धा जागर्ति। राजाकृत्ये दण्डः पतिष्यतीति प्रवृत्तेः सर्वाविवादात्। रामश्च क्षत्रियः। यावत् स्वराज्याभिषेकं अस्यापि भरतादेशतः स्वकृत्ये दुष्टनिग्रहे मूलप्रभुकार्ये प्रवृत्तेः अनुक्तसिद्धत्वात् ॥ २५ ॥

*सुग्रीवेण च मे सख्यं लक्ष्मणेन [1]यथा तथा।
दारराज्यनिमित्तं च [2]निःश्रेयसि रतः स मे ॥ २६ ॥

अथ कारणान्तरमपि वालिनो वधे दर्शयति—सुग्रीवेणेत्यादि। लक्ष्मणेन यथा, तथा सुग्रीवेण च मे सख्यमस्ति च। यस्मादेवं, तस्मात् सखित्वादेव सुग्रीवः स्वस्य दारराज्यनिमित्तं—तत्तत्प्राप्त्यर्थं मम निःश्रेयसि रतः—निःश्रेयसि निरत इति। यावत्कार्यसिद्धि प्रवृत्तः इत्यर्थः ॥ २६ ॥

प्रतिज्ञा च मया दत्ता तदा [3]वानरसंनिधौ।
प्रतिज्ञा च कथं शक्या [4]मद्विधेनानवेक्षितुम् ॥ २७ ॥

यस्मादेवं, तस्मात् मया च तदभिमतसाधनविषयिणी प्रतिज्ञा दत्ता—कृतेत्यर्थः। कृता सा प्रतिज्ञा मद्विधेन कथं अनवेक्षितुं—असमापयितुं शक्यम्! इदमुक्तं भवति—सख्योः एकप्रयोजनत्वनैसर्ग्यात् स्वसखिप्रयोजनमेव मत्प्रयोजनं इति त्वद्वधः अवश्यं कर्तव्यः कथमपि मयेति ॥ २७ ॥

तदेभिः कारणैः सर्वैः महद्भिर्धर्म[5]संहितैः।
शासनं तव यद्युक्तं तद्भवाननुमन्यताम् † ॥ २८ ॥

---

* एवं निरपराधवधशङ्कायाः परिहारमुक्त्वा, 'मामेव यदि पूर्वमचोदयः' (17-49) इत्युक्तस्य परिहारमाह—सुग्रीवेणेति—गो. † अनुमन्यतां—अङ्गीक्रियतामिति वा।

[1] यथा पुरा—ङ. [2] निःश्रेयस रः—ङ. [3] पावक—ङ. [4] मद्वि धाना मुपेक्षितुम्—ङ. [5] संश्रितैः—च. ज.

वदित्यादि । एभिः कारणैः कृते तव शासने यत् युक्तं—उचितं तत्त्वं, तत् भवानपि अनुमन्यताम्—अनुचिन्तयत्विति यावत ॥ २८ ॥

*सर्वथा धर्म इत्येव द्रष्टव्यस्तव निग्रहः ।
[1]वयस्यस्य तु कर्तव्यं धर्ममेवानु[2]पश्यतः ॥ २९ ॥
शक्यं त्वयाऽपि [3]तत् कार्यं धर्ममेवानुपश्यता ॥ ३० ॥

युक्तत्वमेव दृढीकरोति—सर्वथेत्यादि । धर्ममेवानुपश्यतः पुरुषस्य तु—वयस्यस्य तु यत् कर्तव्यं, तदपि सर्वथा कर्तव्यमेवेति योजना । अतः परं त्वदनुष्ठेयमेतावदित्युपदिश्यते— शक्यमित्यादि । धर्ममेव अनुपश्यता—अनुवर्तयता त्वयाऽपि तत्—वक्ष्यमाणार्थग्रहणमेव शक्यं कार्यं—एतद्दशायां अनुष्ठातुं योग्यं कृत्यमित्यर्थः ॥ २९-३० ॥

श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ ।
गृहीतौ धर्मकुशलैः [4]तत्तथाऽऽचरितं [5]मया ॥ ३१ ॥

किं तदित्यपेक्षायामाह—श्रूयत इत्यादि । चारित्रवत्सलौ—सुचरित्रप्रतिपादनतत्परौ धर्मकुशलैः गृहीतौ च भवतः मयाऽपि तदेव—तदर्थतत्त्वमेव अद्य आचरितं, त्वयाऽपि तदर्थतत्त्वमेव ग्राह्यमित्यर्थः ॥

राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥ ३२ ॥

---

*पुनर्हेत्वन्तराणि वक्तुं पीठिकामारचयति—सर्वथेति । धर्ममेवानुपश्यतः वयस्यस्यापि स्वमित्रशत्रुनिरसनं कर्तव्यम् । धर्ममेवानुपश्यता त्वयाऽपि तत्कार्यं—आत्मनिग्रहरूपं शक्यं—प्रायश्चित्तत्वेनानुमन्तुं—योग्यं-गो. मत्स्थाने त्वं तिष्ठेश्चेद त्वयाऽपि एवमेव कर्तुं शक्यमिति वा ।

[1] वयस्यस्योप—च. ञ. [2] पश्यता—ङ. [3] कर्तव्यं—ङ. [4] तथा तच्चरितं—च. [5] हरे—विशो—ङ.

शासनाद्वा विमोक्षाद्वा स्तेनः [1]स्तेयाद्विमुच्यते ।
राजा [2]त्वशासन् पापस्य तदवाप्नोति किल्बिषम् ॥ ३३ ॥

कौ तौ श्लोकौ ? इत्यतः तौ पठ्येते—राजभिरित्यादि । शासनात्—निग्रहात्, विमोक्षात्—दयया विसर्जनात्, उभयथापि स्तेनः—चोरः स्तेयात्—स्तेयपापात् विमुच्यते । पापस्य अशासन्निति । पापं अनिगृह्णन्नित्यर्थः, आर्षी षष्ठी । तथाहि आपस्तम्बः—'स्तेनः प्रकीर्णकेशः अंसे मुसलमादाय राजानं गत्वा कर्माचक्षीत, तेनैनं हन्यात्, वधे मोक्षः, अनुज्ञाते अनुज्ञातारमेव स्पृशति' इति ॥

आर्येण मम मान्धात्रा व्यसनं घोरमीप्सितम् * ।
† श्रमणेन कृते पापे, यथा पापं कृतं त्वया ॥ ३४ ॥

एवं स्वानुष्ठितार्थस्य धर्मत्वे स्मृतिं प्रमाणयित्वा, शिष्टाचारमपि तत्र प्रमाणयति—आर्येणेत्यादि । मम मांधात्रेति । मम कूटस्थेनेति शेषः । त्वया यथा—यत्प्रकारं पापं कृतं, तथा केनचित् श्रमणेन—आर्हतेन पापे कृते सति, तत्र कर्तुमीप्सितं घोरं व्यसनं—दण्डरूपं मान्धात्रा कृतम् ॥ ३४ ॥

‡ अन्यैरपि कृतं पापं प्रमत्तैर्वसुधाधिपैः ।
प्रायश्चित्तं च कुर्वन्ति तेन तत् शाम्यते रजः ॥ ३५ ॥

---

* ईप्सितं—प्रयुक्तमिति यावत्—गो. † श्रमणः—अत्रैवर्णिकः विरक्तः काषायधारी । ‡ ननु प्रजाभिः पापकरणे राजा दण्डयति चेत्, राजैव यद्यपराध्यति, तदा तेषां दण्डकः कः ? इत्यपेक्षायामाह—अन्यैरिति । अन्यैः—मत्पूर्वीकादन्यैः कैश्चित्प्रमत्तैर्वसुधाधिपादिभिः कदाचित् पापं कृतं ; अथापि तैः प्रायश्चित्तमनुष्ठितं, त्वया तु तदपि न कृतम् । एतादृशस्य वध एव दण्ड इत्यर्थो वा ॥

[1] पापा—च. [2] त्वशासनात् पापं—ङ.

अन्यैरित्यादि । प्रमत्तैः कृतं पापं प्रति अन्यैरपि वसुधाधिपैः पापशुद्धये दण्डनं कृतमित्यनुकर्षः । न च केवलं राजदण्डनमेव प्रायश्चित्तं पापस्येत्याह—प्रायश्चित्तं चेत्यादि । तेन—यथाशास्त्रप्रायश्चित्तेन तत्तत्कर्त्रनुष्ठितेनेत्यर्थः ॥ ३५ ॥

तदलं परितापेन धर्मतः परिकल्पितः ।
वधः, वानरशार्दूल ! न वयं स्ववशे स्थिताः ॥ ३६ ॥

न वयं स्ववशे स्थिताः इति । दुष्टनिग्रहविषये मूलप्रभुनियोगवशे स्थिताः इत्यर्थः ॥ ३६ ॥

*शृणु चाप्यपरं भूयः कारणं, हरिपुङ्गव !
[1]यत् श्रुत्वा हेतुमत्, वीर ! न मन्युं कर्तुमर्हसि ॥ ३७ ॥

अथ छन्नेन त्वया अप्रतियुध्यतो मे वधः पापायेति यत् दूषितं, तदपि त्वदज्ञानविलपितमेवेत्याह—शृण्वित्यादि । अपरमप्युद्दिश्य—छन्नेन च अनभिमुखस्य निःशङ्कवधमुद्दिश्य कारणं शृणु इत्यर्थः ॥ ३७ ॥

न मे †तत्र मनस्तापः न मन्युः, हरियूथप !
वागुराभिश्च पाशैश्च कूटैश्च [2]विविधैर्नराः ॥ ३८ ॥
प्रतिच्छन्नाश्च दृश्याश्च गृह्णन्ति सुबहून् मृगान् ।
[3]प्रधावितान् वा वित्रस्तान् विस्रब्धांश्चातिविष्ठितान् ॥

---

*एवं सन्ध्योपासनराज्यपालनादिकं नियमेनानुतिष्ठतो वालिनः शाखावश्यत्वमवलम्ब्योक्तम् । अथ शाखामृगत्वमवलम्ब्याह—शृण्विति—गो. †तत्र—अवयुक्तनिन्दायामिति वा ।

[1] तद्—ङ. च. [2] विविधा नराः—ङ. [3] विस्रब्धांश्चाप्यविस्रब्धान् विनिघ्नन्ति तथैव च—ङ.

प्रमत्तानप्रमत्तान् वा नरा *[1] मांसार्थिनो भृशम् ।
विध्यन्ति विमुखांश्चापि न च दोषोऽत्र विद्यते ॥ ४० ॥

न मे तत्रेति । यथोक्तरूपवध इत्यर्थः । मनस्ताप इति । कथमेवं कृतवानस्मि इति पश्चात्तापः । मन्युः—शोकः । कुतो नेत्यत्र, यथाप्राप्तानुष्ठानत्वादेवेत्याह—वागुराभिरित्यादि । कूटैः—छन्नश्वभ्रसंपादनोपशयस्नानादिनानाविधकृत्रिमोपायैः स्वयं प्रतिच्छन्ना वा भवन्ति, दृश्या वा भवन्ति । गृह्यमाणमृगैः अतिविष्ठितान्—सुप्रतिष्ठितान् ॥ ३८-४० ॥

यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः ।
तस्मात् त्वं निहतो †युद्धे मया बाणेन, वानर !
अयुध्यन् प्रतियुध्यन् वा यस्मात् शाखामृगो ह्यसि[2] ॥ ४१ ॥

कुतो न दोषः ? इत्यत्र शिष्टाचारत्वादेवेत्याह—यान्तीत्यादि । मृगयां—प्रागुक्तरूपनानाप्रकारमृगवधयुक्तां उद्दिश्य राजर्षयः धर्मकोविदा एव यान्ति । प्रतियुध्यन्—अन्यं प्रति युध्यन् इत्यर्थः ॥ ४१ ॥

‡दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च ।
राजानः, वानरश्रेष्ठ ! प्रदातारो न संशयः ॥
तान् न हिंस्यान्न चाक्रोशेत् §नाक्षिपेत् नाप्रियं वदेत् ॥

---

*यद्यप्यत्र न मांसार्थिता, तथापि पराङ्मुखवधान्न दोष इति तात्पर्यम्-गो. †युद्धे—अन्येन साकं इति शेषः । अयुद्धे इति वा पदम् । मया साकं युद्धाभावेऽपि—इति वार्थः । मृगयायामिति वा ॥ ‡परपीडाकरो राज्ञां व्यापारः कुत इत्यत्र, व्रणचिकित्सान्यायेन सः श्रेयस्कर इत्याह—दुर्लभस्येति-गो. §नाक्षिपेत्—लोक्तिखण्डनं कुर्यात्-गो.

[1] मांसाशिनो-ङ. [2] एतदनन्तरं—तस्मात्त्वं निहतः पाप शरेण नतपर्वणा । गमिष्यसि च तान् लोकान् शक्रसूनो मनोरमान्—इत्यधिकं-झ.

शुभस्य—ऐहिकैश्वर्याभ्युदयस्येत्यर्थः। तान् न हिंस्यादिति। रणव्यतिरिक्तदेशकालयोरित्यर्थः। आक्रोशः—निन्दा। आक्षेपः—अवमाननम्। अप्रियवादः—प्रतिकूलवचनम् ॥ ४२ ॥

देवा [1]मनुष्यरूपेण चरन्त्येते* महीतले।
त्वं तु धर्ममविज्ञाय केवलं रोषमास्थितः ॥ ४३ ॥
†[2]विदूषयसि मां धर्मे पितृपैतामहे स्थितम्।
एवमुक्तस्तु रामेण वाली [3]प्रव्यथितो भृशम् ॥ ४४ ॥
‡ न दोषं राघवे दध्यौ [4]धर्मेऽधिगतनिश्चयः ॥ ४५ ॥

भृशं प्रव्यथितः—कारण—न दोषं राघवे वेदेति। दध्याविति रामोपदिष्टं धर्ममेवेति शेषः। धर्मेऽधिगतनिश्चयः इति। भगवद्वचनादेवेति शेषः ॥ ४४-४५ ॥

---

* एते—पूर्वोक्ता राजानः—गो. † नन्वेवमपि कथञ्चित्परिहार्यं 'वरतनुइरतिं, वालिद्रोहं, मनागपसर्पणं' इत्याद्यपवादकरं छन्नवेधनं समर्थोऽपि किमर्थं कृतवान्—तदवहितमनाः शृणु—'यदि रामः वालिनः पुरतस्तिष्ठेत्, तदा विदिततदीयप्रभावतया वाली प्रह्वो भवेत्। तदा तद्वधो न युक्तः। प्रतिज्ञा च व्याहन्येत। तद्द्वारा तन्मित्रं रावणोऽपि शरणं व्रजेत्। देवकार्यं च लुप्येत'। अतः प्रच्छन्नो वालिनमवधीत्—गो. 'मालामुत्सृज्य काञ्चनीम्। पित्रा दत्तां महेन्द्रेण' (11-39), 'इमां च मालामाधत्स्व दिव्यां सुग्रीव काञ्चनीम्' (22-16) इति श्लोकाभ्यां उत्तरकाण्डीयप्रक्षिप्तसर्गकथासूचनात्—वालिनाऽभिमुखयुद्धकरणे राम एव क्षीणो भवेत्। रावणवधस्तु वालिनि जीवति न संभवेत्। अतः रावणवधरूपमहाधर्मसिद्ध्यर्थं प्रच्छन्नवधः कर्तव्य आसीदिति केचित् ॥ ‡ 'देवा मनुष्यरूपेण' इत्यादिवाक्यश्रवणसमनन्तरं दैवानुग्रहवशात् वालिनः 'सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः' इत्युक्तः धर्मः परिचितोऽभूदिति ज्ञायते। अत एवात्रापि 'धर्मेऽधिगतनिश्चयः' इत्युच्यते। एवं सूक्ष्मधर्मपरिचयवतामेव वालिवधस्य धर्मत्वं ज्ञातुं शक्यमिति संप्रदायः। अयमर्थः 'वालिनं व्यक्तदर्शनम्' (६० श्लो.) इत्यनेनापि स्पष्टः ॥

[1] मानुष—च. ज. [2] प्रदूष—ङ. [3] प्रमथितो—च. [4] धर्मार्थकृत—ङ.

प्रत्युवाच ततो रामं प्राञ्जलिर्वानरेश्वरः ।
यत् त्वमात्थ, नरश्रेष्ठ! [1] तदेवं नात्र संशयः ॥ ४६ ॥
प्रतिवक्तुं प्रकृष्टे हि नाप्रकृष्टस्तु शक्नुयात् ॥ ४७ ॥

प्रकृष्टे—प्रकृष्टधर्मज्ञानैश्वर्ये । न शक्नुयादिति । मादृश इति शेषः ॥ ४७ ॥

[2] तदयुक्तं मया पूर्वं प्रमादादुक्तमप्रियम् ।
तत्रापि खलु मे [3] दोषं कर्तुं नार्हसि, राघव! ॥ ४८ ॥

यदप्रियमुक्तं, तदयुक्तमेवेत्यन्वयः । तत्रापि—अज्ञानजाप्रियोक्तौ । दोषं कर्तुं—अधिकर्तुं—भावयितुमित्यर्थः ॥ ४८ ॥

त्वं हि दृष्टार्थतत्त्वज्ञः प्रजानां च हिते रतः ।
*कार्यकारण[4]सिद्धौ ते प्रसन्ना बुद्धिरव्यया ॥ ४९ ॥

तत्र हेतुः—त्वं हीत्यादि । दृष्टेन—अपरोक्षानुभवेनैव आत्मानात्मसर्वार्थतत्त्वं जानासीति तथा । सिद्धिः—निश्चयः । कार्यं—स्वर्निरयादिः । कारणं—पुण्यपापादिः ॥ ४९ ॥

† [5] मामप्यवगतं धर्मात् व्यतिक्रान्तपुरस्कृतम् ।
धर्मसंहितया वाचा, धर्मज्ञ! परिपालय [6] ॥ ५० ॥

---

* कार्यं—दण्डनं, कारणं—तद्धेतुभूतं पापं—गो. † अवगतं—त्वां प्राप्तं—रा. अगतधर्माणं (पा.)—कृत्याकरणवन्तं, व्यतिक्रान्तपुरस्कृतं—पुरस्कृतव्यतिक्रमं—अकृत्यकारिणं—गो.

[1] तत्तथैव न—ख. [2] यद—च. [3] रोषं—ङ. [4] शुद्धौ—च. ङ. [5] मामप्यगतधर्माणं—ङ. [6] एतदनन्तरं—बाष्पसंरुद्धकण्ठस्तु वाली सार्तस्वरं शनैः । उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः—इत्यधिकं—ङ.

मामित्यादि । धर्मात् व्यतिक्रान्तानां पुरस्कृतं—अग्रेसरं, अलुक् छान्दसः । तथा अवगतं मामपि—परमपापिनमपि धर्मसंहितया वाचा परिपालय—अनुगृहाण ॥ ५० ॥

न त्वात्मानमहं शोचे न तारां न च बान्धवान् ।
यथा पुत्रं [1]गुणश्रेष्ठं अङ्गदं कनकाङ्गदम् ॥ ५१ ॥
स ममादर्शनाद्दीनः बाल्यात्प्रभृति लालितः ।
तटाक इव *पीताम्बुः [2]उपशोषं गमिष्यति ॥ ५२ ॥

पीताम्बुः तटाकः इति । 'तस्मादद्यमानाः पीयमाना आपो न क्षीयन्ते' इति श्रुतेः यद्यपि पानमात्रादुपशोषो न समस्ति, अथापि तस्याद्युपयोजितमेव पीत(त्व)शब्देन विवक्ष्यत इत्यदोषः ॥ ५२ ॥

बालश्चाकृतबुद्धिश्च एकपुत्रश्च मे प्रियः ।
तारेयः, राम! भवता रक्षणीयो [3]महाबलः ॥ ५३ ॥

तारेयः, 'स्त्रीभ्यो ढक्' ॥ ५३ ॥

†सुग्रीवे चाङ्गदे चैव विधत्स्व मतिमुत्तमाम् ।
त्वं हि शास्ता च गोप्ता च कार्याकार्यविधौ स्थितः ॥५४॥

उत्तमां मतिमिति । 'मरणान्तानि वैराणि' इति न्यायेन सुग्रीवेऽपि भ्रातृप्रेमाप्त्या सुग्रीवेऽपि अनुग्रहबुद्धिप्रकाशनम् ॥ ५४ ॥

या ते, नरपते! वृत्तिः भरते लक्ष्मणे च या ।
सुग्रीवे चाङ्गदे, राजन्! तां [4]त्वमाधातुमर्हसि ॥ ५५ ॥

या ते इति पदम् ॥ ५५ ॥

---

* पीताम्बुः—सूर्यकिरणशोषितजलः—रा. † सुग्रीवमदेव सोऽपि मन्तव्यस्त्वयेति भावः ।

[1] गुणज्येष्ठं—च. [2] ह्रदशोषं—ङ. [3] महाबलं—ङ. [4] चिन्तयितु—च. ज.

* मद्दोषकृतदोषां तां यथा तारां तपस्विनीम् ।
सुग्रीवो [1]नावमन्येत तथाऽवस्थातुमर्हसि ॥
त्वया ह्यनुगृहीतेन राज्यं शक्यमुपासितुम् ॥ ५६ ॥

मद्दोषकृतदोषां—मत्कृतसुग्रीवापकारदोषानुसरणमात्रेण कृतदोषां, न तु स्वतोऽपकारसहितामित्यर्थः । तपस्विनी—शोच्याम् । अवस्थातुं—अवस्थापयितुम् ॥ ५६ ॥

त्वद्वशे वर्तमानेन तव चित्तानुवर्तिना ।
शक्यं दिवं चार्जयितुं वसुधां चापि [2]शासितुम् ॥ ५७ ॥

राज्यमिति । वानरराज्यमित्यर्थः । शक्यं दिवमिति । तेन द्यौश्चाप्यार्जयितु शक्येति यावत् । तथाऽग्रेऽपि ॥ ५७ ॥

† त्वत्तोऽहं वधमाकांक्षन् वार्यमाणोऽपि तारया ।
सुग्रीवेण सह भ्रात्रा द्वन्द्वयुद्धमुपागतः ॥ ५८ ॥
इत्युक्त्वा [3]सन्नतो रामं विरराम हरीश्वरः ॥ ५९ ॥

अहं त्वत्तः वधमाकांक्षन्निति । इदानीं त्वदुपदेशतः पापक्षयाय त्वत्तो वधमेवापेक्षमाणः, तत्सिद्धये तारया वार्यमाणोऽपि दैवगत्या भ्रात्रा द्वन्द्वयुद्धमुपागतः—प्राप्तवान् । अतो दैवगत्या कृतार्थोऽस्मीति मथितार्थोपसंहारः ॥ ५९ ॥

---

* मद्दोषकृत एव दोषः यस्याः—रा. † आकांक्षन्—आकांक्षमाण इव—गो. त्वत्तोऽहं वधमाकांक्षन्' इति, स्वभाग्यस्य सूचनमुच्यते प्रकृतधर्मपरिचयद्दृष्ट्वा । अथवा एतदर्थमेवाहमुपागतः —इति लोकवत् काकुः इति केचित् ।

[1] नाभिमन्येत—ङ. [2] शाश्वतीम्—ङ. [3] वानरो—च.

स तमाश्वासयद्रामः वालिनं व्यक्त[1]दर्शनम् ।
[2]सामसंपन्नया वाचा धर्म[3]तत्त्वार्थयुक्तया ॥
न संतापस्त्वया कार्यः एतदर्थं, प्लवङ्गम ! ॥ ६० ॥

व्यक्तदर्शनं—उद्बुद्धबोधम् ॥ ६० ॥

न वयं भवता चिन्त्याः [4]नाप्यात्मा, हरिसत्तम !
वयं *भवद्विशेषेण धर्मतः कृतनिश्चयाः ॥ ६१ ॥

वयं न चिन्त्याः, अन्यायकारित्वेनेति शेषः । नाप्यात्मा—स्वदात्माऽपि हतार्थतया न चिन्त्य इत्यनुकर्षः । तत्र हेतुमाह—वयमित्यादि । धर्मतः—धर्ममार्गेणैव कृतनिश्चयाः—कृते—वृत्ते—वध्यघातकत्वरूपे व्यापारे निश्चयः येषामस्माकं, ते वयं तथा ॥ ६१ ॥

दण्ड्ये यः पातयेत् दण्डं दण्ड्यो यश्चापि दण्ड्यते ।
†कार्यकारणसिद्धार्थौ उभौ तौ नावसीदतः ॥ ६२ ॥

उक्त एवार्थः स्मृत्युपन्यासेन स्थिरीक्रियते—दण्ड्ये—इत्यादि । कार्यत्वेन—कृतिविषयत्वेन, कारणत्वेन—प्रकृतिप्रवर्तकत्वेन सिद्धोऽर्थः—परलोकप्रयोजनं ययोः तौ तथा ॥ ६२ ॥

---

* भवद्विशेषेण—भवद्विषयकप्रीत्यतिशयेन—रा. त्वदपेक्षया विशेषेण—विशेषत्वेन—ति. भवतः कृत्यविशेषेण हेतुना—गो. भवद्विषयकस्नेहेन क्रियन्तं वालिनं सान्त्वयति । एतद्विषये वयं न चिन्त्याः—शंक्याः, नापि त्वं, यतः वयं भवद्विशेषेण—भवतोऽप्यतिशयेन धर्मे कृतनिश्चयाः । अतः कुत्रापि विषये तव चिन्ता माऽस्तु—इति केचित् । † कार्यकारणसिद्धार्थौ—दण्ड्यदण्डयितृत्वाभ्यां निष्पन्नप्रयोजनौ—गो.

[1] विक्रमम्, दर्शनः—ङ. [2] साधुसम्मतया—च. [3] हेत्वर्थं—ङ. [4] नापि त्वं—ङ.

तद्भवान् दण्डसंयोगात् अस्माद्विगत[1]कल्मषः ।
गतः स्वां प्रकृतिं धर्म्यां [2]धर्मदृष्टेन वर्त्मना ॥ ६३ ॥

यदेवं, तत्—तस्मात्—भवानित्यादि ॥ ६३ ॥

त्यज *शोकं च मोहं च [3]भयं च हृदये स्थितम् ।
त्वया †विधानं, हर्यग्रय! न शक्यमतिवर्तितुम् ॥ ६४ ॥

हृदये स्थितं भयमिति । अस्मद्दूषणनिमित्तं परलोकभयमित्यर्थः । विधानं—प्राग्भवीयकर्म ॥ ६४ ॥

यथा त्वय्यङ्गदो नित्यं वर्तते, वानरेश्वर !
तथा वर्तेत सुग्रीवे मयि चापि न संशयः ॥ ६५ ॥

‡स तस्य वाक्यं मधुरं महात्मनः
समाहितं धर्मपथानु[4]वर्तिनः ।
निशम्य रामस्य रणावमर्दिनः
वचः [5]सुयुक्तं निजगाद वानरः ॥ ६६ ॥

तस्य वाक्यमिति । पुत्रपालनप्रतिपादकमित्यर्थः ॥ ६६ ॥

शराभितप्तेन विचेतसा मया
[6]प्रदूषितस्त्वं यदजानता, [7]प्रभो !

---

* शोकभयादि ताराऽङ्गदविषयकमपि । † विधानं—विधिः, प्रारब्धं कर्मेति यावत्—गो. ‡ उक्तमर्थं सर्गान्ते श्लोकाभ्यां संगृह्णाति—स तस्येति—गो.

[1] किल्बिषः—ङ. [2] दण्डदिष्टेन—च. [3] मन्युं—ङ. [4] वर्तिनम्. [5] सयुक्तं—ङ. [6] प्रभाषित—च. [7] विभो—च.

इदं महेन्द्रोपम [1]भीमविक्रम !
प्रसादितस्त्वं क्षम मे, [2]नरेश्वर ! ॥ ६७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे अष्टादशः सर्गः

———

इदमिति । आग इत्यर्थः । छन्नतया वधे दोषाभावस्य भगवतैव समर्थितत्वात् कार्यसौकर्याच्च तथा वधः इत्यपि ध्येयम् । सप्त(६७)मानः सर्गः ॥ ६७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे अष्टादशः सर्गः

———

एकोनविंशः सर्गः

[ताराऽऽगमनम्]

*स [3]वानरमहाराजः शयानः शर[4]विक्षतः ।
प्रत्युक्तो हेतुमिर्वाक्यैः नोत्तरं [5]प्रत्यपद्यत ॥ १ ॥

अथ श्रुतवृत्तान्तायाः तारायाः वालिसमीपागमनम् । स वानर इत्यादि । अनेन वृत्तानुवादः । हेतुभिः—हेतूपन्यासोपेतैः वाक्यैः प्रत्युक्तः—उक्तप्रत्युत्तरः ॥ १ ॥

†अश्मभिः प्रविभिन्नाङ्गः पादपैराहतो भृशम् ।
रामबाणेन चाक्रान्तः जीवितान्ते मुमोह सः ॥ २ ॥

मुमोह—विसंज्ञोऽभूत् ॥ २ ॥

---

* वृत्तवृत्तान्तानुवादः—स वानरेत्यादि । नोत्तरं प्रत्यपद्यत—रामोक्तार्थमङ्गीकृतवानित्यर्थः । † अश्मभिः—सुग्रीवप्रक्षिप्तैरिति शेषः । एवं पादपैरित्यत्रापि ।

[1] वीर्यविक्रम—ङ. [2] महीश्वर—ङ., महेश्वर—च. [3] वानरो महातेजाः—ङ. [4] पीडितः—च. ञ. [5] प्रतिपद्यते—च.

तं भार्या बाणमोक्षेण [1]रामदत्तेन संयुगे ।
हतं प्लवगशार्दूलं तारा शुश्राव वालिनम् ॥ ३ ॥
सा सपुत्राऽप्रियं श्रुत्वा वधं भर्तुः सुदारुणम् ।
निष्पपात भृशं [2]त्रस्ता *विविधात् गिरिगह्वरात् ॥ ४ ॥

अप्रियमिति पदम् । सपुत्रा—अङ्गदसहिता । गिरिगह्वरात्—किष्किन्धाख्यात् पुरान्तर्वर्तिनः ॥ ४ ॥

ये त्वङ्गदपरीवाराः वानरा भीमविक्रमाः ।
ते सकार्मुकमालोक्य रामं त्रस्ताः प्रदुद्रुवुः ॥ ५ ॥
सा ददर्श ततस्त्रस्तान् हरीनापततो [3]भृशम् ।
यूथादिव परिभ्रष्टान् मृगान् निहतयूथपान् ॥ ६ ॥

सा—तारा । आपतत इति । आसमन्तात् पलायमानान् इत्यर्थः ॥ ६ ॥

तानुवाच समासाद्य दुःखितान् दुःखिता सती ।
†रामवित्रासितान् सर्वान् अनुबद्धानिवेषुभिः ॥ ७ ॥

दुःखितान् वानरान् इषुभिः अनुबद्धान्—अनुसृतानिव रामवित्रासितान्— स्वार्थे णिः, रामाद्वित्रस्तान् उवाच ॥ ७ ॥

वानराः! राजसिंहस्य यस्य यूयं पुरस्सराः ।
तं विहाय सुसंत्रस्ताः ‡कस्मात् द्रवथ दुर्गताः ॥ ८ ॥

---

* विविधात्—नानाकक्ष्यात्-गो. † रामेण स्वरूपत एव प्रापितभयानिति वा । ‡ दुर्गताः—अगतिकाः-गो. वस्त्रादिकमपश्यन्तः-ति. 'निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः' इत्यमरः । कस्मात् द्रवथ—सुग्रीवसेवयैव भवतां जीवनसंभवादिति केचित् । दायादिनोस्तयोः राज्यनिमित्तवैरेणान्यतरः निहतश्चेत्, भवतां हननस्य का प्रसक्तिरिति वा ॥

[1] रामहस्तेन-ङ. [2] तस्मादुद्विग्ना गिरिकन्दरात्-च. [3] द्रुतम्-च.

राज्यहेतोः स चेत् भ्राता भ्रात्रा [1]रौद्रेण पातितः ।
रामेण प्रहितै [2]रौद्रैः मार्गणैर्दूरपातिभिः ॥ ९ ॥

किमुवाचेत्यतः—वानरा इत्यादि । यस्येति वालिन इत्यर्थः । दुर्गताः—दुर्बुद्धिं गताः कस्मात् द्रवथ ? पलायनस्य दुर्बुद्धिमूलत्वमेव दर्शयति—राज्यहेतोरित्यादि । रामेण दूरात् स्थित्वा प्रेषितैः—विसृष्टैः दूरपातिभिः—अतिदूरस्थितलक्ष्यमपि पातयद्भिः, ण्यन्तात् णिनिः, मार्गणैः भ्रात्रा राज्यहेतोः स च भ्राता पातितश्चेत्, युष्माभिः किं पलाय्यते ॥ ९ ॥

कपिपत्न्या वचः श्रुत्वा कपयः कामरूपिणः ।
प्राप्तकाल[3]मविक्लिष्टं ऊचुर्वचनमङ्गनाम् ॥ १० ॥

प्राप्तकालं—कालोचितम् । अविक्लिष्टं—व्यक्तम् ॥ १० ॥

*जीवपुत्रे ! निवर्तस्व पुत्रं रक्षस्व चाङ्गदम् ।
अन्तको रामरूपेण हत्वा नयति वालिनम् ॥ ११ ॥

पुत्रं रक्षस्वेति । रामादिति शेषः । कुतः पुत्रस्य भयम् ? इत्यत आह—अन्तक इति । नयतीति । यममिति शेषः ॥ ११ ॥

क्षिप्त्वा वृक्षान् समाविध्य विपुलाश्च शिलास्तथा ।
वाली वज्रसमैर्बाणैः [4]रामेण विनिपातितः ॥ १२ ॥

वृक्षान् क्षिप्त्वा विपुलाश्च शिलाः समाविध्य, वालिप्रहितानिति शेषः, वाली वज्रसमैः बाणैः वज्रेणेव निपातितो रामेण । अत्र—पुरान्तः वालिवधं श्रुतवत्याः तारायाः तद्वर्तिवानराणां च,

---

* अपुत्रायाः खलु मृतभर्त्रनुगमनमिति भावः—गो.

[1] क्रूरेण—ङ. [2] दूराद—ङ. [3] मविक्लिष्टं—च. [4] इन्द्रेणेव निपातितः—ङ.

वालिरामयोः युद्धं, तत्र पादपप्रक्षेपादिकं, तदर्थं रामेण बहुबाणमोक्षणं च केवलं उन्नीयवादः ॥ १२ ॥

*[1] अभिद्रुतमिदं सर्वं विद्रुतं [2] वानरं बलम् ।
अस्मिन् प्लवगशार्दूले हते शक्रसमप्रभे ॥ १३ ॥

वानराणामिदं—वानरम् ॥ १३ ॥

रक्ष्यतां [3] नगरद्वारं अङ्गदश्चाभिषिच्यताम् ।
पदस्थं वालिनः पुत्रं भजिष्यन्ति प्लवङ्गमाः ॥ १४ ॥

पदस्थं—वानरपदस्थं वालिनः पुत्रं—अङ्गदं भजिष्यन्ति । अन्यथाऽराजकेऽत्रास्माभिः अवस्थातुं अशक्यमिति भावः ॥ १४ ॥

† अथवा [4] रुचितं स्थानं इह ते, रुचिरानने !
आविशन्ति हि दुर्गाणि क्षिप्र[5]मन्यानि वानराः ॥ १५ ॥
[6] अभार्याश्च ‡ सभार्याश्च सन्त्यत्र वनचारिणः ।
§ लुब्धेभ्यो [7] विप्रलब्धेभ्यः तेभ्यो [8] नस्तुमुलं भयम् ॥१६॥

---

* विद्रुतं—पूर्वं किष्किन्धातो निर्गतं इदं बलं प्रसृतं—प्रकीर्णं सत् अभिद्रुतं—किष्किन्धाभिमुख्येन द्रुतम्-गो. प्रथमतः रामदर्शनमात्रेणैव विद्रुतं, वालिनो वधे अभितो द्रुतं इति वा । अत एवानन्तरश्लोकाञ्जस्यमपि । † ते इह—किष्किन्धायां स्थानं-अवस्थानं अरुचितं—अनभिमतं—अत्र स्थातुं अस्माकं न रोचत इत्यर्थः-गो. अरुचितं-अनर्हमिति वा । यद्वा भवत्यापि बहिर्न गन्तव्यम् । इह—एतस्मिन् सुरक्षितस्थाने स्थानं—अवस्थितिः रुचितं—समीचीनम् । यतः अभिद्रुताः वानराः दुर्गाणि सुरक्षितस्थानानि स्वयमेव क्षिप्रमाविशन्ति । अतः भवत्याः एतेषां प्रत्यवस्थानाय 'कस्माद्द्रवथ दुर्गताः' इत्येवंरीत्या श्रमो माऽस्तु इत्यर्थः । समनन्तरश्लोका द्रष्टव्याः ॥ ‡ सभार्याः—समानभार्याः, साधारणभार्या इत्यर्थः-गो. § लुब्धेभ्यः – साधारणभार्यान्तराभिलाषिभ्यः-गो. राज्यलुब्धेभ्यः-ति. अस्मद्वधाकांक्षिभ्यः-रा.

[1] अभिभूत-च. ञ. [2] प्रसृतं-ङ. [3] नगरं शूरैः-ङ. [4] ऽरुचितं-ङ. [5] मद्यैव-ङ. ख. [6] अभार्यास्सहभार्याश्च-च.ञ. [7] विप्रयुक्तेभ्यः-ङ. [8] नस्सुमहद्-च.

अथ अभिषिक्तेनाप्यङ्गदेन इह किष्किन्धायां अस्माकं परिपालनं अशक्यं, सरामे सुग्रीवे किष्किन्धां आगच्छतीत्याहुः—अथवेत्यादि। अथवा, अङ्गदावलम्बनेन इहावस्थानमपि अयुक्तमेवेति शेषः। कुत इत्यतः—रुचितमित्यादि। हे रुचिरानने! ते रुचितं—'रुच्यर्थानां प्रीयमाणः' इति चतुर्थी; तवाभीष्टमिदं स्थानं, इह विद्यमानानि दुर्गाणि च अद्यैव क्षिप्रं वानराः—सुग्रीवहनुमदादयः आगमिष्यन्ति। तेषु आगतेषु अत्र ये अभार्याः सभार्याश्च वनचारिणः सन्ति प्रागस्माभिः कृतवैराः, ते च क्षिप्रं आविशन्ति। वर्तमानसामीप्ये लट्। ततश्च लुब्धेभ्यः—रन्ध्रान्वेषिभ्यः, अस्माभिः पूर्वं विप्रलब्धेभ्यः—वञ्चितेभ्यः स्वेभ्यः—स्वीयेभ्य एव सुग्रीवादिभ्यः नः सर्वेषां भवत्याश्च सपुत्रायाः तुमुलं—निबिडं महत् भयं अस्त्येव। अत्र *यद्वातद्वाभट्टाः अरुचितमिति पदं छित्वा द्विरर्थाय अक्लिन्दन्; तदरुचितमेव। अत्र विप्रलब्धेभ्यः इति पाङ्क्तः पाठः ॥ १६ ॥

†[1] अवान्तरगतानां तु श्रुत्वा वचनमङ्गना।
आत्मनः प्रतिरूपं सा बभाषे चारुहासिनी ॥ १७ ॥

अथ पत्यौ हते तत्कालोचितमेव वचनं तारा ब्रूत इत्याह—अवान्तरेत्यादि। अवान्तरगतानां—मध्येमार्गं आगतानां तेषां वानराणां वचनं श्रुत्वा आत्मनः प्रतिरूपं—स्वस्याः तत्कालोचितम् ॥

पुत्रेण मम किं कार्यं किं राज्येन किमात्मना।
कपिसिंहे महाभागे तस्मिन् भर्तरि नश्यति ॥ १८ ॥

* गोविन्दराजः। † अवान्तरगतानां—नातिदूरवर्तिनाम्-ति. संभाषणाय कियन्मात्रमवकाशं प्राप्तानाम्। यद्वा आन्तरं—बुद्धिः, अल्पबुद्धीनां-गो.

[1] अल्पान्तर-ङ.

पादमूलं गमिष्यामि तस्यैवाहं महात्मनः ।
योऽसौ रामप्रयुक्तेन शरेण विनिपातितः ॥ १९ ॥

एवमुक्त्वा प्रदुद्राव रुदन्ती शोक[1]कर्शिता ।
शिरश्चोरश्च बाहुभ्यां दुःखेन समभिघ्नती ॥ २० ॥

[2]आव्रजन्ती ददर्शाथ पतिं निपतितं भुवि ।
हन्तारं दानवेन्द्राणां समरेष्वनिवर्तिनाम् ॥ २१ ॥

क्षेप्तारं पर्वतेन्द्राणां वज्राणामिव वासवम् ।
[3]महाबलसमाविष्टं महामेघौघनिःस्वनम् ॥ २२ ॥

क्षेप्तारं पर्वतेन्द्राणामिति । रणेष्विति शेषः । तत्र दृष्टान्तः—वज्राणामिव वासवमिति । रणभेदापेक्षया वज्राणामिति प्रयोगः । महता—वातेन बलेन समाविष्टं—आक्रान्तम् ॥ २२ ॥

शक्रतुल्यपराक्रान्तं वृष्ट्वेवोपरतं घनम् ।
नर्दन्तं नर्दतां भीमं शूरं शूरेण पातितम् ॥
*शार्दूलेनामिषस्यार्थे मृगराजं यथा हतम् ॥ २३ ॥

पराक्रान्तः—पराक्रमः । वृष्ट्वा—जलमुत्सृज्य । रणे नर्दतामपि भीमं नर्दन्तम् । मृगराजं—मृगश्रेष्ठं, प्रभूतमांसरुधिरत्वेन श्रेष्ठम् । अत एवाह—आमिषस्यार्थे इति । अत्र शार्दूलः तरक्षुरेव । †अन्यस्तु सिंह इत्युक्त्वा मृगराजशब्देन पौनरुक्त्यं मोहात् प्रालपत् ॥ २३ ॥

---

* शार्दूलेन—सिंहेन, 'सिंहो मृगेन्द्रः पञ्चास्यः हर्यक्षः श्वेतपिङ्गलः । व्यादीर्णास्यो महानादः शार्दूलोऽतुलविक्रमः' इति वैजयन्ती । यद्वा असंभावितत्वद्योतनाय शार्दूलहिंसितमिवेत्यभूतोपमा—ती. गो. मृगराजं—विपुलमांसवत्तया मृगश्रेष्ठं गजं—रा.

† गोविन्दराजः ॥

[1] मूर्छिता—च. [2] आविशन्ती—ङ. [3] महावात—ङ.

* अर्चितं सर्वलोकस्य सपताकं सवेदिकम् ।
नागहेतोः सुपर्णेन चैत्यमुन्मथितं यथा ॥ २४ ॥

अर्चितमित्यादि । सर्वलोकस्य—सर्वलोकेन अर्चितं, उच्यमानविशेषणं चैत्यं—चतुष्पथवर्तिवल्मीकं नागहेतोः सुपर्णेन यथा उन्मथितं भवति, तद्वत् सुग्रीवप्रयोजनहेतोः रामेण उन्मथितमित्यर्थः । अत्र सुपर्णेन नागेभ्यः चैत्यदत्तबलिभोजनार्थं चैत्योन्माथः इति परः† । अयं तु 'बलिहेतोः सुपर्णेन' इति यदि पाठः स्यात् तदा युज्येत । नैतदस्ति ॥ २४ ॥

अवष्टभ्य च तिष्ठन्तं ददर्श धनुरुत्तमम् ।
रामं रामानुजं चैव भर्तुश्चैवानुजं शुभा ॥ २५ ॥
‡तानतीत्य समासाद्य भर्तारं निहतं रणे ।
समीक्ष्य व्यथिता भूमौ संभ्रान्ता निपपात ह ॥ २६ ॥

तानतीत्य समासाद्येत्यनेन ते मार्गस्थिता इति गम्यते ॥ २६ ॥

सुप्तेव पुनरुत्थाय आर्यपुत्रेति [1] क्रोशती ।
रुरोद [2] सा पतिं दृष्ट्वा [3] सन्दितं मृत्युदामभिः ॥ २७ ॥

सन्दितं—बद्धम् ॥ २७ ॥

---

* अत्र भागवतायुक्तकालियनागप्रहरणवेलायां बलिस्थानं चैत्यमपि उन्मथितमित्यवगन्तव्यमित्याहुः(ती.)–गो. † गोविन्दराजः, तीर्थो वा । ‡ अतीत्येति नातिक्रम उच्यते, सर्वेषां समीपस्थत्वात् । किन्तु तत्र दोषबुद्धिमकृत्वेत्यर्थः–गो.

[1] शोचती–ङ. वादिनी–च. [2] पतितं–ङ. [3] स्यन्दितं–ङ.

तामवेक्ष्य तु सुग्रीवः क्रोशन्तीं कुररीमिव ।
विषादमगमत् कष्टं दृष्ट्वा चाङ्गदमागतम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकोनविंशः सर्गः

———

अमर(२८ १/२)मानः सर्गः ॥ २८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकोनविंशः सर्गः

———

विंशः सर्गः

[ताराविलापः]

रामचापविसृष्टेन शरेणान्तकरेण तम् ।
दृष्ट्वा विनिहतं भूमौ तारा [1] ताराधिपानना ॥ १ ॥

अथ ताराप्रलापः । रामेत्यादि ॥ १ ॥

सा समासाद्य भर्तारं पर्यष्वजत भामिनी ।
इषुणाऽभिहतं दृष्ट्वा वालिनं कुञ्जरोपमम् ।
[2] वानरेन्द्रं [3] महेन्द्राभं शोक[4]संतप्तमानसा ॥ २ ॥
तारा तरुमिवोन्मूलं पर्यदेवयदातुरा ॥ ३ ॥

उन्मूलं—उत्पाटितम् ॥ ३ ॥

---

[1] तारतरस्वना—ङ. [2] वानरं पर्वतेन्द्राभं—च. [3] महाभागं—ङ. [4] संविग्नमानसा—संतापकर्शिता—ङ.

रणे दारुण विक्रान्त प्रवीर प्लवतां वर !
*किं दीना[1]मपुरोभागां अद्य त्वं नाभिभाषसे ॥ ४ ॥

प्लवतां—वानराणाम् । अपुरोभागाम् ; 'दोषैकदृक् पुरोभागी', त्वद्विषये अपराधरहितामित्यर्थः ॥ ४ ॥

उत्तिष्ठ, हरिशार्दूल ! भजस्व शयनोत्तमम् ।
नैवंविधाः शेरते हि भूमौ नृपतिसत्तमाः ॥ ५ ॥
अतीव खलु ते कान्ता वसुधा, वसुधाधिप !
गतासुरपि यां गात्रैः मां विहाय निषेवसे ॥ ६ ॥
†व्यक्तमन्या त्वया, वीर ! धर्मतः [2]संप्रवर्तिता ।
किष्किन्धेव पुरी रम्या स्वर्गमार्गे विनिर्मिता ॥ ७ ॥

व्यक्तमित्यादि । हे वीर ! त्वया धर्मतः संप्रवर्तिता—परिरक्षिता किष्किन्धेव अन्याऽपि नगरी स्वर्गमार्गेऽपि व्यक्तं निर्मिता । नो चेत् कथं किष्किन्धां उपेक्षसे इति शेषः ॥ ७ ॥

यान्यस्माभिस्त्वया [3]सार्धं वनेषु मधुगन्धिषु ।
विहृतानि त्वया काले तेषामुपरमः कृतः ॥ ८ ॥

तेषामुपरमः इति । तेषां विहाराणां समाप्तिरित्यर्थः ॥ ८ ॥

---

*इदानीं पुरोभागां—एतस्मिन् काले कृतापराधां मत्वाऽद्य नाभिभाषसे किमित्यन्वयः—ति. पुरोभागां—अग्रे स्थितां—रा. अपुरोभागां—दोषदर्शनरहितां—गो.
†अत्र निर्मिता किष्किन्धेव अन्या पुरी स्वर्गमार्गे त्वया धर्मतः प्रवर्तिता । अतः खल्विमां त्यक्त्वा गन्तुमुद्यतोऽसीति भावः—गो. धर्मतः संप्रवर्तता—धर्मेण युद्धमाचरता त्वयाऽद्य स्वर्गमार्गे—स्वर्गसाधनरणभूमौ किष्किन्धेवान्या रम्या पुरी निर्मिता—ति. अत्र तिलके कतकोऽनूदितः ॥

[1] मनुरक्तां मां—ङ. मां पुरोभागां—झ. [2] संप्रवर्तता—ङ. च. [3] वीर—ङ.

*निरानन्दा निराशाऽहं निमग्ना शोकसागरे ।
त्वयि पञ्चत्वमापन्ने महायूथपयूथपे ॥ ९ ॥

हृदयं सुस्थिरं †मह्यं दृष्ट्वा विनिहतं पतिम् ।
यन्न शोकाभिसंतप्तं स्फुटतेऽद्य सहस्रधा ॥ १० ॥

विनिहतमिति । त्वामिति शेषः ॥ १० ॥

सुग्रीवस्य प्रिया भार्या हृता स च विवासितः ।
[1]यत्तु तस्य त्वया ‡व्युष्टिः प्राप्तेयं, प्लवगाधिप ! ॥ ११ ॥

विवासित इति यत्, तस्य कर्मणः इयं व्युष्टिः—परिपाकः प्राप्तः इत्यर्थः ॥ ११ ॥

निःश्रेयसपरा मोहात् त्वया चाहं विगर्हिता ।
यैषाऽब्रुवं हितं वाक्यं, वानरेन्द्र ! हितैषिणी ॥ १२ ॥

या एषा अब्रुवं, सा अहं त्वया मोहात् विगर्हिता । अस्वीकृतवचना कृतेति यावत् ॥ १२ ॥

रूपयौवनदृप्तानां §दक्षिणानां च, मानद !
नूनमप्सरसामार्य ! चित्तानि प्रमथिष्यसि ॥ १३ ॥

दक्षिणानां—समर्थानां चित्तानि प्रमथिष्यसीति, प्राप्तदिव्यदेहः अप्सरसां काममोहजननेनेति शेषः ॥ १३ ॥

कालो निःसंशयं नूनं जीवितान्तकरस्तव ।
बलाद्येनावपन्नोऽसि सुग्रीवस्यावशो [2]वशम् ॥ १४ ॥

---

*अत्र निरानन्दा, निराशा—कालान्तरे आनन्दो भविष्यतीत्याशारहिता-गो.
† मह्यं-मम-गो. ति. रा. ‡ व्युष्टिः—फलं, 'व्युष्टिः फले समृद्धौ च' इत्यमरः-गो. § दक्षिणानां—अनङ्गतन्त्रे कुशलानां-गो.

[1] यत्तस्य च-ङ. [2] वशी-ङ.

*[1]अस्थाने वालिनं हत्वा युध्यमानं परेण च।
न संतप्यति काकुत्स्थः कृत्वा कर्म सुगर्हितम् ॥ १५ ॥

काल इति। प्राप्त इति शेषः। अवपन्नः—प्राप्तः ॥१४-१५॥

†वैधव्यं शोकसन्तापं [2]कृपणाऽकृपणा सती।
अदुःखोपचिता पूर्वं वर्तयिष्याम्यनाथवत् ॥ १६ ॥

ललितश्चाङ्गदो वीरः सुकुमारः सुखोचितः।
वत्स्यते कामवस्थां मे पितृव्ये क्रोधमूर्च्छिते ॥ १७ ॥

‡कुरुष्व पितरं, पुत्र! सुदृष्टं धर्मवत्सलम्।
दुर्लभं दर्शनं, वत्स! तव तस्य भविष्यति ॥ १८ ॥

पितरं सुदृष्टं कुरुष्वेत्यन्वयः ॥ १८ ॥

समाश्वासय पुत्रं त्वं सन्देशं सन्दिशस्व च।
मूर्ध्नि चैनं समाघ्राय प्रवासं प्रस्थितो ह्यसि ॥ १९ ॥

सन्देशं—कर्तव्योपदेशम् ॥ १९ ॥

रामेण हि महत्कर्म कृतं त्वामभिनिघ्नता।
आनृण्यं च गतं तस्य सुग्रीवस्य प्रतिश्रवे § ॥ २० ॥

---

* तिलकेऽस्य व्याख्यातत्वात् प्रायः कतकस्याप्ययं संमतः स्यात् ॥ † अहं पूर्वं अदु:खोपचिता अकृपणा च सती संप्रति कृपणा भूत्वा वैधव्यंशोककृतसंतापं च वर्तयिष्यामि—धारयिष्यामि—**गो.** कृपणाकृपणा—अतिशयेन कृपणा, आबाधायां वा द्वित्वम्—**ति.** ‡ अनेन तदानीमङ्गदः समागत इति द्योत्यते—**गो.** § प्रतिश्रवे—प्रतिज्ञाविषये। अनेन वालिवधविषयदोषाभावो ध्वनितः—**ति.** 'महत्कर्म' इति कथनात्—रामेण स्वप्रतिज्ञा दैवात् निर्वर्तिता—इत्याशयस्ताराया व्यज्यते ॥

[1] अयं श्लोकः कुण्डलितः—**ङ.** [2] कृपणं—**ङ.** [3] मे—**च.**

सकामो भव, सुग्रीव! रुमां त्वं प्रतिपत्स्यसे।
भुंक्ष्व राज्यमनुद्विग्नः [1] शस्तो भ्राता रिपुस्तव।
किं मामेवं विलपतीं [2] प्रेम्णा त्वं नाभिभाषसे ॥ २१ ॥

शस्तः—हिंसितः ॥ २१ ॥

*इमाः पश्य वरा [3] बह्वीः भार्यास्ते, वानरेश्वर!
तस्या विलपितं श्रुत्वा [4] वानर्यः सर्वतश्च ताः ॥ २२ ॥
परिगृह्याङ्गदं [5] दीनं दुःखार्ताः परिचुक्रुशुः ॥ २३ ॥

तस्याः विलपितं—तारायाः प्रलापम् ॥ २३ ॥

†किमङ्गदं साङ्गद वीरबाहो!
विहाय [6] यास्यद्य चिरप्रवासम्।
न युक्तमेवं गुणसंनिकृष्टं
विहाय पुत्रं [7] प्रियचारुवेषम् ॥ २४ ॥

किमङ्गदं साङ्गदेत्यादि। एवमेव संनिवेशक्रमः। सर्वतश्च अस्मद्व्याख्यानक्रमेणैव पाठसंन्निवेशक्रमः सुस्पष्टः। वीरबाहो—वीरलालनीयबाहुः वीरबाहुः, मध्यमपदलोपी समासः। गुणैः सन्निकृष्टः—संयुक्तः इत्यर्थः। गुणैः तव प्रत्यासन्नः इति चार्थः। प्रियः चारुः वेषः यस्य स तथा। तं पुत्रमित्यन्वयः ॥ २४ ॥

---

* बह्वयः इमास्ते भार्याः पश्य, वाक्यस्य कर्मतयाऽन्वयान्न द्वितीया—**रा.**
† साङ्गदवीरबाहो—साङ्गदौ, वीरौ वीर्यवन्तौ बाहू यस्य—**गो.** साङ्गद—इति भिन्नं पदं वा।

[1] मृतो—**ङ.** [2] प्रियां त्वं—**च.** [3] बह्वयः—**च.** [4] वानर्यः—**ङ.** [5] दीनाः—**च.** [6] यातोऽसि—**ङ.** [7] प्रियपुत्र गन्तुं—**ङ.**

[1][किमप्रियं ते प्रियचारुवेष !
मया कृतं, नाथ ! सुतेन वा ते !
सहाङ्गदां मां स विहाय, वीर !
यत् प्रस्थितो दीर्घमितः प्रवासम् ॥]

यद्यप्रियं किंचिदसंप्रधार्य
कृतं मया स्यात् तव, दीर्घबाहो !
क्षमस्व मे तत् हरिवंशनाथ !
व्रजामि मूर्ध्ना तव, वीर ! पादौ ॥ २५ ॥

असंप्रधार्य—अविचार्य। हरिवंशानां—वानरसमूहानां नाथः तथा ॥ २५ ॥

तथा तु तारा करुणं रुदन्ती
भर्तुः समीपे सह वानरीभिः ।
व्यवस्यत *[2]प्रायमुपोपवेष्टुं
अनिन्द्यवर्णा भुवि यत्र वाली † ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे विंशः सर्गः

ततः—तथा तु तारा इत्यादि। तरु(२६)मानः सर्गः ॥२६॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे विंशः सर्गः

---

* भुवि प्रायमुपोपवेष्टुं—प्रायोपवेशं कर्तुम् । † अत्र सर्गे श्लोकव्यत्यासो लेखककृतः—गो.

[1] च पुस्तके नास्ति । [2] प्रायमनिन्द्यवर्णा उपोपवेष्टुं—च.

एकविंशः सर्गः

[तारासमाश्वासनम्]

ततो निपतितां तारां च्युतां तारामिवाम्बरात् ।
शनैराश्वासयामास हनुमान् हरियूथपः ॥ १ ॥

अथ हनुमता ताराया: आश्वासनम् । ततो निपतितामित्यादि ॥

*गुणदोषकृतं जन्तुः स्वकर्मफलहेतुकम् ।
अव्यग्रस्तदवाप्नोति [1] सर्वं प्रेत्य शुभाशुभम् ॥ २ ॥

गुणदोषेत्यादि । जन्तुः फलहेतुकं—स्वर्गादिफलसाधकं गुणदोषकृतं—शमादिगुणेन रागादिदोषेण वा कृतं यत् स्वकर्मास्ति, तस्य स्वं स्वं शुभाशुभं—शुभाशुभरूपं फलं प्रेत्य अव्यग्रः—अनाकुलः प्राप्नोति ॥ २ ॥

शोच्या शोचसि कं शोच्यं दीनं दीनाऽनुकम्पसे ।
कस्य को वाऽनुशोच्योऽस्ति देहेऽस्मिन् बुद्बुदोपमे † ॥ ३ ॥

शोच्येत्यादि । पापपुण्यकर्मपाशवशगत्वेन शोचनीया त्वं कमन्यं शोचसि! कर्मवशगं भर्त्रादिकं कर्मफलवशतो दीना त्वं कमन्यं पुत्रादिकं अनुकम्पसे? बुद्बुदोपमे अस्मिन् देहे अतीते कस्य कश्च अनुशोच्योऽस्ति! कस्यापि विदुषः न कोऽपि शोकः इत्यर्थः ॥ ३ ॥

---

* जन्तुः गुणदोषकृतं—ज्ञानाज्ञानाभ्यां कृतं, स्वकर्मफलं—स्वकर्मवासना हेतुः यस्य तत्तथोक्तं, यत्कर्मास्ति । सुग्रीवेणायं मारित इति न मन्तव्यं, किन्तु स्वकर्मणैव हतः, निमित्तमात्रं सुग्रीव इति भावः—गो. † जलबुद्बुदवदस्थिरे देहे, निमित्तसप्तमी—गो.

[1] स्वयं—ङ.

अङ्गदस्तु कुमारोऽयं द्रष्टव्यो जीवपुत्रया ।
*[1] आयत्यां च विधेयानि † समर्थान्यस्य चिन्तय ॥ ४ ॥

अथ मृतशोकमुत्सृज्य जीवत्पुत्रमवलम्ब्य सुखीभवेत्याह-- अङ्गदस्त्वित्यादि । द्रष्टव्य इति । शोकनिवृत्त्यर्थमिति शेषः । अतः परं मृतस्य उत्तरकाले यानि विधेयानि कार्याणि समर्थानि-- उचितानि, त्वं तानि विचिन्तय ॥ ४ ॥

जानास्यनियतामेवं भूतानामागतिं गतिम् ।
तस्मात् शुभं हि कर्तव्यं [2] पण्डितेनेह लौकिकम् ‡ ॥ ५ ॥

जानासीति अभिज्ञावचने लट् । अनियतां—अव्यवस्थिताम् । हि—यस्मात् यदेवं, तस्मात् शुभं—परलोकसुखावहम्, सत्कर्मेत्यर्थः, 'पण्डितेनेह लौकिकं' इतिपाठः, इह—पतिपुत्रादिवियोगकाले लौकिकमपि शुभमेव कर्तव्यम् ॥ ५ ॥

यस्मिन् हरिसहस्राणि [3] प्रयुतान्यर्बुदानि च ।
वर्तयन्ति §[4] कृतांशानि सोऽयं दिष्टान्तमागतः ॥ ६ ॥

यस्मिन् इत्यादि । जीवतीति शेषः । कृतांशानीति । कृतभोग्यविभागानि भूत्वा वर्तयन्ति—जीवन्ति स्म, सोऽयं दिष्टान्तं—कल्पित‖कालान्तम् ॥ ६ ॥

---

* 'उत्तरः काल आयतिः' इत्यमरः ॥ † समर्थानि—हितानि—गो.
‡ शुभं—और्ध्वदैहिकम् । पहलौकिकं—रोदनादिकम्—गो. लौकिकं रोदनादिकमिव शुभं पारलौकिकमपि कर्तव्यम्—रा. इह—पतिपुत्रादिवियोगकाले न लौकिकं बहु रोदनादि कर्तव्यम् । प्रीतिमात्रबोधकतया मृतेष्टासाधनत्वेन च तस्य लौकिकत्वम्—ति.
§ कृतांशानि—कृतभोग्यांशानि—ति. ‖ 'कालो दिष्टोऽप्यनेहापि' इत्यमरः ॥

[1] आयत्या—च. [2] पण्डितेनैह—ङ. [3] प्रयुक्तान्य—च. [4] कृतांशानि—च.झ.

यदयं न्यायदृष्टार्थः सामदानक्षमापरः ।
गतो [1]धर्मजितां भूमिं नैनं शोचितुमर्हसि ॥ ७ ॥

यत्—यस्मात् न्यायेन—नीतिशास्त्रेण, दृष्टः अर्थः—राजकार्यं येन स तथा । सामदानक्षमापरः, मित्रेष्विति शेषः । तस्मात् अयं धर्मजितां—धर्मेण भूमिं जितवतां राज्ञां भूमिं—स्थानं गतः । अतो नैनं शोचितुमर्हसि ॥ ७ ॥

सर्वे हि हरिशार्दूलाः पुत्रश्चायं तवाङ्गदः ।
इदं हर्यृक्षराज्यं च त्वत्सनाथमनिन्दिते ॥ ८ ॥

इतश्च तव शोकार्हता नास्तीत्याह—सर्व इत्यादि । त्वयैवैकया सनाथः—त्वत्सनाथः तथा ; यथार्हं विपरिणामः ॥ ८ ॥

ताविमौ [2]शोकसन्तप्तौ शनैः *प्रेरय, भामिनि ।
त्वया परिगृहीतोऽयं अङ्गदः शास्तु मेदिनीम् ॥ ९ ॥

ताविमाविति । सुग्रीवाङ्गदावित्यर्थः । शनैः प्रेरयेति । उत्तरकृत्यकरणायेति शेषः ॥ ९ ॥

संततिश्च †यथादृष्टा कृत्यं यच्चापि सांप्रतम् ।
राज्ञस्तत् क्रियतां [3]तावत् एष कालस्य निश्चयः ॥ १० ॥

यथादृष्टा सन्ततिश्चेति । अङ्गद इत्यर्थः । तेन यत् राज्ञः सांप्रतं सत्परलोकसाधुकृत्यमस्ति, तत् सर्वं क्रियताम् । एषः कालस्य निश्चयः—इदानीन्तनकालस्य उचितानुष्ठाननिश्चयः इत्यर्थः ॥ १० ॥

---

* प्रेरय-निवर्तस्व-गो. रा. † यथा—यथावत् दृष्टा—त्वया प्राप्ता—रा.

[1] धर्मकृतां—ङ. [2] शोकसन्तापौ—ङ [3] सर्वं -ज.

संस्कार्यो *हरिराजश्च अङ्गदश्चाभिषिच्यताम् ।
सिंहासनगतं पुत्रं पश्यन्ती शान्तिमेष्यसि ॥ ११ ॥

एषः इति कः ? इत्यपेक्षायामाह—संस्कार्य इत्यादि ॥ ११ ॥

सा तस्य वचनं श्रुत्वा भर्तृव्यसनपीडिता ।
अब्रवीदुत्तरं तारा हनुमन्तमवस्थितम् ॥ १२ ॥
अङ्गदप्रतिरूपाणां पुत्राणामेकतः शतम् ।
हतस्याप्यस्य वीरस्य गात्रसंश्लेषणं वरम् ॥ १३ ॥

अथ पुत्रेण सुखिनी भवेति यदुक्तं, तत् प्रत्याख्याति तारा—अङ्गदप्रतिरूपाणामित्यादि । तत्तुल्यानामित्यर्थः । पुत्राणां शतमेकतः इति । एकस्मिन् सुखसाधनकोटौ, अथ मृतस्याप्यस्य वीरस्य गात्रसंश्लेषणं परस्मिन् कोटौ, एवं सति तयोर्मध्ये हतस्यास्य गात्रसंश्लेषणं वरं सुखसाधनमित्यर्थः । परलोकपरमानन्दहेतुत्वादित्याशयः ॥ १३ ॥

न चाहं †[1] हरिराजस्य प्रभवाम्यङ्गदस्य वा ।
पितृव्यस्तस्य सुग्रीवः सर्वकार्येष्वनन्तरः ॥ १४ ॥

अथ राज्यं त्वदधीनमिति यदुक्तं तत् प्रत्याख्याति—न प्रभवामीति । योग्या न भवामि, स्त्रीत्वादित्याशयः । अङ्गदस्य च न प्रभवामि । राज्यप्रदान इति शेषः । कुतो नेत्यतः—पितृव्यस्तस्येत्यादि । अनन्तरः—प्रत्यासन्नः ॥ १४ ॥

---

*संस्कार्य इति । रामबाणस्यामोघान्मरणनिश्चयेनैवमुक्तिः—ति. अनन्तरसर्गस्याद्यश्लोकटिप्पणी द्रष्टव्या ॥ †हरिराजस्य, संस्कारायेति शेषः—रा. गो.

[1] राजसिंहस्य—ज.

न ह्येषा बुद्धिरास्थेया, हनुमन्! अङ्गदं प्रति।
पिता हि बन्धुः पुत्रस्य न माता, हरिसत्तम! ॥ १५ ॥

एषा बुद्धिरिति। अङ्गदस्याभिषेकबुद्धिरित्यर्थः। कुतः इत्यतः—पिता हीत्यादि ॥ १५ ॥

न हि मम हरिराजसंश्रयात्
क्षमतरमस्ति परत्र चेह वा।
अभिमुखहरिवीरसेवितं
शयनमिदं मम सेवितुं क्षमम् ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकविंशः सर्गः

अभिमुखं—अपरोक्षं हरिवीरेण सेवितं तथा। चीय(१६)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकविंशः सर्गः

द्वाविंशः सर्गः

[वाल्यनुशासनम्]

*वीक्षमाणस्तु मन्दासुः सर्वतो मन्दमुच्छ्वसन्।
[1]आदावेव तु सुग्रीवं ददर्श [2]त्वात्मजाग्रतः ॥ १ ॥

अथ वालिना अनुजात्मजयोः हितोपदेशः। वीक्षमाण इत्यादि। सर्वतो वीक्षमाणः सः आत्मजस्याग्रतः स्थितं सुग्रीवमेवादौ ददर्श ॥१॥

---

* एतममोघरामशराभिघातेन मोहसमाविष्टं वालिनं मृतं निश्चित्य संस्कारादिकरणाय त्वरमाणे हनूमति दैवात् किञ्चित्समाश्वस्तो वाली कर्तव्यभागं नियच्छति द्वाविंशे—गो.

[1] आरादेव—ङ. [2] त्वात्मजं ततः—झ.

तं प्राप्तविजयं वाली सुग्रीवं [1] प्लवगेश्वरः ।
आभाष्य [2] व्यक्तया वाचा सस्नेहमिदमब्रवीत् ॥ २ ॥

आभाष्य । सुग्रीवेति संबोध्येत्यर्थः ॥ २ ॥

*सुग्रीव! दोषेण न मां गन्तुमर्हसि किल्बिषात् ।
कृष्यमाणं भविष्येण बुद्धिमोहेन मां बलात् ॥ ३ ॥

हे सुग्रीव! मां दोषेण—त्वदपकारदोषदुष्टत्वेन मां गन्तुं—अवगन्तुं नार्हसि । कथमित्यतः—किल्बिषादिति । प्राग्भवीयदुष्कृतवशात् । भविष्येण—भविष्यता इति यावत् । 'बुद्धिः कर्मानुसारिणी' इति न्यायेन भाविफलानुरोधेन अवश्यंभाविना बुद्धिमोहेन—भ्रातृवैरस्यादिदुर्बुद्ध्या बलादाकृष्यमाणं मां दोषेण गन्तुं—अवगन्तुं नार्हसि । हेतौ शानच् । यस्मादाकृष्यमाणोऽस्मि तस्मादित्यर्थः ॥ ३ ॥

युगपद्विहितं, तात! न मन्ये सुखमावयोः ।
सौहार्दं भ्रातृयुक्तं हि †तदिदं, [3] तात! नान्यथा ॥ ४ ॥

तदेव कर्मप्राबल्यं कार्यानुमितं दर्शयति—युगपदित्यादि । हे तात! आवयोः सुखं—राज्यसौख्यं भ्रातृयुक्तं—सोदरभ्रात्रोः युक्तमुचितं सौहार्दं च युगपत् न विहितं आवयोः कर्मणेति मन्ये । तत्-तस्मात् इदं युगपत् सौख्यं सौहार्दं च अन्यथा जातम् । विघटितमित्यर्थः ॥ ४ ॥

---

* किल्बिषात्—राज्यविवासनदारहरणरूपकिल्बिषाद्धेतोः मां दोषेण गन्तुं—दोषसहितं ज्ञातुं नार्हसि—**गो.** विधिवशादन्तिमदशायां विद्यमानोऽहं पूर्ववृत्तस्मरणेन सवैरं भवता नोपसर्पणीयः, किन्तु सर्वं विस्मृत्य भ्रातृस्नेहेनैवोपसर्पणीय इति भावः ।
† तदिदं दैवकृतं युगपदविधानं अन्यथा न हि—अन्यप्रकारं न हि भवति—**गो.**

[1] प्लवगेश्वरम्—ङ. [2] अभ्यक्तया—ङ. [3] जातमन्यथा—च. झ.

*प्रतिपद्य त्वमद्यैव राज्यमेषां वनौकसाम् ।
मामप्यद्यैव गच्छन्तं विद्धि वैवस्वतक्षयम् ॥ ५ ॥

अथ रामशरक्षीणपापत्वतः प्राप्तदिव्यदेवप्रकृतित्वात् स्वयमेव सुग्रीवाय स्वानन्तरप्राप्तं राज्यं ददाति–प्रतिपद्येत्यादि । प्रतिपद्यस्वेति यावत् । वैवस्वतक्षयं—यमनिवासम् ॥ ५ ॥

जीवितं च हि राज्यं च श्रियं च विपुलामिमाम् ।
प्रजहाम्येष वै तूर्णं महच्चागर्हितं यशः ॥ ६ ॥

अगर्हितं—प्रशस्तं यशश्च—'वाली केनाप्यशक्यवधः' इत्येवंरूपं, तच्च प्रजहामि, एकेनैव शरेण रामेण हतत्वात् † ॥ ६ ॥

‡अस्यां त्वहमवस्थायां, वीर! वक्ष्यामि यद्वचः ।
यद्यप्यसुकरं, राजन्! कर्तुमेव तदर्हसि ॥ ७ ॥

अस्यामवस्थायां इति । चरमदशायामित्यर्थः । यद्वचः—अवश्यवक्तव्यमिति शेषः । यद्यप्यसुकरमिति । मया ते अत्यन्तमपकृतत्वादित्याशयः । अर्हस्येवेति योजना । सात्त्विकत्वात् सात्त्विकसमाश्रयाच्चेत्याशयः ॥ ७ ॥

सुखार्हं सुखसंवृद्धं [1]बालमेनमबालिशम् ।
बाष्पपूर्णमुखं पश्य भूमौ पतितमङ्गदम् ॥
मम प्राणैः प्रियतरं पुत्रं पुत्रमिवौरसम् ॥ ८ ॥

---

* प्रतिपद्य—प्राप्नुहि–रा. पालयेति शेषः, प्राप्नुहीति वा–गो. † एवं सति 'अगर्हितं यशः' इत्युक्तिर्न सरसा । अतः छन्नेनैव रामेण हतत्वात् अकलङ्कां कीर्तिमपि अत्र भूतले प्रतिष्ठाप्य गमिष्यामीति युक्तम् ॥ ‡ अस्यामवस्थायामित्यादि अवश्यकर्तव्यत्वे हेतुतयोक्तिः लोकवत् ॥

[1] बालमत्यन्तबालिशम्–ङ.

किं तदित्यतः—सुखार्हमित्यादि । अबालिशं—समर्थं मम पुत्रं तवौरसं पुत्रमिव ॥ ८ ॥

मया हीनमहीनार्थं सर्वतः परिपालय ।
[1]त्वमप्यस्य हि *दाता च परित्राता च सर्वतः ॥ ९ ॥
भयेष्वभयदश्चैव यथाऽहं, प्लवगेश्वर! ॥ १० ॥

अहीनार्थं—अक्षीणैहिकसकलप्रयोजनं यथा तथा, सर्वतः—सर्वस्मिन् देशे काले च पालय । पालनप्रकारस्यैव प्रदर्शनं—त्वमपीत्यादि । अभयदश्चेति, भवेति शेषः ॥ ९–१० ॥

एष तारात्मजः श्रीमान् त्वया तुल्यपराक्रमः ।
रक्षसां तु वधे तेषां अग्रतस्ते भविष्यति ॥ ११ ॥

प्रागुक्तं पुत्रस्याबालिशत्वं रक्षणीयत्वप्रयोजकं दर्शयति—एष इत्यादि । रक्षसां तु वध इति । रामप्रत्युपकारप्रसङ्गे प्राप्ते इत्यर्थः ॥

अनुरूपाणि कर्माणि विक्रम्य बलवान् रणे ।
करिष्यत्येष तारेयः [2]तरस्वी तरुणोऽङ्गदः ॥ १२ ॥
†सुषेणदुहिता चेयं अर्थसूक्ष्मविनिश्चये ।
औत्पातिके च विविधे सर्वतः परिनिष्ठिता ॥ १३ ॥

---

* दाता, वस्त्राभरणादीनां–गो. † सुषेणदुहितेति । ननु समुद्रसंजातायास्तारायाः सुषेणदुहितृत्वं कथमिति चेत्—तत्र क्षीराब्धिमथनसमयोत्पन्नां तारां दृष्ट्वा सुषेणो वामं करमग्रहीत् । वाली तु दक्षिणं करमगृह्णात् । तदाऽन्योन्यं विवादे सति देवैः तारायाः सुषेणदुहितृत्वं, वालिनो जायात्वं च निश्चितम् । तदुक्तं स्कान्दे—'देवैस्सुषेणकलहे पुत्रीति प्रतिपादिता । सुषेणो दुहितुस्तस्याः स्वयंवरमकारयत् ॥ इत्थमूढा कपीन्द्रेण तारा सर्वाङ्गसुन्दरी । सुग्रीवमेकदा रात्रौ रूपसादृश्यमोहिता ॥ प्रार्थयामास कामार्ता रन्तुं रतिमती प्रभुम् । न ममायोनिजातायाः गमनं लोकगर्हितम्' इति–ती.

[1] त्वमप्यमित्र, त्वमस्य हित–ङ. [2] तेजस्वी–च., ञ.

अथ मंत्रसाचिव्यपरिकररहस्यमुपदिशति—सुषेणदुहितेत्यादि । तारेति यावत् । अर्थस्य इष्टप्राप्त्यनुष्ठेयकार्यस्य सूक्ष्मविनिश्चये—परमसिद्धान्तज्ञाने, तथा औत्पातिके—उत्पातसूच्यमाने नानाविधे आपत्काले च अनुष्ठेयानिश्चये, तथा ऐहिकामुष्मिकार्थनिश्चये च परिनिष्ठिता—निष्णाता—अतिसमर्थेत्यर्थः ॥ १३ ॥

यदेषा साध्विति ब्रूयात् कार्यं तन्मुक्तसंशयम् ।
***न हि तारामतं किञ्चित् अन्यथा परिवर्तते ॥ १४ ॥**

किं ततः ? इत्यतः—यदेषेत्यादि । तत् कार्यं तदेव अनुष्ठेयमित्यर्थः । तदेव द्रढयति—न हीत्यादि । अन्यथा न परिवर्तते इत्यर्थः । स्वानुभवसिद्धत्वादेवेत्याशयः । एवं वदता स्वानन्तरं तारास्वीकारोऽपि तिर्यग्योनित्वाददोष इति मन्यमानेनानुमन्यते इति गम्यते । अत एव तस्याः परिग्रहोऽग्रे ॥ १४ ॥

राघवस्य च ते कार्यं कर्तव्यमविशङ्कया ।
स्यादधर्मो ह्यकरणे त्वां च हिंस्याद्विमानितः[1] † ॥ १५ ॥

एवं स्त्रीपुत्रविषये वक्तव्यमुक्त्वा भ्रात्रे वक्तव्यं उपदेशमाह—राघवस्येत्यादि । अकरणे अधर्मः स्यादिति । मिथ्याप्रतिज्ञत्वप्रसङ्गादित्याशयः । न केवलं पारलौकिकानर्थः अकरणे, किं तु प्रत्यक्षानर्थोऽपीत्याह—त्वां चेत्यादि । मामिव धर्मभ्रष्टत्वादिति शेषः ॥ १५ ॥

* अनेन त्रैवर्णिकेतरत्वेन तरुणीत्वेनावश्यं कर्तव्यपुरुषान्तरस्वीकारायास्तारायाः देवरत्वात् सुग्रीवस्य स्वीकारोऽप्यनुमत इति गम्यते–ति. † विमानितः— अवमानितः, रोषित इति वा । राघव इति विपरिणामः ॥

[1] दमानितः–च. ज.

इमां च मालामाधत्स्व दिव्यां, सुग्रीव! काञ्चनीम् ।
उदारा श्रीः स्थिता ह्यस्यां संप्रजह्यान्मृते मयि ॥ १६ ॥

अथ सर्वात्मना भ्रातरि सौमनस्यं अर्थक्रियया दर्शयति---इमां चेत्यादि । उदारा--प्रशस्ता श्रीः--विजयलक्ष्मीः अस्यां स्थिता, नित्यं महेन्द्रानुग्रहात् । हि—यस्मात् सा माला मृते मयि स्थिता चेत्, तां शवस्पृष्टां श्रीः संप्रजह्यात्, तस्मात् इदानीमेव इमां मालां आधत्स्व । 'संप्रजह्यान्मृते मयि' इति पाठः ॥ १६ ॥

इत्येवमुक्तः सुग्रीवः वालिना भ्रातृसौहृदात् ।
हर्षं त्यक्त्वा पुनर्दीनः ग्रहग्रस्त इवोडुराट् ॥ १७ ॥

हर्षं त्यक्त्वा पुनर्दीन इति । मरणात्पूर्वं दैवात् स्वस्मिन् भ्रातृसौमनस्यस्य नष्टत्वात् तद्वधः सुखप्रतीतितः हर्षावहो जातः । पुनस्तस्य यथापूर्वं सौमनस्यं दृष्ट्वा मरणे विषण्णोऽभूदित्यर्थः । ग्रह-ग्रस्तः--राहुग्रस्तः ॥ १७ ॥

तद्वालिवचनात् शान्तः कुर्वन् *युक्तमतन्द्रितः ।
जग्राह सोऽभ्यनुज्ञातः मालां तां चैव काञ्चनीम् ॥ १८ ॥

तद्वालिवचनात्---तादृशेन वालिवचनेन, शान्तः---शान्तवैरः युक्तं---भ्रातृस्नेहोचितं अतन्द्रितः कुर्वन् भूत्वा । अभ्यनुज्ञातः मालाग्रहे च वालिनेति शेषः ॥ १८ ॥

तां मालां काञ्चनीं दत्त्वा वाली दृष्ट्वाऽऽत्मजं स्थितम् ।
†संसिद्धः प्रेत्यभावाय स्नेहादङ्गदमब्रवीत् ॥ १९ ॥

प्रेत्यभावाय संसिद्ध इति । कल्पित इत्यर्थः ॥ १९ ॥

---

* युक्तं —भ्रातृस्नेहोचितदर्शनादिव्यवहारम्-ति. युक्तं—योग्यं तत्र-लोके प्रसिद्धं विलापादि-रा. पूर्वद्वेषादिकं विस्मरन्निति तात्पर्यम् । † प्रेत्यभावाय संसिद्धः इति, प्रयाणाय सन्नद्ध इति यावत् ॥

देशकालौ भजस्वाद्य *क्षममाणः प्रियाप्रिये ।
सुखदुःखसहः काले सुग्रीववशगो भव ॥ २० ॥

अद्य देशकालौ तत्कर्मोचितौ भजस्व—जानीहीति यावत् । प्रियाप्रिये—इष्टानिष्टयोगजे । काले—यथोचितसेवाकाले । सुग्रीववशगः—तत्सेवापरः भव ॥ २० ॥

यथा हि त्वं, महाबाहो! लालितः सततं मया ।
न तथा वर्तमानं त्वां सुग्रीवो बहु[1]मन्यते ॥ २१ ॥

विपक्षे बाधकमाह—यथा हीति । बालतया मया केवलं लालितः सन् यथा कालोचितराजसेवारहितोऽवर्तिष्ट, तथा इदानीं तारुण्येऽपि सेवाराहित्येन वर्तमानं त्वां सुग्रीवः न बहुमन्यते—न मन्येत, अतः सेवां कुरु इत्युपदेशः ॥ २१ ॥

†माऽस्यामित्रैः गतं गच्छेः मा शत्रुभिररिन्दम!
भर्तुरर्थपरो दान्तः सुग्रीववशगो भव ॥ २२ ॥

अपि च, अस्य सुग्रीवस्य अमित्रैः—अनुपकारकैः, तथा अस्य शत्रुभिश्च गतं—सङ्गतं मा गच्छेः । भर्तुः सुग्रीवस्य अर्थपरः प्रयोजनसाधनपरः ॥ २२ ॥

---

* प्रियाप्रिये क्षममाणः—सहमानः । साधनदृष्ट्येदम् । फलदृष्ट्या—सुखदुःखस[ह] इति ॥ † अस्य सुग्रीवस्य अमित्रैः गतं—प्राप्तं पुरुषं मा गच्छेः । अस्य शत्रोर्मित्रं न भजेरित्यर्थः । शत्रुभिस्सह च मा गच्छेः—गो.

[1] मंस्यते—ङ.

*न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते।
उभयं हि [1]महान् दोषः तस्मादन्तरदृग्भव ॥ २३ ॥

न च अतिप्रणयः कार्य इति। पुत्रत्वात्, बाल्यत्वादिति शेषः। अप्रणयश्च कर्तव्यः इति। स्त्र्यादिसक्त्या इति शेषः। अन्तरदृक् भव—'अत्यासत्तिर्विनाशाय त्वतिदूरं तु निष्फलम्। सेवा मध्यमभावेन राजवह्निगुरुस्त्रियाम् †' इति न्यायेन मध्यमं मार्गमवगच्छेत्यर्थः ॥२३॥

इत्युक्त्वाऽथ विवृत्ताक्षः शरसंपीडितो भृशम्।
विवृतैर्दशनैर्भीमैः बभूवोत्क्रान्तजीवितः ॥ २४ ॥

ततो विचुक्रुशुस्तत्र वानरा [2]हतयूथपाः।
परिदेवयमानास्ते सर्वे प्लवगपुङ्गवाः ॥ २५ ॥

हतः यूथपः येषां ते तथा। परिदेवयमानाः विचुक्रुशुः इत्यन्वयः ॥ २५ ॥

किष्किन्धा ह्यद्य शून्याऽऽसीत् स्वर्गते वानराधिपे।
उद्यानानि च शून्यानि पर्वताः काननानि च ॥
हते प्लवगशार्दूले निष्प्रभा वानराः कृताः ॥ २६ ॥

तस्यैव प्रपञ्चः—किष्किन्धेत्यादि ॥ २६ ॥

‡[3] यस्य वेगेन महता काननानि वनानि च।

---

* विवृध्यत्वात् अतिप्रीतिः प्रसक्ता, प्रभुत्वात् दूरस्थितिः प्रसक्ता। अतो मध्यस्थो भवेत्युच्यते ॥ † एकवचनमार्षम्। ‡ वेगेन—पराक्रमेण काननानि—अरण्यानि वनानि—जलानि, सरांसीत्यर्थः, पुष्पौघेणानुबध्यन्ते। यद्वा वनानि—क्षुद्रारण्यानि। यस्मिन् वालिनि गच्छति सति तद्दूरवेगेनाविशेषेण सर्वाणि वनानि पुष्पैस्सहानुगच्छन्तीत्यर्थः—गो.

[1] महादोषं—च. ज. [2] हरियूथपाः—ङ. [3] ज पुस्तकेऽयं श्लोकः कुण्डलितः।

पुष्पौघेणानुबध्यन्ते करिष्यति तदद्य कः ।
येन दत्तं महद्युद्धं गन्धर्वस्य महात्मनः ॥ २७ ॥

गोलभस्य महाबाहोः दशवर्षाणि पञ्च च ।
नैव रात्रौ न दिवसे तद्युद्धमुपशाम्यति ॥ २८ ॥

महत् युद्धं—पञ्चदशवर्षावधिकाविश्रांताहोरात्रगोलभगन्धर्वयुद्धं यस्य नोपशाम्यति स्म ॥ २७ ॥

ततस्तु षोडशे वर्षे गोलभो विनिपातितः ।
तं हत्वा दुर्विनीतं तु वाली *दंष्ट्राकरालवान् ॥ २९ ॥

सर्वाभयङ्करोऽस्माकं कथमेष निपातितः ॥ ३० ॥

तं हत्वा यो वाली दंष्ट्राकरालवान्, स्वार्थे मतुप्, दंष्ट्राकरालः इत्यर्थः। अस्माकं सर्वाभयङ्करः—सर्वस्मादप्यभयङ्करः अभूत्, स एषः एकवीरः कथं निपातितः ॥ ३० ॥

हते तु वीरे प्लवगाधिपे तदा
[1]प्लवङ्गमास्तत्र न शर्म लेभिरे ।
†वनेचराः ‡सिंहयुते महावने
यथा हि गावो निहते गवां पतौ ॥ ३१ ॥

वनेचराः प्लवङ्गमाः इत्यन्वयः ॥ ३१ ॥

---

*दंष्ट्राकरालवान्—करालदंष्ट्रवान्, परनिपातः–गो. आर्षः स्वार्थे मतुप् दंष्ट्राकराल इत्यर्थः–ति. भावप्रधानो निर्देशः, दंष्ट्राकरालत्ववान्–रा. †अप 'वनेचराः' इति गवां विशेषणम्–ति. पूर्वार्धे पाठान्तरं द्रष्टव्यम् ‡सिंह स्थानीयो रामः–गो.

[1] वनेचरा–च. ज.

ततस्तु तारा व्यसनार्णवप्लुता
मृतस्य [1]भर्तुर्वदनं [2]समीक्ष्य सा ।
जगाम भूमिं परिरभ्य वालिनं
महाद्रुमं छिन्नमिवाश्रिता लता ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे द्वाविंशः सर्गः

'समीक्ष्य सा' इति पाठः। रोग(३२)मानः सर्गः ॥ ३२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे द्वाविंशः सर्गः

त्रयोविंशः सर्गः

[वालिनिर्याणम्]

ततः समुपजिघ्रन्ती कपिराजस्य तन्मुखम् ।
पतिं [3] लोकश्रुतं तारा मृतं वचनमब्रवीत् ॥ १ ॥

अथ पूर्वं मुमूर्षुं दृष्ट्वा प्रलपितवती तारा, मृतं दृष्ट्वा पुनः प्रलपति। ततः समुपजिघ्रन्तीत्यादि। लोकश्रुतः—लोकप्रसिद्धः ॥

शेषे त्वं विषमे *दुःखं अकृत्वा वचनं मम।
उपलोपचिते, वीर! सुदुःखे वसुधातले ॥ २ ॥

उपलैः—पाषाणैः उपचिते—व्याप्ते ॥ २ ॥

---

* दुःखमिति क्रियाविशेषणम्—गो. दुःखमिति खेदाभिनयो वा ॥

[1] भर्तृव्यसनं—ङ. [2] समाश्रिता—ङ. ज. [3] लोकश्रुता—च. ज., लोकाच्युतं—झ.

मत्तः प्रियतरा [1]नूनं, वानरेन्द्र! मही तव ।
शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे ॥ ३ ॥

सुग्रीवस्य वशं प्राप्तः विधिरेष, भवत्यहो!
*सुग्रीव एव विक्रान्तः, वीर! साहसिकप्रिय! ॥ ४ ॥

वशमिति । उपायवशमित्यर्थः । विक्रान्त इति, भवितेति शेषः* ॥

ऋक्षवानरमुख्यास्त्वां [2]बलिनः † पर्युपासते ।
एषां विलपितं कृच्छ्रं अङ्गदस्य च शोचतः ।
मम चेमां गिरं श्रुत्वा किं त्वं न प्रतिबुध्यसे ? ॥ ५ ॥

पर्युपासत इति । उपासिष्यत इति यावत् ॥ ५ ॥

इदं तत् [3]शूरशयनं यत्र शेषे हतो युधि ।
शायिता निहता यत्र त्वयैव रिपवः पुरा ॥ ६ ॥

शूराणां शयनं शूरशयनम् । यत्र त्वया रिपवः शायिताः तदिदं शूरशयनं त्वमपि शेषे ॥ ६ ॥

विशुद्धसत्त्वाभिजन! प्रिययुद्ध ! मम प्रिय !
मामनाथां विहायैकां गतस्त्वमसि, मानद! ॥ ७ ॥
शूराय न प्रदातव्या कन्या खलु विपश्चिता ।
शूरभार्यां हतां पश्य सद्यो मां विधवां कृताम् ॥ ८ ॥

शूरस्य तव भार्या शूरभार्या, तां माम् ॥ ८ ॥

---

* विक्रान्तो भवितेति शेषः-ति. यः सुग्रीवः विक्रान्तः—त्वया बहुवारं पराजितः, तस्य सुग्रीवस्य वशं त्वं प्राप्तः। एषः विधिः, अहो—रा. सुग्रीव एव विक्रान्त इत्येषः विधिः दैवव्यापारः—गो. 'सुग्रीव एव जितवान्' इति लोकवदुक्तिर्वा। भिन्नं वाक्यम् ॥ † पर्युपासते—पर्युपासन्ते—ति. एते सर्वे तव परितो वर्तन्त इति लोकवदेवोक्तिर्वा ॥

[1] नित्यं—ङ. [2] बलिनं—ज. [3] वीर—ङ.

अत्रभग्नश्च मे मानः भग्ना मे शाश्वती * गतिः।
अगाधे च निमग्नाऽस्मि विपुले शोकसागरे ॥ ९ ॥

मानः—राजपत्नीत्वाभिमानः। शाश्वती स्थिरा गतिः—सुखप्राप्तिः ॥ ९ ॥

अश्मसारमयं नूनं इदं मे हृदयं दृढम् ।
भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा [1] गतम् ॥ १० ॥

सुहृच्चैव हि भर्ता च प्रकृत्या मम च प्रियः ।
[2] आहवे च पराक्रान्तः शूरः पञ्चत्वमागतः ॥ ११ ॥

प्रकृत्येति। अनुपाधित इत्यर्थः। परेण आक्रान्तः—अभिभूतः पञ्चत्वमागतः। तं दृष्ट्वाऽपि हृदयं न भिन्नम्। अतो दृढं इति पूर्वेणान्वयः ॥ ११ ॥

पतिहीना तु या नारी कामं भवतु पुत्रिणी ।
धनधान्यैः सुपूर्णाऽपि विधवेत्युच्यते जनैः ॥ १२ ॥

ननु सपुत्रायाः ते कः शोकः इत्यत्राह—पतिहीनेत्यादि ॥

स्वगात्रप्रभवे, वीर! शेषे रुधिरमण्डले ।
† कृमिरागपरिस्तोमे [3] त्वमात्मशयने ‡ यथा ॥ १३ ॥

कृमेः—इन्द्रगोपस्य राग इव रागो यस्य स तथा। कृमिरागः परिस्तोमः—आस्तरणं यस्मिन् तत् तथा ॥ १३ ॥

---

* गतिः—पतिशुश्रूषा-गो. † कृमिरागः—लाक्षारागः। कृमिरागं वदन्त्यार्याः लाक्षिकं प्रियदर्शनम्' इत्युत्पलमाला-ति. ‡ आत्मशयने—स्वीयशयने ॥

[1] क्वाप्-ज्ञ. [2] प्रहारे-ङ. ज्ञ. [3] स्वकीये शयने-ज्ञ.

रेणुशोणितसंवीतं गात्रं तव समन्ततः ।
परिरब्धुं न शक्नोमि भुजाभ्यां, प्लवगर्षभ ! ॥ १४ ॥

परिरब्धुं—आलिङ्गितुं । न शक्नोमीति । शोकेन भुजयोः सन्नबलत्वादिति शेषः ॥ १४ ॥

कृतकृत्योऽद्य सुग्रीवः वैरेऽस्मिन्नतिदारुणे ।
यस्य रामवियुक्तेन हृतमेकेषुणा भयम् ॥ १५ ॥

यस्य भयं हृतं सः, सुग्रीवः अतिदारुणेऽस्मिन् वैरे विषये कृतकृत्यः—संपादितानुष्ठेयानुष्ठान इत्यर्थः ॥ १५ ॥

शरेण हृदि लग्नेन गात्रसंस्पर्शने तव ।
*[1]वार्यामि त्वां निरीक्षन्ती त्वयि पञ्चत्वमागते ॥ १६ ॥

शरेण तव गात्रसंस्पर्शने वार्यामि—निवार्य इति यावत ॥१६॥

उद्बबर्ह शरं नीलः तस्य गात्रगतं तदा ।
गिरिगह्वरसंलीनं दीप्तमाशीविषं यथा ॥ १७ ॥

एवं तस्याः वचः श्रुत्वा नीलः शरं उद्बबर्ह—बृहू उद्यमने उद्धृतवानित्यर्थः ॥ १७ ॥

तस्य निष्कृष्यमाणस्य बाणस्य च बभौ द्युतिः ।
अस्तमस्तक[2]संरुद्धः †रश्मिर्दिनकरादिव ॥ १८ ॥

तस्य निष्कृष्यमाणस्य, चशब्दात् लोहितरक्तस्य बाणस्य द्युतिः अस्तमस्तकसंरुद्धः—अस्तगिरिशिखरसंलग्नः, दिनकरात्, व्यत्ययात् पञ्चमी, दिनकरस्य रश्मिरिव बभौ ॥ १८ ॥

---

*वार्यामि—वारिताऽस्मि—गो. † दिनकरादुद्रच्छन् रश्मिरिव—गो.

[1] वारिताऽस्मि—ङ. [2] सन्नद्धरश्मेर्दिनकरादिव—ज.

पेतुः क्षतजधारास्तु व्रणेभ्यस्तस्य सर्वशः ,।
ताम्रगैरिकसंपृक्ता धारा इव धराधरात् ॥ १९ ॥
अवकीर्णं विमार्जन्ती भर्तारं रणरेणुना ,।
आस्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम् ॥ २० ॥
रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहतं पतिम् ,।
उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना ॥ २१ ॥
अवस्थां पश्चिमां पश्य पितुः, पुत्र! सुदारुणाम् ।
संप्रसक्तस्य वैरस्य *गतोऽन्तः पापकर्मणा ॥ २२ ॥

पापकर्मणा— प्राचीनपापवशतः संप्रसक्तस्य— प्राप्तस्य वैरस्य भ्रातृवैरस्य अन्तः, गतः— अवसानं वृत्तम् ॥ २२ ॥

बालसूर्यो[1]दयतनुं प्रयान्तं यमसादनम् ।
अभिवाद्य राजानं पितरं, पुत्र! मानदम् ॥ २३ ॥
एवमुक्तः समुत्थाय जग्राह चरणौ पितुः ।
भुजाभ्यां पीनवृत्ताभ्यां अङ्गदोऽहमिति ब्रुवन् ॥ २४ ॥

अभिवादयमानं त्वां अङ्गदं त्वं यथापुरा ।
दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे ॥ २५ ॥

अहं पुत्रसहाया त्वां उपासे गत[2]चेतनम् ।
सिंहेन [3]निहतं सद्यः गौः सवत्सेव गोवृषम् ॥ २६ ॥

इष्ट्वा संग्रामयज्ञेन [4]रामप्रहरणाम्भसि ।
अस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना ॥ २७ ॥
रामस्य प्रहरणं— बाण एव अम्भः यस्मिन् स तथा ॥ २७ ॥

---

* गतः—प्राप्तवान्—ति. अन्तः गतः—प्राप्तः । वैरकथा समाप्तेति यावत् ॥

[1] ज्वल—ज. [2] चेतसम्—च. ज. [3] पातितं—च. [4] रामबाणमहांभसि—ङ., रामप्रहरणाम्भसा—च.

या दत्ता देवराजेन तव तुष्टेन संयुगे।
शातकुम्भमयीं मालां तां ते पश्यामि नेह किम् ?* ॥२८॥

या दत्ता, तां इह इदानीं किं न पश्यामि। एवं वदन्त्या तया सुग्रीवाय मालाप्रदानं अदृष्टम्। दृष्टमपि पुनः दुःखात् विस्मृतं वेति ध्येयम् ॥ २८॥

[1]राजश्रीः न जहाति त्वां गतासुमपि, मानद!
†सूर्यस्याऽऽवर्तमानस्य शैलराजमिव प्रभा ॥ २९॥

आवर्तमानस्येति। अस्तमयमानस्येत्यर्थः ॥ २९॥

न मे वचः पथ्यमिदं त्वया कृतं
न चास्मि शक्ता विनिवारणे तव।
हता सपुत्राऽस्मि हतेन संयुगे
सह त्वया श्रीर्विजहाति मामिह ॥ ३०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे त्रयोविंशः सर्गः

पथ्यमिदं वचः इति श्रुतिसंनिहितस्य प्रागुपदिष्टस्य परामर्शः। अनङ्क(३० १/२)मानः सर्गः ॥ ३०॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे त्रयोविंशः सर्गः

---

*सुग्रीवाय किमर्थं दत्तेत्यर्थः-रा. 'क गतस्त्वम्' इतिवत् शोकवशाद्वा एवमुक्तिः॥ †आवर्तमानस्य- परिभ्रमतः -रा. शैलराजं मेरुं आवर्तमानस्य, अस्तं गच्छत इत्यर्थः —गो. मेरौ सदा सूर्यरश्मिसम्बन्धाद्वा तथोक्तिः॥

[1]राज्यश्रीः —च. ज.

चतुर्विंशः सर्गः

[सुग्रीवादिशोकः]

*[1] तां चाश्रुवेगेन दुरासदेन
त्वभिप्लुतां शोकमहार्णवेन ।
पश्यंस्तदा वाल्यनुजस्तरस्वी
भ्रातुर्वधेनाप्रतिमेन तेपे ॥ १ ॥

अथ सुग्रीवानुतापपरीतापौ । तां चेत्यादि । अश्रुवेगेन शोकमहार्णवेन च अभिप्लुतां—खिन्नाम् । अप्रतिमेन—असदृशेन ॥ १ ॥

स बाष्पपूर्णेन † मुखेन [2] वीक्ष्य
क्षणेन निर्विण्णमना मनस्वी ।
जगाम रामस्य शनैः समीपं
भृत्यैर्वृतः संपरि[3]दूयमानः ॥ २ ॥

निर्विण्णमनाः—खिन्नमनाः । संपरिदूयमानः—सम्यक् उपतप्यमानः ॥ २ ॥

स तं समासाद्य गृहीतचापं
उदात्तमाशीविषतुल्यबाणम् ।
यशस्विनं लक्षणलक्षिताङ्गं
अवस्थितं राघवमित्युवाच ॥ ३ ॥

---

* आशुवेगेन (पा.) शोकमहार्णवेन—ति. अश्रूणां वेगः यस्मात्, तादृशेन शोकमहार्णवेन—रा. † मुखेनोपलक्षितः सः वीक्ष्य, तारामिति शेषः—गो. (५ श्लोको द्रष्टव्यः) ॥ क्षणेन पश्यन् (पा.) विचारयन् ।

[1] तामाश्रुवेगेन—च. [2] पश्यन्—च. [3] दृश्यमानः—ङ.

उदात्तं--धीरोदात्तस्वभावम् । लक्षणैः--राजलाञ्छनैः सामुद्रिकलक्षणैः लक्षितं अङ्गं यस्य स तथा । लक्ष्मणेन नित्यसेवया लक्षितं—उपलक्षितं अङ्गं--विग्रहः--यस्य स तथेति च ॥ ३ ॥

यथाप्रतिज्ञातमिदं, नरेन्द्र !
कृतं त्वया *दृष्टफलं च कर्म ।
ममाद्य भोगेषु, नरेन्द्रपुत्र !
मनो निवृत्तं [1]हतजीवितेन ॥ ४ ॥

दृष्टं राजभोगलक्षणं फलं यस्मिन् तत् तथा । हतजीवितेन—कुत्सितजीवितेन साध्येषु भोगेष्वित्यन्वयः ॥ ४ ॥

अस्यां महिष्यां तु भृशं रुदन्त्यां
†पुरेऽतिविक्रोशति दुःखतप्ते ।
[2]हतेऽग्रजे संशयितेऽङ्गदे च
न राम ! राज्ये रमते मनो मे ॥ ५ ॥

अतिविक्रोशति--अत्यन्तं रुदति । संशयिते इति । पितृवियोगदुःखात् संशयितजीविते इत्यर्थः ॥ ५ ॥

‡क्रोधादमर्षादधिविप्रधर्षात्
भ्रातुर्वधो मेऽनुमतः पुरस्तात् ।

---

*दृष्टफलं--दृष्टवालिवधरूपफलकमिति वा । 'वालिनं तं हनिष्यामि' इति प्रतिज्ञानुगुणं भवता कर्म कृतम् । तत्फलं च दृष्टमेवेत्याशयः ॥ †पुरे—पौरजन इति यावत् । ‡क्रोधात्—निर्निमित्तवनवासकृतात् । अमर्षात्—परुषभाषणाक्षमतया अतिविप्रधर्षात्—अत्यन्तमाक्रमणाच्च—गो. अमर्षात्--दुस्सहात् अतिविप्रधर्षात्—भ्रातृकर्तृकातिपराभवात् जातात् क्रोधात्—रा.

[1] सह जीवितेन—ङ. झ. [2] हते नृपे—च.

हते त्विदानीं [1] हरियूथपेऽस्मिन्
　सुतीव्रं, इक्ष्वाकुकुमार! तप्स्ये ॥ ६ ॥

अधिविप्रधर्षात्—भ्रातृकृतात् अधिकाभिभवात् हेतोः ममोत्पन्नात् क्रोधात्, अमर्षात् असहिष्णुतया च तप्स्ये——तप्स्यामीति यावत् ॥

श्रेयोऽद्य मन्ये मम शैलमुख्ये
　तस्मिन् निवासश्चिरमृश्यमूके।
यथातथा वर्तयतः * स्ववृत्त्या
　नेमं निहत्य त्रिदिवस्य लाभः ॥ ७ ॥

यथातथा——येनकेनापि प्रकारेणेत्यर्थः। वर्तयतः——जीवतः। त्रिदिवस्य लाभोऽपि न श्रेय इति मन्ये इत्यन्वयः ॥ ७ ॥

न त्वां जिघांसामि, चरेति यन्मां
　अयं महात्मा मतिमानुवाच।
तस्यैव तत्, राम! वचोऽनुरूपं
　इदं [2] पुनः कर्म च मेऽनुरूपम् ॥ ८ ॥

तस्यैव तद्वचोऽनुरूपमिति। ईषत्करघातेऽपि मयि तदकृत्वा आन्तरभ्रातृस्नेहपाशबद्धतया त्वां न जिघांसामि कदाचिदपि, चर——गच्छ इति यद्वच अवोचत् तद्वचः इत्यर्थः। इदं मे कर्म——भ्रातृघातनरूपम् ॥ ८ ॥

---

* स्ववृत्त्या——वानरजात्युचितवृत्त्या–गो.

[1] हरिपुङ्गवे–ङ.　[2] वचः–च. ज.

भ्राता कथं नाम महागुणस्य
भ्रातुर्वधं, राघव ! रोचयेत ।
राज्यस्य दुःखस्य च, वीर ! सारं
*[1] विचिन्तयन् काम[2]पुरस्कृतः सन् ॥ ९ ॥

राज्यस्य दुःखस्य च सारं—तारतम्योत्कर्षं, विचिन्तयन्निति पाठः, विगणयन् अविचारयन् इत्यर्थः ॥ ९ ॥

† वधो हि मे मतो नासीत् स्व[3]माहात्म्यव्यतिक्रमात् ।
ममासीत् बुद्धिदौरात्म्यात् प्राणहारी व्यतिक्रमः ॥ १० ॥

उक्तार्थ एव विव्रियते—वधो हि मे इत्यादि । मां हन्तुं तस्य मतिर्नासीदित्यर्थः । तत्र हेतुः—स्वमाहात्म्यव्यतिक्रमात् इति । अनुचितकृत्यतः अपयशःप्रसङ्गभयादित्यर्थः । प्राणहारीति । भ्रातुरिति शेषः ॥ १० ॥

द्रुमशाखावभग्नोऽहं मुहूर्तं परिनिष्टनन् ।
सान्त्वयित्वा ह्यनेनोक्तः न पुनः कर्तुमर्हसि ‡ ॥ ११ ॥

भ्रातृत्वमार्यभावश्च [4]धर्मश्चानेन रक्षितः ।
मया क्रोधश्च कामश्च कपित्वं च प्रदर्शितम् ॥ १२ ॥

द्रुमशाखावभग्नः—द्रुमशाखया अवभग्नः तेन प्रहृतः । अत एव मुहूर्तं परिनिष्टनन्—क्रोशन् यदा अभवं, तदा तु अनेन भ्रात्रा

---

* विचिन्तयन्—विचारयन्–ति. † महात्मेत्युक्तं विशदयति—वध इति । अस्य वालिनः स्वमाहात्म्याव्यतिक्रमात्—स्वमहत्त्वस्य अव्यतिक्रमात्—अनतिक्रमात् मे वधः मतः नासीत्–गो. 'न त्वां जिघांसामि' इत्यादि ज्येष्ठस्य तस्य स्वरूपानुगुण्यात् स्वानतिक्रमः संरक्षितः, मया तु व्यतिक्रम एव प्रदर्शित इत्यर्थः ॥ ‡ न पुनः कर्तुमर्हसि, युद्धमिति शेषः । अत्रेतिकरणं द्रष्टव्यम्–गो.

[1] न चिन्तयन्–ङ. झ. [2] पुरस्कृतोऽपि–च. ज. [3] माहात्म्याव्यति–ङ. झ. [4] धर्मांश्चानेन रक्षिताः–ङ.

सान्त्वयित्वा तु, पुनरेवं दुश्चेष्टां मा कुरु इत्येवोक्तवानस्मि। कोपभावेन मां न हतवानित्यर्थः। अत एव—भ्रातृत्वमित्यादि ॥ ११–१२ ॥

अचिन्तनीयं परिवर्जनीयं
अनीप्सनीयं *स्वनवेक्षणीयम् ।
प्राप्तोऽस्मि पाप्मान[1]मिमं, नरेन्द्र !
भ्रातुर्वधात् त्वाष्ट्रवधादिवेन्द्रः ॥ १३ ॥

सद्भिः अचिन्तनीयत्वादिस्वभावमिदं पाप्मानं प्राप्तवानस्मि। अचिन्तनीयं—चिन्तयितुमयोग्यम्। अत एव, नित्यं परिवर्जनीयम्। यत्किञ्चिदुपाधिनाऽपि अनीप्सनीयम्। अन्यकर्तृकमपि अनवेक्षणीयम्—दर्शनानर्हम्। त्वाष्ट्रः—विश्वरूपः ॥ १३ ॥

†पाप्मानमिन्द्रस्य मही जलं च
वृक्षाश्च कामं जगृहुः स्त्रियश्च ।
को नाम पाप्मानमिमं [2]क्षमेत
शाखामृगस्य [3]प्रतिपत्तु[4]मिच्छन् ॥ १४ ॥

इन्द्रस्य पाप्मानं जगृहुरिति। तथा हि 'विश्वरूपो वै त्वाष्ट्रः' इत्यनुवाकप्रसिद्धः। प्रतिपत्तुं—प्राप्तुम् ॥ १४ ॥

---

*स्वनवेक्षणीयं—विचारायोग्यम्–रा. †इन्द्रस्य परमैश्वर्यसंपन्नस्य पाप्मानं मह्यादयः ऊषरफेननिर्यासऋतुरूपेण जगृहुः खातपूरणादिवरप्रदत्वात्। मम तु शाखामृगस्य कस्याप्यनुपकारकस्य पाप्मानं प्रतिपत्तुं–किञ्चिद्दूरं प्राप्तुमिच्छन् को नाम क्षमेत? ग्रहीतुमिति शेषः। यद्यपि विश्वरूपाख्यायिकायां त्वाष्ट्रशिरस्त्रयच्छेदकृतब्रह्महत्यात्रितयं पृथिवीवनस्पतिस्त्रिय एव जगृहुरित्युक्तं, तथापि शाखान्तरानुरोधेन जलेनापि कश्चिदंशो गृहीत इत्यवगन्तव्यम्–गो. प्रतिहर्तुं (पा.)—परिहर्तुं–ती.

[1] मिदं वयस्य–ज. [2] सहेत–ज. [3] प्रतिहर्तुं–ङ. [4] मिच्छेत्–च. ज.

नार्हामि संमानमिमं प्रजानां
*न यौवराज्यं कुत एव राज्यम् ।
अधर्मयुक्तं कुलनाशयुक्तं
एवंविधं, राघव! कर्म कृत्वा ॥ १५ ॥

नार्हामीति । पापग्रस्तत्वादिति शेषः । न यौवराज्यमिति । ज्येष्ठस्थाने तत्पुत्रं कृत्वा, मम च यथाप्राप्तं यौवराज्यमित्यर्थः । अथ वालिना मुख्यराज्यस्य प्रदत्तत्वादाह—कुत एव राज्यमिति । कर्म कृत्वा नार्हामीति पूर्वेणान्वयः ॥ १५ ॥

पापस्य कर्ताऽस्मि विगर्हितस्य
क्षुद्रस्य †[1] लोकापकृतस्य [2] चैव ।
शोको महान् मामभिवर्ततेऽयं
वृष्टेर्यथा निम्नमिवाम्बुवेगः ॥ १६ ॥

क्षुद्रस्य— क्षुद्रप्राणिकृत्यस्य, लोकापकृतस्य परलोकपरमानर्थकर्मभूतस्य । वृष्टेः वेगः यथा, तथा शोकः भिन्नं—निम्नप्रदेशमिव मां प्राप्नोति ॥ १६ ॥

‡ सोदर्यघातापरगात्रवालः
संतापहस्ताक्षिशिरोविषाणः ।
एनो मयो मामभिहन्ति हस्ती
दृप्तो नदीकूलमिव प्रवृद्धः ॥ १७ ॥

सोदर्यघातक्रौर्यरूपः अपरगात्रभागः, वालश्च यस्य स तथा ॥

---

* इयं लोकवदुक्तिः । यौवराज्यार्हतैव नास्ति चेत् कुतो राज्यार्हतेति ॥ † लोकापकृतस्य—राजापकृतिद्वारा सर्वजनापकारकस्य-रा. लोकापकृतस्य—सर्वलोकैस्त्यक्तस्य-गो. ‡ सोदर्यस्य—भ्रातुः घात एवापरगात्रवालौ—अपरकायपुच्छौ यस्य स तथा । सन्ताप एव हस्तादीनि यस्य स तथा । वधादपि सन्तापस्य प्राधान्यात् ऊर्ध्वकायत्वरूपणम्-गो.

[1] लोकावमतस्य चैव, लोके परिनिन्दितस्य-ङ. [2] लोके-च.

*अंहो बतेदं नृवरा[1]विषह्यं
निवर्तते मे हृदि साधु वृत्तम् ।
विवर्णमग्नौ परितप्यमानं
किट्टं यथा, राघव ! जातरूपम् ॥ १८ ॥

अंहो बतेदं नृवराविषह्यं इति पाठः । हे नृवर ! मे ईदृक् अविषह्यं--सोढुमशक्यं अंहः--पापं प्राप्य, मे हृदि स्थितं साधु वृत्तं—प्रागनुष्ठितपुण्यकर्म च एकायनत्वात् प्रबलेनांहसा निवर्तते ; बतेति खेदे । तत्र दृष्टान्तः-- विवर्णमित्यादि । विवर्णं, अत एव अग्नौ परितप्यमानं प्रबलं जातरूपं प्राप्य किट्टं--मलं यथा निवर्तते, तथैवेत्यर्थः । †परस्तु अविषह्येति ल्यबन्तमङ्गीकृत्य व्याकरोदिव ॥१८॥

महाबलानां हरियूथपानां
इदं कुलं, राघव ! ‡मन्निमित्तम् ।
अस्याङ्गदस्यापि च शोकतापात्[2]
अर्धस्थितप्राणमितीव मन्ये ॥ १९ ॥

---

*मे हृदि इदं साधुवृत्तं अंहः—स्वेन सह बर्तमानं पापं अविषह्य—असोढ्वा निवर्तते–निर्गच्छति । कथमिव ? विवर्णं जातरूपं अग्नौ परितप्यमानं सत् किट्टं यथा ऋजीषांशमविषह्य निवर्तते—किट्टाद्वियुज्यते—गो. अथवा–सुवर्णस्य विपरीतं विवर्णं जातरूपं कूटसुवर्णमिति यावत् । तत् अग्नौ परितप्यमानं सत् किट्टं यथा किट्टं भवतीव, मे हृदि साधुवृत्तं अविषह्यं एनः—स्वार्थमूलकभ्रातृवधं प्राप्य निवर्तते—हृदयाद्गलति । अग्निर्यथा सुवर्णपरीक्षकः, तथा स्वार्थ एव साधुवृत्तपरीक्षक इत्यर्थः ॥ †गोविन्दराजः, महेश्वरतीर्थे वा ॥ ‡मन्निमित्तं—मन्निमित्तात् अङ्गदशोक-तापात्–गो. रा.

[1] विषह्म–ङ. [2] शोकभावात्–ङ.

सुतः सुलभ्यः सुजनः [1] सुवश्यः
कुतः सुपुत्रः सदृशोऽङ्गदेन ।
न चापि विद्येत स, वीर! देशः
यस्मिन् भवेत् सोदरसंनिकर्षः ॥ २० ॥

सुतः सुलभ्यः इति । सुलभः इति यावत् । वाऽसरूपविधिना 'पोरदुपधात्' इति यत् वा ॥ २० ॥

*[2] यद्यङ्गदः, [3] वीर! वरार्ह! जीवेत्
जीवेच्च माता परिपालनार्थम् ।
विना तु पुत्रं परितापदीना
तारा न जीवेदिति निश्चितं मे ॥ २१ ॥

† सोऽहं प्रवेक्ष्याम्यतिदीप्तमग्निं
भ्रात्रा च पुत्रेण च सख्यमिच्छन् ।
इमे विचेष्यन्ति हरिप्रवीराः
सीतां निदेशे [4] तव वर्तमानाः ॥ २२ ॥

कृत्स्नं तु ते सेत्स्यति कार्यमेतत्
‡ मय्यप्रतीते, मनुजेन्द्रपुत्र!
कुलस्य हन्तारमजीवनार्हं
रामानुजानीहि कृतागसं माम् ॥ २३ ॥

अनुजानीहीति । अग्निप्रवेशायेति शेषः ॥ २३ ॥

---

* यद्यङ्गदो जीवेत्, तदा माता ताराऽपि पुत्रपालनार्थं जीवेत्–ति. † अङ्गदमरणं निश्चित्याह—सोऽहमिति–गो. ‡ मयि अप्रतीते—अप्रकाशे, मृत इति यावत्–गो.

[1] सुवंश्यः–ङ. [2] अथाङ्गदः–च. [3] वीरवराय, वीरवरो न–झ.
[4] परि–ङ. ञ.

इत्येवमार्तस्य रघुप्रवीरः
श्रुत्वा वचो वाल्यनुजस्य तस्य ।
सञ्जातबाष्पः परवीरहन्ता
रामो मुहूर्तं विमना बभूव ॥ २४ ॥

संजातबाष्पः इति । दुःखिप्राणिघृणायाः महतां स्वभावात् । विमनाः—खिन्नचित्त इति यावत् ॥ २४ ॥

तस्मिन् क्षणेऽभीक्ष्ण[1]मवेक्षमाणः *
क्षितिक्षमावान् भुवनस्य गोप्ता ।
रामो रुदन्तीं व्यसने निमग्नां
समुत्सुकः सोऽथ ददर्श ताराम् ॥ २५ ॥

तस्मिन् क्षण इति । प्रकृतिमापन्न इति शेषः । क्षितेरिव क्षमा अस्यास्तीति तथा ॥ २५ ॥

† तां चारुनेत्रां ‡ कपिसिंह[2]नाथं
पतिं समाश्लिष्य तदा शयानाम् ।
उत्थापयामासुरदीनसत्त्वां
मन्त्रिप्रधानाः [3]कपिवीरपत्नीम् ॥ २६ ॥

कपिसिंहानां नाथः तथा ॥ २६ ॥

---

* तारां अभीक्ष्णं—वारं वारं अवेक्षमाणः—जीवन्तीमिच्छन्—ति. अवेक्ष्यमाणः तारयेति शेषः—गो. सर्वमेतदवेक्षमाणः तारां साभिप्रायं ददर्शेत्यर्थो वा ॥
† रामागमनमालोक्य मन्त्रिणस्तामुत्थापयामासुरित्याह—तामिति—गो. ‡ कपिसिंहनाथां (पा.)—कपिसिंहानां स्वामिनीं—ति. कपिसिंहः—वाली, नाथः यस्यास्तां—रा.

[1] मवेक्ष्यमाणः—ङ. [2] नाथां—च. ज. [3] कपिराज—ज.

सा विस्फुरन्ती परिरभ्यमाणा
भर्तुः सकाशादपनीयमाना ।
ददर्श रामं शरचापपाणिं
स्वतेजसा सूर्यमिव ज्वलन्तम् ॥ २७ ॥

सुसंवृतं पार्थिवलक्षणैश्च
तं चारुनेत्रं मृगशावनेत्रा ।
अदृष्टपूर्वं पुरुषप्रधानं
अयं *स काकुत्स्थ इति प्रजज्ञे ॥ २८ ॥

पुरुषप्रधानं—पुरुषश्रेष्ठम् ॥ २८ ॥

तस्येन्द्रकल्पस्य दुरासदस्य
महानुभावस्य समीपमार्या ।
आर्ताऽतितूर्णं व्यसनाभिपन्ना
जगाम तारा परिविह्वलन्ती ॥ २९ ॥

परिविह्वलन्ती, ह्वलचलने, शतरि नुम्—परवशेत्यर्थः ॥ २९ ॥

सा तं समासाद्य विशुद्ध[1]सत्त्वा
शोकेन †संभ्रान्तशरीरभावा ।
मनस्विनी वाक्यमुवाच तारा
रामं रणोत्कर्षणलब्ध[2]लक्षम् ॥ ३० ॥

---

* सः—अङ्गदोक्तः—ति. सुग्रीवमित्रभूतः—रा. † संभ्रान्तः—अयथाभूतः शरीरभावः—शरीरकृतभावः यस्याः सा, कुपितेत्यर्थः । मनस्विनी—मत्प्रियहन्तारं यावच्छक्ति परुषाणि वदेयमिति कृताध्यवसाया—गो. परन्तु विशुद्धसत्त्वेति विशेषणं, अनन्तरश्लोकाश्चात्र द्रष्टव्याः ।

[1] सत्त्वं—ज. [2] लक्ष्यम्—ज.

संभ्रान्तः—विस्मृतः शरीरभावः—राजस्त्रीत्वाभिमानादिः यस्याः सा तथा। रणेषु उत्कर्षेण—अनन्यसामान्योत्कर्षेण—अमोघबाणत्वादिलक्षणेन लब्धं लक्षं—वेध्यं येन स तथा—'रामः शस्त्रभृतामहम्' इति प्रसिद्धानन्यसामान्यरणोत्कर्षम् ॥ ३० ॥

त्वमप्रमेयश्च दुरासदश्च
जितेन्द्रियश्चोत्तम[1]धार्मिकश्च।
अक्षय्यकीर्तिश्च विचक्षणश्च
क्षितिक्षमावान् *क्षतजोपमाक्षः ॥ ३१ ॥

क्षतजोपमाक्षः। रक्ताक्षइत्यर्थः ॥ ३१ ॥

त्वमात्तबाणासनबाणपाणिः
महाबलः संहननोपपन्नः।
† मनुष्यदेहाभ्युदयं विहाय
दिव्येन देहाभ्युदयेन युक्तः ॥ ३२ ॥

संहननोपपन्नः इति। सिंहवत् संहननोपपन्नः इत्यर्थः। संहननं—दृढगात्रता। मनुष्यदेहाभ्युदयं—मनुष्यलोकवर्तिदेहप्राप्यं—अभ्युदयं—सौख्यम्, विहाय दिव्येन बाणेन त्वया हतः सन् वाली दिव्येन देहाभ्युदयेन युक्तः अभूत् ॥ ३२ ॥

[2]येनैकबाणेन हतः प्रियो मे
तेनैव मां त्वं जहि सायकेन।
हता गमिष्यामि समीपमस्य
[3]न मामृते, राम! रमेत वाली ॥ ३३ ॥

---

* रक्तान्तनेत्रः 'रामो रक्तान्तलोचनः' इति ह्युक्तिः—गो. † मानुषशरीरपरिग्रहं विहाय—गो. रामं प्रतीयमुक्तिः ॥

[1] धर्मकश्च—च. ज. [2] येनैव—ज. [3] न मां विना वीर—ज.

स्वर्गेऽपि पद्मामलपत्र[1]नेत्रः
समेत्य संप्रेक्ष्य च मामपश्यन् ।
न ह्येष उच्चावचताम्रचूडाः
विचित्रवेषाप्सरसोऽभजिष्यत् ॥ ३४ ॥

पद्मस्य यदमलं पत्रं—दलं तत्समं नेत्रं यस्य तत्संबुद्धिः । मामपश्यन् न रमेतेत्यन्वयः । उच्चेति । नानाप्रकाररक्तपुष्पकृतशेखराः । रक्तपुष्पवर्णनं वशीकृतिप्रयोजनत्वात् तासाम् ॥ ३४ ॥

स्वर्गेऽपि शोकं च विवर्णतां च
मया विना प्राप्स्यति, वीर ! वाली ।
रम्ये * नगेन्द्रस्य तटावकाशे
विदेहकन्यारहितो यथा त्वम् ॥ ३५ ॥

तटावकाश इति । अस्मिन् इति शेषः ॥ ३५ ॥

त्वं वेत्थ [2] यावद्वनिताविहीनः
प्राप्नोति दुःखं पुरुषः † कुमारः ।
तत् त्वं प्रजानन् जहि मां न वाली
दुःखं ममादर्शनजं भजेत ॥ ३६ ॥

कुमारः—सुन्दरः पुरुष इत्यर्थः ॥ ३६ ॥

---

* नगेन्द्रस्य—ऋश्यमूकस्य-गो. † कुमारः—युवा-गो. नित्यं कुमारत्वेन प्रतीयमानस्त्वं वेत्थ-रा.

[1] नेत्र-ज. [2] तावद्-ख. ज.

यच्चापि मन्येत भवान् महात्मा
स्त्रीघातदोषो *न भवेत्तु मह्यम् ।
आत्मेयमस्येति च मां जहि त्वं
न स्त्रीवधः स्यात्, मनुजेन्द्रपुत्र ! ॥ ३७ ॥

स्त्रीघातदोषश्च मह्यं भवेदिति यत्तु भवान् मन्येत, तदपि नेत्यर्थः । कुत इत्यतः—आत्मेयमित्यादि । इयं अस्य वालिनः आत्मा—प्राण एव, न केवलं तद्व्यतिरिक्ता काचित् स्त्री इति मत्वा जहि । एवं च न स्त्रीवधदोषः तव स्यात् । पुंस एव हन्यमानत्वादित्यर्थः ॥ ३७ ॥

†शास्त्रप्रयोगात् विविधाच्च वेदात्
[1]आत्मा ह्यनन्यः पुरुषस्य दाराः ।
दारप्रदानात् न हि दानमन्यत्
प्रदृश्यते ज्ञानवतां हि लोके ॥ ३८ ॥

तारा परमसुबुद्धितः पुरुषाभेदं साधयति—शास्त्रेत्यादि । शास्त्रीये—यागाद्यनुष्ठाने सहैव पुंसा प्रयोगानुष्ठानात्, "अर्धो वा एष आत्मनः, यत्पत्नी" इति श्रुतेश्च दाराः पुरुषस्य अनन्यः आत्मा । न केवलं दोषाभावमात्रम्, अपि तु कन्यादानफलमपि ते इत्याह—दारप्रदानादित्यादि । दारप्रदानात् अधिकं प्रदानं न दृश्यते इत्यर्थः ॥ ३८ ॥

---

* न भवेदिति काकुः, न भवेत्किम्—इत्यर्थः । एवं भवान् यद्यपि मन्येत, परन्तु तस्याश्चिन्ताया नावसर इत्यर्थः । † विविधात् वेदात्—वेदरूपात् शास्त्रप्रयोगात् । यद्वा वेदात्, धर्मशास्त्रप्रयोगाच्च–गो.

[1] अनन्यरूपाः–च. ख.

त्वं चापि मां तस्य मम प्रियस्य
प्रदास्यसे धर्ममवेक्ष्य, वीर !
अनेन दानेन न लप्स्यसे त्वं
अधर्मयोगं * मम, वीर ! घातात् ॥ ३९ ॥

अनेन दानेनेति । एवं ज्ञानयोगसाधितदिव्यकन्यादानेनेत्यर्थः ॥ ३९ ॥

आर्तामनाथामपनीयमानां †
[1] एवंविधामर्हसि मां निहन्तुम् ।
अहं हि मातङ्गविलासगामिना
प्लवङ्गमानामृषभेण धीमता ॥ ४० ॥

विना वरार्होत्तमहेममालिना
चिरं न शक्ष्यामि, नरेन्द्र ! जीवितुम् ।
इत्येवमुक्तस्तु विभुर्महात्मा
तारां समाश्वास्य हितं बभाषे ॥ ४१ ॥

अपनीयमानां—भर्तुः सकाशात् अन्यत इति शेषः । विहन्तुं—विशेषेण हन्तुम् । वरार्हः—इन्द्रार्हः । अत एव तद्दत्तमालया उत्तमहेममाली च तथा ॥ ४०–४१ ॥

---

* मम वीरस्य पत्युः छलेन घातात् प्राप्तमधर्मसंयोगं न लप्स्यसे । किञ्च तत एव मच्छापतः प्राप्तमधर्मयोगं—अधर्मफलयोगं स्त्रीवियोगरूपं न लप्स्यसे । ममावधे तु लप्स्यस एव । अत एव क्वचित्पठ्यते—'अचिरेणैव कालेन त्वया वीर्यबलाऽऽहृता । सा सीता मम शापेन न चिरात्त्वयि वत्स्यति' इति–ति. वीरघातादित्येतत् सुग्रीवदुःखदुःखितरामहृदयानुसारेणोक्तं, 'त्वमुत्तमधार्मिकश्च' इति पूर्वमुक्तत्वात्–गो.
† अपनीयमानां—वालिना वञ्चिताम्–गो.

[1] एवं गतां नार्हसि मामहन्तुम्–च. ज.

मा, वीरभार्ये! विमतिं कुरुष्व
लोको हि सर्वो विहितो विधात्रा।
तं चैव सर्वं सुखदुःखयोगं
*लोकोऽब्रवीत् तेन कृतं विधात्रा ॥ ४२ ॥

लोको हि सर्वो विहित इति। अहरादौ सृष्टः इत्यर्थः। तेन विधात्रा कृतं, तं च सर्वं लोकं सुखदुःखयोगं—अवर्ज्यसुखदुःखसंबन्धम्। लोक्यते इति लोकः—वेदः अब्रवीत्—'न ह वै सशरीरस्य सतः प्रियाप्रिययोः अपहतिरस्ति' इति। तथा मन्वादिस्मर्तृलोकश्च अब्रवीत् ॥ ४२ ॥

[1]त्रयो हि लोका विहितं [2]विधानं
नातिक्रमन्ते वशगा हि तस्य।
†प्रीतिं परां प्राप्स्यसि तां तथैव
पुत्रस्तु ते प्राप्स्यति यौवराज्यम् ॥
धात्रा विधानं विहितं तथैव
न शूरपत्न्यः परिदेवयन्ति ॥ ४३ ॥

विहितं विधानमिति। निर्मितं सुखदुःखस्वभावं नातिक्रमन्ते—अतिक्रमितुं न शक्नुवन्ति। कुतः इत्यतः—वशगा हि तस्येति। सर्वे लोकाः लोकिनश्चेत्यर्थः। तत्सृष्टत्वस्य, तदण्डस्थितत्वस्य

---

*लोकः—पण्डितः पामरश्च—गो. †वाली परां प्रीतिं त्वत्सम्बन्धजां प्राप्स्यति (पा.) मत्संकल्पात्। भवत्यपि वालिसम्बन्धजां प्रीतिं सुग्रीवसम्बन्धात् प्राप्स्यति—ति. तां—वालिसंभोगसदृशभोगं—गो.

[1] प्रायो—ङ.   [2] विधातुः—ङ.

स्वाण्डान्तः तत्प्रवर्त्यमानस्वर्गादिपुरुषार्थस्य जीवविश्रमायाहरन्ते सर्वसंहारस्य च सर्वाविवादात् सर्वस्य तद्वशगत्वं प्रसिद्धमिति हिशब्देन द्योत्यते ॥ ४३ ॥

आश्वासिता तेन [1] तु राघवेण
प्रभावयुक्तेन परंतपेन ।
सा वीरपत्नी ध्वनता मुखेन *
[2] सुवेषरूपा विरराम तारा ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चतुर्विंशः सर्गः

ध्वनता मुखेन विररामेति । त्यक्तपरिदेवनाऽभूत् इत्यर्थः । अविभु(४४ १/२)मानः सर्गः ॥ ४४ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चतुर्विंशः सर्गः

पञ्चविंशः सर्गः

[सुग्रीवाद्याश्वासनम्, वालिसंस्कारश्च]

सुग्रीवं चापि तारां च साङ्गदं सहलक्ष्मणः ।
समानशोकः काकुत्स्थः सांत्वयन्निदमब्रवीत् ॥ १ ॥

अथ वालिनः संस्कारः । सुग्रीवं चापीत्यादि । समानशोकः इति । सुग्रीवादिभिरिति शेषः ॥ १ ॥

---

* ध्वनता सुखेनोपलक्षिता–गो. रा. ति.

[1]महात्मना तु–च. ज. [2] सुरूपचेष्टा–ङ.

न शोकपरितापेन श्रेयसा युज्यते मृतः ।
यदत्रानन्तरं कार्यं तत् समाधातुमर्हथ ॥ २ ॥

चित्तशोकोपेतः करणग्रामपरितापः तथा । समाधातुं—अनुष्ठातुम् ॥ २ ॥

लोकवृत्तमनुष्ठेयं *कृतं वो बाष्पमोक्षणम् ।
† न कालादुत्तरं किंचित् [1] कर्म शक्यमुपासितुम् ॥ ३ ॥

लोकवृत्तं—लोकाचारोऽपि अनुष्ठेय एव । तच्च बाष्पमोक्षणरूपं कृतम् । अतः परं यदनन्तरं संस्कारलक्षणं तदेव समाधातुमर्हथ । कृतं बाष्पमोक्षेणेति तृतीया न दृश्यते । अलं कृतं इत्यादियोगे सर्वतो दृश्यते हि तृतीया । अतः कृतं—पर्याप्तमित्यर्थो न वर्णितः । अथ काललक्षेपो न कर्तव्यः इत्याह—न कालादुत्तरमित्यादि । तत्तत्कर्मविहितकालात्परं तत्तत्कर्म किञ्चिदपि उपासितुं न शक्यम्† । कालस्यैव कर्मकारणत्वात् । न हि विहाय पर्वणि शक्या इष्टिः अनुष्ठातुम् ॥ ३ ॥

‡ नियतिः कारणं लोके नियतिः कर्मसाधनम् ।
नियतिः सर्वभूतानां § नियोगेष्विह कारणम् ॥ ४ ॥

---

*कृतं—पर्याप्तम् । बाष्पमोक्षणमिति द्वितीया तृतीयार्थे—ति. कृतं—अलम्—ती. † अकाले कृतस्याकृतप्रायत्वादिति भावः—ति. बाष्पमोक्षणातिरिक्तं किमपि न युष्माभिः कर्तुं शक्यमित्याह—न कालादिति। कालादुत्तरं—कालं विनेत्यर्थः। किञ्चित् कर्म उपासितुं—कर्तुं न शक्यम् । दैवाज्ञामुल्लंघ्य स्वातन्त्र्येण किञ्चिदपि कर्म कर्तुं न शक्यमित्यर्थः—गो. ‡ नियतिः—नियम्यतेऽनयेति नियतिः कालः—ती. रा. ईश्वरः—गो. § नियोगेषु—नियमनेषु—ती. प्रेरणेषु—गो. ज्योतिष्टोमादिषु—ति. तत्तज्जातिविषयकाग्रहेषु—रा.

[1] परं कर्म उपा—ङ.

कालस्यैव चोदितार्थानुष्ठानसाधनत्वमाह—नियतिरित्यादि। नियतिः—कालकृता व्यवस्था लोके—लोकसृष्ट्यादिव्यापारे, तथा सृष्टस्य तस्य कर्मसाधनं—लौकिकालौकिकप्रवृत्तिकारणमपि नियतिरेव। न हि उदयास्तमयदिनमासादिकालनियतिं विना प्रवृत्तिमात्रं समस्ति। सर्वभूतानां नियोगाधिकृतप्राणिमात्रस्य तत्तत्कर्मनियोगेऽपि नियतिरेव कारणम् ॥ ४ ॥

*न कर्ता कस्य चित् कश्चित् नियोगे चापि नेश्वरः।
स्वभावे वर्तते लोकः तस्य कालः परायणम् ॥ ५ ॥

---

*किमनया कालादृष्टकल्पनया? प्राणिन एवान्योन्यं कर्तारः कारयितारश्च भवन्तीत्यत आह—न कर्तेति—ती. एवमन्वयमुखेनेश्वराधीनत्वमुक्त्वा व्यतिरेकमुखेन दर्शयति—न कर्तेति। कश्चित्पुरुषः कस्यचित्कर्मणः न कर्ता—न स्वातन्त्र्येण कर्ता। नियोगे—कस्यचित्प्रेरणे च नेश्वरः—न स्वतन्त्रः। किन्तु स्वभावे वर्तते—स्वभावाधीनो वर्तते लोकः। तत्र हेतुमाह—तस्येति। कालः तस्य परायणं—गतिः। अत्र स्वभावनियतिकालादिशब्दैः ईश्वर एवाभिधीयते। अन्यथाऽनेकराजत्वापत्तेः। श्वेताश्वतरश्रुतिश्च 'स्वभावमेके कवयो वदन्ति' इत्यादिकैवमाह—गो. कालातिरिक्तं न साक्षात्प्रवर्तकमित्याह—न कर्तेत्यादि। कस्यचित् कृष्यादेः कश्चित्कर्ता न—नियतिनिरपेक्षः कर्ता न। तथा नियोगे—नियोगानुष्ठानेऽपि नियतिनिरपेक्षः कश्चिदीश्वरो न—नियतिनैरपेक्ष्येण समर्थो न। यतः लोकः—लोकव्यवहारः स्वभावे—ईश्वरसहिते प्राक्कृतस्वकर्मणि वर्तते—तदधीनो वर्तते। तस्य च स्वभावस्य कालः परायणं—सहकारीत्यर्थः। तदुक्तं सूतसंहितायां शिववाक्येन 'स्वभावादेव संभूतं समस्तमिति केचन। तन्न सिध्यति विप्रेन्द्राः देशकालाद्यपेक्षणात्। मत्तः कर्मानुरूपेण जगज्जन्मादि जायते। एष स्वभावो विप्रेन्द्राः इति वेदार्थनिर्णयः। न मया केवलेनापि न च केवलकर्मणा। प्राणिनां कर्मपाकेन मया च मुनिसत्तमाः। जगतः संभवो नाशः स्थितिश्च भवति द्विजाः' इति—ति. यो लोकः—जनः स्वभावे वर्तते—स्वभावाधीनतया वर्तते, तस्य लोकस्य परायणं—परमप्रवर्तकः कालः। अत एव कस्यचित्कर्मणः कश्चित् स्वभावादिः कर्ता न—कालमनपेक्ष्य कारको न। अत एव नियोगे—जात्यादिविषयकाग्रहेऽपि ईश्वरः—समर्थो न—रा.

ननु लौकिकालौकिकनियोगयोः कारणान्तरं दृश्यते इत्याशङ्क्य, साक्षात् प्रवर्तकत्वं अन्यस्य कस्यापि नास्तीत्याह—न कर्तेत्यादि। कस्यचित् कृष्यादिलौकिकनियोगस्यापि कश्चिदप्यधिभूः कर्ता न समस्ति, तथा अलौकिके नियोगे ईश्वरस्सृष्टावपि न केवलं कर्ता। यदेवं अतः—स्वभावे—यथोक्तनियतावेव लोकः परावरसकललोकव्यवहारः वर्तते। तस्य—नियतिपर्यायस्वभावस्य च काल एव परायणम्। कालेनैव विनाड्यादिपरार्धान्तनियतीनां कल्पितत्वात् ॥ ५ ॥

*न कालः कालमत्येति न कालः परिहीयते।
†स्वभावं च समासाद्य न कश्चिदतिवर्तते ॥ ६ ॥

कालात्मकस्य भगवतः सम्राजो ब्रह्मणः अपक्षपातेन तत्तत्कर्मानुरूपनित्यनियतपञ्चकृत्यप्रवृत्तिकारणत्वं दर्शयति त्रिश्लोक्या। त्रिश्लोकीयं पाठ्या योगिभिः। न काल इत्यादि। कालो भगवान् कालाग्निः चतुर्मुख रुद्रः काल स्वकृतिकालनियतिं नात्येति—नातिक्रामति। "षड्भिः प्राणैः विनाडी स्यात्" इत्यादिज्योतिस्सिद्धान्तसिद्धां नियतिं एकरूपामेव सदा प्रवर्तयति। सोऽसौ भगवान् कालः न परिहीयते। स्वस्यैव स्वेतरसर्वजगत्परिहाणिकरत्वतः स्वपरिहाणिहेत्वभावात्। अनाद्यन्तजगत्कारणस्य तस्य भगवतः आज्ञा श्रीमदादिगुरुभिः हिरण्यगर्भातिरिक्तपरापरसकलात्मभिरपि अशक्यलंघनेत्याह—स्वभावं चेत्यादि।

---

* कालः—महाकालः कालं—प्राणिनां सुखदुःखप्रापकत्वेन दिवसपक्षमासर्त्वयनादिरूपं औपाधिकं कालं नातिवर्तते—ती. कालः—ईश्वरः कालं—आत्मानं—गो. कालः—भगवानीश्वरः कालं—स्वकृतां कालव्यवस्थां—ति. † स्वभावं—कालं—ती. स्वस्मिन् भवतीति—स्वभावः ईश्वरः ...। निरङ्कुशस्स्वतन्त्रः स्वकृतां व्यवस्थां स्वयमपि नातिवर्तते, तत्परतन्त्रोऽनीश्वरः किमुतेति भावः—गो.

उक्तार्थः स्वभावशब्दः। तं समासाद्य संसरत् कश्चिदपि किंचिदपि तन्नातिवर्तते। सर्वथैव उत्पत्त्यादौ पारतंत्र्यस्य अविवादात् ॥ ६ ॥

*न कालस्यास्ति बन्धुत्वं †न हेतुर्न पराक्रमः।
न मित्रज्ञातिसंबन्धः कारणं नात्मनो‡ वशः ॥ ७ ॥

तस्य भगवतः अपक्षपातप्रवृत्तिपरं स्वातंत्र्यदर्शनम्—न कालस्येत्यादि। प्राप्तकालं वस्तु निर्घृणं सर्वथा संहरत्येव। न किंचिदपि प्राप्तकालं पक्षपातात् परित्यजतीत्यर्थः। प्राप्तकालस्य कालकृतसंहारनिवर्तने कश्चिदपि हेतुः न समास्ति। अस्यैव प्रपञ्चनं—न पराक्रम इति। परमशूरः वालिरावणादिः प्राप्तकाले निहन्यत एव तृणवत् कालेन। बहुमित्रसंबन्धः बहुज्ञातिसंबन्धो वा यथा लौकिकानर्थपरिहारकारणं, एवं अयं कालकटाक्षितसंहारपरिहारे न कारणम्। सोऽसौ भगवान् न आत्मनः प्रत्यग्वर्गस्य वशः। तदिच्छानुवर्ती न भवति ॥ ७ ॥

किन्तु §कालपरिणामः द्रष्टव्यः साधु पश्यता।
धर्मश्चार्थश्च कामश्च कालक्रमसमाहिताः ॥ ८ ॥

किन्तु—परं स्वतन्त्रेण भगवता कालेन क्रियमाणस्वस्वकर्मपरिपाक एव साधु पश्यता—सम्यक् भगवद्वैभवदर्शनवता द्रष्टव्यः। "स्वकृतस्य सुकृतस्य दुष्कृतस्य वा फलं दत्तं भगवता" इत्येतावदेव

---

*कालस्य पुरुषेण सह वशीकरणहेतुभूतं बन्धुत्वं नास्ति–ती. †हेतुं किञ्चिन्नापेक्षते। पराक्रमादिकं च न गणयति चेति वा। ‡आत्मनः पुरुषस्य–ती. जीवस्य–गो., ति. आत्मनः—परमात्मनः वशो यः कालः, तस्य–रा. §कालपरीणामः—कालस्य ईश्वरस्य परिणामः। अत्र नियतिकालस्वभावपदैः व्यामिश्रतयोक्तिः तदानीं रहस्यस्य वक्तुमनर्हत्वात्–गो.

द्रष्टव्यम् । न हर्षविषादौ, न वा स्वसामर्थ्यासामर्थ्यदुर्मतिश्च कर्तव्येत्यर्थः । यदेवं अतः—धर्मश्चेत्यादि । चकारैः अधर्मादयः । कालक्रमेण—कालप्रवृत्तिक्रमेण—तत्तत्क्लेशकर्मविपाकाशयचक्रानुरूपेण समाहिताः—सम्पादिताः भवन्ति ॥ ८ ॥

*इतः स्वां प्रकृतिं वाली गतः प्राप्तः क्रियाफलम् ।
†[1] सामदानार्थसंयोगैः पवित्रं प्लवगेश्वरः ॥ ९ ॥

उक्तां लोकस्थितिं प्रकृते योजयति—इत इत्यादि । इतः—अस्मात् लोकात् देहाच्च गतः—अपगतः स्वां प्रकृतिं—स्वनियतिं तत्प्रकृतिं स्वक्रियाफलं च प्राप्तः । क्रियाफलं च अशोच्यमेवेत्याह—सामेत्यादि । सामदानाभ्यां—सौम्योपायाभ्यां अर्जितैः अर्थैः—ऐश्वर्यैः इह पवित्रं—शुभं भोगं प्राप्तवान् ॥ ९ ॥

स्वधर्मस्य च संयोगात् जितस्तेन महात्मना ।
‡स्वर्गः [2] परिगृहीतश्च प्राणानपरिरक्षता ॥ १० ॥

स्वधर्मस्य—राजधर्मस्य च संयोगात् महात्मना तेन जितः स्वर्गश्च, प्राणान् अपरिरक्षता—युद्धे त्यक्तवता यथाकालं परिगृहीतश्च ॥

---

*क्रियाफलं—भोगं इह लोके प्राप्तवान् वाली । इतो लोकात्—देहाच्च गतः—अपगतः स्वां प्रकृतिं गतः—प्राप्तः । कार्याणां कारणे लयात् । एवं चेन्द्रलोकं गतो वालीति सूचितम्-ति. क्रियाफलं—स्वर्गं-ती., गो. † धर्मकामार्थसंयोगैः—विहितकालानुष्ठितधर्मार्थकामसम्बन्धैः । सामदानार्थसंयोगैः इति पाठे नीतिशास्त्रानुष्ठानैरित्यर्थः-गो. ‡ उभाभ्यां (स्वधर्मानुष्ठानात् प्राणपरित्यागाच्च) जितः—पूर्वं वशीकृतः स्वर्गः इदानीं परिगृहीतश्च-गो. स्वधर्मस्य संयोगात् तेन महात्मना वालिना पूर्वं स्वर्गो जितः—अर्जितः । युद्धे प्राणानपरिरक्षता इदानीं परिगृहीतः—प्राप्तश्च-ति.

[1] दानमानार्थ-ङ., धर्मकामार्थ-ङ., झ. [2] प्रतिगृहीतश्च-ङ.

एषा वै नियतिः श्रेष्ठा यां गतो हरियूथपः ।
तदलं परितापेन प्राप्तकालमुपास्यताम् ॥ ११ ॥

एषा नियतिः—कालकर्मपरिपाकप्राप्तिरित्यर्थः । प्राप्तकालं, कर्मेति शेषः ॥ ११ ॥

[1]वचनान्ते तु रामस्य लक्ष्मणः परवीरहा ।
अवदत् प्रश्रितं वाक्यं सुग्रीवं *गतचेतसम् ॥
कुरु त्वमस्य, सुग्रीव ! प्रेतकार्यमनन्तरम् ॥ १२ ॥

अस्य प्रेतकार्यं कुरु इत्यन्वयः ॥ १२ ॥

ताराङ्गदाभ्यां सहितः वालिनो दहनं प्रति ।
समाज्ञापय काष्ठानि शुष्काणि च बहूनि च ॥ १३ ॥
चन्दनादीनि दिव्यानि वालिसंस्कारकारणात् ॥ १४ ॥

तत्र किं कर्तव्यमित्यत्राह—ताराङ्गदाभ्यामित्यादि ॥ १३–१४ ॥

समाश्वासय चैनं त्वं अङ्गदं दीनचेतसम् ।
मा भूः बालिशबुद्धिस्त्वं त्वदधीनमिदं पुरम् ॥ १५ ॥
अङ्गदस्त्वानयेन्माल्यं वस्त्राणि विविधानि च ।
घृतं तैलमथो गन्धान् यच्चात्र समनन्तरम् ॥ १६ ॥

कः कुत्राज्ञापनीयः इत्यत्राह—अङ्गदस्त्वित्यादि ॥ १६ ॥

त्वं, तार ! शिबिकां शीघ्रं आदायागच्छ संभ्रमात् ।
त्वरा गुणवती युक्ता ह्यस्मिन् काले विशेषतः ॥ १७ ॥

त्वं तारेति । तारः—सुग्रीवसचिवः ॥ १७ ॥

---

* गतचेतसं—दुःखितमिति यावत्—गो.

[1] वचनादेव—ङ.

सञ्जीभवन्तु प्लवगाः शिबिका[1]वाहनोचिताः ।
समर्थाः [2]वालिनश्चैव निर्हरिष्यन्ति वालिनम् ॥ १८ ॥

वालिनः शिबिकावाहनोचिताः । औचित्यं सापिण्ड्य-सोदकत्वप्रयुक्तम् । समर्थाः—वहनसमर्थाः, बलवन्तः इति यावत् । *निर्हारः—प्रेतदहनम् ॥ १८ ॥

एवमुक्त्वा तु सुग्रीवं सुमित्रानन्दवर्धनः ।
तस्थौ भ्रातृसमीपस्थः लक्ष्मणः परवीरहा ॥ १९ ॥
लक्ष्मणस्य वचः श्रुत्वा तारः संभ्रान्तमानसः ।
प्रविवेश †गुहां शीघ्रं शिबिकासक्तमानसः ॥ २० ॥
आदाय शिबिकां [3]तारः स तु पर्यापतत् पुनः ।
वानरैरुह्यमानां तां शूरैरुद्वहनो[4]चितैः ॥
दिव्यां भद्रासनयुतां शिबिकां स्यन्दनोपमाम् ॥ २१ ॥

भद्रासनयुतां—मध्यप्रदेशे राजोचितमहार्हासनवतीम् ॥ २१ ॥

पक्षिकर्मभिराचित्रां द्रुमकर्मविभूषिताम् ।
[5]आस्थितां ‡चित्र[6]पत्तीभिः सुनिविष्टां समन्ततः ॥२२॥

पक्षिकर्मभिः—पक्षिप्रकृतिभिः आसमन्तात् चित्राम्—चित्रवतीम् । द्रुमकर्मभिः—कल्पकादिद्रुमप्रकृतिभिः विभूषिताम् । चित्रपत्तीभिः—चित्रपदातिभिः आस्थिताम् । सुनिविष्टाम्—सुसंनिवेशाम् ॥ २२ ॥

---

* निर्हारः—दहनदेशनयनं—ति. निर्हारः—शववहनं—गो. † गुहां—किष्किन्धां—गो. ‡ चित्रपत्तीभिः—चित्रलेखाभिः, आर्षो दीर्घः—गो.

[1] वहनो—ङ. [2] बलिन—ङ. ज. झ. [3] शीघ्रं तारः—ङ. [4] चिताम्—ङ.
[5] आचितां—ङ. झ. [6] पङ्क्तीभिः—ङ.

विमानमिव सिद्धानां *जालवातायनान्विताम् ।
सुनियुक्तां विशालां च †सुकृतां [1]शिल्पिभिः कृताम् ॥

जालोपेतानि वातायनानि तथा। गवाक्षान्तर्गततिर्यगूर्ध्वफलकरचना--जालः। सुनियुक्तां--सुश्लिष्टाम्। ‡विशालां कृताम्। शिल्पिभिः--चतुरतक्षभि उक्तरीत्या सुकृतां--सुनिर्मिताम् ॥

दारुपर्वतकोपेतां चारुकर्मपरिष्कृताम् ।
वराभरणहारैश्च चित्रमाल्योपशोभिताम् ॥ २४ ॥

दारुनिर्मितैः पर्वतकैः- सूक्ष्मपर्वतैः। चारुकर्मभि — परिष्क्रियाकर्मभिः परिष्कृताम्। अस्यैव प्रपञ्चः- वराभरणेत्यादि ॥

§गुहागहनसंछन्नां रक्तचन्दनरूषिताम् ।
[2]पुष्पौघैः समभिच्छन्नां पद्ममालाभिरेव च ॥ २५ ॥

शिबिकोपरि वातवर्षातपत्राणाय प्रसार्यमाणं पञ्जरं गुहागहनमुच्यते, तेन संछन्नाम्। २५॥

तरुणादित्यवर्णाभिः [3]भ्राजमानाभिरावृताम् ।
॥ईदृशीं शिबिकां दृष्ट्वा रामो लक्ष्मणमब्रवीत् ॥ २६ ॥
क्षिप्रं विनीयतां वाली प्रेतकार्यं विधीयताम् ॥ २७ ॥

---

* सूक्ष्मरन्ध्रसमूहो जालं, गोनयनाकृतिरन्ध्रसमूहो गवाक्षं–वातायनं–गो. जालवन्निर्मितवातमार्गयुतां–रा. ति कुड्योपरि तिर्यगवस्थितफलकनिर्मितविविधसन्निवेशरंध्राणि जालानि। वातायनानि वायुप्रवेशार्थगवाक्षाकाररन्ध्राणि–ती. † शिल्पिभिर्विशालां कृतां, एवमुक्तत्वात्या सुकृतां–ति. ‡ विशालं यथा तथा कृतामित्यर्थः। §कृत्रिमैः गुहागहनैः— गुहाभिः काननैश्च संछन्नाम–गो ||ईदृशीं शिबिकामिति पुनरुक्तिः व्यवहितानुस्मरणार्था–गो.

[1] विश्वकर्मणा-ङ. [2] पुष्पाढ्यैः–ज. [3] लम्बमानाभि–ङ.

*ततो वालिनमुद्यम्य सुग्रीवः शिबिकां तदा ।
आरोपयत विक्रोशन् अङ्गदेन सहैव तु ॥ २८ ॥
आरोप्य शिबिकां चैव वालिनं गतजीवितम् ।
अलङ्कारैश्च विविधैः माल्यैर्वस्त्रैश्च भूषितम् ॥ २९ ॥
आज्ञापयत् तदा राजा सुग्रीवः प्लवगेश्वरः ।
और्ध्वदेहिकमार्यस्य क्रियता[1]मनुरूपतः †॥ ३० ॥

आज्ञापयदित्यस्यैव प्रकारः——और्ध्वदेहिकमित्यादि ॥ ३० ॥

विश्राणयन्तो रत्नानि विविधानि बहून्यपि ।
अग्रतः प्लवगा यान्तु शिबिकासमनन्तरम् ॥ ३१ ॥
‡[2]राज्ञामृद्धिविशेषा हि दृश्यन्ते भुवि यादृशाः[3] ।
[4]तादृशं वालिनः क्षिप्रं §[5]प्राकुर्वन् और्ध्वदेहिकम् ॥ ३२ ॥

ऋद्धिविशेषाः——ऐश्वर्यविशेषाः ॥ ३२ ॥

अङ्गदं [6]परिगृह्याशु [7]तारप्रभृतयस्तदा ।
क्रोशन्तः प्रययुस्सर्वे वानराः ‖हतबान्धवाः ॥ ३३ ॥

---

*ततः——लक्ष्मणं प्रति रामोक्तिश्रवणानन्तरम् । यद्वा लक्ष्मण प्रत्युक्तिः स्वमुद्दिश्यैवेति ज्ञात्वेत्यर्थः—गो. वस्तुतस्तु राज्ञां धाटीयम् ॥ †अनुकूलतः (पा.) नदीकूलसमीपे शास्त्रानुसारतो वा । अत्र इतिकरणं द्रष्टव्यम्—ति. ‡राज्ञां भुवि——चिताभूमिसमीपे यादृशा ऋद्धिविशेषा दृश्यन्त——अदृश्यन्त, तादृशैः ऋद्धिविशेषैः, हे वानराः! भर्तृसत्क्रियां—समीचीनप्रमीतक्रियां भवन्तः कुर्वन्तु (पा.)—रा. ऋद्धिविशेषाः——ऋद्धिविशेषानुरूपाः यादृशाः——और्ध्वदैहिकक्रियाप्रकाराः दृश्यन्ते, तादृशमौर्ध्वदैहिकं क्षिप्रं प्राकुर्वन् गो. ऋद्धिविशेषा यादृशा तादृश तदनुरूपमिति वा ॥ §प्राकुर्वन—कर्तुमारभन्त—रा. ‖हताः राजवधातेन निहतप्राया बान्धवाः येषां—रा. हतः बान्धवः——राजा येषामिति वा । राजा हि प्रथमो बन्धुः प्रजानाम् ॥

[1] मनुकूलतः—च. [2] राज्ञामृद्धविशिष्टा हि दृश्यते भुवि यादृशी-ङ. [3] एतदनन्तरं—तादृशीमिह कुर्वन्तु वानरा भर्तृसत्क्रियाम् इत्यधिकं—ङ. ज. [4] तादृशा—ङ. [5] प्राक्कुर्वन्—झ. [6] परिरभ्या—ज. [7] तारा—ङ.

ततः [1]प्रणिहिताः सर्वाः [2]वानर्योऽस्य वशानुगाः ।
चुक्रुशुर्वीरवीरेति भूयः क्रोशन्ति ताः [3]स्त्रियः ॥ ३४ ॥

प्रणिहिताः—समेताः ॥ ३४ ॥

[[4]ताराप्रभृतयः सर्वाः वानर्यो [5]हतयूथपाः ।
अनुजग्मुर्हि भर्तारं क्रोशन्त्यः करुणस्वनाः ॥]
तासां [6]रुदितशब्देन वानरीणां वनान्तरे ।
वनानि गिरयः [7]सर्वे विक्रोशन्तीव सर्वतः ॥ ३५ ॥

विक्रोशन्तीवेति । प्रतिध्वनिनेति शेषः ॥ ३५ ॥

पुलिने गिरिनद्यास्तु * विविक्ते जलसंवृते ।
चितां चक्रुः सुबहवः वानराः [8]शोककर्शिताः ॥ ३६ ॥

गिरिवर्तिनी नदी—गिरिनदी ॥ ३६ ॥

अवरोप्य ततः स्कन्धात् शिबिकां † [9]वहनोचिताः ।
तस्थुरेकान्तमाश्रित्य सर्वे शोक[10]समन्विताः ॥ ३७ ॥
ततस्तारा पतिं दृष्ट्वा शिबिकातलशायिनम् ।
आरोप्याङ्के शिरस्तस्य विललाप सुदुःखिता ॥ ३८ ॥
हा वानर[11]महाराज ! हा नाथ ! मम वत्सल !
हा महार्ह ! महाबाहो ! हा मम प्रिय ! पश्य माम् ॥३९॥

---

* विविक्ते—पूते, 'विविक्तौ पूतविजनौ' इत्यमरः—ती. † वहनोचिताः—वाहकाः—गो.

[1] प्रणादिताः—ङ. [2] वानरस्य—ङ. [3] प्रियम्—ज. [4] सर्गान्तदृश्यमानसंख्यादृष्ट्या अयं श्लोकः कतककर्तुरधिको वा । [5] हतबान्धवाः—ज. [6] क्रन्दित—ङ. [7] वृक्षाः—ङ. [8] वनचारिणः—ज. [9] वानरोत्तमाः—ज. [10] परायणाः—ज. [11] महावीर—ङ.

जनं न पश्यसीमं त्वं कस्मात् शोकाभिपीडितम् ।
प्रहृष्टमिव ते वक्त्रं गतासोरपि, मानद ! ॥ ४० ॥
अस्तार्कसमवर्णं च [1]लक्ष्यते जीवतो यथा ॥
एष त्वां रामरूपेण कालः कर्षति, वानर !
येन स्म विधवाः सर्वाः कृता एकेषुणा [2]रणे ॥ ४१ ॥

एकेषुणा रण इति । रणे—सुग्रीवरणे ॥ ४१ ॥

इमास्तास्तव, राजेन्द्र ! वानर्यो *[3]वल्लभाः सदा ।
पादैर्विकृष्टमध्वानं आगताः किं न बुध्यसे ? ॥ ४२ ॥
तवेष्टा ननु नामैताः भार्याश्चन्द्रनिभाननाः ॥ ४३ ॥

विकृष्टं—दूरम् ॥ ४३ ॥

इदानीं नेक्षसे कस्मात् [4]सुग्रीवं [5]प्लवगेश्वरम् ।
एते हि सचिवाः, राजन् ! तारप्रभृतयस्तव ॥ ४४ ॥
पुरवासी जनश्चायं [6]परिवार्यासतेऽनघ !
विसर्जयैतान् [7]प्लवगान् [8]यथोचितमरिन्दम !
ततः क्रीडामहे सर्वाः वनेषु †मदनोत्कटाः ॥ ४५ ॥
एवं विलपतीं तारां पतिशोक[9]परिप्लुताम् ।
उत्थापयन्ति स्म तदा वानर्यः शोककर्शिताः ॥ ४६ ॥
सुग्रीवेण ततः सार्धं अङ्गदः पितरं रुदन् ।
चितामारोपयामास शोकेनाभि[10]हतेन्द्रियः ॥ ४७ ॥

---

* अप्लवगाः (पा.) प्लुतगतिमजानन्त्यः (शोकादिति शेषः)–ति. तव वानर्यः तव प्लवगाश्च (पा.)–रा. † त्वया सहेति, विललापेति च शेषः–ति.

[1] दृश्यते–ज. [2] वने–ङ. [3] ऽप्लवगास्तथा–झ., प्लवगास्तथा–ङ. ज., त्यक्तवल्लभाः–झ. [4] अनाथाः–ङ. [5] प्लवगेश्वर–झ. [6] परिवार्य विषीदति–ज. [7] सचिवान्–ज. [8] यथापुर–ज. [9] परीवृताम्–ज. [10] प्लुतेन्द्रियः–ज.

ततोऽग्निं विधिवत् दत्त्वा *सोऽपसव्यं चकार ह।
पितरं दीर्घमध्वानं प्रस्थितं व्याकुलेन्द्रियः ॥ ४८॥

अपसव्यं—अपसव्यपरिक्रमणम्। इममग्निमिति शेषः ॥ ४८॥

संस्कृत्य वालिनं ते तु [1]विधिपूर्वं प्लवङ्गमाः।
आजग्मुरुदकं कर्तुं नदीं शीतजलां [2]शिवाम् ॥ ४९॥

विधिपूर्वं संस्कृत्येति। देवांशत्वेन सुग्रीवहनुमदादेः स्वयंप्रतिभातसर्ववेदवेदार्थत्वात् वालिनश्च महाराजचरित्रत्वात् विचित्रसंध्यावन्दनाद्यनुष्ठानादिमत्त्वेन श्रौतसंस्कारार्हत्वाच्च ॥ ४९॥

ततस्ते सहिता[3]स्तत्र ह्यङ्गदं स्थाप्य चाग्रतः।
सुग्रीव†तारासहिताः सिषिचुर्वालिने जलम् ॥ ५०॥
सुग्रीवेणैव दीनेन दीनो भूत्वा महाबलः।
समानशोकः काकुत्स्थः प्रेतकार्याण्यकारयत् ॥ ५१॥
‡ततस्तु तं वालिनमग्र्यपौरुषं
प्रकाशमिक्ष्वाकुवरेषुणा हतम्।
प्रदीप्य दीप्ताग्निसमौजसं तदा
सलक्ष्मणं राममुपेयिवान् हरिः ॥ ५२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चविंशः सर्गः

राम(५२)मानः सर्गः ॥ ५२॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चविंशः सर्गः

---

* अपसव्यं चकार—प्रदक्षिणेन परिक्रमणं चक्रे—रा. 'अपसव्यं तु दक्षिणं' इत्यमरः॥ † तारयाऽप्युदकदानं कुलाचारः—गो. ‡ प्रकाशं—प्रसिद्धम्। यद्यपि तिर्यगधिकरणरीत्या तिरश्चां न शास्त्रविहितसंस्काराधिकारः, तथापि देवांशसंभूतानां तिर्यगवस्थामात्रभाजां वेदाध्ययनसंयोगात् देवक्षत्रजातत्वात् संस्कारार्हताऽस्तीति बोध्यम्—गो.

[1] विधिवत् प्लवगर्षभाः—ज. [2] शुभाम्—ङ. [3] स्तथुः—ङ.

षड्विंशः सर्गः

[सुग्रीवाभिषेकः]

ततः शोकाभिसंतप्तं सुग्रीवं *क्लिन्न[1]वाससम्।
शाखामृगमहामात्राः परिवार्योपतस्थिरे॥ १॥

अथ रामानुमत्या सुग्रीवाङ्गदयोः राजयुवराजपट्टाभिषेकः। तत इत्यादि। क्लिन्नवाससं—आर्द्रवस्त्रपरिधानम्। शाखामृगमहामात्राः—वानरबलप्रधानाः इत्यर्थः॥ १॥

†[2]अभिगम्य महाबाहुं राममक्लिष्टकारिणम्।
स्थिताः प्राञ्जलयः सर्वे पितामहमिवर्षयः॥ २॥

ततः काञ्चनशैलाभः तरुणार्कनिभाननः।
अब्रवीत् प्राञ्जलिर्वाक्यं हनूमान् मारुतात्मजः॥ ३॥

भवत्प्रसादात् [3]सुग्रीवः पितृपैतामहं महत्।
वानराणां सुदंष्ट्राणां संपन्नबलशालिनाम्॥ ४॥

[4]महात्मनां सुदुष्प्रापं प्राप्तो राज्यमिदं, प्रभो!
भवता समनुज्ञातः प्रविश्य नगरं शुभम्॥
संविधास्यति कार्याणि सर्वाणि ससुहृज्जनः॥ ५॥

कार्याणि—राजकार्याणि॥ ५॥

---

* क्लिन्नवाससं—आर्द्रवस्त्रं, सद्यः स्नानात्—गो.　† अभिगम्य, पूर्वश्लोकोक्ताः सर्वे ससुग्रीवा वानराः रामसमीपमागम्य।

[1] मानसम्—ङ.　[2] अभिवाद्य—ङ.　[3] काकुत्स्थ—ज.　[4] एतदर्धद्वयस्थाने—वानराणां सुदुष्प्रापं प्राप्तं राज्यमिदं प्रभो—इति—ङ. झ.

*स्नातोऽयं विविधैर्गन्धैः औषधैश्च यथाविधि ।
अर्चयिष्यति रत्नैश्च माल्यैश्च त्वां विशेषतः ॥ ६ ॥

यथाविधि स्नात इति । राजाभिषेकाभिषिक्तः इत्यर्थः ॥ ६ ॥

इमां †गिरिगुहां रम्यां अभिगन्तुमितोऽर्हसि ।
कुरुष्व स्वामिसंबन्धं वानरान् संप्रहर्षयन् ॥ ७ ॥

स्वामिसंबन्धं—स्वामित्वसंबन्धम् । कुरुष्वेति । वानरराज्याभिषेकेणेति शेषः ॥ ७ ॥

एवमुक्तो हनुमता राघवः परवीरहा ।
प्रत्युवाच हनूमन्तं बुद्धिमान् वाक्यकोविदः ॥ ८ ॥
चतुर्दशसमाः, सौम्य! ग्रामं वा यदि वा पुरम् ।
न प्रवेक्ष्यामि, हनुमन्! पितुर्निर्देश[1]पालकः ॥ ९ ॥
सुसमृद्धां गुहां [2]रम्यां सुग्रीवो वानरर्षभः ।
प्रविष्टो विधिवद्वीरः क्षिप्रं राज्येऽभिषिच्यताम् ॥ १० ॥

अभिषिच्यतामिति । त्वयेति शेषः ॥ १० ॥

एवमुक्त्वा हनूमन्तं रामः सुग्रीवमब्रवीत् ।
वृत्तज्ञो वृत्तसम्पन्नं उदारबलविक्रमम् ॥ ११ ॥
इममप्यङ्गदं, [3]वीर! यौवराज्येऽभिषेचय ।
ज्येष्ठस्य हि सुतो ज्येष्ठः सदृशो विक्रमेण [4]ते ॥ १२ ॥
अङ्गदोऽयमदीनात्मा यौवराज्यस्य भाजनम् ॥ १३ ॥

---

* गन्धैरौषधैश्च स्नातोऽयं सुग्रीवः माल्यैः रत्नैश्च त्वां विशेषतोऽर्चयिष्यति—रा.

† गिरिगुहां—किष्किन्धाम् ॥

[1] पारगः—ज. [2] दिव्यां—ज. [3] वीरं—ज. [4] च—ज.

हि—यस्मात् ज्येष्ठस्य ज्येष्ठः सुतः विक्रमेण ज्येष्ठस्य सदृशश्च, तस्मात्—अङ्गदोऽयमित्यादि ॥ १३ ॥

*पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः ।
प्रवृत्ताः, सौम्य! चत्वारः मासा वार्षिकसंज्ञकाः ॥ १४ ॥

ये प्रवृत्ताः चत्वारो मासाः, तेषां अयं पूर्वो मासः इति योजना ॥ १४ ॥

नायमुद्योगसमयः प्रविश त्वं पुरीं शुभाम् ।
अस्मिन् वत्स्याम्यहं, सौम्य! पर्वते सहलक्ष्मणः ॥ १५ ॥

इयं गिरिगुहा रम्या विशाला युक्तमारुता ।
प्रभूतसलिला, सौम्य! प्रभूतकमलोत्पला ॥ १६ ॥

युक्तमारुता—उचितवातवती ॥ १६ ॥

†कार्तिके समनुप्राप्ते त्वं रावणवधे यत ।

---

* सीतान्वेषणोद्योगं सुग्रीवस्यालक्ष्याह—पूर्वोऽयमिति—ति. श्रावणभाद्रपदौ वर्षर्तुः । तदेकदेशत्वात् श्रावणो वार्षिक इत्युच्यते । वार्षिकसंज्ञकाश्चत्वारो मासा इति । आश्वयुजाषाढाभ्यां चतुष्ट्वमिति ज्ञेयम्, छत्रिन्यायात् । वर्षमुखत्वात् वर्षानन्तरकालत्वाच्च चत्वारोऽपि युद्धयोग्या न भवन्ति । कश्चित्तु—'पक्षा वै मासाः' इति श्रुतिपक्षमाश्रित्य चत्वारो वार्षिका मासा इत्युक्तम् । 'श्रावणः प्रथमो मासः' इत्यत्रापि प्रथमः पक्ष इत्यर्थः । 'चत्वारो वार्षिका मासा गता वर्षशतोपमाः' इत्युपसंहारादित्याह—गो.

† कार्तिके मासि समनुप्राप्ते—समीपं प्राप्ते आश्वयुजान्त इत्यर्थः । एष नः समयः—संकेतः (पुनर्न मया बोधनीय इति भावः) । यत—यतस्व—सेनासन्नहनं कुरु । कार्तिकशब्दस्य आश्वयुजान्तपरत्वं स्वयमेव वक्ष्यति—'वयमाश्वयुजे मासि पिङ्गाक्षप्रतिबोधिताः' (किष्कि. 53, 22–24) इति । प्रचोदनं सन्नहनं, न तु निर्गमः । निर्गमस्तु मार्गशीर्षे । स्वसंकेतितकार्तिकातिक्रमादेव रामस्य सुग्रीवे कोपः, लक्ष्मणप्रेषणं च । स्वयंप्रभाबिलनिर्गमनानन्तरं 'द्रुमान् वासन्तिकान् दृष्ट्वा' (किष्कि. 53-17) [अनन्तरपुटे—

एष नः समयः, सौम्य! प्रविश त्वं स्वमालयम्॥
[1]अभिषिक्तः स्वराज्ये च सुहृदः [2]संप्रहर्षय ॥ १७ ॥

यत–प्रयतस्व । एष नः समय इति । 'कार्तिक्यां वयं संभूय प्रयतिष्यामहे' इत्येवंरूपः इत्यर्थः ॥ १७ ॥

इति रामाभ्यनुज्ञातः सुग्रीवो वानराधिपः ।
प्रविवेश पुरीं रम्यां किष्किन्धां वालिपालिताम् ॥१८॥
तं वानरसहस्राणि प्रविष्टं वानरेश्वरम् ।
[3]अभिवाद्य प्रविष्टानि सर्वतः [4]पर्यवारयन् ॥ १९ ॥
ततः प्रकृतयः सर्वाः दृष्ट्वा हरिगणेश्वरम् ।
***प्रणम्य मूर्ध्ना पतिताः वसुधायां समाहिताः ॥ २० ॥**

इत्येतत् वसन्तपुष्पोद्गमोपक्रमभूतपत्रविगलनहेतुफाल्गुनापेक्षया । पक्षान्तरे फाल्गुन-चैत्रयोः वसन्तत्वोक्तेर्वा । अयमत्र क्रमोऽनुसन्धेयः—'उत्तरस्यादिना पूर्वस्यावधिं जानीयात्' इति न्यायेन उत्तरस्योत्तरस्य ग्रहणात् पूर्वपूर्वकालसंख्याज्ञापनं वाल्मीकेः शैली । तथा च चैत्रे रामस्य साकेतान्निर्गमः । अगस्त्यागमनात्पूर्वं दशसंवत्सरा गता इत्युक्तम् । अथ पञ्चवट्यां वर्षत्रयानन्तरं चैत्रे प्राप्ते शूर्पणखानासिकाच्छेदनखरवधादिकं कृतमित्यवगम्यते । रावणेन च मारीचवचनादिना किञ्चिद्विलम्ब्य तस्मिन्नेव चैत्रे सीता हृता । सीताविरहेण दूयमानस्य रामस्य वसन्तवर्णने 'चैत्रो वनानिलः' (किष्कि. 1-36) इत्युक्तेः । लङ्कायां सीतायाः संवत्सरवासोक्तेश्च । पुनः फाल्गुने हि रावणवधः । आषाढे वालिवधः । शरदि सेनासन्नहनम् । मार्गशीर्षे वानरप्रस्थानम् । स्वयंप्रभाबिले बहुकालयापनम्, 'कालश्च नो महान् यातः' (किष्कि. 49-4) इत्युक्तेः । बिलनिर्गमनानन्तरं फाल्गुनशुद्ध-त्रयोदश्यां हनुमतः समुद्रतरणम् । चतुर्दश्यां पुनरागमनम् । पौर्णमास्यां दण्डयात्रेत्यादि । अन्यत् युद्धकाण्डे वक्ष्यते–**गो.** *वसुधायां समाहिताः—संस्थिताः–**रा.** मूर्ध्ना प्रणम्य–नम्रीभूय वसुधायां दण्डवत् पतिताः–**ति.** मूर्ध्ना प्रणम्य वसुधायां पतिताः । समाहिताः—अनन्यमनस्काः–**गो.**

[1] अभिषिञ्चस्व–**ज. झ.** [2] संप्रचोदय–**ङ.** [3] अभिवार्य प्रहृष्टानि–**ज.**
[4] प्लवगेश्वरम्–**ज.**

सुग्रीवः प्रकृतीः सर्वाः संभाष्योत्थाप्य वीर्यवान् ।
*आतुरन्तःपुरं सौम्यं प्रविवेश महाबलः ॥ २१ ॥

उत्थाप्यति । वसुधायां प्रणतानिति शेषः ॥ २१ ॥

[1]प्रविश्य त्वभिनिष्क्रान्तं सुग्रीवं [2]प्लवगेश्वरम् ।
अभ्यषिञ्चन्त सुहृदः सहस्राक्षमिवामराः ॥ २२ ॥

प्रविश्य त्वभिनिष्क्रान्तमिति । अन्तःपुरकोशादिकं प्रविश्य स्त्रियश्च दृष्ट्वा अभिषेकाय पुनः प्रतिनिवृत्तं इत्यर्थः ॥ २२ ॥

तस्य पाण्डुरमाजह्रुः छत्रं हेमपरिष्कृतम् ।
शुक्ले च वालव्यजने हेमदण्डे यशस्करे ॥ २३ ॥
तथा सर्वाणि रत्नानि सर्वबीजौषधैरपि ।
सक्षीराणां च वृक्षाणां †प्ररोहान् कुसुमानि च ॥२४॥

सक्षीराणां वृक्षाणां प्ररोहानिति । न्यग्रोधादिशृङ्गानित्यर्थः ॥

शुक्लानि चैव वस्त्राणि श्वेतं चैवानुलेपनम् ।
सुगन्धीनि च माल्यानि स्थलजान्यम्बुजानि च ॥ २५ ॥
चन्दनानि च दिव्यानि गन्धांश्च विविधान् बहून् ।
अक्षतं जातरूपं च प्रियङ्गुमधुसर्पिषी ॥
दधि चर्म च वैयाघ्रं ‡[3]वाराही चाप्युपानहौ ॥ २६ ॥

गन्धान्—गन्धद्रव्याणि ॥ २६ ॥

---

* आतुरन्तःपुरं प्रविवेशेति । तारां संमान्य स्ववशीकरणार्थमिति शेषः—**गो.**

† प्ररोहाः—अधोजटाः—**ति. रा.** पल्लवाः—**गो.** ‡ वाराही—वराहचर्मविकृती—**गो.**

[1] प्रविष्टं भीमविक्रान्तं—**ज.** [2] वानरर्षभम्—**ज.** [3] वराहौ—**ङ.** पराध्यौ—**च.ज.**

समालम्भनमादाय *[1] रोचनां समनःशिलाम् ।
आजग्मुस्तत्र मुदिताः वराः कन्यास्तु षोडश ॥ २७ ॥

समालम्भनं—उपलेपनद्रव्यम् ॥ २७ ॥

ततस्ते वानरश्रेष्ठं [2]यथाकालं यथाविधि ।
रत्नैर्वस्त्रैश्च भक्ष्यैश्च तोषयित्वा †द्विजर्षभान् ॥२८॥

‡ततः कुशपरिस्तीर्णं समिद्धं जातवेदसम् ।
मंत्रपूतेन हविषा हुत्वा मंत्रविदो जनाः ॥२९॥

ततो हैमप्रतिष्ठाने वरास्तरणसंवृते ।
प्रासादशिखरे रम्ये चित्रमाल्योपशोभिते ॥३०॥

प्राङ्मुखं विविधैर्मन्त्रैः स्थापयित्वा वरासने ।
नदीनदेभ्यः संहृत्य तीर्थेभ्यश्च समन्ततः ॥३१॥

मन्त्रैः स्थापयित्वेति । 'वसवस्त्वा गायत्रेण छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्ना रेऽहकृतानन्नाना ेऽइ साम्राज्याय ' इत्यादिमन्त्रैः इत्यर्थः ॥३१॥

आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः ।
अपः कनककुम्भेषु निधाय [3]विमलाः शुभाः ॥३२॥

---

* रोचनां—गोरोचनाम् । समनःशिलां—शैलधातुविशेषसहितं तिलकसाधनं मनःशिला—**गो.** † द्विजर्षभान्—वानरजातीयद्विजर्षभान्—**ती.** ‡ ततः कुशेति । अनेनाग्निसाध्यकर्माधिकारं तेषां दर्शयति। मनुष्यसदृशसर्वव्यवहारात्, वेदज्ञत्वाच्च—**ति.**

[1] गोरोचनां मन—**च.**, गोरोचनमन—**ङ.** [2] अभिषेक्तुं—**च. ञ.**
[3] विमलं जलम्—**ञ.**

*[1] शुभैर्वृषभशृङ्गैश्च [2] कलशैश्चापि काञ्चनैः ।
शास्त्रदृष्टेन विधिना † महर्षिविहितेन च ॥ ३३ ॥

वृषभशृङ्गैः-तन्निर्मितपात्रैरित्यर्थः । महर्षिविहितेन । बोधायन-विहितेनेत्यर्थः ॥ ३३ ॥

गजो गवाक्षो गवयः शरभो गन्धमादनः ।
मैन्दश्च द्विविदश्चैव हनुमान् जाम्बवान् नलः ॥३४॥
अभ्यषिञ्चन्त सुग्रीवं प्रसन्नेन सुगन्धिना ।
सलिलेन सहस्राक्षं वसवो वासवं यथा ॥३५॥
अभिषिक्ते तु सुग्रीवे सर्वे वानरपुङ्गवाः ।
[3] प्रचुक्रुशुर्महात्मानः हृष्टास्तत्र सहस्रशः ॥३६॥

हृष्टाः प्रचुक्रुशुरिति । किलकिलाशब्दमकुर्वन् इत्यर्थः ॥ ३६ ॥

रामस्य तु वचः कुर्वन् सुग्रीवो [4] हरिपुङ्गवः ।
अङ्गदं संपरिष्वज्य यौवराज्येऽभ्यषेचयत् ॥३७॥
अङ्गदे चाभिषिक्ते तु सानुक्रोशाः प्लवङ्गमाः ।
साधु साध्विति सुग्रीवं महात्मानोऽभ्यपूजयन् ॥३८॥
रामं चैव महात्मानं लक्ष्मणं च पुनःपुनः ।
प्रीताश्च तुष्टुवुः सर्वे तादृशे तत्र ‡[5] वर्तिनि ॥३९॥

तादृशे तत्र वर्तिनीति । अभिषिक्ते सुग्रीवे किष्किन्धायां वर्तमाने सतीत्यर्थः ॥ ३९ ॥

---

* वृषभशृङ्गादिभिरुद्धृत्य—गो. † महर्षिविहितेन— बौधायनादिविहितेन—ति. महर्षयः—मन्वादयः—ती. ‡ वर्तति (पा.)—वर्तमाने सति—गो.—

[1] शुभैर्हिरण्य—ङ. [2] शुकुशै—ङ. [3] प्रतुष्टुवु—ङ. [4] वानरेश्वरः—ज. [5] वर्तति—ङ.

हृष्टपुष्टजनाकीर्णा पताकाध्वजशोभिता ।
बभूव नगरी रम्या किष्किन्धा *गिरिगह्वरे ॥४०॥

निवेद्य रामाय तदा महात्मने
महाभिषेकं कपिवाहिनीपतिः ।
रुमां च भार्यां प्रतिलभ्य वीर्यवान्
अवाप राज्यं त्रिदशाधिपो यथा ॥४१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षड्विंशः सर्गः

अपभी(४१ १/२)मानः सर्गः ॥ ४१ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षड्विंशः सर्गः

सप्तविंशः सर्गः

[माल्यवत्पर्वतनिवासः]

अभिषिक्ते तु सुग्रीवे प्रविष्टे वानरे गुहाम् ।
आजगाम सह भ्रात्रा रामः प्रस्रवणं गिरिम् ॥१॥

अथ सुग्रीवं प्रस्थाप्य राघवस्य माल्यवद्गिरौ वासः । अभिषिक्ते त्वित्यादि । गुहां—किष्किन्धाम् ॥ १ ॥

---

* गिरिगह्वरे विद्यमाना किष्किन्धा–रा.

शार्दूलमृगसंघुष्टं सिंहैः भीमरवैर्वृतम् ।
[1]नानागुल्मलतागूढं बहुपादपसङ्कुलम् ॥ २ ॥

प्रस्रवणगिरिवर्णनम् — शार्दूलेत्यादि । गुल्मानि लताश्च गुल्मलताः ॥ २ ॥

ऋक्षवानरगोपुच्छैः मार्जारैश्च निषेवितम् ।
मेघराशिनिभं शैलं नित्यं [2]शुचिजलाश्रयम् ॥ ३ ॥

मार्जारैः—वनमार्जारैः । ३ ॥

तस्य शैलस्य शिखरे महतीमायतां गुहाम् ।
प्रत्यगृह्णत वासार्थं रामः सौमित्रिणा सह ॥ ४ ॥

कृत्वा च समयं [3]सौम्यः सुग्रीवेण सहानघः ।
कालयुक्तं महद्वाक्यं उवाच रघुनन्दनः ॥
विनीतं भ्रातरं भ्राता लक्ष्मणं लक्ष्मिवर्धनम् ॥ ५ ॥

समयं—सीतान्वेषण कालप्रतिज्ञाम् । कालयुक्तं—तत्कालोचितम् ॥

इयं गिरिगुहा रम्या विशाला युक्तमारुता ।
अस्यां *[4]वसाव, सौमित्रे ! वर्षरात्रमरिन्दम ! ॥ ६ ॥

युक्तमारुता—उचितवातवर्ती । वर्षरात्रमिति जात्येकवचनम् ॥६॥

गिरिशृङ्गमिदं रम्यं [5]उन्नतं, पार्थिवात्मज !
श्वेताभिः कृष्णताम्राभिः शिलाभिरुपशोभितम् ॥ ७ ॥

---

* वसाव—लोडुत्तमपुरुषद्विवचनम् ।

[1] नानाद्रुम—ङ [2] शुचिकरं शिवम्—च., ज. [3] रामः—ज. [4] वत्स्याम—च., ज.
[5] उत्तमं—च., ज.

नानाधातुसमाकीर्णं [1] दरीनिर्झरशोभितम् ।
विविधैर्वृक्षषण्डैश्च [2] चारु चित्रलतावृतम् ॥ ८ ॥

वृक्षषण्डैः चारु–सुन्दरम् ॥ ८ ॥

नानाविहगसंघुष्टं मयूररवनादितम् ।
मालतीकुन्दगुल्मैश्च [3] सिन्धुवारकुरण्टकैः ॥ ९ ॥
कदम्बार्जुन[4]सर्जैश्च पुष्पितैरुपशोभितम् ।
इयं च मालिनी रम्या फुल्लपङ्कजमण्डिता ॥ १० ॥
*नातिदूरे गुहाया नौ भविष्यति, नृपात्मज !
†प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति ॥ ११ ॥
पश्चाच्चैवोन्नता, सौम्य ! निवातेयं भविष्यति ॥ १२ ॥

प्रागुदक्प्रवणे–ईशानदिङ्निम्नवति देशे वर्तमाना गुहा साधु—सम्यक् भविष्यतीति । सुखसाधनमिति शेषः ॥ ११–१२ ॥

‡गुहाद्वारे च, सौमित्रे ! शिला समतला शुभा ।
[5] श्लक्ष्णा चैवायता चैव भिन्नाञ्जनचयोपमा ॥ १३ ॥
गिरिशृङ्गमिदं, तात ! पश्य चोत्तरतः शुभम् ।
भिन्नाञ्जनचयाकारं [6] स्थितं श्वेतमिवाम्बरम् ॥ १४ ॥

---

* नातिदूर इति । वर्षाकालस्य प्रवृत्तत्वात् भाविजलसमृध्या समीपवर्तिनी भविष्यतीत्यर्थः–**गो.** † प्रागुदक्प्रवणे देशे वर्तमानत्वाभिधानात् गुहाया नैऋत्याभिमुखत्वमुक्तम् । अत एव पौरस्त्यवर्षप्रवेशाभावेन साधुत्वमुक्तं भवति—**गो., ती.**
‡ तेन बहिरुपवेशनसौकर्यम्—**ति.**

[1] नदीदर्दुरसंयुतम्–**ज.** [2] द्वारि–**ङ.** [3] सिन्धुवारैः शिरीषकैः–**ज.**
[4] वंशैश्च–**ङ.** [5] कृष्णा–**ञ.** [6] अंभोधरमिवोत्थितम्–**ङ.**

उत्तरतः—उत्तरदिग्भागे । 'भिन्नाञ्जनचयाकारं स्थितं श्वेतमिवाम्बरम्' इति पाठः । शुक्लवस्त्रमिव स्थितं इत्यर्थः ॥ १४ ॥

दक्षिणस्यामपि दिशि स्थितं *श्वेतमिवा[1]परम् ।
कैलासशिखरप्रख्यं नानाधातुविभूषितम् ॥ १५ ॥
प्राचीनवाहिनीं चैव नदीं भृशमकर्दमाम् ।
गुहायाः [2]पूर्वतः पश्य त्रिकूटे †जाह्नवीमिव ॥ १६ ॥

त्रिकूटे–पूर्वकालोषितत्रिकूटपर्वते ॥ १६ ॥

[3]चम्पकैस्तिलकैस्तालैः तमालैरतिमुक्तकैः ।
पद्मकैः सरलैश्चैव [4]अशोकैश्चैव शोभिताम् ॥ १७ ॥

'अतिमुक्तः पुण्ड्रकः स्यात्'—குருக்கத்தி । पद्मकः—चन्दनभेदः । सरलः—पीतद्रुमः ॥ १७ ॥

[5]वानीरैस्तिमिशैश्चैव [6]वकुलैः केतकैर्धवैः ।
हिन्तालै[7]स्तिरिटैर्नीपैः [8]वेत्रकैः कृतमालकैः ॥ १८ ॥

'हिन्तालः तृणराजश्च'—தாளிப்பனை ॥ १८ ॥

तीरजैः शोभिता भाति नानारूपैस्ततस्ततः ।
वसनाभरणोपेता प्रमदेवाभ्यलङ्कृता ॥ १९ ॥

प्रमदेवाभ्यलङ्कृता, इयं नदी इत्यनुकर्षः ॥ १९ ॥

---

* श्वेतमिव—रूप्यमिव–गो. † जाह्नवी—जाह्नवीसदृशी मन्दाकिन्याख्या नदी–ति.

[1] म्बुदम्–ङ. म्बरम्–च., ज. [2] पुरतः–ज. [3] चन्दनै–ज. [4] अंकोलै–ङ. [5] नीवारैस्तिनिशै–ङ., वानीरैस्तिमिदै–ज. [6] वञ्जुलैः–ङ. [7] स्तिनिशै–ङ. [8] वेतसैः–ज.

शतशः पक्षिसङ्घैश्च नानानादैर्विनादिता ।
एकैकमनुरक्तैश्च चक्रवाकैरलङ्कृता ॥ २० ॥
पुलिनैरतिरम्यैश्च हंससारस[1]सेवितैः ।
प्रहसन्तीव भात्येषा [2]नारी सर्वविभूषिता ॥ २१ ॥
क्वचिन्नीलोत्पलच्छन्ना भाति रक्तोत्पलैः क्वचित् ।
क्वचिदाभाति शुक्लैश्च दिव्यैः कुमुदकुड्मलैः ॥ २२ ॥
पारिप्लवशतैर्जुष्टा बर्हिणक्रौञ्चनादिता ।
रमणीया नदी, सौम्य! [3]मुनिसङ्घैर्निषेविता ॥ २३ ॥

पारिप्लवः—शकटलीलः—மடல்நாரை ॥ २३ ॥

पश्य चन्दनवृक्षाणां पंक्तीः *[4]सुरुचिरा इव ।
ककुभानां च दृश्यन्ते मनसेवोदिताः समम् ॥२४॥

सुरुचिरा इव—इवशब्दः अप्यर्थे । शोभमानाः चन्दनवृक्षपङ्क्तीरपीति योजनार्थः ॥ २४ ॥

अहो सुरमणीयोऽयं देशः, शत्रुनिषूदन !
[5]इहं रंस्याव, सौमित्रे! साध्वत्र निवसावहै ॥ २५ ॥
†इतश्च नातिदूरे सा किष्किन्धा चित्रकानना ।
सुग्रीवस्य पुरी रम्या भविष्यति, नृपात्मज! ॥ २६ ॥
गीतवादित्रनिर्घोषः श्रूयते, जयतां वर !
नर्दतां वानराणां च मृदङ्गाडम्बरैः सह ॥ २७ ॥

---

* सुरचिता इव (पा.)—मालारूपेण ग्रथिता इव—गो. † अत्र वासे किष्किन्धाऽपि समीपवर्तिनी भविष्यतीत्याह—इतश्चेति—गो.

[1] सेविता—ज. [2] नानारत्नसमन्विता—ज. [3] ऋषिसंघै—ङ. [4] सुरचिता—ङ. [5] इह—ङ.

नातिदूरे इत्यत्र गमकं—गीतवादित्रेत्यादि। मृदङ्गानां आडम्बराः—शब्दाः ॥ २७ ॥

लब्ध्वा भार्यां कपिवरः प्राप्य राज्यं सुहृद्वृतः।
ध्रुवं नन्दति सुग्रीवः संप्राप्य महतीं श्रियम् ॥ २८ ॥
[1]इत्युक्त्वा न्यवसत् तत्र राघवः सहलक्ष्मणः।
बहुदृश्यदरीकुञ्जे तस्मिन् प्रस्रवणे गिरौ ॥ २९ ॥
सुसुखेऽपि *बहुद्रव्ये तस्मिन् [2]हि धरणीधरे।
वसतस्तस्य रामस्य रतिरल्पाऽपि नाभवत् ॥ ३० ॥

बहुद्रव्ये—सुखसाधनबहुद्रव्यवति। रतिः—सुखम् ॥ ३० ॥

हृतां हि भार्यां स्मरतः प्राणेभ्योऽपि गरीयसीम्।
[3]उदयाभ्युदितं दृष्ट्वा शशाङ्कं च विशेषतः ॥
आविवेश न तं निद्रा निशासु शयनं गतम् ॥ ३१ ॥

उदयपर्वते अभ्युदितः—उदयाभ्युदितः। †न तं इति-पदभ्रमः ॥ ३१ ॥

तत्समुत्थेन शोकेन बाष्पोपहत[4]चेतसम्।
तं शोचमानं काकुत्स्थं नित्यं शोकपरायणम् ॥ ३२ ॥
तुल्यदुःखोऽब्रवीत् भ्राता लक्ष्मणोऽ‡[5]नुनयन् वचः।
अलं, वीर! व्यथां गत्वा न त्वं शोचितुमर्हसि ॥ ३३ ॥

---

* बहुद्रव्ये—बहुपुष्पफलादिधने–गो. † नतं इति पदैकत्वभ्रमः स्यात्, पदद्वयमिति भावः। ‡ अनुनयं–पा.—अनुनयवत्–ति. विनीतं–रा.

[1] इत्युक्त्वेत्याद्यर्धस्थाने—एवमुक्त्वा महातेजा लक्ष्मणं शुभलक्षणम्। न्यवसत्तत्र धर्मात्मा राघवः सहलक्ष्मणः—इत्यर्धद्वयं–ङ. [2] प्रस्रवणे गिरौ–ङ. [3] उदयाभ्युदयं–ङ. [4] चेतनम्–ङ. [5] नुनयं–ज.

[1]शोचतो व्यवसीदन्ति [2]सर्वार्थाः, विदितं हि ते ॥ ३४ ॥

व्यथां गत्वा अलं—व्यथा मास्तु इत्यर्थः। विदितं हि ते इति। त्वयेति यावत् ॥ ३४ ॥

भवान् क्रियापरो लोके भवान् [3]दैवपरायणः।
आस्तिको धर्मशीलश्च व्यवसायी च, राघव! ॥ ३५ ॥

क्रियापरः——नित्यकर्मानुष्ठाता ॥ ३५ ॥

न ह्यव्यवसितः शत्रुं राक्षसं तं विशेषतः।
समर्थस्त्वं रणे हन्तुं [4]विक्रमे जिह्मकारिणम् ॥ ३६ ॥

अव्यवसितः स त्वं शत्रुं हन्तुं न समर्थः इत्यन्वयः। विक्रमे——तत्प्रकाशनावसरभूते रणे——युद्धे। यदि शोकावसन्न इति शेषः ॥ ३६ ॥

समुन्मूलय शोकं त्वं व्यवसायं [5]स्थिरं कुरु।
ततः सपरिवारं तं [6]निर्मूलं कुरु राक्षसम् ॥ ३७ ॥

यदेवं, अतः—शोकं समुन्मूलय। व्यवसायं शत्रुसंहारोद्योगम् ॥ ३७ ॥

पृथिवीमपि, काकुत्स्थ! ससागरवनाचलाम्।
परिवर्तयितुं शक्तः [7]किमङ्ग! *पुनरावणम् ॥ ३८ ॥
शरत्कालं प्रतीक्षस्व प्रावृट्कालोऽयमागतः।
ततः सराष्ट्रं सगणं रावणं त्वं वधिष्यसि ॥ ३९ ॥

---

* पुनः (पा.) इत्यत्र दीर्घाभावः आर्षः—गो.

[1] शोचन्तो—ङ., च. [2] सर्वथा—ङ. [3] देव—ज. [4] विक्रमैर्जिह्मकारिणम्, विक्रमो जयकारणम्—ङ. [5] स्थिरीकुरु—ज. [6] राक्षसं हन्तुमर्हसि—ज. [7] किं पुनस्तं हि—ज.

अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये ।
*दीप्तै[1]राहुतिभिः काले भस्मच्छन्नमिवानलम् ॥ ४० ॥

काल इति । होमकाल इत्यर्थः ॥ ४० ॥

लक्ष्मणस्य तु तद्वाक्यं प्रतिपूज्य हितं शुभम् ।
राघवः सुहृदं स्निग्धं इदं वचनमब्रवीत् ॥ ४१ ॥

†वाच्यं यदनुरक्तेन स्निग्धेन च हितेन च ।
सत्यविक्रमयुक्तेन तदुक्तं, लक्ष्मण! त्वया ॥ ४२ ॥

एष शोकः परित्यक्तः सर्वकार्यावसादकः ।
विक्रमेष्वप्रतिहतं तेजः प्रोत्साहयाम्यहम् ॥ ४३ ॥

विक्रमेषु—विक्रमकालेषु । तेजः, सहजमिति शेषः । प्रोत्साहयामि—वर्धयामि ॥ ४३ ॥

शरत्कालं प्रतीक्षिष्ये स्थितोऽस्मि वचने तव ।
सुग्रीवस्य नदीनां च प्रसादमनुपालयन् ॥ ४४ ॥

सुग्रीवस्य प्रसादं—चित्तसौमनस्यम् । नदीनां प्रसादं—शरद्वशात् अपङ्किलोदकत्वम् ॥ ४४ ॥

‡उपकारेण वीरस्तु प्रतिकारेण युज्यते ।
अकृतज्ञोऽप्रतिकृतः हन्ति सत्त्ववतां मनः ॥ ४५ ॥

उपकारेणेति । अस्मत्कृतेन, युक्त इति शेषः । प्रतिकारेणेति । प्रत्युपकारेणेत्यर्थः । कुत एवं निश्चयः इत्यत्राह—अकृतज्ञ इत्यादि ।

---

* दीप्तैः—दीपकैः—ति. † अनुरक्तेन—अनुरागयुक्तेन, स्निग्धेन—तत्कालोचितप्रियपरेण—गो., ति. अनुरक्तेन—अनुरागयुक्तेन जनेन यद्वाच्यं, तत् स्निग्धेन—स्नेहयुक्तेन अत एव हितेन त्वया—रा. अनुरागः मानसिकः । आत्मगुणस्तु स्नेह इति वा ॥ ‡ सज्जनापवादभीतः सुग्रीवोऽस्माकं प्रत्युपकारं करोत्येवेति भावः—गो.

[1] राहुतिसंघातः—ङ.

अकृतज्ञो भूत्वा यद्यप्रतिकृतः—अकृतप्रत्युपक्रियः भवति, तदा सत्त्ववतामस्माकं मनो हन्ति। मैत्रीं नाशयेत्। अतः मित्रत्वात् अवश्यं प्रत्युपकरोत्येव ॥ ४५ ॥

अथैवमुक्तः *प्रणिधाय लक्ष्मणः
कृताञ्जलिस्तत् प्रतिपूज्य भाषितम्।
उवाच रामं स्वभिरामदर्शनं
प्रदर्शयन् दर्शनमात्मनः शुभम् ॥ ४६ ॥

आत्मनः शुभं दर्शनं—शुभबुद्धिं दर्शयन् उवाचेत्यन्वयः ॥ ४६ ॥

यथोक्तमेतत् तव सर्वमीप्सितं
नरेन्द्र! कर्ता न चिरात् [1]हरीश्वरः।
शरत्प्रतीक्षः क्षमतामिमं भवान्
जलप्रपातं रिपुनिग्रहे धृतः ॥ ४७ ॥

जलप्रपातं—वर्षमित्यर्थः। धृतः—स्थिरनिश्चयः ॥ ४७ ॥

नियम्य [2]कोपं [3]प्रतिपाल्यतां शरत्
क्षमस्व मासान् चतुरो मया सह।
वसाचलेऽस्मिन् मृगराजसेविते
[4]संवर्तयन् शत्रुवधे [5]समुद्यमम् ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे सप्तविंशः सर्गः

———

अस्मिन् अचले कालं संवर्तयन्—क्षपयन् वस। शिव(४८)-मानः(?) सर्गः ॥ ४८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे सप्तविंशः सर्गः

———

* प्रणिधाय—भाविकार्यमालोच्य। दर्शनं—मतम्—गो.

[1] तु वानरः—ज. [2] शोकं—ङ. [3] परिपाल्यतां—ज. [4] संवर्धयन्—ङ. [5] समर्थः—ङ.

अष्टाविंशः सर्गः

[वर्षर्तुवर्णनम्]

स [1]तदा वालिनं हत्वा सुग्रीवमभिषिच्य च ।
वसन् *माल्यवतः पृष्ठे रामो लक्ष्मणमब्रवीत् ॥ १ ॥

अथ वर्षर्तुवर्णनम् । स तदा वालिनमित्यादि ॥ १ ॥

†अयं स कालः संप्राप्तः समयोऽद्य जलागमः ।
संपश्य त्वं नभो मेघैः संवृतं गिरिसंनिभैः ॥ २ ॥

अयं स कालः संप्राप्त इति कोऽयमित्यतः——समयोऽद्य जलागमः इति । मेघैः संवृतं नभः आकाशम् ॥ २ ॥

‡नवमासधृतं गर्भं भास्करस्य गभस्तिभिः ।
पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥ ३ ॥

नवेत्यादि । द्यौः समुद्राणां रसं भास्करस्य गभस्तिभिः पीत्वा कार्तिक्यादिनवमासधृतं गर्भं—गर्भपरिपक्वं जलं लोकस्य रसायनं——

---

*माल्यवतः—पूर्वं प्रस्रवणाख्ययोक्तस्य—**गो.** †समयः—सुग्रीवस्य स्थानावधित्वेन संकेतितः सोऽयं जलागमः कालः—वर्षाकालः अद्य संप्राप्तः—**गो.**, **ती.** जलागमः—वृष्टिप्रापकः, अत एव कालः—सर्वस्थित्युपदेशकः सः प्रसिद्धोऽयं समयः संप्राप्तः—**रा.** वस्तुतस्तु 'अयं स कालः संप्राप्तः' इति लोकवत् प्रत्यक्षनिर्देशः । 'समयोऽद्य जलागमः' इत्यपि लोकवदेव विवरणम् ॥ ‡रसायनं—षड्सानां कारण गर्भं जलं प्रसूते—**ती.**, **गो.** रसायनं—सर्वरसानां मूलं समुद्राणां रसं पीत्वा—**रा.**

[1] तथा—**ङ.**, **झ.**

जीवातुं प्रसूते। गर्भवशात् सामुद्रस्याप्युदकस्य स्वादुता। उत्प्रेक्षामात्रमिदम्। वस्तुतस्तु "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति" इत्येव ॥ ३ ॥

*शक्यमम्बरमारुह्य मेघसोपान पंक्तिभिः।
कुटजार्जुनमालाभिः अलंकर्तुं [1]दिवाकरः ॥ ४ ॥

दिवाकरः अलंकर्तुं शक्यम्। †सर्वत्रात्रेदमव्ययम्। सुकरः इत्यर्थः ॥ ४ ॥

‡संध्या[2]रागोत्थितैस्ताम्रैः [3]अन्तेष्वधिकपाण्डरैः।
स्निग्धैरभ्रपटच्छेदैः बद्धव्रणमिवाम्बरम् ॥ ५ ॥

संध्यारागस्य मेघपटलेषु उत्थितैः—उत्थानैः हेतुभिः ताम्रैः अन्तेषु—पर्यन्तभागेषु अधिकपाण्डरैः, तथाऽवस्थानस्यापि संभवात् वादः, स्निग्धैः श्लक्ष्णैः अभ्ररूपैः पटच्छेदैः छिन्नपटैः अम्बरं बद्धव्रणमिव—बद्धव्रणकपुरुषादिशरीरप्रदेश इव भातीत्यर्थः ॥ ५ ॥

मन्दमारुतनिःश्वासं संध्याचन्दनरञ्जितम्।
आपाण्डुजलदं भाति कामातुरमिवाम्बरम् ॥ ६ ॥

---

* मेघसोपानपंक्तिभिः अम्बरमारुह्य कुटजार्जुनमालाभिः दिवाकरं अलंकर्तुं शक्यम्—गो. कुटजार्जुनमालाभिः, कर्तृभिः, मेघसोपानपङ्क्तिभिरम्बरमारुह्य दिवाकरः अलंकर्तुं शक्यम्—रा. †एतादृशस्थलेषु सर्वत्र उत्तरत्र ८ श्लोकादौ—'शक्यं' इत्यव्ययं बोध्यमित्यर्थः। ‡सन्ध्यारागोत्थितैः—उत्थितसन्ध्यारागैः, आहिताग्न्यादित्वात परनिपातः—गो.

[1] दिवाकरम्—ङ. [2] कालो—ङ. [3] अन्तेष्वपि च पाण्डुभिः—ज.

वर्षर्तुप्रारंभकालवर्णनम्--मन्दमारुतेत्यादि । सन्ध्यारूपेण चन्दनेन—हरिचन्दनेन रञ्जितम् तथा ॥ ६ ॥

एषा घर्मपरिक्लिष्टा नववारिपरिप्लुता ।
सीतेव शोकसंतप्ता मही बाष्पं विमुञ्चति ॥ ७ ॥

बाष्पं--ऊष्माणम् ॥ ७ ॥

मेघोदरविनिर्मुक्ताः [1] कल्हारसुखशीतलाः ।
* शक्यमञ्जलिभिः पातुं वाताः [2] केतकिगन्धिनः ॥ ८ ॥

कल्हाराणां सुखावहाः शीतलाश्च तथा । अनेन वातस्य मान्द्यधर्मो दर्शितः । केतकिगन्धिनः इति स्पष्टो गन्धधर्मः । जलवत् श्रान्तिहरत्वादिसाम्यात् अञ्जलिभिः पातुं शक्यं इति वादः ॥

एष फुल्लार्जुनः शैलः केतकैरधिवासितः ।
सुग्रीव इव शान्तारिः धाराभिरभिषिच्यते ॥ ९ ॥

फुल्लाः—पुष्पिताः अर्जुनाः--इन्द्रद्रुमाः यस्मिन् स तथा । धाराः—वर्षधाराः ॥ ९ ॥

मेघकृष्णाजिनधराः धारायज्ञोपवीतिनः ।
मारुतापूरितगुहाः प्राधीता इव पर्वताः ॥ १० ॥

'मारुतापूरितगुहाः' इत्यनेन ध्वनिसंबन्धप्रदर्शनम् । प्राधीताः । 'आदिकर्मणि क्तः कर्तरि च', अध्येतुमुपक्रान्ताः बटवः इवेत्यर्थः ॥ १० ॥

---

* अञ्जलिभिः पातुमिति आदरातिशयादुक्तिः–ति.

[1] कर्पूरदल–ञ.   [2] केतक–ङ.

कशाभिरिव हैमीभिः विद्युद्भिरिव *ताडितम् ।
अन्तःस्तनितनिर्घोषं सवेदनमिवाम्बरम् ॥ ११ ॥

अन्तर्गतस्तनितरूपो निर्घोषः कशाप्रहृतक्रियमाणशब्दः यस्य स तथा ॥ ११ ॥

नीलमेघाश्रिता विद्युत् स्फुरन्ती प्रतिभाति [1]मा ।
स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी ॥ १२ ॥
†इमास्ताः मन्मथवतां हिताः प्रति हता दिशः ।
अनुलिप्ता इव घनैः नष्टग्रहनिशाकराः ॥ १३ ॥

इमा इत्यादि । घनैः अनुलिप्ताः—संप्राप्ताः, अत एव नष्टाः – अदृष्टाः ग्रहादयः यासु ताः तथा । ताः इमाः दिशः मन्मथवतां—सस्त्रीकाणामेव हिताः, अन्यान् प्रति हता एव—कष्टा एव ॥ १३ ॥

क्वचित् बाष्पाभि[2]संरुद्धान् वर्षागमसमुत्सुकान् ।
कुटजान् पश्य, सौमित्रे ! पुष्पितान् गिरिसानुषु ॥
मम शोकाभिभूतस्य कामसंदीपनान् स्थितान् ॥ १४ ॥

बाष्पाभिसंरुद्धान् —– नवजलसेकजभौमबाष्पसंबन्धरूपपुष्पोदयनिमित्तवतः इत्यर्थः । तत एव पुष्पितान् सानुषु स्थितान् इत्यन्वयः ॥

---

* ताडितमिवेत्यन्वयः । † घनैरनुलिप्ता इवास्थिताः, नष्टग्रहनिशाकराः, अत एव प्रतिहताः—प्रतिहतिं प्राप्ताः—अपरिज्ञातप्राच्योदीच्यादिविभागाः इत्यर्थः । ता इमा दिशः मन्मथवतां—मन्मथोत्सववतां, सस्त्रीकाणामिति यावत्, हिताः—सुखकराः; विरहिणां तु दुःखकरा इति भावः–ती. मन्मथवतां––सस्त्रीकाणां, यद्वा आभिसारिकजनानाम्–गो. मन्मथोत्सवसाधनप्रियासहितानाम्–ति.

[1] मे–ङ. [2] सम्बद्धान्–ङ.

रजः प्रशान्तं सहिमोऽद्य वायुः
निदाघदोषप्रसराः प्रशान्ताः ।
स्थिता हि यात्रा वसुधाधिपानां
प्रवासिनो यान्ति नराः स्वदेशान् ॥ १५ ॥

सहिमः—सशैत्य इत्यर्थः । निदाघस्य ग्रीष्मस्य दोषप्रसराः—तापादयः । स्थिताः—स्तब्धाः । प्रवासिनः—विरहिणः ॥ १५ ॥

* संप्रस्थिता मानसवासलुब्धाः
प्रियान्विताः संप्रति चक्रवाकाः ।
अभीक्ष्णवर्षोदकविक्षतेषु
यानानि मार्गेषु न संपतन्ति ॥ १६ ॥

मानसवासः—मानससरोवासः । वर्षोदकविक्षतेषु—क्लिष्टगमनेष्वित्यर्थः । यानानि—रथशकटादीनि न सम्पतन्ति—न गच्छन्ति ॥ १६ ॥

क्वचित्प्रकाशं क्वचिदप्रकाशं
नभः प्रकीर्णाम्बुधरं विभाति ।
क्वचित् क्वचित् † पर्वतसंनिरुद्धं
रूपं यथा शान्तमहार्णवस्य ॥ १७ ॥

शान्तमहार्णवस्य—शान्तकालवर्तिमहासमुद्रस्य । निस्तरङ्गप्रलयकालसमुद्रस्येत्यर्थः ॥ १७ ॥

व्यामिश्रितं सर्जकदम्बपुष्पैः
नवं जलं पर्वतधातुताम्रम् ।

---

* मानसवासलुब्धाः—हंसाः संप्रस्थिताः । चक्रवाकाः कामोद्रेकेण प्रियान्विता भवन्ति—गो. † पर्वतसन्निरुद्धंशान्तमहार्णवस्य रूपं - स्वरूपं—ति.

मयूरकेकाभि[1]रनुप्रयातं
शैलापगाः शीघ्रतरं वहन्ति ॥ १८ ॥

सज्जानि—संनद्धानि कदम्बपुष्पाणि तथा। तैः व्यामिश्रितं नवं जलं पर्वतधातुताम्रमिव भातीति शेषः। मयूरकेकाभिरिति। केका-शब्दोपेतमयूरैरित्यर्थः। अनुप्रयातं—अनुसृतम्। जलमिति शेषः। १८॥

रसाकुलं षट्पदसंनिकर्षं
प्रभुज्यते जम्बुफलं [2]प्रकामम्।
अनेकवर्णं पवनावधूतं
भूमौ पतत्याम्रफलं विपक्वम् ॥ १९ ॥

रसाकुलं—रसनिबिडम्। षट्पदानां संनिकर्षः—प्रत्यासत्तिः यस्मिन् तत्। संभुज्यते, जनैरिति शेषः। विपक्वं श्रावणमासत्वात् अतिशयेन पक्वं आम्रफलम्। अत एव भूमौ स्वयमेव पतति ॥ १९ ॥

विद्युत्पताकाः सबलाकमालाः
शैलेन्द्रकूटाकृतिसंनिकाशाः।
गर्जन्ति मेघाः समुदीर्णनादाः
मत्ता गजेन्द्रा इव संयुगस्थाः ॥ २० ॥

गजमेघसमाधिः—विद्युत्पताका इत्यादि। बलाकमालया—पंक्त्या सहिताः सबलाकमालाः। कूटः—शिखरम् ॥ २० ॥

वर्षोदकाप्यायितशाद्वलानि
प्रवृत्तनृत्तोत्सवबर्हिणानि।
वनानि निर्वृष्टबलाहकानि
पश्यापराह्णेष्वधिकं विभान्ति ॥ २१ ॥

निर्वृष्टाः—नितरां वृष्टाः बलाहकाः येषु तानि तथा ॥ २१ ॥

---

[1] रुतानुयातं—ङ. [2] विपक्वम्—ङ.

समुद्वहन्तः सलिलातिभारं
*बलाकिनो वारिधरा नदन्तः ।
महत्सु शृङ्गेषु महीधराणां
[1]विश्रम्य विश्रम्य पुनः प्रयान्ति ॥ २२ ॥

बलाकिनः इति व्रीह्यादित्वादिनिः ॥ २२ ॥

†मेघाभिकामा परिसंपतन्ती
संमोदिता भाति बलाकपङ्क्तिः ।
वातावधूता वरपौण्डरीकी
लम्बेव माला [2]रचिताम्बरस्य ॥ २३ ॥

मेघेष्वभिकामः गर्भार्थः यस्याः सा तथा । बलाकपङ्क्तिरिति । छान्दसो ह्रस्वः । बलाकापङ्क्तेरुत्प्रेक्षा--वातेत्यादि । वरा--श्रेष्ठा पौण्डरीकी--श्वेतपद्मविकारभूता अम्बरस्य रचिता लम्बा मालेव भाति ॥

बालेन्द्रगोपान्तरचित्रितेन
विभाति भूमिर्नवशाद्वलेन ।
[3]गात्रानुषक्तेन ‡शुकप्रभेण
नारीव लाक्षोक्षितकम्बलेन ॥ २४ ॥

बालेन्द्रगोपैः अन्तरे--मध्येमध्ये चित्रितं तथा । गात्रानुषक्तेन-गात्रसंबन्धेन शुकप्रभेण । कम्बलस्य स्वतः शुकप्रभत्वम् । लाक्षया शोभार्थं मध्ये मध्ये उक्षितः तथा ॥ २४ ॥

---

* बलाकिनः—बकपंक्तियुक्ताः–रा. † मेघाभिकामा–गर्भधारणार्थं मेघमभिकामयन्त इति तथा–ती., गो., रा. ‡ शुकप्रभेण–हरितवर्णेन–रा.

[1] विमृश्य–ङ. [2] रुचिरा–ज. [3] गात्रानुषक्तेन–ङ., गात्रानुरक्तेन–ज.

*निद्रा शनैः केशवमभ्युपैति
द्रुतं नदी सागरमभ्युपैति ।
हृष्टा बलाका घनमभ्युपैति
कान्ता सकामा प्रियमभ्युपैति ॥ २५ ॥

केशवं निद्रा अभ्युपैतीति । प्रथमैकादश्यां निद्रोपक्रमः, उत्थानद्वादश्यां उत्थानं विष्णोः ॥ २५ ॥

जाता वनान्ताः †शिखिसंप्रनृत्ताः
जाताः कदम्बाः सकदम्बशाखाः ।
जाता वृषा गोषु समानकामाः
जाता मही [1]सस्यवनाभिरामा ॥ २६ ॥

शिखिसंप्रनृत्ता इति मत्वर्थीयाजन्तः । सकदम्बाः—कदम्बपुष्पसहिताः शाखाः येषां ते तथा । सस्यैः वनैश्चाभिरामा तथा ॥ २६ ॥

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः[2] प्लवङ्गाः ‡ ॥ २७ ॥

वहन्तीत्यादीनां नद्यादिभिः क्रमात् संबन्धः ॥ २७ ॥

---

* आषाढे स्वापारंभः, श्रावणे निद्राऽऽसक्तिरुच्यते—गो. † शिखिनां सुष्ठु प्रनृत्तं येषु ते—गो. ‡ प्लवङ्गाः समाश्वसन्ति—सुग्रीवराज्यलाभात्—ति. एकत्रैव बहुभक्ष्यलाभेन अचलचित्ता भवन्ति—गो.

[1] सस्यवरा—ङ. [2] प्लवङ्गमाः—ज.

प्रहर्षिताः केतकपुष्पगन्धं
आघ्राय [1]हृष्टा वननिर्झरेषु ।
प्रपातशब्दाकुलिता गजेन्द्राः
सार्धं मयूरैः समदा नदन्ति ॥ २८ ॥

प्रहर्षिताः—संजातप्रहर्षाः । वननिर्झरेषु हृष्टा इति । क्रीडयेति शेषः । प्रपातशब्देति । प्रपातनिर्झरशब्देति यावत् ॥ २८ ॥

धारानिपातैरभिहन्यमानाः
कदम्बशाखासु [2]विलम्बमानाः ।
क्षणार्जितं पुष्परसावगाढं
शनैर्मदं षट्चरणास्त्यजन्ति ॥ २९ ॥

पुष्परसः—पुष्परसास्वादैः अवगाढं—प्रवृद्धम् ॥ २९ ॥

अङ्गारचूर्णोत्करसन्निकाशैः
फलैः सुपर्याप्तरसैः समृद्धैः ।
जम्बूद्रुमाणां प्रविभान्ति शाखाः
[3]निलीयमाना इव षट्पदौघैः ॥ ३० ।

अङ्गारः—शान्ताग्निः इङ्गालः— कती ॥ ३० ॥

तडित्पताकाभिरलङ्कृतानां
उदीर्णगम्भीरमहारवाणाम् ।
विभान्ति रूपाणि बलाहकानां
[4]रणोद्यतानामिव [5]वानराणाम्* ॥३१॥

---

*'विद्युत्पताकाः' इति (२०) श्लोकोक्तमेवार्थं आदरातिशयेन भङ्ग्यन्तरेणोक्तवान्—गो. वस्तुतस्तु—तत्र 'संयुगरथाः' इति, अत्र 'रणोत्सुकानां' (रणोद्यतानां—पा.) इति च पदयोः दर्शनेन 'वारणानां' इति पाठः समञ्जसतरो वा ॥

[1] मत्ताः—ज. [2] विलीयमानाः—ङ. [3] निपीयमानाः—च., ज.
[4] रणोत्सुकाना—ज. [5] बारणानाम्—ङ.

*मार्गानुगः शैलवनानुसारी
संप्रस्थितो मेघरवं निशम्य ।
[1]युद्धाभिकामः [2]प्रतिनागशङ्की
मत्तो गजेन्द्रः प्रतिसंनिवृत्तः ॥ ३२ ॥

निशम्य—अवलोक्य ॥ ३२ ॥

[3]क्वचित् प्रगीता इव षट्पदौघैः
क्वचित् प्रनृत्ता इव नीलकण्ठैः ।
क्वचित् प्रमत्ता इव वारणेन्द्रैः
विभान्त्यनेकाश्रयिणो वनान्ताः ॥ ३३ ॥

अनेकाश्रयिणः इति । अनेकभावाश्रयिण इत्यर्थः ॥ ३३ ॥

कदम्बसर्जार्जुनकन्दलाढ्या
वनान्तभूमि[4]र्नववारिपूर्णा ।
मयूरमत्ताभिरुतप्रनृत्तैः
आपानभूमिप्रतिमा विभाति ॥ ३४ ॥

कन्दलं—स्थलोत्पलम्—கொடலப்பூ । आपानभूमिः—मद्यपानभूमिः ॥ ३४ ॥

---

* स्वनिवासभूमिशैलवनानुसारी (तदनुगुण) मार्गानुगमने संप्रस्थितः पृष्ठतो मेघरवं निशम्य प्रतिनिवृत्तः—ती. स्वमार्गे गच्छन् गजः मेघरवं निशम्य पार्श्वे यत्र कुत्रचित् गजान्तरमस्तीति मन्वानः स्वमार्गं संत्यज्य मार्गान्तरमाश्रित इति यावत् ॥

[1] युद्धाभिरामः—ङ. [2] प्रतिनादशङ्की—ज. [3] क्वचिच्च मत्ताः—ङ.
[4] र्मेघुवारि—ज.

[1] मुक्तासकाशं सलिलं पतद्वै
सुनिर्मलं पत्रपुटेषु लग्नम् ।
दृष्ट्वा विवर्णच्छदना विहङ्गाः *
सुरेन्द्रदत्तं तृषिताः पिबन्ति ॥ ३५ ॥

विवर्णच्छदनाः—जलसेकतो विवर्णपक्षाः ॥ ३५ ॥

षट्पादतन्त्री[2]मधुराभिधानं
प्लवङ्गमोदीरितकण्ठतालम् ।
आविष्कृतं मेघमृदङ्गनादैः
वनेषु सङ्गीतमिव प्रवृत्तम् ॥ ३६ ॥

षट्पादः—भ्रमरः, तद्ध्वनिरूपः तंत्रीणां मधुराभिधानं गीतं—गाथा यस्मिन् तत् तथा। † प्लवङ्गमाः—भेकाः, तदुदीरितरूपः कण्ठतालः यस्मिन् तत् तथा ॥ ३६ ॥

क्वचित्[3]प्रवृत्तैः [4] क्वचिदुन्नदद्भिः
क्वचिच्च वृक्षाग्रनिषण्णकायैः ।
[5] व्यालम्बबर्हाभरणैर्मयूरैः
वनेषु सङ्गीतमिव प्रवृत्तम् ॥ ३७ ॥

प्रवृत्तैः—प्रवृत्तपक्षप्रचारैः। सङ्गीतमित्यनेन तदुपलक्षितनृत्ताभिनयः ॥ ३७ ॥

---

* विवर्णच्छदनाः—विविधवर्णपक्षाः—गो., ती. विहङ्गाः—चातकाः—गो., रा. सुरेन्द्रदत्तमिति—भूमावपतितं जलमुच्यते ॥ † उत्प्लुत्य गच्छन्तीति—प्लवङ्गमाः—भेकाः ॥

[1] मुक्तासमाभं—ञ. [2] मधुराभिनादं—ङ. [3] प्रनृत्तैः—ङ., ञ.
[4] क्वचिदुन्नमद्भिः—ञ. [5] व्यालम्बि—ञ.

स्वनैर्घनानां *[1] प्लवगाः प्रबुद्धाः
विहाय निद्रां चिरसंनिरुद्धाम् ।
अनेकरूपाकृतिवर्णनादाः
नवाम्बुधाराभिहता नदन्ति ॥ ३८ ॥

चिरसंनिरुद्धां--चिरसम्पादिताम् । शुष्कमृत्तिकास्विति शेषः । अनेकरूपा आकृतिः--संस्थानं, वर्णः--शुक्लनीलादिवर्णाश्च येषां ते तथा ॥ ३८ ॥

नद्यः [2] समुद्वाहितचक्रवाकाः
तटानि [3] शीर्णान्यपवाहयित्वा ।
दृप्ता [4] नवप्रावृतपूर्णभोगा-
द्रुताः स्वभर्तारमुपोपयान्ति ॥ ३९ ॥

स्वभर्तृगामिस्त्रीसमाधिः नदीनाम्—नद्य इत्यादि । सम्यगुद्वाहिताः--धृताः स्तनस्थानीयाः चक्रवाकाः याभिः ताः तथा । शीर्णानि तटानि निरोधकजरतीस्थानीयानि, अपवाहयित्वा--निरस्येति यावत् । नवप्रावृतपूर्वं-नूतनपुष्पफलाद्युपहारपूर्वं पूर्णभोगायाद्दृतः स्वीकृतः याभिस्तथा । उपोपयान्ति । 'प्रसमुपोदः पादपूरणे' इति द्वित्वम् ॥ ३९ ॥

[5] नीलेषु नीलाः प्रविभान्ति [6] सक्ताः
मेघेषु मेघा नववारिपूर्णाः ।
दवाग्निदग्धेषु दवाग्निदग्धाः
शैलेषु शैला इव बद्धमूलाः ॥ ४० ॥

---

* प्लवगाः—मण्डूकाः-गो., रा., ति.

[1] विहगाः-ङ. [2] समुत्थापित-ङ. [3] शीर्णान्यवहापयित्वा-ङ [4] नवप्राभृत-ङ.
[5] नीलेषु नीला नववारिपूर्णा मेघेषु मेघाः प्रतिभान्ति सक्ताः-ङ. [6] शक्ताः-ज.

नीलेत्यादि। नीलेषु मेघेषु सक्ताः नववारिपूर्णाः नीलाः प्रविभान्ति। कथम्? दवाग्निदग्धेषु शैलेषु दवाग्निदग्धाः बद्धमूलाः—संसक्तमूलाः शैलाः इव। अभूतोपमेयम् ॥ ४० ॥

[1]प्रहृष्टसन्नादितबर्हिणानि
सशक्रगोपाकुलशाद्वलानि।
चरन्ति नीपार्जुनवासितानि
गजाः सुरम्याणि वनान्तराणि ॥ ४१ ॥

नवाम्बुधाराहतकेसराणि
[2]द्रुतं परित्यज्य सरोरुहाणि।
कदम्बपुष्पाणि सकेसराणि
*[3]नवानि हृष्टा भ्रमराः [4]पतन्ति ॥ ४२ ॥

मत्ता गजेन्द्रा मुदिता [5]गवेन्द्राः
वनेषु [6]विश्रान्ततरा मृगेन्द्राः।
रम्या नगेन्द्रा निभृता नरेन्द्राः
†प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥ ४३ ॥

गवेन्द्राः—वृषभाः। निभृताः—निरुद्धोद्योगाः। सुरेन्द्रः—देवेन्द्रः ॥

मेघाः [7]समुद्भूतसमुद्रनादाः
महाजलौघैर्गगनावलम्बाः।
नदीस्तटाकानि सरांसि वापीः
महीं च कृत्स्नाम्[8]अपवाहयन्ति ॥ ४४ ॥

---

* कदम्बकेसराणामहृतत्वे हेतुः—नवानीति—गो.　† प्रक्रीडित इति कर्तरि निष्ठा—ती., गो.

[1] प्रमत्त—ञ.　[2] ध्रुवं—ञ.　[3] वनानि—ङ.　[4] पिबन्ति—ञ.　[5] वृषेन्द्राः—ङ.　[6] विक्रान्ततराः—ञ.　[7] समुद्भूत—ङ.　[8] मभिपूरयन्ति—ङ., मभितर्पयन्ति—ङ., झ.

समुद्धूतः--निरुद्धः समुद्रनादः यैः ते तथा। अपवाहयन्ति--संपरिवाहान् कुर्वन्तीत्यर्थः ॥४४॥

[1] वर्षप्रवेगा विपुलाः पतन्ति
प्रवान्ति वाताः समुदीर्ण[2]घोषाः।
प्रणष्टकूलाः प्रवहन्ति शीघ्रं
नद्यो [3]जलैर्विप्रतिपन्नमार्गाः ॥ ४५ ॥

विप्रतिपन्नः--खिलीकृतः गन्तॄणां मार्गः याभिः ताः तथा ॥४५॥

नरैर्नरेन्द्रा इव पर्वतेन्द्राः
सुरेन्द्र[4]दत्तैः पवनोपनीतैः।
घनाम्बुकुम्भैरभिषिच्यमानाः
*रूपं श्रियं स्वामिव दर्शयन्ति ॥ ४६ ॥

घनोपगूढं गगनं सतारं
न भास्करो दर्शनमभ्युपैति।
नवैर्जलौघैर्धरणी [6]वितृप्ता
तमोविलिप्ता न दिशः प्रकाशाः ॥ ४७ ॥

वितृप्ता--जामितां प्राप्ता ॥ ४७ ॥

महान्ति कूटानि महीधराणां
धाराभिधौतान्यधिकं विभान्ति।
महाप्रमाणैर्विपुलैः प्रपातैः
मुक्ताकलापैरिव लम्बमानैः ॥ ४८ ॥

महाप्रमाणैः--दीर्घाकारैरित्यर्थः। प्रपतन्तीति प्रपाताः--निर्झराः॥

---

* नरेन्द्राः स्वां श्रियमिव, पर्वताः स्वरूपं दर्शयन्ति--ती., गो.

[1] वर्षप्रयागाः--ङ. [2] वेगाः--ञ. [3] जलं विप्रति. [4] नीतैः--ञ. [5] न ताराः--ञ.

[6] विसृप्ता--ङ.

शैलोपलप्रस्खलमानवेगाः
शैलोत्तमानां विपुलाः प्रपाताः ।
गुहासु संनादितबर्हिणासु
हारा [1] विकीर्यन्त इवाभिभान्ति ॥ ४९ ॥

समीपवर्तिगुहाः पतितबिन्दुकाः इति शेषः ॥ ४९ ॥

शीघ्रप्रवेगा विपुलाः प्रपाताः
निर्धौतशृङ्गोपतला गिरीणाम् ।
मुक्ताकलापप्रतिमाः पतन्तः
महागुहोत्सङ्ग[2]तलैर्ध्रियन्ते ॥ ५० ॥

निर्धौतं—क्षालितं शृङ्गाणां उपतलं यैः ते तथा ॥ ५० ॥

सुरतामर्दविच्छिन्नाः स्वर्गस्त्रीहारमौक्तिकाः ।
[3] पतन्तीवाकुला दिक्षु तोयधाराः समन्ततः ॥ ५१ ॥

निलीयमानैर्विहगैः निमीलद्भिश्च पङ्कजैः ।
विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः ॥ ५२ ॥

विहगादिभिः अस्तं गतः रविः ज्ञायते—अनुमीयते । न तु कदाऽपि प्रत्यक्षतः इत्यर्थः ॥ ५२ ॥

* वृत्ता यात्रा नरेन्द्राणां सेना [4] पथ्येव वर्तते ।
वैराणि चैव मार्गाश्च सलिलेन समीकृताः ॥ ५३ ॥

---

* वृत्ता—निवृत्ता-ती., गो., ति., रा.

[1] विशीर्यन्ते–ङ. [2] वने–ङ. [3] पतन्ति चातका–ज. [4] प्रतिनिवर्तते–ङ.

वृत्ता--प्रसक्तयात्रा निर्वृत्तेत्यर्थः। प्रस्थिताऽपि सेना पथ्येव वर्तते ॥ ५३ ॥

*मासि [1]प्रोष्ठपदे ब्रह्म ब्राह्मणानामधीयताम् ।
अयमध्यायसमयः सामगानामुपस्थितः ॥ ५४ ॥

ब्रह्म अधीयतां--वेदाध्ययनं कुर्वतां सामगानां अयं अध्याय-समयः—उपाकरणकालः उपस्थितः ॥ ५४ ॥

निवृत्तकर्मायतनः नूनं संचितसंचयः ।
आषाढीमभ्युपगतः भरतः कोसलाधिपः ॥ ५५ ॥

निवृत्तकर्म--वर्षवशात् निरुद्धप्रवृत्तिनिवृत्तिकं आयतनं--राजधानी यस्य स तथा। संचिताः—चातुर्मास्ये गजतुरगादिरक्षणा-पेक्षिताः संचयाः--जीवनसाधनानि येन स तथा ॥ ५५ ॥

नूनमापूर्यमाणायाः सरय्वा वर्धते रयः ।
†मां समीक्ष्य समायान्तं अयोध्याया इव स्वनः ॥ ५६ ॥

मां समीक्ष्य समायान्तमिति। अयोध्यायां पूर्वस्थितिकाले इति शेषः ॥ ५६ ॥

इमाः स्फीतगुणा वर्षाः सुग्रीवः सुखमश्नुते ।
विजितारिः सदारश्च राज्ये महति च स्थितः ॥ ५७ ॥

वर्षा इति। प्राप्येति शेषः ॥ ५७ ॥

---

* अनेन भाद्रपदो मासः संप्रवृत्त इति सूचयति—गो. † प्रजानां स्वस्मिन्ननुरागस्य, तासु स्वानुरागमूलकत्वात्, स्वस्य प्रजानां च परस्परानुरागकथनमिदम्। लोकेऽपि हि 'मयि तस्य प्राणाः' इत्युक्तिः बहुलं दृश्यते ॥

[1] भाद्रपदे—ङ.

अहं तु हृतदारश्च राज्याच्च महतश्च्युतः ।
* नदीकूलमिव क्लिन्नं अवसीदामि, लक्ष्मण ! ॥ ५८ ॥

नदीकूलमिति कर्तृ ॥ ५८ ॥

शोकश्च मम विस्तीर्णः [1] वर्षाश्च भृशदुर्गमाः ।
रावणश्च महान् शत्रुः [2] अपारः प्रतिभाति मे ॥ ५९ ॥

वर्षाश्चेति । विस्तीर्णा इत्यनुकर्षः । अपारः--दुष्प्रापवैरनिर्यातनपार इत्यर्थः ॥ ५९ ॥

अयात्रां चैव दृष्ट्वेमां मार्गांश्च भृशदुर्गमान् ।
प्रणते चैव सुग्रीवे न मया किंचिदीरितम् ॥ ६० ॥

अयात्रां--यात्रानर्हां इमां वर्षां इत्यर्थः । सुग्रीवे च कार्योन्मुखे प्रणतेऽपि मया किञ्चिदपि सीतान्वेषणादिकमुद्दिश्य नेरितम् ॥ ६० ॥

अपि चातिपरिक्लिष्टं चिराद्दारैः समागतम् ।
† आत्मकार्यगरीयस्त्वात् वक्तुं नेच्छामि वानरम् ॥ ६१ ॥

अपि च तदानीं अयं गरीयसे आत्मकार्याय वक्तुमनुचितश्चेत्याह--अपि चेत्यादि । नेच्छामि--नैच्छम् ॥ ६१ ॥

[3] स्वयमेव हि विश्रम्य ज्ञात्वा कालमुपागतम् ।
उपकारं च सुग्रीवः वेत्स्यते नात्र संशयः ॥ ६२ ॥

---

* क्लिन्नं नदीकूलं क्रमशः यथा अपच्चिनोति तथेति भावः । † आत्मकार्यगरीयस्त्वप्रतीतिभियेति वा । सर्वोऽपि स्वार्थं बहुमन्यते, न तथा मया मन्तुं शक्यमिति भावः ॥

[1] मार्गांश्च--ङ. [2] अपारं--ङ. [3] अयमेव हि--ङ.

तस्मात् कालप्रतीक्षोऽहं स्थितोऽस्मि, शुभलक्षण !
सुग्रीवस्य नदीनां च प्रसाद[1]मनुपालयन् ॥ ६३ ॥

*उपकारेण [2]वीरो हि [3]प्रतिकारेण युज्यते ।
अकृतज्ञोऽप्रतिकृतः हन्ति सत्त्ववतां मनः ॥ ६४ ॥

उपकारेणेति । अस्मत्कृतेन युक्त इति शेषः । अकृतज्ञो हि सत्त्ववतां मनः हन्ति, नायं तथेति शेषः ॥ ६४ ॥

तमेवमुक्तः प्रणिधाय लक्ष्मणः
कृताञ्जलिस्तत्प्रतिपूज्य भाषितम् ।
उवाच रामं स्वभिरामदर्शनं
प्रदर्शयन् दर्शनमात्मनः शुभम् ॥ ६५ ॥

आत्मनः शुभं दर्शनं प्रदर्शयन् उवाच ॥ ६५ ॥

यथोक्तमेतत् तव सर्वमीप्सितं
नरेन्द्र ! कर्ता नचिराद्धरीश्वरः ।
शरत्प्रतीक्षः क्षमतामिमं भवान्
जलप्रपातं रिपुनिग्रहे धृतः ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे अष्टाविंशः सर्गः

अतोष (६६ १/२) मानः सर्गः ॥ ६६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे अष्टाविंशः सर्गः

---

* एतच्छ्लोकत्रयं गतसर्गान्तेऽपि समानम् ॥

[1] मभिकाङ्क्षयन्–ज. [2] युक्तो हि–ङ. [3] प्रतीकारेण–ज.

एकोनत्रिंशः सर्गः

[सुग्रीवप्रतिबोधनम्]

समीक्ष्य विमलं व्योम गतविद्युद्बलाहकम् ।
[1]सारसारवसंघुष्टं रम्यज्योत्स्नानुलेपनम् ॥ १ ॥

अथ हनुमद्वचनात् सुग्रीवेण सर्वतः स्वसेनाऽऽनयनाय दूतप्रेषणम्। समीक्ष्येत्यादि। विमलं व्योम समीक्ष्य, 'हरीश्वरमुपागम्य हनूमान् वाक्यमब्रवीत्' इत्यग्रेण सम्बन्धः। शरच्च वीक्ष्य, सुग्रीवं च कामवृत्तमवस्थितं वीक्ष्येत्यन्वयः ॥ १ ॥

समृद्धार्थं च सुग्रीवं *मन्दधर्मार्थसंग्रहम् ।
†[2]अत्यर्थमसतां मार्गं एकान्तगतमानसम् ॥ २ ॥

मन्दः धर्मार्थयोः संग्रहः यस्य स तथा। असतां मार्गे—कामप्रवृत्तिलक्षणं, एकान्तं नित्यमेव, गतं—प्राप्तं, मानसं यस्य स तथा ॥

[3]निर्वृत्तकार्यं सिद्धार्थं प्रमदाभिरतं सदा ।
प्राप्तवन्तमभिप्रेतान् सर्वानेव मनोरथान् ॥ ३ ॥

निर्वृत्तकार्यं—समाप्तस्वकार्यं, अत एव सिद्धार्थं अभीप्सितार्थं, प्राप्तवन्तमित्यनुकर्षः ॥ ३ ॥

‡स्वां च पत्नीमभिप्रेतां तारां चापि समीप्सिताम् ।
विहरन्तमहोरात्रं कृतार्थं विगतज्वरम् ॥ ४ ॥

---

*मोक्षप्रसक्तेरभावात्, त्रैवर्गिके द्वयोर्मन्दत्वे 'कामवृत्तं' इत्युक्तार्थसिद्धिः ॥ † असतां मार्गं अत्यर्थं आश्रयन्तमिति शेषः—ति. 'एकान्तगतमानसं' इत्यनेन 'कामोपभोगपरमाः एतावदिति निश्चिताः' इत्युक्तासुरी संपत् सूच्यते ॥ ‡ स्वां पत्नीं—रुमां—ति.

[1] सारसाकुल—ज. [2] अत्यर्थं चासतां—ज. [3] निवृत्त—ज.

क्रीडन्तमिव देवेशं [1] नन्दनेऽप्सरसां गणैः ।
मन्त्रिषु न्यस्तकार्यं च [2] मन्त्रिणामनवेक्षकम् ॥ ५ ॥
[3] उत्सन्नराज्य[4] सन्देशं कामवृत्त[5] मवस्थितम् ।
निश्चितार्थोऽर्थतत्त्वज्ञः कालधर्मविशेषवित् ॥ ६ ॥

निश्चितार्थः—निश्चितसर्वशास्त्रार्थः । अत एव कृत्याकृत्य-सकलार्थतत्त्वज्ञः । कालोचितं धर्मविशेषं अनुष्ठेयकृत्यं वेत्तीति स तथा ॥

[6] प्रसादवाक्यै[7] र्मधुरैः हेतुमद्भि[8] र्मनोरमैः ।
वाक्यवित् वाक्य[9] तत्त्वज्ञं हरीशं मारुतात्मजः ॥ ७ ॥

प्रसादप्रयोजनानि वाक्यानि तथा ॥ ७ ॥

हितं [10] तत्त्वं च *पथ्यं च सामधर्मार्थनीतिमत् ।
† प्रणयप्रीतिसंयुक्तं ‡ विश्वासकृतनिश्चयम् ॥
हरीश्वरमुपागम्य हनुमान् वाक्यमब्रवीत् ॥ ८ ॥

हितं—तत्कालहितम् । पथ्यं—कालान्तरहितं च । सामादि-चतुष्कं अस्मिन् अस्तीति तथा । विश्वास—स्ववचनप्रामाण्ये कृत-निश्चयम् ॥ ८ ॥

राज्यं प्राप्तं यशश्चैव कौली श्रीरभिवर्धिता ।
मित्राणां संग्रहश्शेषः तं भवान् कर्तुमर्हति ॥ ९ ॥

कौली—कुलक्रमागता । शेषः—अवशिष्टकर्तव्यः ॥ ९ ॥

---

* पथ्यं—नीतिमार्गादनपेतम्—ती., गो. † प्रणयः—प्रार्थना, प्रीतिः—स्नेह-विशेषः—ती. प्रणयः—समानविषयः स्नेहः, प्रीतिः—न्यूनविषयः—गो. प्रणयः—नम्रता—रा. ‡ विश्वासकृतानां शास्त्रोक्तौ विश्वासयुक्तानां निश्चयः, यस्मिन् तत्—रा. आप्तवाक्यत्व-विश्वासे—विषये—कृतनिश्चयं—गो. आप्तवाक्यत्वविश्वासेन कृतनिश्चयम्—ती.

[1] गन्धर्वा—ङ. [2] मन्त्राणा—ञ. [3] उच्छिन्न—ङ. [4] सन्देहं—ञ. [5] मिव—झ. [6] प्रसाद—ङ., ञ. [7] विविधैः. [8] र्मनोऽनुगैः—ङ. [9] तत्त्वज्ञः—ङ. [10] तथ्यं—ञ.

यो हि मित्रेषु कालज्ञः सततं साधु वर्तते ।
तस्य राज्यं च कीर्तिश्च प्रतापश्चाभिवर्धते ॥ १० ॥

साधु वर्तते—साध्वनुष्ठानवान् वर्तते ॥ १० ॥

यस्य कोशश्च दण्डश्च मित्राण्यात्मा च, भूमिप !
*[1]समवेतानि सर्वाणि स राज्यं महदश्नुते ॥ ११ ॥

आत्मा—सकरणग्रामः । समवेतानि—स्ववंशप्राप्तानि ॥ ११ ॥

तद्भवान् वृत्तसंपन्नः स्थितः पथि निरत्यये ।
† मित्रार्थमभिनीतार्थं यथावत् कर्तुमर्हति ॥ १२ ॥

निरत्यये—निरपाये । अभिनीतार्थं—प्रतिज्ञातार्थम् ॥ १२ ॥

संत्यज्य ‡ सर्वकर्माणि मित्रार्थे [2]योऽनुवर्तते ।
[3]संभ्रमाद्धि कृतोत्साहः [4]सोऽनर्थैर्नावरुध्यते ॥ १३ ॥

संभ्रमात्—त्वरया ॥ १३ ॥

यस्तु कालव्यतीतेषु [5]मित्रकार्येषु वर्तते ।
स कृत्वा महतोऽप्यर्थान् न मित्रार्थेन युज्यते ॥ १४ ॥

उचितकालाकृतं कृतमपि अकृतप्रायमित्याह——यस्त्वित्यादि ॥

यदिदं, वीर ! कार्यं नो मित्रकार्यं, अरिन्दम !
क्रियतां राघवस्यैतत् वैदेह्याः परिमार्गणम् ॥ १५ ॥

---

*समानि(पा.)—स्वत्वशत्वेन समत्वं—ति. समवेतानि—समुदितानि—गो.
† अभिनीतार्थं-प्रापितप्रयोजनं यथा भवति, तथा—गो. ‡ सर्वकर्माणि—स्वभोगसाधनानि—गो. संभ्रमात्—आदरात्—गो.

[1] समान्येतानि—ज. [2] यो न वर्तते—ज. [3] संभ्रमाद्धिकृतो—ज. [4] सोऽयं नैवाव-ङ., सोऽनर्थंनाव—ज. [5] मित्रार्थं योऽनु.

[1] तदिदं वीर! कार्यं ते कालातीतं, अरिन्दम!

यदिदं कार्यमिति। मित्रकार्यमित्यर्थः ॥ १५ ॥

न च कालमतीतं ते निवेदयति कालवित्।
*त्वरमाणोऽपि [2] सन् प्राज्ञः तव, राजन्! वशानुगः ॥ १६ ॥

ननु कालात्ययो यदि स्यात् स्वयमेव कार्यार्थं निवेदयिष्यतीत्यत्राह—न चेत्यादि। अनिवेदने कारणमाह—प्राज्ञः तव वशानुगः इति। प्राज्ञत्वात् तव अभिप्रायमेव केवलं अनुगच्छन् तूष्णीं तिष्ठतीत्यर्थः ॥ १६ ॥

†कुलस्य [3] हेतुः स्फीतस्य [4] दीर्घबन्धुश्च राघवः।
‡अप्रमेय[5]प्रभावश्च स्वयं चाप्रतिमो गुणैः ॥ १७ ॥

स्फीतस्य कुलस्य त्वदीयस्य हेतुः वृद्धिहेतुः। इदानीं कालान्तरेऽपि दीर्घबन्धुः—यावज्जीवसुहृत्। स्वयं चेति। चकारात् लक्ष्मणश्चेत्यर्थः ॥ १७ ॥

तस्य त्वं कुरु वै कार्यं पूर्वं तेन कृतं तव।
हरीश्वर! हरिश्रेष्ठान् आज्ञापयितुमर्हसि ॥ १८ ॥

कृतं तवेति। कार्यमिति शेषः। आज्ञापयितुमर्हसीति। पुरा रामनियोगादिति शेषः ॥ १८ ॥

---

*रामः कालविदपि, त्वरमाणोऽपि तव वशानुगः—त्वदभिप्रायं प्रतीक्षन्, वशी वा, गांभीर्यात् स्वयमागत्य न ज्ञापयेदिति भावः ॥ †स्फीतस्य कुलस्य हेतुः—महतो राजवंशस्याङ्कुररूपः इति वा ॥ ‡अप्रमेयस्वभावः कुलस्य बन्धुः, स्वयं गुणैरप्रतिमश्च—ती. स्वयं चेति—स्वमप्यप्रतिमो गुणैरित्यर्थः-गो. अप्रमेयस्वभावः (पा.) इति स्वरूपतः महत्त्वं, गुणैरप्रतिम इति गुणतो महत्त्वं चोच्यते—इति वा॥

[1] यदिदं मित्रकार्यं ते वीरकार्यं—ङ. [2] स प्राज्ञः-ङ., ञ. [3] हेतुभूतः सन्, केतुभूतस्सन्, केतुः स्फीतस्य—ङ. [4] दीर्घबाहुश्च—ङ. [5] स्वभावश्च—ङ.

न हि तावत् भवेत् कालः व्यतीतश्चोदनादृते ।
चोदितस्य हि कार्यस्य भवेत् कालव्यतिक्रमः ॥ १९ ॥

चोदनादृते--रामचोदनमनपेक्ष्य । त्वयैव प्रवृत्तौ तावत्कालो हि न व्यतीतो भवेत् । चोदितस्य हि कार्यस्य यदि करणं तदा कालव्यतिक्रमो भवेदेव ॥ १९ ॥

अकर्तुरपि कार्यस्य भवान् कर्ता, हरीश्वर !
किं पुनः प्रतिकर्तुस्ते *राज्येन च [1]धनेन च ॥ २० ॥

अकर्तुरपि--अनिष्पादितत्वत्कार्यस्यापि भवान् कर्ता, अर्हे कृत्यतृचश्च, कर्तुमर्हः । किं पुनः प्रतिकर्तुरिति । उपकर्तुरित्यर्थः ॥२०॥

शक्तिमानपि विक्रान्तः, वानरर्क्षगणेश्वर !
कर्तुं दाशरथेः प्रीतिं †आज्ञायां [2]किं नु सज्जसे ?॥ २१ ॥

आज्ञायां किं नु सज्जसे । रामनियोगेन कर्तुं किमर्थमिच्छसीत्यर्थः ॥

कामं खलु शरैः शक्तः सुरासुरमहोरगान् ।
वशे दाशरथिः कर्तुं त्वत्प्रातिज्ञां तु कांक्षते ॥ २२ ॥

वस्तुतस्तु रामस्य स्वार्थे त्वयि नास्त्यपेक्षेत्याह--कामं खल्वित्यादि । त्वत्प्रातिज्ञां-सपरिवारोऽहं सीतान्वेषणादौ सहकारीभविष्यामीत्येवंरूपिणीं त्वत्प्रतिज्ञामित्यर्थः ॥ २२ ॥

‡[3] प्राणत्यागाविशङ्केन कृतं तेन [4] तव प्रियम् ।
तस्य मार्गाम वैदेहीं पृथिव्यामपि चाम्बरे ॥ २३ ॥

---

* राज्येन च धनेन च प्रतिकर्तुः—इत्यन्वयः ॥ †प्रीतिं कर्तुं आज्ञायां—आज्ञापनेऽपि न सज्जसे—नोद्योगं करोषि—गो. ‡ प्राणत्यागाविशङ्केनेत्यनेन उपकारमहत्त्वं द्योतितम्—गो. 'स्वप्राणानप्यविगणय्य त्वत्प्रियं तेन साधितं किल' इति लोकवदुक्तिरित्याशय: ॥

[1] वधेन श्व—झ. [2] किं न—झ. [3] प्राणत्यागप्रसङ्गेन—झ. [4] महत्—ज.

प्राणत्यागाविशङ्केनेति। त्यजेः ण्यन्तात् घञ्, त्याजनं–त्यागः। स्वानपकारिवालिप्राणसंहारेऽपि मित्रकृत्यं स्वकृत्यं, मित्रारातिरेव मदरातिः इति बुद्ध्या निश्शङ्कसम्पादितहारः इत्यर्थः। मार्गाम इति लोट् ॥ २३ ॥

[1]न देवा न च गन्धर्वा नासुरा न मरुद्गणाः।
न च यक्षा भयं तस्य कुर्युः [2]किमुत राक्षसाः ॥ २४ ॥

भयं इति। रणे इति शेषः ॥ २४ ॥

*तदेवं शक्तियुक्तस्य पूर्वं [3]प्रियकृतस्तव।
रामस्यार्हसि, पिङ्गेश! कर्तुं सर्वात्मना प्रियम् ॥ २५ ॥

पिङ्गेशः—हरिराजः ॥ २५ ॥

†नाधस्तादवनौ नाप्सु गतिर्नोपरि चाम्बरे।
कस्यचित् [4]सज्जतेऽस्माकं, कपीश्वर! तवाज्ञया ॥ २६ ॥

इदानीं सुग्रीवस्य आज्ञावैभवं दर्शयति—नाधस्तादित्यादि। हे कपीश्वर! तव आज्ञया आकारणे सति अस्माकं हरीणां मध्ये यः कश्चिदपि सज्जते विलम्बते, तस्य कस्यचिदपि बलिनः दुर्बलस्यापि अधस्तात् पाताले गत्वापि गतिर्नास्ति—जीवनं नास्ति। तथा अवन्यादावपि ॥ २६ ॥

---

*तादृशशक्तियुक्तस्यास्माभिः किं कार्यमिति न शंकनीयम्, अस्माकमुपकृतवतः तस्य कार्यमस्माभिर्निर्वर्तनीयमिति लोकनीतिः पालनीयेत्याह—तदेवमिति।

†तवाज्ञयाऽस्मासु मध्ये कस्यचिदपि वानरादेः गतिः—गमनं अधस्तादादौ न सज्जते—न शिथिलीभवति—एतेन दुर्गमदेशे स्थापिता चेत्सीता, कथमन्वेषणीयमिति संशयो न कार्यं इति ध्वनितम्–रा. न सज्जते–न मन्दीभवति–गो.

[1] देवदानवगन्धर्वाः असुरास्समरुद्गणाः–च., ज. [2] किमिव–ज. [3] प्रतिकृत–ज.

[4] सज्जतेऽस्मासु–ङ.

*तदाज्ञापय [1]कः किं ते [2]कुतो वाऽपि व्यवस्यतु ।
हरयो ह्यप्रधृष्यास्ते सन्ति [3]कोट्यग्रतोऽनघाः ॥ २७ ॥

यदेवं अतः—'तत् आज्ञापय, कः किं ते कुतो वाऽपि व्यवस्यतु' इति पाठः । सार्वविभक्तिकः तसिल् । हरयः कुत्रापि तिष्ठन्तु, किंनामकः किं ते नियोगं व्यवस्यतु—उद्युक्तः अनुतिष्ठतु अाज्ञापय । आज्ञापनीया वा सेना कियत्यस्तीत्यत्राह—हरय इत्यादि । कोट्यग्रतः—कोट्यः न्यर्बुदस्य चाग्रतः—उपरि समुद्राख्यसख्या-संख्येयास्ते सन्ति ॥ २७ ॥

तस्य तद्वचनं श्रुत्वा काले साधु [4]निवेदितम् ।
सुग्रीवः [5]सत्त्वसम्पन्नः चकार मतिमुत्तमाम् ॥ २८ ॥

मतिं चकारेति । तदनुष्ठानविषयिणीमिति शेषः ॥ २८ ॥

[6]स संदिदेशाभिमतं नीलं नित्यकृतोद्यमम् ।
दिक्षु सर्वासु सर्वेषां सैन्यानामुपसंग्रहे ॥ २९ ॥
यथा सेना समग्रा मे यूथपालाश्च सर्वशः ।
[7]समागच्छन्त्यसङ्गेन [8]सेनाग्रेयेण तथा कुरु ॥ ३० ॥

समग्रं यथा समागच्छन्ति तथा कुरु इत्यन्वयः । असंगेन—अविलम्बेन । सेनाग्रेयेण—सेनाधिनाथेन, सहेति शेषः ॥ ३० ॥

---

* कोट्यग्र:—कोट्यधिकाः हरयस्ते सन्ति । तेषां मध्ये कः ते कुत्र—त्वदर्थं किं करोत्विति शेषः । कुत्र कार्ये व्यवस्यतु-व्यवसायं करोतु—गो. कः कुत्र किं व्यवस्यतु—इति वा ॥

[1] नः—ङ. [2] कुते कुत्र—ङ., झ. [3] कोट्यग्रशो—ङ. [4] निरूपितम्. [5] सत्त्व—ङ. [6] सन्दिदेशातिमतेमान्—ज., स संदिदेशातिबलं—झ. [7] समागच्छन्ति वेगेन—ङ. [8] सेनाग्राणि—ङ., झ.

*ये त्वन्तपालाः [1]प्लवगाः शीघ्रगा व्यवसायिनः ।
समानयन्तु ते [2]सैन्यं त्वरिताः शासनान्मम ॥ ३१ ॥
[3]स्वयं चानन्तरं सैन्यं †भवानेवानुपश्यतु ॥ ३२ ॥

ये त्वन्तपालाः—दिगन्तवर्तिसेनाधिपतयः । इह संनिहिताः इति शेषः । आनयनानन्तरं भवानेव सैन्यमनुपश्यतु—परिगणय्य अन्वीक्षताम् । चकारात् न्यूनतायां निग्रहं च कुरु इत्यर्थः ॥ ३२ ॥

त्रिपञ्चरात्रादूर्ध्वं यः [4]प्राप्नुयान्नेह वानरः ।
तस्य प्राणान्तिको दण्डः नात्र कार्या विचारणा ॥ ३३ ॥

निग्रहकालं निर्दिशति—त्रिपञ्चेत्यादि । पञ्चदशदिनादूर्ध्वम् ॥

हरींश्च ‡[5]वृद्धानुपयातु साङ्गदः
भवान् ममाज्ञामधिकृत्य [6]निश्चिताम् ।
इति व्यवस्थां हरिपुङ्गवेश्वरः
विधाय वेश्म प्रविवेश वीर्यवान् ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः

वृद्धान् हरीन् साङ्गदो भवानुपयात्विति । सम्मानार्थमिति शेषः । वर्ग(३४)मानः सर्गः ॥ ३४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः

---

* अन्तपालः—सेनापर्यन्तपालकाः—गो. † 'मन्त्रिषु न्यस्तकार्यं च मन्त्रिणमनवेक्ष्य' (श्लो. ५) इत्युक्तं स्मर्तव्यमत्र ॥ ‡ वृद्धान्—जाम्बवत्प्रमृतीन्—गो.

[1] सबका—ङ. [2] शीघ्र—ञ. [3] तेषां चानन्तरं कार्यं—ङ. [4] प्राप्नुयादिह—ञ. [5] सर्वा—ङ. [6] निश्चितम्—ञ.

त्रिंशः सर्गः

[शरद्वर्णनम्]

[1]गुहां प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः ।
[2]वर्षरात्रोषितो रामः कामशोकाभिपीडितः ॥ १ ॥

पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम् ।
शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम् ॥ २ ॥

कामवृत्तं च सुग्रीवं नष्टां च जनकात्मजाम् ।
[3]बुद्ध्वा कालमतीतं च *मुमोह परमातुरः ॥ ३ ॥

अथ शरदं दृष्ट्वा रामेण सुग्रीवप्रोत्साहनाय लक्ष्मणप्रेरणम् । गुहामित्यादि । मुमोहेति । व्याकुलचित्तो बभूवेत्यर्थः ॥ १-३ ॥

स तु संज्ञामुपागम्य मुहूर्तान्मतिमान् पुनः ।
†मनःस्थामपि वैदेहीं चिन्तयामास राघवः ॥ ४ ॥

स तु संज्ञामिति । चित्तस्वास्थ्यमित्यर्थः । मनःस्थां—मनःसंनिहिताम् । वैदेहीमपि चिन्तयामासेति । कथं वर्तते ? जीवति ? मृता वा ? कथमिमां प्रत्यानेष्यामीति चिन्तयामासेत्यर्थः ॥४॥

---

* एतावत्पर्यन्तं कस्यचिदवरोधविघ्नानत्वात् कथञ्चिद् धृतवान् । संप्रति तदभावान्मुमोहेत्यर्थः-गो. † 'मनस्स्थामपि चिन्तयामास' इति निरवधिकप्रीतिद्योतकः कविसमयः । समनन्तरश्लोक इदं स्पष्टं 'पर्वतस्याग्रे आसीनस्सन्नेव लङ्कास्थितां प्रियां मनसा जगाम' इत्यत्र ।

[1] गुहं-ङ. [2] वर्षरात्रे स्थित:-ङ. [3] दृष्ट्वा-च., ज.

[1]आसीनः पर्वतस्याग्रे हेमधातुविभूषिते ।
शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम् ॥ ५ ॥

हेमवर्णाः धातवः हेमधातवः ॥ ५ ॥

दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकम् ।
सारसारवसंघुष्टं विललापार्तया गिरा ॥ ६ ॥
[2]सारसारवसंनादैः सारसारवनादिनी ।
याऽऽश्रमे रमते बाला साऽद्य मे रमते कथम् ॥ ७ ॥

सारसानां आरवेण—अन्योन्यव्यवहारेण जातो नादः तथा । आश्रम इति पदम् ॥ ७ ॥

पुष्पितांश्चासनान् दृष्ट्वा काञ्चनानिव निर्मलान् ।
कथं सा रमते बाला *पश्यन्ती मामपश्यती ॥ ८ ॥

पुष्पितान् असनान् दृष्ट्वा काञ्चनान्—काञ्चनपुष्पानिव निर्मलान् तान् पुनः पुनः सौन्दर्यातिशयात् पश्यन्ती मामपश्यती च कथं वर्तते ॥

या पुरा कलहंसानां [3]स्वरेण कलभाषिणी ।
बुध्यते चारुसर्वाङ्गी साऽद्य मे [4]बुध्यते कथम् ॥ ९ ॥
निःस्वनं चक्रवाकानां निशम्य सहचारिणाम् ।
पुण्डरीक[5]विशालाक्षी कथमेषा भविष्यति ॥ १० ॥
सरांसि सरितो वापीः काननानि वनानि च ।
तां विना मृगशावाक्षीं [6]चरन्नाद्य सुखं लभे ॥ ११ ॥

काननवनयोः कान्तारोपवनात्मना भेदः ॥ ११ ॥

---

* पश्यन्ती—मद्दिदृक्षया इतस्ततो दृष्टिं विक्षिपन्ती—गो.

[1] अयं श्लोकः कुत्र चन्नास्ति—ङ. [2] पादादे अर्धत्रयं अधिकं क्वचित्—ङ्ग.
[3] कलेन—च., ज. [4] रमते—ङ. [5] पद्माक्षी—ङ. [6] चिरं नाथ—ङ.

अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीम् ।
[1]सुदूरं पीडयेत् कामः शरद्गुणनिरन्तरः ॥ १२ ॥

अपि तामित्यादि । शरद्गुणैः निरन्तरः—निरन्तरप्रवृत्तः कामः तामपि मद्वियोगात् सौकुमार्याच्चेति हेतुभ्यां सुदूरं—चिरं पीडयेदेव ॥

एवमादि नरश्रेष्ठः विललाप नृपात्मजः ।
विहङ्ग इव *सारङ्गः सलिलं त्रिदशेश्वरात् ॥ १३ ॥

सारङ्गरूपो विहङ्गः—चातकपक्षी तृषितः त्रिदशेश्वरात् जलमिव सीताप्राप्तिं काङ्क्षमाणः एवमादि विललाप ॥ १३ ॥

†[2]ततश्चञ्चूर्य रम्येषु फलार्थी गिरिसानुषु ।
ददर्श पर्युपावृत्तः लक्ष्मीवान् लक्ष्मणोऽग्रजम् ॥ १४ ॥

ततः तस्यामवस्थायां रम्येषु गिरिसानुषु फलार्थी चञ्चूर्य—चरित्वा, चरेर्यङ्, लुगन्तात् आर्धः अप्रमाने ल्यप् । चरफलोरित्यादिना अभ्यासधात्वकारयोः नुगुत्वे, हलि चेति दीर्घश्च, अपावृत्तः लक्ष्मणः अग्रजं रामं ददर्श ॥ १४ ॥

तं चिन्तया दुस्सहया परीतं
　विसंज्ञमेकं विजने तपस्वी ।
भ्रातुर्विषादात् [3]परितापदीनः
　समीक्ष्य सौमित्रिरुवाच [4]रामम् ॥ १५ ॥

विषादात्—विषाददर्शनात् हेतोः ॥ १५ ॥

---

*सारङ्ग—चातकः-गो. 'सारङ्गः पुंसि हरिणे चातके च मतङ्गजे' मेदिनी ॥
† चञ्चूर्य—कुटिलं चरित्वा (इतस्ततश्चरित्वा)—'नित्यं कौटिल्ये गतौ' इति यङ्-गो.
[1] न दूरं-ङ.　[2] ततस्संचार्य-ङ.　[3] स्वरितोऽतिदीनः-च., ज.
[4] दीनम्-च., ज.

किं आर्य! कामस्य वशंगतेन
*किमात्मपौरुष्यपराभवेन।
†[1] अयं ह्रिया संह्रियते समाधिः
किमत्र योगेन [2] निवर्तते न॥ १६॥

अथ लक्ष्मणः कर्मयोगज्ञानयोगावेव पौरुषवृद्धये दुःखशान्तये च आतिष्ठेत्युपदिशति—किमार्येत्यादि। कर्मयोगे तु ईश्वरानुग्रहात् पौरुषवृद्धिः, ज्ञानयोगे तत्त्वज्ञस्य निर्दुःखत्वं च सर्वाविवादसिद्धम्। अतः तदुभयानुष्ठानबोधनम्। हे आर्य, कामस्य वशं गतेन त्वया किं कर्म कृतं स्यात्? अपि चैवं कामवशतः आत्मपौरुष्यस्य, स्वार्थे ष्यञ्, सहजपौरुषस्य, पराभवेन—अभिभवेन किं प्रयोजनं साधितं स्यात्? अतः कामशोकं त्यक्त्वा कर्मयोगमातिष्ठ। यथाकालं शौचस्नानादिकर्मयोगानुष्ठानानन्तरं नित्यया ब्रह्मविद्यया यथाप्राप्तोऽयं समाधिः—ब्रह्मानुसंधानं च ह्रिया किमर्थं संह्रियते? 'अयं ह्रिया' इति पाठः। हरतीति ह्रीः, तया, सर्वनाशककामशोकेनेत्यर्थः। 'किमत्र योगेन निवर्तते न' इति पाठः। अत्र अस्मिन् योगे समाधौ सति सर्वमपि दुःखं निवर्तते न? नञ् स्वरे, निवर्तत एव किलेत्यर्थः। अत्र पाठयोजनाशक्तया पाठान्तरं प्रकल्प्य यत्किञ्चिदसंगतं ‡यद्वाभट्टो ब्रूते॥ १६॥

---

* भवत्पौरुषस्य भवतैव परिभवः क्रियत इति लोकवदुक्तिः। † आर्य, यदा—यस्मिन् काले समाधिः—चित्तसमाधानं संपादनीयम्, अत्र—अस्मिन् काले अयं किं संह्रियते?—ती. यदा—यस्मिन् काले अयं समाधिः—चित्तसमाधानं संह्रियते—संपाद्यते, अत्र—अस्मिन् काले निवर्तितेन योगेन—सन्नहनेन—उत्साहेन किम्?—गो. अयं समाधिः—त्वयि एतावता दृष्टं मनस्समाधानं, यदा संह्रियते, भवता, अत्र—एतद्विषये एतावता कालेन निवर्तितेन—परित्यक्तेन योगेन किम्? एतावता साधितं सर्वं व्यर्थमेव स्यात् खलु—इति वा. ‡ गोविन्दराजः.

[1] अयं सदा—ङ. [2] निवर्तितेन—ङ.

*क्रियाभियोगं मनसः प्रसादं
समाधियोगानुगतं च कालम् ।
सहायसामर्थ्यं, [1]अदीनसत्त्वः
स्वकर्महेतुं च कुरुष्व [2]हेतुम् ॥ १७ ॥

अथ उक्तश्लोकार्थ एव विव्रियते—क्रियाभियोगं इत्यादि। क्रियाणां—शौचस्नानादिरूपाणां क्रियाणां, अभितः—कात्स्न्र्येन, योगं—अनुष्ठानम्। तथा मनःप्रसादं च आस्थाय, कालम् अत्यन्तसंयोगे द्वितीया, सर्वमपि कालं समाधियोगानुगतमेव अकृतकब्रह्मानन्यतालक्षणस्वात्मसमाधियोगानुगुण्यमेव कुरुष्व। तथा अदीनसत्त्वः—अमीक्ष्णसत्त्वगुणः सन् स्वकर्मयोगं—नित्यम् ब्रह्मभावनादिलक्षणं हेतु—पौरुषवृद्धिसाधनं, तथा तत्साधनं मानुषसहायसामर्थ्यं तद्घटनरूपं च कुरुष्व ॥ १७ ॥

न जानकी, मानववंशनाथ!
त्वया सनाथा सुलभा परेण।
न चाग्निचूडां ज्वलितामुपेत्य
न दह्यते, वीर! वरार्ह! कश्चित् ॥ १८ ॥

हे मानववंशनाथ! त्वया सनाथा जानकी परेण न सुलभा—न सुग्रहा। कश्चिदपि ज्वलितां अग्निचूडां—अग्निशिखां उपेत्य—स्पृष्ट्वा न न दह्यते कश्चित्—दह्यत एवेत्यर्थः ॥ १८ ॥

---

*क्रियाभियोगं—कार्येयोगं, मनसः प्रसादं, समाधियोगानुगतं—धैर्योपायाभ्यामनुगतं कालं च, सुग्रीवादिसहायसामर्थ्यं, स्वकर्महेतुं च—स्वकर्म-देवतोपासनात्मकं, तं च हेतुं कुरुष्व-ती., गो.

[1] अदीनसत्त्व, अहीनसत्त्व—ङ. [2] योगम्—ङ., ज्ञात—झ.

* स लक्षणं लक्ष्मणमप्रधृष्यं
स्वभावजं वाक्यमुवाच रामः ।
हितं च पथ्यं च [1] नयप्रसक्तं
ससाम [2] धर्मार्थसमाहितं च ॥ १९ ॥
निस्संशयं कार्यमवेक्षितव्यं
क्रिया[3] विशेषो ह्यनुवर्तितव्यः ।
† [4] न तु प्रवृद्धस्य दुरासदस्य
कुमार! [5] वीर्यस्य [6] फलं च चिन्त्यम् ॥ २० ॥

स इत्यादि । सः रामः अप्रधृष्यं—न्यायोपेतत्वात् अविचाल्यस्वाभावजं तत्त्वार्थकं वाक्यं उक्तवन्तं लक्ष्मणं उवाच । किमुवाचेत्यतः—हितमित्यादि । अवेक्षितव्यं—स्वतत्त्वसमाधियोगः अनुष्ठातव्यः । क्रियाविशेषश्च अनुवर्तितव्यः—कर्मयोगोऽप्यनुष्ठेयः इति त्वदुक्तं वचनं हि—यस्मात् हितं—तत्कालसुखं, पथ्यं—कालान्तरहितं च, तथा नयप्रसक्तं—राजनीत्युक्तं, साम्ना सहितं—ससाम, धर्मार्थाभ्यां समाहितं—संगतं च, तस्मात् तत् निस्संशयं कार्यं अनुष्ठेयमेव । न तु केवलं राक्षसवत् कर्मज्ञानयोगौ हित्वा प्रवृद्धस्य—अभिवृद्धस्य अत एव दुरासदस्य वीर्यस्य फलं—विजयफलं अपेक्षणीयम् ॥ १९-२० ॥

---

* अप्रधृष्य लक्ष्मणं, स्वभावजं, हितं, पथ्यमित्यादिविशेषणविशिष्टं वाक्यमुवाच—इत्येकं वाक्यं वा ॥ † प्रवृत्तस्य दुरासदस्य कार्यस्य (पा). फलं—सीताप्राप्तिरूपं न चिन्त्य ननु—चिन्त्यमेव—गो. प्रवृत्तस्य दुरासदस्य कार्यस्य फलं—सीताप्राप्तिरूपं न चिन्त्यमिति न—ती.

[1] वचःप्रयुक्तं—ङ. [2] धर्मसमाहितार्थम्—ङ. [3] विशेषोऽप्यनु—ङ. [4] ननु प्रवृत्तस्य—ङ., झ. [5] कार्यस्य—ङ. [6] फलं न—ङ.

पद्मपत्रपलाशाक्षीं मैथिलीमनुचिन्तयन् ।
उवाच लक्ष्मणं रामः मुखेन परिशुष्यता ॥ २१ ॥

एवं लक्ष्मणवचः परिगृह्य स्थितस्य रामस्य तत्कालं सुस्थितस्य कालान्तरे पुनः विचिन्त्य विद्यमानस्य शरदनुभववर्णनम्--पद्मपत्रेत्यादि । परिशुष्यतेत्यनेन खेदः प्रदर्शितः ॥ २१ ॥

तर्पयित्वा सहस्राक्षः सलिलेन वसुन्धराम् ।
निर्वर्तयित्वा सस्यानि कृतकर्मा व्यवस्थितः * ॥ २२ ॥

निर्वर्तयित्वा—संपाद्य ॥ २२ ॥

स्निग्धगंभीरनिर्घोषाः † शैलद्रुमपुरो गमाः ।
विसृज्य सलिलं मेघाः [1] पारश्रान्ताः, नृपात्मज ! ॥ २३ ॥

शैलाश्च द्रुमाश्च पुरश्च शैलद्रुमपुरः, एकान्तः शब्दः । गच्छन्तीति गमाः, पचाद्यच्, गमाः भूत्वा सलिलं विसृज्यति योजना ॥ २३ ॥

नीलोत्पलदलश्यामाः श्यामीकृत्वा दिशो दश ।
विमदा इव मातङ्गाः शान्तवेगाः पयोधराः ॥ २४ ॥

नीलोत्पलदलश्यामाः इति पयोधरविशेषणम् ॥ २४ ॥

जलगर्भा महावेगाः कुटजार्जुनगन्धिनः ।
चरित्वा विरताः, सौम्य ! वृष्टिवाताः समुद्यताः ॥ २५ ॥

वृष्टिसहिताः वाताः—वृष्टिवाताः ॥ २५ ॥

---

* वृष्टिः उपरतेति यावत् ॥ † शैलद्रुमाणां अग्रे गच्छन्तः—गो.

[1] परिश्रान्ताः—क.

घनानां वारणानां च मयूराणां च, लक्ष्मण!
नादः प्रस्रवणानां च प्रशान्तः सहसानघ!॥ २६ ॥

अभिवृष्टा महामेघैः निर्मलाश्चित्रसानवः ।
अनुलिप्ता इवाभान्ति [1]गिरयश्चित्रदीप्तिभिः ॥ २७ ॥

[2]दर्शयन्ति शरन्नद्यः पुलिनानि शनैश्शनैः ।
नवसंगमसंव्रीडा जघनानीव योषितः ॥ २८ ॥

दर्शयन्ति शरन्नद्यः इति । शरत्कालवर्तिन्यो नद्यः तथा ॥

शाखासु सप्तच्छदपादपानां
प्रभासु तारार्कनिशाकराणाम् ।
[3]लीलासु चैवोत्तमवारणानां
श्रियं विभज्याद्य शरत् प्रवृत्ता ॥ २९ ॥

श्रियं विभज्येति । शाखाप्रभालीलास्थले त्रिधा विभक्तां कृत्वेत्यर्थः ॥ २९ ॥

संप्रत्यनेकाश्रयचित्रशोभा
लक्ष्मीः शरत्काल[4]गुणोपनीता ।
[5]सूर्याग्रहस्तप्रतिबोधितेषु
पद्माकरेष्वभ्यधिकं विभाति ॥ ३० ॥

अनेकपदार्थाश्रयाः चित्राः शोभाः यस्याः सा तथा । अग्रहस्ताः—प्रातःकालकिरणाः ॥ ३० ॥

---

[1] गिरयश्चन्द्ररश्मिभिः—च., ज. [2] अयं श्लोकः 'चञ्चच्चन्द्रकरस्पर्श' इत्यादेः पूर्वं ४६ तमत्वेन पठनीयः—ङ., झ. [3] क्रीडासु—ङ. [4] गुणोपपन्ना—च., ज. [5] सूर्याग्रपाद—ङ.

सप्तच्छदानां कुसुमोपगन्धी
षट्पादवृन्दैरनुगीयमानः ।
* मत्तद्विपानां [1] पवनानुसारी
दर्पं [2] वनेष्वभ्यधिकं करोति ॥ ३१ ॥

मत्तद्विपानां पवनमनुसर्तुं शीलमस्त्यस्येति तथा । दर्पं करोतीति । शरत्काल इति शेषः ॥ ३१ ॥

† अभ्यागतैश्चारुविशालपक्षैः
[3] स्मरप्रियैः पद्मरजोऽवकीर्णैः ।
महानदीनां पुलिनोपयातैः ‡
क्रीडन्ति हंसाः सह चक्रवाकैः ॥ ३२ ॥

अभ्यागतैः चक्रवाकैरिति योजना । अभ्यागतैः, मानससरसः इति शेषः ॥ ३२ ॥

[4] मदप्रगल्भेषु च वारणेषु
गवां समूहेषु च दर्पितेषु ।
प्रसन्नतोयासु च निम्नगासु
विभाति लक्ष्मीर्बहुधा विभक्ता ॥ ३३ ॥
नभः समीक्ष्याम्बुधरैर्विमुक्तं
विमुक्तबर्हाभरणा वनेषु ।
[5] प्रियास्वरक्ता विनिवृत्तशोभाः
§ गतोत्सवा ध्यानपरा मयूराः ॥ ३४ ॥

---

* अनुसारी—अनुसृत्य वर्तमानः, अविच्छेदेनैव प्रवर्तमान इत्यर्थः । मत्तद्विपानां दर्पं करोति—गो. † मिथुनतया आभिमुख्येन संगतैः—गो. ‡ पुलिनं प्राप्तैरित्यर्थः ॥ § मयूराणां हि वर्षाकाल इष्टः ॥

[1] पवनोऽनुसारी—ङ. [2] वनेष्वत्यधिकं विभाति—ङ. [3] सरःप्रियैः—ङ. [4] मदान्वितेषु—ङ. [5] प्रियास्वसक्ता—ज.

विमुक्तं—गलितं बर्हरूपं आभरणं येषां ते तथा । अरक्ताः—रागरहिताः ॥ ३४ ॥

मनोज्ञगन्धैः प्रियकैरनल्पैः
पुष्पातिभारावनताग्रशाखैः ।
सुवर्णगौरैर्नयनाभिरामैः
उद्योतितानीव वनान्तराणि ॥ ३५ ॥

प्रियकैः—असनैः ॥ ३५ ॥

प्रियाऽन्वितानां नलिनीप्रियाणां
[1]वने रतानां *[2]कुसुमोद्गतानाम् ।
मदोत्कटानां मदलालसानां
गजोत्तमानां गतयोऽद्य मन्दाः ॥ ३६ ॥

कुसुमोद्गतानां—कुसुमाघ्राणप्रवृत्तानाम् । कुसुमोद्गतानामिति पाठः । मदोत्कटाः—मदाधिकाः, अत एव मदलालसाः—परवशाः ॥ ३६ ॥

[3]व्यभ्रं नभः शस्त्रविधौतवर्णं
कृशप्रवाहाणि नदीजलानि ।
कल्हारशीताः पवनाः प्रवान्ति
तमोविमुक्ताश्च दिशः प्रकाशाः ॥ ३७ ॥

शस्त्रवत्—उत्तेजितासिवत् विधौतः—विमलः वर्णः—नैर्मल्यं यस्य तत् तथा ॥ ३७ ॥

---

* कुसुमोद्गतानां—सप्तच्छदकुसुमाघ्राणनेन मत्तानां, मदोत्कटानां—मदेनोद्भिन्नकटानां—गो.

[1] वनेचराणां—ङ., वनप्रियाणां—च. [2] कुसुमोद्धतानाम्—ङ. [3] व्यक्तं—च.

सूर्यातपक्रामणनष्टपङ्का
[1] भूमिश्चिरोद्घाटितसान्द्ररेणुः ।
*[2] अन्योन्यवैरामरुषायुतानां
उद्योगकालोऽद्य नराधिपानाम् ॥ ३८ ॥

आतपस्य क्रमणं—संक्रमः । चिरेण उद्घाटितः—प्रकाशितः सान्द्रः रेणुः यया सा तथा । अमरुषेति छन्दोभङ्गपरिहाराय पाठः ॥

शरद्गुणाप्यायित†रूपशोभाः
प्रहर्षिताः पांसुसमुत्क्षिताङ्गाः ।
मदोत्कटाः संप्रति युद्धलुब्धाः
वृषा गवां मध्यगता नदन्ति ॥ ३९ ॥

आप्यायिता रूपस्य शोभा—सौन्दर्यं येषां ते तथा ॥ ३९ ॥

[3] समन्मथास्तीव्रतरानुरागाः
कुलान्विता [4] मन्दगतिं करेणूः ।
मदान्वितं संपरिवार्य [5] यान्तं
वनेषु भर्तारमनुप्रयान्ति ॥ ४० ॥

करेणूः—समन्मथत्वादिविशेषणचतुष्टयं करेणवः, करेणवः उच्यमानविशेषणाः संपरिवार्य यान्ति । करेणूरिति ऊकारान्तत्वं छान्दसम् ॥ ४० ॥

---

* वैरं – विरोधः, अमर्षः—असहिष्णुता—गो. † रूपशोभाः—शरीरशोभाः—गो.

[1] भूमेस्समुत्पादित—ङ. [2] अन्योन्यवैरेण समायुतानां—ङ. [3] समन्मथं तीव्रगतानुरागाः—ङ. [4] मन्दगताः करिण्यः, मन्दगतिं करिण्यः—ङ. [5] कान्तं—ङ.

त्यक्त्वा वराण्यात्मविभूषणानि
बर्हाणि तीरोपगता नदीनाम् ।
निर्भर्त्स्यमाना इव *सारसौघैः
प्रयान्ति दीना †[1] विमदा मयूराः ॥ ४१ ॥

वित्रास्य कारण्डवचक्रवाकान्
महारवैर्भिन्नकटा गजेन्द्राः ।
सरस्सु बद्धाम्बुजभूषणेषु
विक्षोभ्य विक्षोभ्य जलं [2] पिबन्ति ॥ ४२ ॥

बद्धाम्बुजं—विकसितकमलम् ॥ ४२ ॥

व्यपेतपङ्कासु सवालुकासु
प्रसन्नतोयासु सगोकुलासु ।
ससारसाराविनादितासु
नदीषु हृष्टा निपतन्ति हंसाः ॥ ४३ ॥

सारसानां आरावजनितविनादितसहिताः—ससारसारावविनादिताः ॥ ४३ ॥

‡[3] नदीघनप्रस्रवणोदकानां
अतिप्रवृद्धानिलबर्हिणानाम् ।
प्लवङ्गमानां च गतोत्सवानां
[4] द्रुतं रवाः संप्रति संप्रणष्टाः ॥ ४४ ॥

---

* सारसौघैः—हंससमूहैः—ती, गो. † (पा.) मनःपर्यायो मदशब्दः अकारान्तोऽपि, द्विरूपकोशात्—ति. ‡ गतोत्सवानां नद्यादित्रयाणां (नदी, घनः—मेघः, प्रस्रवणं च)—रा.

[1] विमनाः—च. [2] क्षिपन्ति—ङ. [3] नदीजल—ङ. [4] ध्रुवं—च.

नद्यः, घनाः, प्रस्रवणानि च तथा, तेषां हृदकादि तथा। प्लवङ्गमाः-भेकाः ॥ ४४ ॥

अनेकवर्णाः *सुविनष्टकायाः
नवोदितेष्वम्बुधरेषु [1] †नष्टाः।
क्षुधार्दिता घोरविषा बिलेभ्यः
चिरोषिता विप्रसरन्ति सर्पाः ॥ ४५ ॥

अनेके वर्णाः येषां सर्पाणां ते तथा। अम्बुधरेषु नवोदितेषु सुविनष्टकायाः—सुतरां विनष्टदेहयात्राः, अत एव नष्टाः—मृतिबहुलाः, विद्युद्भीत्या अदृष्टाश्च ॥ ४५ ॥

[2] चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका।
अहो रागवती ‡सन्ध्या जहाति स्वयमम्बरम् ॥ ४६ ॥

चञ्चताम्—उद्गच्छतां चन्द्रकराणां स्पर्शेन यो हर्षः, तेन उन्मीलिताः—ईषदुद्गताः तारकाः—नक्षत्राणि यस्याः सा तथा। तत्समये रागवती सन्ध्या स्वयमपि अम्बरं जहाति—आकाशं त्यजति, अहो! कान्तकरस्पर्शसुखात् अर्धोन्मीलितचक्षुः कामुकी यथा स्वयमेव कामवशात् विगलितवसना भवति तथा इति ध्वनिः ॥ ४६ ॥

रात्रिः शशाङ्कोदितसौम्यवक्त्रा
तारागणोन्मीलितचारुनेत्रा।
ज्योत्स्नांशुकप्रावरणा विभाति
नारीव शुक्लांशुकसंवृताङ्गी ॥ ४७ ॥

---

* सुविनष्टकायाः—अत्यन्तकृशशरीराः—गो. † नष्टाः—नष्टप्रायाः—शि.

‡ सन्ध्यायाः अम्बरत्यागो नाम, रात्र्यां प्राप्तायां संध्याया अपसरणमेव।

[1] नवोदकेष्व—ङ. [2] एतत्पूर्वं—२८ तमः श्लोकः क्वचित्—ङ., झ.

शशाङ्कोदितेनि । उदितशशङ्केति यावत् । तारागणरूपाणि उन्मीलितानि चारूणि नेत्राणि यस्याः सा तथा ॥ ४७ ॥

विपक्वशालिप्रसवानि * भुक्त्वा
प्रहर्षिता सारसचारुपङ्क्तिः ।
नभः समाक्रामति शीघ्रवेगा
वातावधूता ग्रथितेव माला ॥ ४८ ॥

शालिप्रसवानि—व्रीहीन् । मालेव सारसचारुपङ्क्तिः नभः समाक्रामतीत्यन्वयः ॥ ४८ ॥

† सुप्तैकहंसं [1] कुमुदैरुपेतं
महाह्रदस्थं सलिलं विभाति ।
घनैर्विमुक्तं निशि पूर्णचन्द्रं
तारागणाकीर्णमिवान्तरिक्षम् ॥ ४९ ॥

सुप्तैकहंसमिति संभावनया चन्द्रस्थाने प्रयोगः ॥ ४९ ॥

प्रकीर्णहंसाकुलमेखलानां
प्रबुद्धपद्मोत्पलमालिनीनाम् ।
वाप्युत्तमानामधिकाऽद्य लक्ष्मीः
वराङ्गनानामिव भूषितानाम् ॥ ५० ॥

प्रकीर्णहंसा एव आकुला मेखला यासां ताः तथा ॥ ५० ॥

---

* भुक्त्वा—मुखाग्रे गृहीत्वा–गो. † सुप्तैकहंसमिति चन्द्रप्रतिबिम्बवत्–ति.

[1] कुसुमै–ङ.

[1]वेणुस्वरव्यञ्जिततूर्यमिश्रः
प्रत्यूषकालेऽनिल[2]संप्रवृद्धः ।
संमूर्छितो *[3]गह्वरगोवृषाणां
अन्योन्यमापूरयतीव शब्दः ॥ ५१ ॥

वेणुस्वररूपेण व्यञ्जितेन—व्यक्तेन तूर्येण—वाद्यघोषेण मिश्रः । प्रत्यूषकाले—प्रातःकाले अनिलेन संप्रवृद्धः । संमूर्छितः—व्याप्तः । गह्वराणां—गिरिगह्वराणां गोवृषाणां, वनवर्तिनामिति शेषः, गावो वृषाश्च तथा, तेषां शब्दः अन्योन्यं आपूरयति—वर्धयतीव । कीचकध्वन्युपेतगह्वरशब्दः गोशब्दोपेतवृषशब्दश्च अन्योन्यं वर्धयतीव । साजात्यादित्यर्थः । गह्वरगोवृषाणां इति पाठः ॥ ५१ ॥

नवैर्नदीनां कुसुमप्रहासैः
व्याधूयमानैर्मृदुमारुतेन ।
धौतामलक्षौमपटप्रकाशैः
कूलानि काशैरुपशोभितानि ॥ ५२ ॥

नवैर्नदीनामित्यादि । मृदुमारुतेन व्याधूयमानैः कुसुमप्रहासैः—कुसुमरूपस्मितैः नदीनां † वनानि—जलानि शोभितानि—'जीवनं भुवनं वनम्'। कूलानि कुसुमादिविशेषणकैः काशैः उपशोभितानि ॥ ५२ ॥

---

* गर्गरगोवृषाणां (पा)—गर्गराणां—दधिमथनभाण्डानां, गवां, वृषाणां च—गो., ती. † 'वनानि' इति पदघटितपाठः मूले नोपलब्धः । 'वनानि च क्षौमपट' इत्येवं पाठः स्याद्वा ॥

[1] वेणुस्वन—ङ.　　[2] संप्रवृत्तः—ङ.　　[3] गर्गर—ङ.

वनप्रचण्डा मधुपानशौण्डाः
प्रियान्विताः षट्चरणाः प्रहृष्टाः ।
वनेषु मत्ताः पवनानुयात्रां
कुर्वन्ति पद्मासनरेणुगौराः ॥ ५३ ॥

प्रचण्डाः--प्रगल्भाः । शौण्डाः—समर्थाः । पद्मपुष्पाणां, असनपुष्पाणां च रेणुभिः गौराः । पवनानुयात्रां कुर्वन्तीति । गन्धलाभादिति शेषः ॥ ५३ ॥

जलं प्रसन्नं [1] कुमुदप्रभासं
[2] क्रौञ्चस्वनः शालिवनं विपक्वम् ।
मृदुश्च वायुर्विमलश्च चन्द्रः
शंसन्ति * वर्षव्यपनीतकालम् ॥ ५४ ॥

कुमुदरूपः प्रभासः यस्य जलस्य तत् तथा । शालिवनं—शालिसमूहः । वर्षाणां व्यपनीतः—व्यपनयः यस्मिन्, स चासौ कालः तथा ॥ ५४ ॥

मीनोपसंदर्शितमेखलानां
नदीवधूनां गतयोऽद्य मन्दाः ।
कान्तोपभुक्तालसगामिनीनां
प्रभातकालेष्विव कामिनीनाम् ॥ ५५ ॥

सचक्रवाकानि सशैवलानि
काशैर्दुकूलैरिव संवृतानि ।
सपत्रलेखानि सरोचनानि
वधूमुखानीव [3] नदीमुखानि ॥ ५६ ॥

चक्रवाकशैवलकाशाः रोचनापत्रलेखाऽवकुण्ठनक्षौमस्थानीयाः ॥

---

* व्यपनीतकालं—गतसमयं वर्षं—शि.

[1] कुमुदं महासं—कु. [2] क्रौञ्चस्वनं—कु. [3] सरोमुखानि—कु.

प्रफुल्लबाणासनचित्रितेषु
  प्रहृष्टषट्पादनिकूजितेषु ।
*गृहीतचापोद्यत[1]दण्डचण्डः
  [2]प्रचण्डचारोऽद्य वनेषु कामः ॥ ५७ ॥

बाणः—अतिगल - மழை வண்ணக்குறுஞ்சி गृहीतचापश्च उद्यते विरहिविषयके दण्डे चण्डः—प्रहरणश्च तथा ॥ ५७ ॥

लोकं सुवृष्ट्या परितोषयित्वा
  नदीस्तटाकानि च पूरयित्वा ।
निष्पन्नसस्यां वसुधां च कृत्वा
  त्यक्त्वा नभस्तोयधराः [3]प्रणष्टाः ॥ ५८ ॥

प्रसन्नसलिलाः, सौम्य ! †कुररीभिर्विनादिताः ।
चक्रवाकगणाकीर्णाः विभान्ति सलिलाशयाः ॥ ५९ ॥

असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः ।
दृश्यन्ते बन्धुजीवाश्च श्यामाश्च गिरिसानुषु ॥ ६० ॥

श्यामाः—तमालाः ॥ ६० ॥

हंससारसचक्राह्वैः कुररैश्च समन्ततः ।
पुलिनान्यवकीर्णानि नदीनां पश्य, लक्ष्मण ! ॥ ६१ ॥

---

*गृहीतचापेन उद्यतः—प्रयुक्तः चण्डदण्डः—तीक्षणदण्डनं येन सः—गो.
†कुररीभिः—क्रौञ्चीभिः—गो.

[1] चण्डदण्डः—ङ. [2] प्रचण्डचापोऽद्य च. [3] प्रयाताः—ङ.

[1]अन्योन्यं बद्धवैराणां जिगीषूणां, नृपात्मज !
उद्योगसमयः, सौम्य ! पार्थिवानामुपस्थितः ॥ ६२ ॥
इयं सा प्रथमा यात्रा पार्थिवानां, नृपात्मज !
न च पश्यामि सुग्रीवं उद्योगं वा तथाविधम् ॥ ६३ ॥

इयं सेति । शरदिति यावत् । यात्रेति । यात्राकाल इत्यर्थः । तथाविधमिति । यात्रास्फोरकमित्यर्थः ॥ ६३ ॥

*चत्वारो वार्षिका मासाः गता वर्षशतोपमाः ।
[2]मम शोकाभिभूतस्य, सौम्य ! सीतामपश्यतः ॥ ६४ ॥
चक्रवाकीव भर्तारं पृष्ठतोऽनुगता वनम् ।
विषमं दण्डकारण्यं उद्यानमिव [3]याऽङ्गना ॥ ६५ ॥
प्रियाविहीने दुःखार्ते हृतराज्ये विवासिते ।
†कृपां न कुरुते राजा सुग्रीवो, मयि, लक्ष्मण ! ॥ ६६ ॥
अनाथो हृतराज्योऽयं रावणेन च धर्षितः ।
दीनो ‡दूरग्रहः कामी मां चैव शरणं गतः ॥ ६७ ॥
इत्येतैः कारणैः, सौम्य ! सुग्रीवस्य दुरात्मनः ।
अहं वानरराजस्य परिभूतः, परंतप ! ॥ ६८ ॥

---

* यद्यपि चतुर्थो मासो विद्यत एव, तथापि तत्रोद्योगाभावेन तस्यापि गतप्रायत्वात् गता इत्युक्तिः– ती. चत्वारः–आषाढाद्याः । केचिदाहुः श्रावणाद्या इति । 'पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः' इत्युपक्रमोक्तेः । आश्वयुजकार्तिकयोर्वर्षानुवृत्त्या वार्षिकत्वम् । 'कार्तिके समनुप्राप्ते त्वं रावणवधे यत' इति पूर्वोक्तवचने तु, समनुप्राप्ते—समाप्त इत्यर्थ इत्याहुः–गो. † कृपां न कुरुत इत्यादिकं सुग्रीवाभिमानमनुसृत्योक्तम्–गो. वस्तुतस्तु—मानवभावसहजमिदं वाक्यम् ॥ ‡ दूरगृह इति पाठे—गृहं त्यक्त्वा सुदूरमागत इत्यर्थः ॥

[1] एतदादि श्लोकद्वयमधिकं–ङ. [2] मम शोकाभितप्तस्य तथा–च. [3] याऽऽगता–ङ.

कृपां न कुरुते इत्यत्र कारणमुन्नयति––अनाथ इत्यादि। दूरग्रहः––दूरवर्तिन्यो विषयग्रहः––अभिनिवेशः यस्य स तथा। वानरराजस्य परिभूतः इति। मतिबुद्धीत्यत्र अनुक्तसमुच्चयार्थेन चकारेण वर्तमानत्वे, 'क्तस्य च वर्तमाने' इति षष्ठी ॥ ६७–६८॥

स कालं परिसंख्याय सीतायाः परिमार्गणे।
कृतार्थः समयं कृत्वा दुर्मतिर्नैव बुध्यते ॥ ६९॥

परिसंख्याय––गणयित्वा, समयं च कृत्वाऽपि दुर्मतिः नैव बुध्यते। समयमिति शेषः ॥ ६९॥

स किष्किन्धां प्रविश्य त्वं ब्रूहि वानरपुङ्गवम्।
मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम ॥ ७०॥
*अर्थिनामुपपन्नानां पूर्वं चाप्युपकारिणाम्।
आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥ ७१॥

उपपन्नानां, बलवीर्यादिनेति शेषः। आशां––अभिमतार्थसम्पादनाशाम् ॥ ७१॥

†शुभं वा यदि वा पापं [1]यो हि वाक्यमुदीरितम्।
सत्येन परिगृह्णाति [2]स वीरः पुरुषोत्तमः ॥ ७२॥

सत्येन––अमोघतया ॥७२॥

‡कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये।
तान् मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ ७३॥

---

* वचनप्रकारमाह––अर्थिनामिति–शि. परन्तु नायं सुग्रीवाय वक्तव्यस्यानुवादः, किन्तु लक्ष्मणं प्रत्येवोक्तिरियम् ॥ † शुभं वेत्यादि लोकवदुक्तिः। ‡ अस्य श्लोकस्यान्ते इतिकरणं द्रष्टव्यम्। इति सुग्रीवं ब्रूहीति पूर्वेण संबन्धः–गो. परन्तु स्वाशयकथनं लक्ष्मणसमीप इति स्वरसम् ॥

[1] येन–ङ.   [2] स लोके–ङ.

न भवन्तीति। कार्यायेति शेषः। क्रव्यादाः— श्वगोमायवादयः, पचाद्यच् ॥ ७३ ॥

नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे।
[1]द्रष्टुमिच्छति चापस्य रूपं विद्युद्गणोपमम् ॥ ७४ ॥

चापस्य रूपं— ज्यास्वरूपम्। विद्युद्गणः गुणः—उपमा यस्य तत् तथा ॥ ७४ ॥

घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे।
निर्घोषमिव वज्रस्य पुनः *संश्रोतुमिच्छति ॥ ७५ ॥
† काममेवंगतेऽप्यस्य परिज्ञाते पराक्रमे।
त्वत्सहायस्य मे, वीर! न चिन्ता स्यात्, नृपात्मज! ॥

काममेवंगतेऽपि—एतदवस्थायामपीत्यर्थः ॥ ७६ ॥

यदर्थमयमारंभः कृतः, परपुरंजय!
समयं नाभिजानाति कृतार्थः प्लवगेश्वरः ॥७७॥

---

*संश्रोतुमिच्छसि—इत्युत्तरं इति सुग्रीवं ब्रूहीति संबन्धः–ति. †त्वत्सहायस्य मे एवंगते—बालगिरिभू दल दिषु इत्थमप्रतिहते पराक्रमे—कामं परिज्ञाते सत्यपि अस्य सुग्रीवस्य चिन्ता न स्यात्—समयव्यतिक्रमे मामपि हनिष्यतीति विचारः नाभूत्—ती. वस्तुतस्तु 'वीर' 'नृपात्मज' इति संबुद्धिस्वारस्यात् इयमपि लक्ष्मण प्रत्ययोक्तिः (६१ श्लोकेऽपि 'नृपात्मज' इति द्रष्टव्यम्)। अस्य सुग्रीवस्य पराक्रमे परिज्ञाते इति नर्मोक्तिः। समये अनेन नास्माकमुपयोग इति परिशङ्कायां जातायामपि हे लक्ष्मण त्वत्सहायस्त्वात् न मम चिन्ता, सर्वं ह साधयेयम्। किन्तु—यादृशं दैवनियोगं प्रमाणीकृत्यास्माभिरयं सीताप्राप्त्यर्थमारम्भः कृतः, तदनुगुणं प्लवगेश्वरः प्रतिबोधनीय इत्याहस्य तात्पर्यं स्वरसम्। त्वत्साहाय्यात् सर्वमहं साधयेयम्, किन्तु सुग्रीवद्वारैव कार्यस्य साधनीयत्वात् तं प्रतिबोधयेत्याशयः। अत एवोत्तरवाक्ये 'नास्मासु सुग्रीवः कुरुते दयाम्' इत्यपि स्वरसम् ॥

[1] द्रष्टुमिच्छसि—च., ज. [2] मिच्छसि—च., ज.

यदर्थं—यत्सीतान्वेषणादिप्रयोजनम् । आरंभः—उद्योगः ।
कृतार्थः—कृतस्वप्रयोजनः ॥ ७७ ॥

[1]वर्षाः समयकालं तु प्रतिज्ञाय हरीश्वरः ।
व्यतीतांश्चतुरो मासान् विहरन्नावबुध्यते ॥ ७८ ॥

व्यतीतान् नावबुध्यते इत्यन्वयः ॥ ७८ ॥

सामात्यपरिषत् क्रीडन् पानमेवोपसेवते ।
शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम् ॥ ७९ ॥

उच्यतां गच्छ सुग्रीवः त्वया, [2]वत्स ! महाबल !
*मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः ॥ ८० ॥

यद्रूपं उचितम् ॥ ८० ॥

न च संकुचितः पन्थाः येन वाली हतो गतः ।
†समये तिष्ठ, सुग्रीव ! मा वालिपथमन्वगाः ॥ ८१ ॥

एक एव रणे वाली शरेण निहतो मया ।
त्वां तु सत्यादतिक्रान्तं [3]हनिष्यामि सबान्धवम् ॥ ८२ ॥

[4]तदेवं विहिते कार्ये [5]यद्धितं, पुरुषर्षभ !
तत्तद्ब्रूहि, नरश्रेष्ठ ! ‡त्वर कालव्यतिक्रमः ॥ ८३ ॥

---

* मम रोषस्य यत् रूपं, तद्ब्रूयाः, इदं वचश्च ब्रूयाः इत्यन्वयः ॥ † समये—प्रतिज्ञायामिति यावत् । ‡ लक्ष्मणं प्रति इयमुक्तिः लोकवत् । त्वर, मास्तु कालव्यतिक्रम इति ।

[1] वर्षासमय—ङ. [2] वीर—च., ञ. [3] वधिष्यामि—ङ. [4] यदेवं—ञ. [5] विहितं—ङ.

तदित्यादि । तत्—तस्मात् एवं विहिते कार्ये—अकरणे प्रत्यवायतया प्राप्ते, यद्यत् हितं तत्तद् ब्रूहीत्यर्थः । करोमि, न करोमीति वा निश्चित्य ब्रूहीति पृच्छेत्यर्थः । क्वतिपक्षे तु कालव्यतिक्रमो जायते ॥ ८३ ॥

कुरुष्व सत्यं [1] मयि, वानरेश्वर !
प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम् ।
मा वालिनं [2] प्रेतगतो [3] यमक्षयम्
त्वमद्य [4] पश्येर्मम [5] चोदितैश्शरैः ॥ ८४ ॥

अथ उपदेशसंक्षेपः—कुरुष्वेत्यादि । प्रेतगतः—प्रेतत्वं प्राप्तः । चोदितः—प्रेरितः । इति वचनात् ब्रूहीत्यनुकर्षः ॥ ८४ ॥

स पूर्वजं तीव्रविवृद्धकोपं
लालप्यमानं प्रसमीक्ष्य दीनम् ।
चकार तीव्रां मतिमुग्रतेजाः
हरीश्वरे मानववंश[6]वर्धनः ॥ ८५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे त्रिंशः सर्गः

मानववंशवर्धनः इति । लक्ष्मणं इत्यर्थः । अराज (८२ १/२)-मानः (!) सर्गः ॥ ८५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे त्रिंशः सर्गः

---

[1] मम—ज. [2] प्रेत्य गतो—ङ. [3] यमक्षये—ङ. [4] पश्ये मम—ङ.
[5] चोदितश्शरैः—ज. [6] नाथः—ङ.

एकत्रिंशः सर्गः

[लक्ष्मणाक्रोशः]

स [1]कामिनं *दीनमदीनसत्त्वं
शोकाभिपन्नं समुदीर्ण[2]कोपम् ।
नरेन्द्रसूनुर्नरदेवपुत्रं
रामानुजः पूर्वजमित्युवाच ॥ १ ॥

अथ लक्ष्मणस्य रामाज्ञया किष्किन्धाद्वारगमनम् । स कामिनमित्यादि । सः—लक्ष्मणः ॥ १ ॥

न वानरः स्थास्यति साधुवृत्ते
न [3]मंस्यते कर्मफलानुषङ्गान् ।
न भोक्ष्यते वानरराज्यलक्ष्मीं
तथाहि †[4]नातिक्रमतेऽस्य बुद्धिः ॥ २ ॥

साधुवृत्ते—साधूनां वृत्ते स्थिरस्नेहतालक्षणे । कर्मणा—सख्यकर्मणा जनितान् फलानुषङ्गान्—अकण्टकराज्यभोगसंबन्धान् सख्यमूलान् न मंस्यते—न भोक्ष्यते । अत एव वानरराज्यलक्ष्मीं न भोक्ष्यते । हि—यस्मात् तत् तथा—तथाप्रकाशा तस्य बुद्धिः अति—अत्यन्तं, न क्रमते प्रेमपरिपालने । नातिक्रमते इति पाठः ॥ २ ॥

[5]मतिक्षयात् ग्राम्यसुखेषु सक्तः
तव [6]प्रसादात् प्रतिकारबुद्धिः ।
हतोऽग्रजं पश्यतु, वीर! [7]तस्य
न राज्यमेवं विगुणस्य देयम् ॥ ३ ॥

---

* दीनं, तथाप्यदीनसत्त्वं ; एतेन वस्तुतः अदीनसत्त्वोऽपि दैन्यं भावयतीति गम्यते—गो.   † नातिक्रमते—(पा.) अस्मत्प्रयोजनाभिमुख्येन वर्तते—गो.

[1] राघवं—झ.   [2] कामम्—ज.   [3] मन्यते—ज.   [4] नाभिक्रमते—झ.
[5] मतिभ्रमात्—ङ.   [6] प्रसादाप्रतिकार—ङ.   [7] वालिनं—ज.

न कामये इत्यत्र हेतुमाह—मतिक्षयादित्यादि। तत्रापि हेतुः—तव प्रसादात् संप्राप्तेषु ग्राम्यसुखेषु सक्तः इति। यदेवं अतः, प्रतिकारबुद्धिः—प्रत्युपकारबुद्धिः, न वर्तते इति शेषः। एवं पंक्तिपाठस्य योजन शक्त्या 'तव प्रसादाप्रतिकारबुद्धि' इति पठित्वा अगमकसमासं अंगीकृत्य अक्लिश्यत् परः*। न देयमिति। दत्तं नानुपालनीयमित्यर्थः ॥ ३ ॥

न धारये कोपमुदीर्णवेगं
निहन्मि सुग्रीवमसत्यमद्य।
हरिप्रवीरैः सह वालिपुत्रः
[1]नरेन्द्रपत्न्या विचयं करोतु ॥ ४ ॥

न धारये इति। हृदि न निरुणध्मीत्यर्थः। असत्यं—असत्यप्रतिज्ञम्। वालिपुत्रः—अङ्गदः विचयं करोतु, सुग्रीवं हत्वा तस्मा एव राज्यसमर्पणादिति शेषः ॥ ४ ॥

† तमात्तबाणासनमुत्पतन्तं
निवेदितार्थं रणचण्डकोपम्।
उवाच रामः परवीरहन्ता
[2]स्ववेक्षितं सानुनयं च वाक्यम् ॥ ५ ॥

निवेदितार्थमिति। विज्ञातसुग्रीववृत्तान्तमित्यर्थः। स्ववेक्षितम्—सम्यक् पर्यालोचितम् ॥ ५ ॥

---

* महेश्वरतीर्थः, गोविन्दराजो वा ॥ 'तव प्रसादस्य—राज्यप्रदानादिरूपस्य प्रत्युपकारबुद्धिरहितः' इति ताभ्यां व्याख्यातम् ॥ † उद्रेकस्य कोपस्य स्वकार्यविनाशकारणत्वात् रामः सौमित्रिं सान्त्वयति ॥

[1] नरेन्द्रपुत्र्या—ज. [2] स्ववीक्षितं—ज.

न हि वै त्वद्विधो लोके पापमेवं समाचरेत् ।
[1]पापमार्येण यो हन्ति स वीरः पुरुषोत्तमः ॥ ६ ॥

त्वद्विध इति । धर्मज्ञः इत्यर्थः । एवं पापमिति । मित्रघातरूपमित्यर्थः । पापं—पापबुद्धिम् । आर्येण—सच्चरित्रेण* ॥ ६ ॥

नेदमद्य त्वया [2]ग्राह्यं साधुवृत्तेन, लक्ष्मण !
तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च संगतम् ॥ ७ ॥

इदमिति । मित्रघातचिन्तेत्यर्थः । अनुवर्तस्वेति । सुग्रीवे इति शेषः । तत्र हेतुः--पूर्ववृत्तं सङ्गतं--सख्यं च, अनुस्मरेति शेषः ॥ ७ ॥

सामोपहितया वाचा रूक्षाणि परिवर्जयन् ।
वक्तुमर्हसि सुग्रीवं व्यतीतं [3]कालपर्यये ॥ ८ ॥

कालपर्यये--कालप्रवृत्तौ विषये व्यतीतं, भावे निष्ठा, व्यत्ययं--अतिक्रममेव केवलं वक्तुमर्हसि ॥ ८ ॥

सोऽग्रजेनानुशिष्टार्थः यथावत् पुरुषर्षभः ।
प्रविवेश पुरीं वीरः लक्ष्मणः परवीरहा ॥ ९ ॥
ततः शुभमतिः प्राज्ञः भ्रातुः प्रियहिते रतः ।
लक्ष्मणः †प्रति संरब्धः जगाम भवनं कपेः ॥ १० ॥

भवनं प्रति, संरब्धः--कालातिक्रमजकोपवान् भूत्वा जगाम ॥ १० ॥

---

* आर्येण – सम्यग्विवेकेन–गो. † प्रतिसंरब्धः–प्रतिनिवृत्तहननाध्यवसायः—ती., गो.

[1] कोपमार्येण—ङ. [2] कार्यं—ङ. [3] कालपर्ययम्—ङ.

*शक्रबाणासनप्रख्यं धनुः [1]कालान्तकोपमम् ।
प्रगृह्य गिरिशृङ्गाभं †मन्दरः सानुमानिव ॥ ११ ॥

कालान्तकोपमम्—तद्वत् भयङ्करम् ॥ ११ ॥

यथोक्तकारी वचनं ‡उत्तरं चैव सोत्तरम् ।
बृहस्पतिसमो बुद्ध्या मत्वा रामानुजस्तदा ॥ १२ ॥

उत्तरं च बुद्ध्या मत्वेत्यर्थः । सोत्तरमिति । उत्तरादुत्तरमपि वक्तव्योत्तरसहितमित्यर्थः ॥ १२ ॥

कामक्रोध[2]समुत्थेन भ्रातुः [3]कोपाग्निना वृतः ।
प्रभञ्जन [4]इवाप्रीतः प्रययौ लक्ष्मणस्तदा ॥ १३ ॥

भ्रातुः—रामस्य कामस्य—स्वाभीष्टकार्यप्रवर्तनस्य अभावेन यः क्रोधः, तत्समुत्थेन कोपाग्निना स्वीयक्रोधाग्निना वृतः प्रभञ्जन इव प्रययौ इत्यन्वयः ॥ १३ ॥

सालतालाश्वकर्णांश्च तरसा पातयन् [5]बहून् ।
पर्यस्यन् गिरि[6]कूटानि द्रुमानन्यांश्च [7]वेगितः ॥ १४ ॥

तरसा—वेगेन । वेगितः—संजातवेगः ॥ १४ ॥

शिलाश्च शकलीकुर्वन् पद्भ्यां गज इवाशुगः ।
§दूरमेकपदं त्यक्त्वा ययौ कार्यवशात् द्रुतम् ॥ १५ ॥

---

*'क्रोडग्रजेन' इत्यादिश्लोकद्वयोक्तं विस्तरेणाह—शक्रेत्यादिना—गो. †मन्दरः—मन्दराख्यः सानुमान्—पर्वतः—ती. धनुषः स्थाने सानोर्निर्देशो वा ॥ ‡उत्तरं—स्ववचनस्य संभावितं सुग्रीवोत्तरं, तस्य पुनः स्वोत्तरं यत्, तत्सहितम् । अहमेवं वदेयं, तस्योत्तरं स एवं वदेत, तस्योत्तरं मया एवं वक्तव्यमितिरीत्या मत्वेत्यर्थः ॥ §एकपदं—पौरस्त्यपदं दूरं त्यक्त्वा—दूरे क्षिप्त्वा—गो.

[1]कालान्तकोपमः—ङ. [2]समृद्धेन—ङ. [3]क्रोधाग्निना—ज. [4]इवाविष्टः—ङ. [5]बलात्—ज. [6]शृङ्गाणि—ङ. [7]वेगतः—ङ.

दूरमेकपदं त्यक्त्वेति। एकैकपदं पूर्वपदापेक्षया यथा चेत् दूरं भवति, तथान्तरालं त्यक्त्वा विन्यस्य कार्यवशात् द्रुतं ययौ ॥ १५ ॥

तामपश्यद्बलाकीर्णां हरिराजमहापुरीम् ।
दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां *[1] गिरिसङ्कटे ॥ १६ ॥

बलाकीर्णां — वानरबलेन व्याप्ताम् ॥ १६ ॥

रोषात् प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः ।
ददर्श वानरान् भीमान् [2] किष्किन्धाया बहिश्चरान् ॥१७॥
तं दृष्ट्वा वानराः सर्वे लक्ष्मणं पुरुषर्षभम् ।
शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ॥
जगृहुः कुञ्जरप्रख्याः वानराः पर्वतान्तरे ॥ १८ ॥

तं क्रुद्धं लक्ष्मणं दृष्ट्वा तदा वानराणां शैलशृङ्गादिग्रहः भीत्या आपाततः स्वस्वरक्षणार्थम् ॥ १८ ॥

तान् गृहीतप्रहरणान् [3] हरीन् दृष्ट्वा तु लक्ष्मणः ।
बभूव [4] द्विगुणं क्रुद्धः बह्विन्धन इवानलः ॥ १९ ॥

द्विगुणं क्रुद्धः इति। मां दृष्ट्वा सुग्रीवभृत्याश्च त्यक्तस्नेहाः प्रणामं मुक्त्वा बत प्रहरणं गृह्णन्तीति कोपद्वैगुण्यम् ॥ १९ ॥

तं ते भयपरीताङ्गाः [5] क्रुद्धं दृष्ट्वा प्लवङ्गमाः ।
[6] कालमृत्युयुगान्ताभं शतशो विद्रुता दिशः ॥ २० ॥

---

* गिरिसंकटे — निबिडगिरिमध्ये — गो.

[1] गिरिगह्वरे — ङ. [2] किष्किन्धायां — ज. [3] सर्वान् — ज. [4] परम — ङ.
[5] क्षुब्धं — ज. [6] कालमृत्युमिवायान्तं — ङ.

ततः सुग्रीवभवनं प्रविश्य हरिपुङ्गवाः ।
*क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ॥ २१ ॥

तारया सहितः कामी सक्तः [1]कपिवृषो रहः ।
न तेषां [2]कपिवीराणां [3]शुश्राव वचनं तदा ॥ २२ ॥

तेषां—सामान्यभृत्यानामित्यर्थः ॥ २२ ॥

ततः [4]सचिवसंदिष्टाः हरयो रोमहर्षणाः ।
गिरिकुञ्जरमेघाभाः नगर्या निर्ययुस्तदा ॥ २३ ॥

ततः सचिवसंदिष्टा इति । सुग्रीवं बोधयित्वा तदनुमत्या लक्ष्मणोऽस्माभिः प्रवेश्यते, तावत्पर्यन्तं लक्ष्मणस्य हठात् प्रवेशं निरुन्धानाः तिष्ठतेति सचिवैः—हनूमदादिभिः सन्दिष्टा हरयः—† अङ्गदादयः नगरात् निर्ययुः ॥ २३ ॥

नखदंष्ट्रायुधा [5]घोराः सर्वे विकृतदर्शनाः ।
सर्वे शार्दूल[6]दर्पाश्च सर्वे च [7]विकृताननाः ॥ २४ ॥

विकृतदर्शनाः—भीमदर्शनाः ॥ २४ ॥

दशनागबलाः केचित् केचिद्दशगुणोत्तराः ।

---

* प्रथमं स्वैरनुभूतं लक्ष्मणक्रोधं प्राथम्येनोचुर्वानराः । लक्ष्मणस्य क्रोधं, आगमनं चेत्यन्वयः ॥ † परन्तु प्रकरणपरिशीलने—अत्रोक्ताः सचिवाः अन्य एव स्युः । लक्ष्मणपराक्रमापरिज्ञानात् लक्ष्मणनिरोधाय वानराः प्रदिष्टाः कैश्चन । अथवा 'सुग्रीवसंदिष्टाः' इति पाठो युक्तः । कृत्याकृत्यविवेकशून्यः सुग्रीवः कपीन् लक्ष्मणनिरोधे न्ययूयुजत । अङ्गदप्रमुखास्तु चातुर्येण सर्वं समीकृतवन्तः इति स्वरसम् ॥

[1] कपिवरस्तदा—ङ. [2] कपिसिंहानां—ज. [3] जग्राह—ङ. [4] सुग्रीव—ङ.
[5] वीराः—ङ. [6] दंष्ट्राश्च—ङ., ञ. [7] विवृताननाः—ङ.

केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः[2] ॥ २५ ॥

दशगुणोत्तराः इति । दशगुणाधिकदशनागबलाः । शतनागबलाः इत्यर्थः ॥ २५ ॥

कृत्स्नां हि कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः ।
अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां तां दुरासदाम् ॥ २६ ॥

दुरासदामपश्यदित्यन्वयः ॥ २६ ॥

ततस्ते हरयस्सर्वे प्राकारपरिघान्तरात् ।
निष्क्रम्योदग्रसत्त्वास्तु तस्थु*[3]राविष्कृतं तदा ॥ २७ ॥

प्राकारः तद्बहिर्वर्तिनी परिघा च, तदनन्तरात् तदवधेरपि बहिर्निष्क्रम्य आविष्कृतं—आविष्कृतनिरोधनं यथा तथा तदा तस्थुः ॥ २७ ॥

सुग्रीवस्य प्रमादं च †[4]पूर्वजस्यार्थमात्मवान् ।
[5]बुद्ध्वा कोपवशं वीरः ‡ पुनरेव जगाम सः ॥ २८ ॥

प्रमादं चेति । चकारात् वानरप्रतिरोधं चेत्यर्थः ॥ २८ ॥

---

* आविष्कृतं—प्रकाशं यथा तथा—गो. सचिवादिष्टत्वादिति भावः ॥ † पूर्वजस्य रामस्य अर्थे—सीतान्वेषणरूप इत्यर्थः ॥ ‡ सर्वमिदं स्मरन् लक्ष्मणस्य कोपस्तथातथाऽवर्धतेति भावः ॥

[1] वर्चसः—ज. [2] एतदनन्तरं—सन्ति चौघबलाः केचित् केचिद्वायुबलोत्तराः । अप्रमेयबलाः केचित् तत्रासन् हरियूथपाः ॥ प्रापूगमेवाकाशं सच्छन्नमेव तद्वनम् । तेन वानरसैन्येन सुग्रीवस्य महात्मनः ॥ ततो द्वाराणि सर्वाणि अङ्गदो राजशासनात् । पर्यधावत दुर्धर्षः नक्षत्राणीव चन्द्रमाः—इत्यधिकं—ङ. [3] राविष्कृतायुधाः—ङ. [4] पूर्वजं चार्तमात्मन—ङ. [5] दृष्ट्वा—ज.

सदीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः ।
बभूव नरशार्दूलः सधूम इव पावकः[1] ॥ २९ ॥

दीर्घः उष्णः महान् उच्छ्वासः यस्य स तथा ॥ २९ ॥

बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान् ।
स्वतेजोविष[2]संघातः पञ्चास्य इव पन्नगः ॥ ३० ॥

बाणस्य शल्यमेव स्फुरन्ती जिह्वा यस्य स तथा । सायकासनं —धनुरेव भोगः अस्यास्तीति तथा । ३० ॥

तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम् ।
समासाद्याङ्गदस्त्रासात् विषाद[3]मगमत्भृशम् ॥ ३१ ॥

भृशं विषादमगमदिति । नैतावत्कालं रामकार्यं अस्माभि चिन्तितमिति विषादः ॥ ३१ ॥

सोऽङ्गदं रोषताम्राक्षः संदिदेश महायशाः ।
सुग्रीवः कथ्यतां, वत्स! ममागमनमित्युत ॥ ३२ ॥

इत्युतेति । एवंप्रकारेणेत्यर्थः ॥ ३२ ॥

एष रामानुजः प्राप्तः त्वत्सकाश[4]मरिंदमः ।
भ्रातुर्व्यसनसंतप्तः द्वारि तिष्ठति लक्ष्मणः ॥ ३३ ॥

तमेव प्रकारं दर्शयति—एष इत्यादि। एष इति द्वारासन्नस्य परामर्शः॥

*[5]तस्य वाक्यं यदि रुचिः क्रियतां साधु, वानर!
इत्युक्त्वा शीघ्रमागच्छ, वत्स![6] वाक्यमरिन्दम! ॥३४॥

---

* तस्य वाक्ये तव यदि रुचिः, तर्हि साधु-युक्तं, तत्र तव गमनं वा, अत्रैव तस्यानयनं वा क्रियतामित्येतद्वाक्यमुक्त्वा शीघ्रमागच्छ—गो.

[1] एतदनन्तरं—बाणासनमहावीर्यः लक्ष्मणः परवीरहा । प्रविवेश दुराधर्षां पुरीं सुग्रीवपालिताम् ॥ ततो नीलाभ्रसंकाशं तप्तकाञ्चनवेदिकम् । श्रीमद्विमानमासाद्य रमणीयं मनोरमम् ॥ शुश्राव परमस्त्रीणां सोत्कृष्टहसितस्वनम्—इत्यधिकं—ङ. [2]संभृतः-ज. [3] मगमत्परम्—ज. [4] मरिन्दम—ज. [5] तस्य वाक्ये—ङ. [6]वाक्यमिदं मम—च.

तस्य वाक्यमित्यादि । हे अरिन्दम ! वत्स ! उक्तप्रकारं मद्वाक्यं तस्मा उक्त्वा, अथ स वानरः सुग्रीवः साधु--साधुकारी यथा भवति तथा क्रियताम् । अनन्तरं यद्यस्मात्तु रुचिर्भवति तदा तस्य वाक्यं च श्रुत्वा शीघ्रमागच्छ ॥ ३४ ॥

लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत् ।
पितुस्समीपमागम्य सौमित्रिरयमागतः ॥ ३५ ॥

अथाङ्गदस्तस्य [1] वचो निशम्य
  संभ्रान्तभावः परिदीनवक्त्रः ।
[2] निपत्य तूर्णं नृपतेस्तरस्वी
  *[3] ततः कुमारश्चरणौ ववन्दे ॥ ३६ ॥

लक्ष्मणस्य वचः इति संक्षेपश्लोकस्य विस्तारः—अथाङ्गदस्तस्येत्यादि । संभ्रान्तभाव इति । संभ्रान्तचित्त इत्यर्थः ॥ ३६ ॥

संगृह्य पादौ [4] पितुरग्र्यतेजाः
  जग्राह † मातुः पुनरेव पादौ ।
पादौ रुमायाश्च निपीडयित्वा
  निवेदयामास ततस्तमर्थम् ॥ ३७ ॥

[5] स निद्रामदसंवीतः वानरो न विबुद्धवान् ।
बभूव मदमत्तश्च मदनेन च मोहितः ॥ ३८ ॥

न विबुद्धवानिति । तन्त्रीति तद्वचनं चेति शेषः ॥ ३८ ॥

---

* पूर्वं नृपतेश्चरणौ ववन्दे, ततः रुमायाः, तदुपलक्षिततारायाश्च चरणौ ववन्दे—शि.

† मातुः—तारायाः—शि., ति.

[1] सुतीव्रवाचा–ज. [2] निगीर्य पूर्वं–ज. [3] ततो रुमायाश्चरणौ–ज.

[4] पुनरुग्रतेजाः–कु., पितुरुग्रतेजाः–ज. [5] स निद्राक्रान्त–ज.

ततः किलकिलां चक्रुः लक्ष्मणं प्रेक्ष्य वानराः ।
प्रसादयन्तस्तं क्रुद्धं [1]भयमोहितचेतसः ॥ ३९ ॥

तत इति । अङ्गदस्य पितृसमीपगमनानन्तरमित्यर्थः । वानराणां भयक्रोधादिजः उच्चैस्संघातशब्दः किलकिला ॥ ३९ ॥

*[2]ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम् ।
सिंहनादं समं चक्रुः लक्ष्मणस्य समीपतः ॥ ४० ॥

सिंहनादं चक्रुरिति । सुग्रीवोद्बोधनायेति शेषः † ॥ ४० ॥

तेन शब्देन महता प्रत्यबुध्यत वानरः ।
मदविह्वलताम्राक्षः व्याकुलस्रग्विभूषणः ॥ ४१ ॥
अथाङ्गदवचः श्रुत्वा ‡तेनैव च समागतौ ।
मन्त्रिणौ वानरेन्द्रस्य [3]§संमतोदारदर्शिनौ ॥ ४२ ॥

अथाङ्गदवचः श्रुत्वेति । स्ववचनात् अनुद्बुद्धं पितरं बोधयत इत्युक्तवतोऽङ्गदस्य वचः श्रुत्वा तेन च अङ्गदेन सह मन्त्रिणौ वानरेन्द्रस्य समीपमागतौ बभूवतुः । संमतौ उदारार्थदर्शिनौ च संमतोदारदर्शिनौ ॥ ४२ ॥

[4]प्लक्षश्चैव प्रभावश्च ‖मन्त्रिणावर्थधर्मयोः ।
वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः ॥ ४३ ॥

---

* महौघनिभमित्यनेन अप्रस्तुतमुच्यते ॥ † परन्तु 'लक्ष्मणस्य समीपतः' इति दर्शनात्, लक्ष्मणनिरोधप्रयत्नसूचकः सिंहनाद इति युक्तम् ॥ ‡ तेनैव समागतौ—तदाह्वानेन समागतौ-गो. § (पा.) संमतौ, दारदर्शिनौ—अन्तःपुरप्रवेशयोग्यौ—ती. ‖ अर्थधर्मयोर्मन्त्रिणौ उच्चावचं वक्तुं प्राप्तं लक्ष्मणं शशंसतुः — इति वा । अनेन तयोः स्वस्वामिनिष्ठा सूचिता ।

[1] लक्ष्मणं समुपस्थितम्-ङ. [2] ते मत्तेभनिभं, ते महेन्द्रनिभं-ङ. [3] संमतौ दारदर्शिनौ-छ. [4] यक्षश्चैव प्रभासश्च-ङ.

कौ तावित्यतः—प्लक्ष इत्यादि । अर्थधर्मयोरिति । विषय इति शेषः । उच्चावचं स्वराज्ञे वक्तुं तत्प्रस्तावनया तावल्लक्ष्मणं प्राशं शशंसतुः ॥ ४३ ॥

प्रसादयित्वा सुग्रीवं वचनैः [1]सामनिश्चितैः [2]।
आसीनं [3]पर्युपासीनौ यथा शक्रं मरुत्पतिम् [4] ॥ ४४ ॥

रामेण सामसंपादनाय निश्चितानि, तैस्तथा ॥ ४४ ॥

सत्यसन्धौ महाभागौ भ्रातरौ रामलक्ष्मणौ ।
[5]वयस्यभावं संप्राप्तौ राज्यार्हौ राज्यदायिनौ ॥ ४५ ॥

तयोरेको धनुष्पाणिः द्वारि तिष्ठति लक्ष्मणः ।
यस्य भीताः प्रवेपन्तः नादान् मुञ्चन्ति वानराः ॥ ४६ ॥

यस्य भीता इति । यस्मात् भीता इत्यर्थः ॥ ४६ ॥

स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः ।
व्यवसायरथः प्राप्तः तस्य रामस्य शासनात् ॥ ४७ ॥

रामवाक्यरूपः सारथिः—प्रवर्तकः यस्य स तथा ॥ ४७ ॥

अयं च दयितः, राजन्! तारायास्तनयोऽङ्गदः ।
लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयाऽनघ! ॥ ४८ ॥

---

[1] सार्थनिश्चितैः–ज. [2] एतदनन्तरं—सुग्रीवसचिवास्सर्वे मन्त्रार्थं समुपाविशन् । विनतश्च सुषेणश्च नीलोऽथ नल एव च ॥ अङ्गदो वायुपूनुश्च हनुमानपि बुद्धिमान् । एते सर्वे महात्मानः सुग्रीवं वानरोत्तमाः—इत्यधिकं–झ. [3] पर्युपासीनाः शक्र सुरगणा इव–झ. [4] एतदनन्तरं—बलविक्रमयुक्तश्च मन्त्रिणः स्वार्थनिर्णये । वक्तुरुच्चावचं प्राशं लक्ष्मणं ते शशंसिरे । प्रसादयित्वा सुग्रीवं वचनैः सामनिश्चयैः । उवाच हनुमान् वीरः यथा शक्रं बृहस्पतिः—इत्यधिकं–झ. [5] मनुष्यभावं–ज.

सोऽयं रोषपरीताक्षः द्वारि तिष्ठति वीर्यवान् ।
वानरान्, वानरपते! चक्षुषा निर्दहन्निव ॥ ४९ ॥
तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः सह बन्धुभिः ।
गच्छ शीघ्रं, महाराज! रोषो [1] ह्यस्य निवर्तताम् ॥ ५० ॥
यदाह रामो धर्मात्मा तत्कुरुष्व समाहितः ।
राजन्! तिष्ठ स्वसमये भव [2] सत्यप्रतिश्रवाः ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकत्रिंशः सर्गः

अकर्ध(५१ १/२)मानः सर्गः ॥ ५१ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां कीष्किन्धाकाण्डे एकत्रिंशः सर्गः

द्वात्रिंशः सर्गः

[हनुमन्मन्त्रालोचना]

* अङ्गदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह ।
लक्ष्मणं कुपितं श्रुत्वा † मुमोचासनमात्मवान् ॥ १ ॥

अथ कोपनिमित्तं मंत्रिभिस्सह मंत्रयन् बालतिपात एव निमित्तं नान्यदिति हनुमता बोध्यते । अङ्गदस्येत्यादि ॥ १ ॥

सचिवानब्रवीद्वाक्यं निश्चित्य गुरुलाघवम् ।
मन्त्रज्ञान् मन्त्रकुशलः मन्त्रेषु [4] परिनिष्ठितान् ॥ २ ॥

---

* अङ्गदस्य प्राधान्यात् अङ्गदस्य वचः श्रुत्वेत्युक्तम्–गो. अङ्गदस्य—अङ्गदप्रेरित-मन्त्रिणोः–शि. † आसनं मुमोच—भयेनासनादुदतिष्ठत्–गो. आसनात्—शयना-सनात्–शि.

[1] अयोपशाम्यताम्–ज. [2] सत्यप्रतिश्रवः–ज. [3] मन्त्रज्ञः–ङ. [4] परिनिष्ठितः–ज.

न मे दुर्व्याहृतं किञ्चित् नापि मे दुरनुष्ठितम् ।
लक्ष्मणो राघवभ्राता क्रुद्धः किमिति चिन्तये ॥ ३ ॥

दुर्व्याहृतं—अनुचितवचनम् । दुरनुष्ठितं—अनुचितकृत्यम् । अस्तीति शेषः । लक्ष्मण इत्यादि । अथाहेत्यादिः ॥ ३ ॥

* असुहृद्भिर्ममामित्रैः नित्यमन्तरदर्शिभिः ।
[1]मम दोषानसंभूतान् श्रावितो राघवानुजः ॥ ४ ॥

कोपकारणं संभावितं तूलयति—असुहृद्भिरित्यादि । असुहृद्भिः—वैरिभिः । अमित्रैः—अपकारिभिः ॥ ४ ॥

† अत्र तावद्यथा[2]बुद्धिः सर्वैरेव यथाविधि ।
भावस्य निश्चयस्तावत् विज्ञेयो निपुणं शनैः ॥ ५ ॥

अत्र—मित्रकोपविषये । तावत्—प्रथमतः । यथाबुद्धिः यथा—तत्त्वात्मिका बुद्धिः ज्ञानं यस्मिन् निश्चये स तथा । भावस्य निश्चय इति । कोपनिमित्तस्य निश्चय इत्यर्थः ॥ ५ ॥

‡ न खल्वस्ति मम त्रासः लक्ष्मणान्नापि राघवात् ।
मित्रं त्वस्थानकुपितं जनयत्येव संभ्रमम् ॥ ६ ॥

त्रासो नास्तीति । मदपराधमूल इत्यर्थः । तर्हि कुतश्चिन्तेत्यत्राह—मित्रमित्यादि । अस्थाने—अकाण्डे मदरातिप्रयुक्तमिथ्योपजापेन कुपितं—संजातकोपं यतः, अतः मे तत्तु संभ्रमं—भयं जनयत्येव । 'संभ्रमोऽत्यादरे भये' ॥ ६ ॥

---

* असुहृद्भिः—अशोभनहृदयैः—गो. तथा चेदं अमित्रविशेषणमिति भावः ।
† यथाविधि यथाबुद्धि च विज्ञेय इति वाऽन्वयः । ‡ निजभयकृतमासनचालनमपह्नुते—न खल्विति—गो. लब्धप्रतिष्ठाः खलु स्वदौर्बल्य अपह्नुवत इति कोऽकृत्त्वम् ॥

[1] गुणदोषा-ङ. [2] बुद्धि-ङ.

*सर्वथा सुकरं मित्रं दुष्करं परिपालनम् ।
अनित्यत्वात्तु चित्तानां प्रीतिरल्पेऽपि भिद्यते ॥ ७ ॥

अथ मित्रपरिपालनं अमित्रजोपजापपरिहारेण विना दुष्कर-मित्याह—सर्वथेत्यादि । उपजापतो मित्रभेदस्य संभावने हेतुमाह—अनित्यत्वादिति । अल्पेऽपीति । उपजाप इति शेषः ॥ ७ ॥

अतोनिमित्तं त्रस्तोऽहं रामेण तु महात्मना ।
यन्ममोपकृतं, शक्यं प्रतिकर्तुं न तन्मया ॥ ८ ॥

अतोनिमित्तं—अस्मादेव निमित्तात् । अरातिजोपजाप-निमित्तादित्यर्थः । अथ कृतज्ञतां स्वदोषशंकानिवृत्तये मंत्रिभ्यो दर्शयति—रामेणेत्यादि ॥ ८ ॥

†सुग्रीवेणैवमुक्तस्तु हनुमान् [1] मारुतात्मजः ।
उवाच स्वेन तर्केण मध्ये वानरमन्त्रिणाम् ॥ ९ ॥

अथ राज्ञा कोपनिमित्तं निश्चेतव्यमिति मंत्रिष्वनुशिष्टेषु मंत्रिप्रधानो हनुमान् निश्चिनोति निमित्तं—सुग्रीवेणेत्यादि । स्वेनैव तर्केण—स्वया युक्त्या ॥ ९ ॥

सर्वथा नैतदाश्चर्यं यस्त्वं, हरिगणेश्वर !
[2] न विस्मरसि सुस्निग्धं [3] उपकारकृतं शुभम् ॥ १० ॥

निश्चयं विवक्षुस्तावत् स्वस्य गुणग्राहित्वरूपं मंत्रिलक्षणं प्रकटयति—सर्वथेत्यादि ॥ १० ॥

---

*मित्रसंपादनं सुलभं, तस्यैकरूपतया परिपालनं दुष्करमित्यर्थः ॥ †अथ मुख्यमन्त्री हनुमान् कोपनिमित्तं निश्चिनोति—सुग्रीवेणेति—ति.

[1] हरियूथपः—ङ., हरिपुङ्गवः—ज. [2] न विस्मरस्यमुं स्निग्धं—ङ., न विस्मरस्यविक्लब्धं—ज. [3] उपकारं कृतं—ज.

राघवेण तु [1]वीरेण *भयमुत्सृज्य दूरतः ।
त्वत्प्रियार्थं हतो वाली शक्रतुल्यपराक्रमः ॥ ११ ॥

उपकारगौरवं दर्शयति—राघवेणेत्यादि । भयमुत्सृज्येति । त्वदुपदिष्टवालिबलादिनिमित्तमिति शेषः ॥ ११ ॥

सर्वथा प्रणयात् क्रुद्धः राघवो नात्र संशयः ।
भ्रातरं संप्रहितवान् लक्ष्मणं लक्ष्मिवर्धनम् ॥ १२ ॥

प्रणयात् क्रुद्धः इति । न तु किञ्चिदरातिजोपज्ञापतः इत्यर्थः ॥ १२ ॥

त्वं प्रमत्तो न जानीषे कालं, कालविदां वर !
फुल्लसप्तच्छदश्यामा †प्रवृत्ता तु [2]शरच्छिवा ॥ १३ ॥

ननु प्रणयकोपस्यापि केनचिन्निमित्ताभासेन भाव्यमित्यपेक्षायां तद्दर्शयति—त्वं प्रमत्त इत्यादि । कालमिति । प्रवृत्तप्रतिश्रुत-कालमित्यर्थः ॥ १३ ॥

निर्मलग्रहनक्षत्रा द्यौः प्रणष्टबलाहका ।
[3]प्रसन्नाश्च दिशः सर्वाः सरितश्च सरांसि च ॥ १४ ॥
प्राप्तमुद्योगकालं तु नावैषि, हरिपुङ्गव !
त्वं प्रमत्त इति व्यक्तं लक्ष्मणोऽयमिहागतः ॥ १५ ॥

व्यक्तमिति । ज्ञात्वेति शेषः ॥ १५ ॥

---

* भयं—वालिपराक्रमजं, वालिनश्छद्मेन वधकृतलोकापवादजं वा–ति. † शिवा शरत्, प्रवृत्ता—प्रकर्षेण वृत्ता, गतप्रायेति यावत्–ति.

[1] शूरेण–ङ. [2] शरच्छुभा–ज. [3] सुप्रसन्नाश्च सरितः प्रसन्नानि सरांसि च–ङ.

आर्तस्य हृतदारस्य परुषं पुरुषान्तरात् ।
वचनं मर्षणीयं ते राघवस्य महात्मनः ॥ १६ ॥

पुरुषान्तरात् प्रयुक्तं परुषं—पारुष्योपेतं वचनमपि मर्षणीयमिति । *सभावितमालक्ष्य स्वराज्ञोऽयमुपदेशः ॥ १६ ॥

कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम् ।
अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात् ॥ १७ ॥

नियुक्तैर्मन्त्रिभिर्वाच्यः ह्यवश्यं पार्थिवो हितम् ।
अत एव भयं त्यक्त्वा ब्रवीम्यवधृतं वचः । ॥ १८ ॥

नियुक्तैरिति । हितोपदेश इति शेषः । भयं त्यक्त्वा ब्रवीमीति । स्वराजानमपि कार्यवशात् परस्मा अञ्जलिमपि कुर्वि.ति निर्भयं वदामीत्यर्थः ॥ १८ ॥

अभिक्रुद्धः समर्थो हि चापमुद्य राघवः ।
सदेवासुरगन्धर्वं वशे स्थापयितुं जगत् ॥ १९ ॥

न स क्षमः कोपयितुं †यः प्रसाद्यः पुनर्भवेत् ।
पूर्वोपकारं स्मरता कृतज्ञेन विशेषतः ॥ २० ॥

तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः [1]ससुहृज्जनः ।
राजन् ! तिष्ठ स्वसमये भर्तुर्भार्येव तद्वशे ॥ २१ ॥

---

* स्वामिनां सन्निधौ तद्भृत्यैरेवंवचनं लोकन्याय इति भावः ॥ †पौरुषेण रामकोपस्य उत्तरदानं सर्वदाऽशक्यमित्यर्थः ॥

[1] सह बन्धुभि —ङ.

न रामरामानुजशासनं त्वया
कपीन्द्र ! [1] युक्तं मनसाऽप्यपोहितुम् ।
मनो हि ते ज्ञास्यति मानुषं बलं
* [2]सराघवस्यास्य सुरेन्द्रवर्चसः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे द्वात्रिंशः सर्गः

मन इत्यादि । सराघवस्य सलक्ष्मणस्यास्य रामस्य मानुषं—मनुष्यमर्यादासिद्धं बलं ते मनः जानात्येव, वालिवधादिना । अतः परं रावणवधे अमानुषमपि बलं ज्ञास्यति । आकार(२२ १/२)-मानः (?) सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे द्वात्रिंशः सर्गः

त्रयस्त्रिंशः सर्गः

[लक्ष्मणसान्त्वनम्]

अथ प्रतिसमादिष्टः लक्ष्मणः परवीरहा ।
प्रविवेश [3]गुहां [4]रम्यां किष्किन्धां रामशासनात् ॥ १ ॥

अथ राजानुमत्या अन्तःपुरं प्रविष्टात् लक्ष्मणात् भीतेन सुग्रीवेण तारया पत्न्या लक्ष्मणसान्त्वनम् । अथेत्यादि । प्रतिसमादिष्टः—प्रतिसन्देशं प्राप्तः † ॥ १ ॥

---

* सराघवस्य—राममहितस्य अस्य—लक्ष्मणस्य—शि. ति. † अङ्गदमुखादिति शेषः ॥ रामशासनादिति प्राथमिकनियोगस्मरणेन ॥

[1] शक्यं—ङ. [2] सलक्ष्मणस्यास्य—ङ. [3] शुभां—ङ. [4] घोरां—ङ.

द्वारस्था हरयस्तत्र महाकाया महाबलाः ।
बभूवुर्लक्ष्मणं दृष्ट्वा सर्वे प्राञ्जलयः स्थिताः ॥ २ ॥

निःश्वसन्तं तु तं दृष्ट्वा क्रुद्धं दशरथात्मजम् ।
बभूवुर्हरयस्त्रस्ताः *न चैनं पर्यवारयन् ॥ ३ ॥

स तां रत्नमयीं श्रीमान् दिव्यां पुष्पितकाननाम् ।
रम्यां रत्नसमाकीर्णां ददर्श महतीं गुहाम् ॥ ४ ॥

पुष्पितानि काननानि उपवनानि—यस्यां सा तथा । रत्नसमाकीर्णां—प्रशस्तानेकपदार्थसमाकीर्णाम् ॥ ४ ॥

†हर्म्यप्रासादसंबाधां नाना[1]पण्योपशोभिताम् ।
सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभिताम् ॥ ५ ॥

अस्यैव प्रपञ्चः—हर्म्येत्यादि । सर्वदा अपेक्षितफलोपेताः—सर्वकामफलाः ॥ ५ ॥

देवगन्धर्वपुत्रैश्च वानरैः कामरूपिभिः ।
दिव्यमाल्याम्बरधरैः शोभितां प्रियदर्शनैः ॥ ६ ॥
चन्दनागरु‡पद्मानां गन्धैः सुरभि[2]गन्धिताम् ।
मैरेयाणां मधूनां च संमोदितमहापथाम् ॥ ७ ॥

पद्मं—पद्माख्यं गन्धद्रव्यम् ॥ ७ ॥

---

* भयाद् उपसर्पितुं नाशक्नुवन्नित्यर्थः । † हर्म्याः—धनिनां गृहाः । प्रासादाः-देवगृहाः—गो. ‡ पद्मानां—आलेपविशेषाणां—गो.

[1] रत्नौघ—ज. [2] गन्धिनाम्—ङ.

[1] [विन्ध्यमेरुगिरिप्रख्यैः प्रासादैरुपशोभिताम् ।]
ददर्श * गिरिनद्यश्च विमलास्तत्र राघवः ।
† अङ्गदस्य गृहं रम्यं मैन्दस्य द्विविदस्य च ॥ ८ ॥
गवयस्य गवाक्षस्य गजस्य शरभस्य च ।
विद्युन्मालेश्च संपातेः सूर्याक्षस्य हनूमतः ॥ ९ ॥
वीरबाहोः सुबाहोश्च [2] नलस्य [3] च महात्मनः ।
कुमुदस्य सुषेणस्य तारजाम्बवतोस्तथा ॥ १० ॥
दधिवक्त्रस्य नीलस्य सुपाटलसुनेत्रयोः ।
एतेषां कपिमुख्यानां राजमार्गे महात्मनाम् ॥ ११ ॥
ददर्श गृहमुख्यानि ‡ महासाराणि लक्ष्मणः ।
पाण्डुराभ्रप्रकाशानि [4] दिव्यमाल्ययुतानि च ॥ १२ ॥
प्रभूतधनधान्यानि स्त्रीरत्नैः शोभितानि च ।
पाण्डुरेण तु [5] सालेन परिक्षिप्तं दुरासदम् ॥ १३ ॥
वानरेन्द्रगृहं रम्यं महेन्द्रसदनोपमम् ।
शुक्लैः प्रासादशिखरैः कैलासशिखरोपमैः ॥ १४ ॥
[6] सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभितम् ।
महेन्द्रदत्तैः श्रीमद्भिः नीलजीमूतसन्निभैः ।
दिव्यपुष्पफलैर्वृक्षैः शीतच्छायैर्मनोरमैः ॥ १५ ॥
महेन्द्रदत्तैः वृक्षैः—कल्पवृक्षैरित्यर्थः ॥ १५ ॥

---

* गिरिनद्यः—गिरिनदीः, व्यत्ययात् द्वितीया—गो. † एषु कपिषु बहवः किष्किन्धाया बहिर्वर्तन्त इति ३९ सर्गे ज्ञायते, अथापि तेषां गृहाणि राजधान्यामपि प्रत्येकं वर्तन्त इति न विरोधः ॥ ‡ महासाराणि—अतिदृढनि—गो.

[1] इदमर्धं कुण्डलितं—ङ. [2] बलस्य—ङ. [3] पनसस्य च—ङ. [4] गन्धमाल्य—ञ. [5] शैलेन—ञ. [6] सर्वकाल—ङ.

हरिभिः संवृतद्वारं बलिभिश्शस्त्रपाणिभिः ।
दिव्यमाल्यावृतं शुभ्रं तप्तकाञ्चनतोरणम् ॥ १६ ॥

सुग्रीवस्य गृहं रम्यं प्रविवेश महाबलः ।
अवार्यमाणः सौमित्रिः महाभ्रमिव भास्करः ॥ १७ ॥

स सप्तकक्ष्या धर्मात्मा [1]नानाजनसमाकुलाः ।
प्रविश्य [2]सुमहद्गुप्तं ददर्शान्तःपुरं महत् ॥ १८ ॥

हैमराजतपर्यङ्कैः बहुभिश्च वरासनैः ।
महार्हास्तरणोपेतैः तत्र [3]तत्रोपशोभितम् ॥ १९ ॥

प्रविशन्नेव सततं शुश्राव मधुर[4]स्वरम् ।
तन्त्रीगीतसमाकीर्णं [5]समगीतपदाक्षरम् ॥ २० ॥

सततं—वीणादिवादनघोषसहितं मधुरस्वरं उच्यमानविशेषणं शुश्राव ॥ २० ॥

बह्वीश्च विविधाकाराः रूपयौवनगर्विताः ।
स्त्रियः सुग्रीवभवने ददर्श स महाबलः ॥ २१ ॥

दृष्ट्वाऽभिजनसंपन्नाः चित्रमाल्यकृतस्रजः ।
*[6]वरमाल्यकृतव्यग्राः भूषणोत्तमभूषिताः ॥ २२ ॥

अभिजनसंपन्नाः—आभिजात्यसंपन्नाः । वरमाल्यकृतव्यग्राः उत्तमस्य माल्यस्य स्रगर्थं ग्रहे कृतव्यग्राः । दिव्यस्रङ्निर्माणव्यग्राः इत्यर्थः ॥ २२ ॥

---

* वरमाल्यानां—उत्तमस्रजां कृतं—करणं, तत्र व्यग्राः—ति.

[1] यानासनसमावृताः–ज. [2] बलिभिर्गुप्तं–ङ. [3] वत्र समावृतम्–ज
[4] स्वनम्–ज. [5] समताल–ज. [6] फलमाल्य–ङ.

नातृप्तान्नापि चाव्यग्रान् नानुदात्तपरिच्छदान् ।
सुग्रीवानुचरांश्चापि लक्षयामास लक्ष्मणः ॥ २३ ॥

अव्यग्रान्—परिचर्यात्वरारहितान् । अनुदात्तपरिच्छदान्—प्रशस्तालंकाररहितान् ॥ २३ ॥

कूजितं नूपुराणां च काञ्चीनां निनदं तथा ।
सन्निशम्य ततः श्रीमान् *सौमित्रिर्लज्जितोऽभवत् ॥२४॥

सौमित्रिः लज्जितोऽभवदिति । अस्मदयोध्यायामप्येवं सौभाग्यं नास्ति राज्ञामप्यस्माकमिति लज्जा ॥ २४ ॥

†रोषवेग[1]प्रकुपितः श्रुत्वा चाभरणस्वनम् ।
चकार ज्यास्वनं वीरः दिशश्शब्देन पूरयन् ॥ २५ ॥

आभरणस्वनमपि श्रुत्वा रोषवेगप्रकुपित इति ‡। प्राक् सामान्यतः स्थिररोषेणातिवृद्धिं प्राप्तः इत्यर्थः । नेदानीमपि कामभोगं जयतीति कोपवृद्धिः । तन्नाशाय तु ज्यास्वनं चकार ॥ २५ ॥

चारित्रेण महाबाहुः अपकृष्टः स लक्ष्मणः ।
तस्थावेकान्तमाश्रित्य [2]रामशोकसमन्वितः ॥ २६ ॥

स्त्रीगोष्ठ्यां नास्माभिः प्रवेष्टव्यमिति चारित्रेण—स्वोचितचारित्रेण पर्यालोचनया अपकृष्टः—अपवारितान्तःपुरप्रवेशः सन्

---

* कोपवेगाववशस्यान्तःपुरप्रवेशप्रत्यभिशया लज्जा—इति युक्तम् । अत एव तदुपरि नागच्छत् सः । अनन्तरश्लोका द्रष्टव्याः ॥ † रोषवेगप्रकुपितः—रोषप्रवृद्धः । प्रकोपशब्दो ह्यभिवृद्धिवाची—गो. ‡ वस्तुतस्तु तत्रैव स्थित्वा ज्यास्वनकरणे हेतुः—श्रुत्वा चाभरणस्वनमिति ॥

[1] प्रचलितः—ङ.   [2] रामकोप—ज.

एकान्तदेशमाश्रित्य रामकोपसमन्वितः—रामकार्यप्रवृत्त्यदर्शनजकोपेन समन्वितः तस्थौ ॥ २६ ॥

तेन चापस्वनेनाथ सुग्रीवः प्लवगाधिपः ।
विज्ञायागमनं त्रस्तः संचचाल वरासनात् ॥ २७ ॥
[1][अङ्गदेन यथा मह्यं पुरस्तात् प्रतिवेदितम् ।
सुव्यक्तमेष [2]संप्राप्तः सौमित्रिर्भ्रातृवत्सलः ॥]
*अङ्गदेन समाख्यातं ज्यास्वनेन च वानरः ।
बुबुधे लक्ष्मणं प्राप्तं मुखं चास्य व्यशुष्यत ॥ २८ ॥

प्राप्तलक्ष्मणावगत्यनुवादपूर्वकं कविः तन्निमित्तं विकारं दर्शयति—अङ्गदेन समाख्यातमिति ॥ २८ ॥

ततस्तारां हरिश्रेष्ठः सुग्रीवः प्रियदर्शनाम् ।
उवाच हितमव्यग्रः त्राससंभ्रान्तमानसः ॥ २९ ॥
किं नु [3]तत्कारणं, सुभ्रु! प्रकृत्या मृदुमानसः ।
सरोष इव संप्राप्तः येनायं राघवानुजः ॥ ३० ॥

सरोष इव—सरोष एवेत्यर्थः† ॥ ३० ॥

किं पश्यसि कुमारस्य रोषस्थानं, अनिन्दिते !
न खल्वकारणे कोपं आहरेन्नरसत्तमः ॥ ३१ ॥

रोषस्थानं—अपराधम् ॥ ३१ ॥

यदस्य कृतमस्माभिः बुध्यसे किञ्चिदप्रियम् ।
तद्बुद्ध्या संप्रधार्याशु क्षिप्रमर्हसि ‡भाषितुम् ॥ ३२ ॥

अस्य अस्माभिः कृतं यत्किञ्चिदित्यन्वयः ॥ ३२ ॥

---

* अङ्गदेन समाख्यातं, तेनेति अर्धत्रिद्धम् । † वस्तुतस्तु—'कुपित इव दृश्यते' इति लोकवदुक्तिरियम् । ‡ भाषितुमिति । मह्यमिति शेषः ।

[1] इदं पद्यं कुण्डलितं—ङ. [2] मां प्राप्तः—ङ. [3] तद्कारणं—ञ.

अथ वा स्वयमेवैनं द्रष्टुमर्हसि [1]भामिनि पितुम् ।
वचनैः सान्त्वयुक्तैश्च प्रसादयितुमर्हसि ॥ ३३ ॥

निर्निमित्तकोपासंभवात् निमित्तमत्र निश्चित्य द्रक् समीपगमनं अनुचितमिति पक्षान्तरं गृह्णाति—अथ वेत्यादि । स्वयमिति । मां विहायेत्यर्थः ॥ ३३ ॥

[2]त्वद्दर्शनविशुद्धात्मा न स कोपं करिष्यति ।
न हि स्त्रीषु महात्मानः क्वचित् कुर्वन्ति दारुणम् ॥३४॥

विशुद्धात्मा—गतक्रोधान्तःकरणः ॥ ३४ ॥

त्वया सान्त्वै*रुपक्रान्तं प्रसन्नेन्द्रियमानसम् ।
ततः कमलपत्राक्षं द्रक्ष्याम्यहमरिन्दमम् ॥ ३५ ॥

उपक्रान्तं—उपक्रान्तक्षमापगम् ॥ ३५ ॥

सा प्रस्खलन्ती मदविह्वलाक्षी
　प्रलम्बकाञ्चीगुणहेमसूत्रा ।
[3]सलक्षणा लक्ष्मणसन्निधानं
　जगाम तारा नमिताङ्गयष्टिः ॥ ३६ ॥
स तां समीक्ष्यैव हरीशपत्नीं
　तस्थावुदासीनतया महात्मा ।
अवाङ्मुखोऽभून्मनुजेन्द्रपुत्रः
　स्त्रीसन्निकर्षाद्विनिवृत्त[4]कोपः ॥ ३७ ॥

---

* उपक्रान्तं—उपागतं-गो.

[1] भामिनि-ज.　[2] त्वद्दर्शने-ज.　[3] सुलक्षणा-ङ.　[4] रोषः-ङ.

हरीशपत्नीं—सुग्रीवपत्नीम्। एतत्पत्नीत्वं 'सा प्रस्खलन्ती' इत्यादिप्रागुक्तविशेषणैः स्पष्टम्। 'भर्ता भर्तृहिते युक्ते' इत्यग्रिमवचनप्रामाण्याच्च ॥ ३७ ॥

सा पानयोगाद्विनिवृत्तलज्जा
* दृष्टि[1]प्रसादाच्च नरेन्द्रसूनोः।
उवाच तारा प्रणयप्रगल्भं
वाक्यं महार्थं [2]परिसान्त्वपूर्वम् ॥ ३८ ॥

प्रणयप्रगल्भं—मैत्रीसमर्थनसमर्थम् ॥ ३८ ॥

किं कोपमूलं, मनुजेन्द्रपुत्र!
कस्ते न संतिष्ठति वाङ्निदेशे?
कः शुष्कवृक्षं वनमापतन्तं
दवाग्निमासीदति निर्विशङ्कम्? ॥ ३९ ॥

वाङ्निदेशे—अनुशिष्टकार्यानुष्ठाने। आपतन्तं—दग्ध्वाऽऽगच्छन्तम् ॥ ३९ ॥

स तस्या वचनं श्रुत्वा सान्त्वपूर्व[3]मसंशयम्।
† भूयः प्रणयदृष्टार्थं लक्ष्मणो वाक्यमब्रवीत् ॥ ४० ॥

भूयः—अभ्यधिकम्। प्रणयप्रकाशनपूर्वं दृष्टः अर्थः यस्मिन् स तथा ॥ ४० ॥

किमयं कामवृत्तस्ते लुप्तधर्मार्थसंग्रहः।
भर्ता, भर्तृहिते युक्ते! न चैनमवबुध्यसे ॥ ४१ ॥

अयं ते भर्ता लुप्तधर्मार्थसंग्रहो वर्तते, किमेनं नावबुध्यसे ॥ ४१ ॥

---

* दृष्टिप्रसादादिति। तस्य कोपशान्त्येत्यर्थः॥ † भूय इति। तारादर्शनेनैव कोपः शान्तः। तद्वाक्यात्तु प्रीतिरप्यभूदिति भावः॥

[1] प्रसाराच्च, प्रचाराच्च—ङ. [2] परिसान्त्वरूपम्—ज. [3] मशङ्कितः—ज.

न चिन्तयति *राज्यार्थं नास्मान् शोकपरायणान् ।
†[1]सामात्यपरिषत्, तारे! पानमेवोपसेवते ॥ ४२ ॥

उक्तमेव लुप्तधर्मत्वादिकं स्पष्टयति—न चिन्तयतीत्यादि। सामात्यपरिषत्, भूत्वेति शेषः ॥ ४२ ॥

स मासांश्चतुरः कृत्वा प्रमाणं प्लवगेश्वरः ।
व्यतीतांस्तान् [2]मदव्यग्रः विहरन्नावबुध्यते ॥ ४३ ॥
न हि धर्मार्थसिध्यर्थं पानमेवं प्रशस्यते ।
पानादर्थश्च धर्मश्च कामश्च परिहीयते ॥ ४४ ॥
धर्मलोपो महांस्तावत् [3]कृते ह्यप्रतिकुर्वतः ।
अर्थलोपश्च मित्रस्य नाशे गुणवतो महान् ॥ ४५ ॥

महान् धर्मलोपः—प्रतिज्ञातिलङ्घनरूपः । तावत्—प्रथमतः कृतः । ततः किमित्यतः—अर्थेत्यादि । अप्रतिकुर्वतः अस्य तु गुणवतो मित्रस्य नाशे सति महान् अर्थलोपश्च प्राप्नोति ॥ ४५ ॥

‡मित्रं ह्यर्थगुणश्रेष्ठं सत्यधर्मपरायणम् ।
तद्द्वयं तु परित्यक्तं न तु धर्मे व्यवस्थितम् ॥ ४६ ॥

---

* राज्यार्थं—राज्यरूपं अर्थं इत्यर्थः ॥ † सामात्यपरिषत् राज्यं न चिन्तयति, इति वाऽन्वयः ॥ ‡ गुणशब्दः कामवाची। अर्थकामयोर्मूलत्वात् मित्रं ताभ्यां श्रेष्ठम् । तद्दृशं मित्रं त्यजता सुग्रीवेण तद्द्वयं—अर्थकामद्वयं परित्यक्तम्—ती., गो. वस्तुतस्तु—'अर्थलोपश्च मित्रस्य नाशे' इत्युक्तमेवोपपादयति—मित्रमिति। अर्थस्य—अर्थरूपपुरुषार्थस्य ये गुणाः—स्वेष्टसाधनत्वादयः, तैः श्रेष्ठं मित्रं—तत्तादृशं सत्यधर्मपरायणं मित्रं यदा परित्यक्तं तदा द्वयं अर्थधर्मरूपं द्वयं परित्यक्तमेव। स्वतोऽपि न धर्मे व्यवस्थितम् इत्यर्थः ॥

[1] सामान्यपरिषत्–ज. [2] मदोदग्रः–ज. [3] कृतेऽप्रति–ङ.

मित्रं हीत्यादि । अर्थगुणश्रेष्ठं मित्रार्थसाधनलक्षणप्रशस्तं, तथा सत्यधर्मपरायणमेव च हि मित्रं प्रसिद्धम् । तद्द्वयं—उक्तमित्रलक्षणद्वयं तु तव भर्त्रा परित्यक्तम् । न तु मैत्रीपरिपालनरूपे धर्मे व्यवस्थितम् ॥ ४६ ॥

तदेवं प्रस्तुते कार्ये कार्यमस्माभिरुत्तरम् * ।
यत् कार्यं, कार्यतत्त्वज्ञ ! तदुदाहर्तुमर्हसि ॥ ४७ ॥

तत्—तस्मात् एवं स्थिते सति प्रस्तुते कार्ये तत्सिद्धिनिमित्तं यत् कार्यं अस्माभिः उत्तरं—उत्तमं, तत् कार्यं उदाहर्तुमर्हसि ॥ ४७ ॥

सा तस्य धर्मार्थसमाधियुक्तं
निशम्य वाक्यं [1]मधुरस्वभावम् ।
†[2]ताराऽगतार्थे मनुजेन्द्रकार्ये
विश्वासयुक्तं तमुवाच भूयः ॥ ४८ ॥

---

* एवं कपिराजेनोपेक्षिते उत्तरं कार्यं—एतदनन्तरकर्तव्यं कार्यं त्वमेव वक्तुमर्हसि—इति लोकवदुक्तिः ॥ † गतार्थां—अवगतप्रयोजना—ती. गतार्थे—प्रयोजनयुक्ते—गो. आगतार्था—आगतलक्ष्मणाऽऽगमनप्रयोजना—रा. गतार्थे मनुजेन्द्रकार्ये विश्वासयुक्तं—क्रियाविशेषणं, वाक्यमित्यनुषङ्गो वा—[illegible] । गतार्थत्वमेवोच्यते उत्तरत्र—'उद्योगस्तु चिराज्ञप्तः' (श्लो. ५७) इत्यादिना । अत एव 'न कोपकालः' इति च ॥

[1] मधुरस्वभावा—ङ. [2] तारा गतार्थे—ङ.

धर्मार्थसमाधियुक्तं—तत्संबन्धयुक्तम् । अगतार्थे—अदृष्टप्रयोजने मनुजेन्द्रकार्ये विश्वासयुक्तं—प्रमाणयुक्तं यथा तथा लक्ष्मणं भूयः—पुनश्च उवाच ॥ ४८ ॥

*न कोपकालः, क्षितिपालपुत्र !
[1]न चातिकोपः स्वजने विधेयः ।
त्वदर्थकामस्य जनस्य तस्य
प्रमादमप्यर्हति, वीर ! सोढुम् ॥ ४९ ॥

न कोपकाल इति । अर्थस्यागतत्वादित्याशयः । प्रमादं—अज्ञानमूलापराधम् ॥ ४९ ॥

कोपं कथं नाम गुणप्रकृष्टः
कुमार ! कुर्यादपकृष्टसत्त्वे ।
कस्त्वद्विधः कोपवशं हि गच्छेत्
सत्त्वावरुद्धः तपसः प्रसूतिः ॥ ५० ॥

सोढव्यतामेव समर्थयति—कोपं कथं नामेत्यादि । †सत्त्वावरुद्धः—सहजसत्त्वगुणावरुद्धव्यापारः । अत एव—तपसः प्रसूतिः ॥

---

*न कोपकाल इत्यत्र हेतुः ५२ श्लोके स्पष्टः ॥ †अवरुद्धत्वं—सहितत्वं, तच्च कार्ये पर्यवस्यतीत्याशयः ॥

[1] न चापि कोपः-ज.

जानामि [1]कोपं हरिवीरबन्धोः*
जानामि कार्यस्य च कालसङ्गम् ।
जानामि कार्यं त्वयि यत्कृतं नः
तच्चापि जानामि यदत्र कार्यम् ॥ ५१ ॥

जानामि कोपमिति । रामस्य कोपनिमित्तमित्यर्थः । तत्कोपनिमित्तभूतं कालस्य सङ्गं—विलम्बं च जानामि । त्वय्यायत्तं नः कृतं—कार्यं राज्यदानलक्षणं च जानामि । यदत्र कार्यं—प्रतिकर्तव्यरूपं तदपि च जानामि ॥ ५१ ॥

[2]तच्चापि जानामि यथाऽविषह्यं
बलं, नरश्रेष्ठ! शरीरजस्य ।
जानामि यस्मिंश्च [3]जनेऽवबद्धं
कामेन सुग्रीवम्†असक्तमद्य ॥ ५२ ॥

अथापि नेदानीं ते कोपो युक्तः इत्यत्र हेतुमपि जानामीत्याह—तच्चापीत्यादि । शरीरजस्य—कामस्य बलमपि अविषह्यमित्यपि जानामि । तथा सुग्रीवं यस्मिंश्च जने स्त्रीजने कामेनावबद्धं जानामि, तथा अद्य अत्र कृत्ये असक्तमपि जानामि ॥ ५२ ॥

---

* हरिवीरस्य—सुग्रीवस्य बन्धुः रामः ॥ † असक्तं—अनवरतं—गो., ती. सङ्ग—विलम्बः, तद्रहितमित्यर्थः इत्याशयः ॥

[1] रोषं—ङ. [2] इदं पद्यमधिकं—झ. [3] जनेऽनुबद्धं—ङ.

* न कामतन्त्रे तव बुद्धिरस्ति
त्वं वै यथा मन्युवशं प्रपन्नः ।
न देशकालौ हि [1] न चार्थधर्मौ
[2] अवेक्षते कामरतिर्मनुष्यः ॥ ५३ ॥

तव च कामतंत्रे—कामस्वभावपरिज्ञाने बुद्धिः नास्ति । कुत एवं ते बुद्धिः इत्यत आह—त्वं वै इत्यादि । त्वं वै यथा स्वानुभवेनैव मन्युवशं प्रपन्नः दृश्यसे, तस्मादेव । कामस्वभावपरिज्ञत्वे तु तव कोपो न समस्तीत्याशयेनाह—न देशकालावित्यादि ॥ ५३ ॥

तं कामवृत्तं † मम सन्निकृष्टं
कामाभियोगाच्च [3] निवृत्तलज्जम् ।
क्षमस्व तावत्, परवीरहन्तः !
‡ त्वद्भ्रातरं वानरवंशनाथम् ॥ ५४ ॥

मम संनिकृष्टमिति । तस्मिन्समये मम समीपे कामवशात् वर्तमानमित्यर्थः । क्षमस्वेति । परवशप्रवृत्तापराधत्वात् क्षमैवात्र योग्या, न ते कोपो योग्य इत्यर्थः ॥ ५४ ॥

महर्षयो धर्मतपोऽभि[4]कामाः
कामानुकामाः प्रतिबद्धमोहाः ।
अयं प्रकृत्या चपलः कपिस्तु
कथं न सज्जेत सुखेषु राजा ॥ ५५ ॥

---

* कामप्रभावः न त्वया ज्ञातुं शक्यः । किन्तु एतावद्वक्तुं शक्यते, यथा वा तव कोप दुर्निग्रहो भाति, तथैवायमपि कामः कैश्चित् न निगृहीतुं शक्य इति त्वया भाव्यमिति वा ॥ † 'मम सन्निहितबन्धुः' इत्यादि लोकव्यवहार इव सन्निकृष्टत्वं बोध्यम् ॥
‡ 'त्वद्भ्रातरं' इति अनुनयार्थवचनम् ।

[1] यथार्थधर्मौ—च., ज. [2] अवेक्षते—च., ज. [3] विमुक्तलज्जम्—ज. [4] रामाः—ज.

कामवशप्राप्तिरपि नास्यैकस्यापराधः इत्याह—महर्षय इत्यादि। कामे—कामोपभोगे अनुकामः—अभिलाषः येषां ते तथा ॥ ५५ ॥

इत्येवमुक्त्वा वचनं महार्थं
सा वानरी लक्ष्मणमप्रमेयम् ।
पुनः[1]ससखेलं मदविह्वलं च
भर्तुर्हितं वाक्यमिदं बभाषे ॥ ५६ ॥

भर्तुर्हितमिति। उद्दिश्येति शेषः ॥ ५६ ॥

उद्योगस्तु चिराज्ञप्तः सुग्रीवेण, नरोत्तम !
कामस्यापि विधेयेन तवार्थप्रतिसाधने ॥ ५७ ॥

चिराज्ञप्तः—त्वदागमनात् पूर्वमेवेत्यर्थः ॥ ५७ ॥

आगता हि महावीर्याः [2]हरयः कामरूपिणः ।
कोटीशतसहस्राणि नानानगनिवासिनः ॥ ५८ ॥

कामविधेयस्य तस्य उद्योगाज्ञप्तिः अश्रद्धेयेत्याशंक्याह—आगता हीत्यादि। कोटीशतसहस्राणीति बहुत्वमात्रे तात्पर्यम्। न तत्संख्यायाम् ॥ ५८ ॥

तदागच्छ, महाबाहो ! चारित्रं रक्षितं त्वया ।
*अच्छलं मित्रभावेन सतां दारावलोकनम् ॥ ५९ ॥

---

* 'पुरुषेण अन्तःपुरं न प्रवेष्टव्यं' इति भावनया तत्र बहिरेवावस्थानेन स्वस्वरूपं संरक्षितम्। परन्तु अस्माभिरेवान्तराह्वानेऽन्तःपुरप्रवेशः सुहृद्वस्य तव न दुष्यतीत्याशयः—तारावाक्यस्य ॥

[1] सखेदं मदविह्वलाक्षी-ङ. [2] कपयः-ङ.

चारित्रं रक्षितमिति। द्रागन्तःपुरानागमनेनेति शेषः। ननु कथं अन्तःपुरागमनं युज्यते इत्यत्राह—अच्छलमित्यादि। छलं अधर्मः, स न भवतीत्यर्थः। मित्रभावेनेति। न तु विकारेणेत्यर्थः॥

तारया चाभ्यनुज्ञातः त्वरया चापि चोदितः।
प्रविवेश महाबाहुः अभ्यन्तरमरिन्दमः॥ ६०॥
ततः सुग्रीवमासीनं काञ्चने परमासने।
महार्हास्तरणोपेते ददर्शादित्यसन्निभम्॥ ६१॥
दिव्याभरणचित्राङ्गं दिव्यरूपं यशस्विनम्।
दिव्यमाल्याम्बरधरं [1]महेन्द्रमिव दुर्जयम्॥ ६२॥
दिव्याभरणमाल्याभिः प्रमदाभिः [2]समं ततः।
[3]संरब्धतररक्ताक्षः बभूवान्तकसन्निभः॥ ६३॥

प्रमदाभिः समं ददर्शेत्यन्वयः। तत एव हेतोः संरब्धतरः, अत एव रक्ताक्षश्च तथा॥ ६३॥

रुमां तु वीरः परिरभ्य गाढं
वरासनस्थो वरहेमवर्णः।
ददर्श सौमित्रिमदीनसत्त्वं
विशालनेत्रः [4]सुविशालनेत्रम्॥ ६४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः

———

परिरभ्य आसने स्थित एव सन् ददर्श। वात(६४)मानः सर्गः॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः

———

[1] महेन्द्रमद्भुतद्युतिम्—ङ. [2] समावृतम्—ङ. [3] तं दृष्ट्वा क्रोधताम्राक्षः—ङ.
[4] स विशाल—ज.

चतुस्त्रिंशः सर्गः

[सुग्रीवतर्जनम्]

*तमप्रतिहतं क्रुद्धं प्रविष्टं पुरुषर्षभम् ।
सुग्रीवो लक्ष्मणं दृष्ट्वा बभूव व्यथितेन्द्रियः ॥ १ ॥

अथ लक्ष्मणेन सुग्रीवाय रामोपदिष्टकोपवचनम् । तमप्रतिहतमित्यादि ॥ १ ॥

क्रुद्धं निःश्वसमानं तं प्रदीप्तमिव तेजसा ।
भ्रातुर्व्यसनसन्तप्तं दृष्ट्वा दशरथात्मजम् ॥ २ ॥
उत्पपात हरिश्रेष्ठः हित्वा सौवर्णमासनम् ।
महान् महेन्द्रस्य यथा †स्वलंकृत इव ध्वजः ॥ ३ ॥

महन् महेन्द्रस्य ध्वजः यथा स्वलंकृतः, तथा स्वलंकृतः महेन्द्रध्वज इव उत्पपात ॥ ३ ॥

उत्पतन्तमनूत्पेतुः रुमाप्रभृतयः स्त्रियः ।
सुग्रीवं गगने [1]पूर्णचन्द्रं तारागणा इव ॥ ४ ॥

अनूत्पेतुः—पश्चात् उत्थितवत्यः ॥ ४ ॥

‡संरक्तनयनः श्रीमान् [2]विचचाल कृताञ्जलिः ।
बभूवावस्थितस्तत्र कल्पवृक्षो महानिव ॥ ५ ॥
रुमाद्वितीयं सुग्रीवं नारीमध्यगतं स्थितम् ।
अब्रवील्लक्ष्मणः क्रुद्धः सतारं शशिनं यथा ॥ ६ ॥

शशिनं यथेति । शशिनमिव स्थितमित्यर्थः ॥ ६ ॥

---

* अप्रतिहतं—केनाप्यप्रतिबद्धं-ति. केनापि प्रतिरोद्धुमशक्यमिति भावः ॥
† स्वलङ्कृतः ध्वज इव स्थितः हरिश्रेष्ठ इति वाऽन्वयः ॥ ‡ संरक्तनयनः, मदेनेति शेषः-गो.

[1] तूर्ण-च. [2] मदलोलः-ङ.

सत्त्वाभिजनसंपन्नः सानुक्रोशो जितेन्द्रियः ।
कृतज्ञः सत्यवादी च राजा लोके महीयते ॥ ७ ॥

राज्यार्हतदनर्हराजलक्षणं प्रकृतोपनयनशेषतया सामान्यतो दर्शयति—सत्त्वेत्यादि ॥ ७ ॥

यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणाम् ।
मिथ्याप्रतिज्ञां कुरुते को नृशंसतरस्ततः ? ॥ ८ ॥

अधर्मे स्थितः । अधर्ममार्गावलम्बीत्यर्थः । नृशंसतर इति । क्रूरतर इत्यर्थः ॥ ८ ॥

शतमश्वानृते हन्ति सहस्रं तु गवानृते ।
*आत्मानं स्वजनं हन्ति पुरुषः पुरुषानृते ॥ ९ ॥

असत्यदोषं च प्रकृतशेषतया दर्शयति—शतमित्यादि । एकाश्वनिमित्तके अनृते—दानादिप्रतिश्रवहाने सति सोऽनृतवादी शतं हन्ति—शताश्वहननदोषभाग् भवति । तथा अग्रेऽपि । पुरुषानृते—पुरुषविषयकिञ्चिदुपकारादिप्रतिश्रवनाशने सति, सः पुरुषः प्रथमं आत्मानं हन्ति—निजपुण्यलोकं नाशयति । अनन्तरं स्वजनं च हन्ति—स्वपित्रादिपुण्यलोकं च नाशयति ॥ ९ ॥

पूर्वं कृतार्थो मित्राणां न तत् प्रतिकरोति यः ।
कृतघ्नः सर्वभूतानां स वध्यः, प्लवगेश्वर ! ॥ १० ॥

अथ कृतघ्नतादोषं च प्रकृतशेषतया दर्शयति—पूर्वमित्यादि । सर्वभूतानां वध्यः इति कृद्योगे षष्ठी । सर्वलोकबहिष्कार्यः इत्यर्थः ॥

* आत्मानं हन्ति–ति., गो.

गीतोऽयं *ब्रह्मणा श्लोकः सर्वलोकनमस्कृतः† ।
दृष्ट्वा कृतघ्नं क्रुद्धेन तं निबोध, प्लवङ्गम! ॥ ११ ॥

न केवलं पूर्वमित्युक्तश्लोकः स्वकपोलकल्पितः इत्याह—गीत इत्यादि । ब्रह्मणा—श्रीहिरण्यगर्भेण गीतः, अत एव सर्वलोकनमस्कृतः—ब्रह्मदेव सर्वस्मर्तृप्रथमोदाहरणपरिगृहीतः इत्यर्थः । उक्तमर्थं प्रकृते योजयति—दृष्ट्वेत्यादि । त्वां कृतघ्नं दृष्ट्वा क्रुद्धेन रामेण यदुक्तं तं च निबोध—अवगच्छ ॥ ११ ॥

[1]गोघ्ने चैव सुरापे च चोरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति ‡निष्कृतिः ॥१२॥

किमुक्तमित्यतः—गोघ्न इत्यादि ॥ १२ ॥

अनार्यस्त्वं कृतघ्नश्च मिथ्यावादी च, वानर!
पूर्वं §कृतार्थो रामस्य न तत् प्रतिकरोषि यत् ॥ १३ ॥

परिगणितेषु कोऽहमस्मीत्यत्राह—अनार्यस्त्वमित्यादि । कुतो मे कृतघ्नत्वमित्यतः—पूर्वमित्यादि ॥ १३ ॥

ननु नाम कृतार्थेन त्वया रामस्य, वानर!
सीताया मार्गणे यत्नः कर्तव्यः कृतमिच्छता ॥ १४ ॥

अथ मिथ्यावादित्वं च बोधयति—ननु नामेत्यादि । आमंत्रणप्रसिद्ध्योः ननुनामशब्दौ । मार्गणे यत्न इति । प्राक् प्रतिज्ञात इति शेषः । कृतं इच्छता—कृतस्य प्रतिकृतिं कर्तुमिच्छता । कर्तव्यो नाम ननु हुं ॥ १४ ॥

---

* ब्रह्मणा—स्वायंभुवमनुना—गो. † नमस्कृतः—आदृतः-ती. ‡ निष्कृतिः—प्रायश्चित्तम-गो. § रामस्य कृतार्थः—रामनिरूपितकृतार्थत्ववान् इत्यर्थः । एवं समनन्तरश्लोकोऽपि ।

[1] ब्रह्मघ्ने च-ङ.

[1]स त्वं ग्राम्येषु भोगेषु सक्तो मिथ्याप्रतिश्रवः ।
न [2]त्वा रामो विजानीते *सर्पं मण्डूकराविणम् ॥ १५ ॥

ततः किमित्यत्राह—स त्वं ग्राम्येष्वित्यादि । त्वा-त्वां रामः मण्डूकराविणं—स्वगृहीतमण्डूकद्वारा मण्डूकविराववन्तं सर्पम् । भ्रान्तमनवलोकनात् शब्दमात्रेण मण्डूकमेव जानीते, न सर्पम् । शब्दप्रमाणभावः रामः त्वया वञ्चितोऽभूदित्यर्थः । †यद्वाभट्टस्तु—मण्डूकग्रहणार्थं सर्पः मण्डूकवत् रौति । तेन स्वरेण स्वगण इति मत्वा मण्डूकः तत्समीपमागच्छति । स तं गृह्णाति । एवं वञ्चकं त्वां न जानातीत्याह । भट्टोऽयं सर्वलोकासम्मतं अनृतमपि साहसाद्वक्ति । न हि सर्पस्य मण्डूकरवोऽस्ति । नापि च मण्डूकाः मण्डूकरावायागच्छन्ति । नापि च सर्पाणां एवं भट्टतंत्रः प्रसिद्धः ॥ १५ ॥

महाभागेन रामेण पापः करुणवेदिना ।
हरीणां प्रापितो राज्यं त्वं दुरात्मा महात्मना ॥ १६ ॥

पापस्त्वमित्यन्वयः ॥ १६ ॥

[3]कृतं चेन्नाभिजानीषे [4]रामस्याक्लिष्टकर्मणः ।
सद्यस्त्वं निशितैर्बाणैः हतो द्रक्ष्यसि वालिनम् ॥ १७ ॥

---

* मण्डूकग्रहणार्थं सर्पो मण्डूकवद्रौति ; तमिव वञ्चकं–ती., गो. † गोविन्दराजः । वस्तुतस्तु—'आर्भाटस्तु महान्, पौरुषं तु शून्यं' इत्यादिलोकोक्तिवदियमुक्तिः—'आकारस्तु सर्पस्य, स्वरस्तु मण्डूकस्य'—इति । अतिशूरं दक्षं च त्वां रामो जानाति, त्वं तु निर्वीर्यः, स्त्रीलोलः, मद्यासक्तश्च—इत्यवहेलनोक्तिरियम्—रूपं तु अतीव सुन्दरम्, स्वरस्तु गर्दभस्येतिवत् । एतच्च समनन्तरश्लोकेऽपि स्पष्टम् ।

[1] यस्त्वं–ङ. [2] त्वां–ङ., ज., झ. [3] कृतं त्वं नाभि–ङ. [4] रामस्य महात्मनः–ज.

*न च संकुचितः पन्थाः येन वाली हतो गतः।
समये तिष्ठ, सुग्रीव! मा वालिपथमन्वगाः ॥ १८ ॥

न नूनमिक्ष्वाकुवरस्य [1]कार्मुक-
च्युतान् शरान् पश्यसि वज्रसन्निभान्।
ततः सुखं नाम निषेवसे सुखी
न रामकार्यं मनसाऽप्यवेक्षसे ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः

शरान् न पश्यसि—न स्मरसि। ततः—अत एव हेतोः नाम सुखं निषेवसे। रामकार्यं मनसाऽपि नावेक्षसे। धैर्य(१९)मानः सर्गः ॥ १९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः

पञ्चत्रिंशः सर्गः

[ताराप्रार्थनम्]

तथा ब्रुवाणं [2]सौमित्रिं प्रदीप्तमिव तेजसा।
अब्रवीच्छ्लक्ष्णं तारा ताराधिपनिभानना ॥ १ ॥

अथ तारया हितोपदेशेन लक्ष्मणकोपशमनम्। तथेत्यादि ॥ १ ॥

नैवं, लक्ष्मण! वक्तव्यः नायं परुषमर्हति।
हरीणामीश्वरः श्रोतुं †तव वक्त्राद्विशेषतः ॥ २ ॥

तव वक्त्रात्—सुहृदः तव मुखादित्यर्थः ॥ २ ॥

---

*न च संकुचित इति। पूर्वं येन पौरुषेण वाली हतः, तदिदं पौरुषं नाद्यापि गलितं—इति लोकवदुक्तः ॥ †मया बहुधा सान्त्वितस्य तव मुखादिति वा। एतच्च समनन्तरश्लोकेषु स्पष्टम् ॥

[1] कार्मुकाच्छरांश्च तान् पश्यसि—ज. [2] काकुत्स्थं—ङ.

नैवाकृतज्ञः सुग्रीवः न शठो नापि दारुणः ।
नैवानृतकथः, वीर ! न जिह्मश्च कपीश्वरः ॥ ३ ॥

नार्हसीत्यत्र हेतून्यासः—नैवेत्यादि । अनृतकथः—अनृतवचनः ॥

* उपकारं कृतं, वीर ! नाप्ययं विस्मृतः कपिः ।
रामेण, वीर ! सुग्रीवः यदन्यैर्दुष्करं रणे ॥ ४ ॥
रामप्रसादात् [1] कीर्तिं च कपिराज्यं च शाश्वतम् ।
प्राप्तवानिह सुग्रीवः रुमां मां च, परन्तप ! ॥ ५ ॥

रुमां मां चेति स्पष्टं तारासम्बन्धः ॥ ५ ॥

सुदुःखं शयितः पूर्वं प्राप्येदं सुखमुत्तमम् ।
प्राप्तकालं न जानीते विश्वामित्रो यथा मुनिः ॥ ६ ॥

यदि कृतज्ञः तर्हि कथं कालात्ययं न जानीते ? इत्यत्राह—सुदुःखमित्यादि । सुदुःखमनुभूतवानिति यावत् ॥ ६ ॥

† घृताच्यां किल संसक्तः दशवर्षाणि, लक्ष्मण !
‡ अहोऽमन्यत धर्मात्मा विश्वामित्रो महामुनिः ॥ ७ ॥

विश्वामित्रस्य स्त्रीसंगात् कालापरिज्ञानं दर्शयति—घृताच्यानित्यादि । मेनकायां दशवर्षसहस्रसंभोगः बालकाण्डे उक्तः—'तां ददर्श महातेजाः मेनकां कुशिकात्मजः' इति । एतद्वाक्यवाच्च कालान्तरे घृताच्यामपि तस्य सङ्गः इत्यवगम्यते ॥ ७ ॥

---

* रामेण कृतमुपकारं न विस्मृतः, कर्तरि क्तः, विस्मृतवान् ॥ † घृताचीति मेनकाया नामान्तरं—ती. घृताचीशब्देन मेनकैवोच्यते—गो. 'आगमस्तु न मे व्यक्तः, श्रुतमात्रं ब्रवीम्यहम्' (श्लो. १८) इतिवत् कर्णाकर्णिकाप्रभावस्य, मानवसहजविस्मरणाद्वा यथावाच्छित्रणं वा महाकवेरिदम् ॥ ‡ अहोऽमन्यत—दशवर्षाणि दिनममन्यत—गो. अमन्यतेति काकुः ; किं ज्ञातवान्—अहो—इति वा । तदेतदनन्तरश्लोके स्पष्टम् ॥

[1] सौमित्रे—ङ.

स हि प्राप्तं न जानीते कालं कालविदां वरः ।
विश्वामित्रो महातेजाः किं पुनर्यः पृथग्जनः ॥ ८ ॥

[1]देहधर्मं गतस्यास्य परिश्रान्तस्य, लक्ष्मण !
अवितृप्तस्य कामेषु *[2]कामं क्षन्तुमिहार्हसि ॥ ९ ॥

देहधर्मश्च — 'आहारनिद्राभयमैथुनं च सामान्यमेतत्' इत्युद्दिष्टलक्षणः ॥ ९ ॥

न च रोषवशं, तात ! गन्तुमर्हसि, लक्ष्मण !
† [3]निश्चयार्थमविज्ञाय सहसा प्राकृतो यथा ॥ १० ॥

निश्चयार्थमिति । कर्तव्यार्थनिश्चयमित्यर्थः ॥ १० ॥

सत्त्वयुक्ता हि पुरुषाः त्वद्विधाः, पुरुषर्षभ !
अविमृश्य न रोषस्य सहसा यान्ति वश्यताम् ॥ ११ ॥

प्रसादये त्वां, धर्मज्ञ ! [4]सुग्रीवार्थे समाहिता ।
महान् रोषसमुत्पन्नः संरंभस्त्यज्यतामयम् ॥ १२ ॥

रोषसमुत्पन्नः संरम्भः—क्षोभः ॥ १२ ॥

रुमां मां [5]कपिराज्यं च धनधान्यवसूनि च ।
रामप्रियार्थं सुग्रीवः त्यजेदिति मतिर्मम ॥ १३ ॥

आनयिष्यति सुग्रीवः सीतया सह राघवम् ।
शशाङ्कमिव रोहिण्या [6]हत्वा तं रावणं रणे ॥ १४ ॥

---

* कामं—कामवर्तनं—गो. विषयव्यामोहमिति वा ॥ वाक्यालङ्कारे वा ॥
† निश्चयार्थं—निश्चयरूपमर्थं, सुग्रीवाभिप्रायमिति यावत्—गो.

[1] पशुधर्मं—ङ. [2] रामः—ङ. [3] लोकयात्रा—ङ. [4] सुग्रीवार्थं—ज.
[5] अङ्गदं राज्यं—झ. [6] निहत्वा—ङ.

*शतकोटिसहस्राणि लङ्कायां किल [1] राक्षसाः ।
अयुतानि च षट्त्रिंशत् सहस्राणि शतानि च ॥ १५ ॥

सुग्रीवः रावणं हत्वा सीतया सह राघवं आनयिष्यति। कथमेवमित्यत्र, तत्सहायैकसाध्यत्वात् तद्बलस्येत्याशयेनाह—शतकोटीत्यादि । अत्र संख्यायां तात्पर्यमस्ति विशिष्यबोधनात् । अर्बुदं—कोटिशतम् (?), दश कोटिः समुद्रः, शतकोटिः—मध्यम्, मध्यसंख्यानां सहस्रमित्यर्थः । तदुपरि षट्त्रिंशदयुतानि षष्टिसहस्राधिकत्रिलक्षाणीत्यर्थः । तदुपरि सहस्रसहस्राणि तदुपरि शतानि लङ्कायां राक्षसाः सन्ति ॥ १५ ॥

अहत्वा तांश्च दुर्धर्षान् राक्षसान् कामरूपिणः ।
[2] अशक्यं रावणं हन्तुं येन सा मैथिली हृता ॥ १६ ॥
ते न [3] शक्या रणे हन्तुं असहायेन, लक्ष्मण!
†रावणः क्रूरकर्मा च सुग्रीवेण विशेषतः ॥ १७ ॥

तेषां वधे सहायापेक्षा परमशूरस्याप्यस्त्येवेत्याह—त इत्यादि । च—यस्मात् असहायेन रामेण ते हन्तुं न शक्याः, यस्मात् रावणश्च क्रूरकर्मा—क्रूरपराक्रमः तस्मात् सुग्रीवेण प्रयोजनं विशेषतः अस्ति । रक्षस्सेनायाः प्रतिसेनाघटनस्य सुग्रीवेण विना अशक्यार्थत्वात् ॥ १७ ॥

---

* 'अविमृश्य' (श्लो. ११) इत्याद्युक्तं सुग्रीवहननस्याविमृश्यकारित्वं चातुर्येणोपपादयति—शतकोटीत्यादिना ॥ तथा च सुग्रीववधे रामस्येष्टसिद्धिः न स्यादिति भावः ॥

† असहायेन सुग्रीवेण रावणो हन्तुं न शक्यः—गो. अथवा, पञ्चम्यर्थे तृतीया, सुग्रीवापेक्षयाऽपि रावणः क्रूरकर्मा, सुग्रीव इव तर्जनादिना स न जेतुं शक्य इति भावः । असहायेन रामेण ते राक्षसाः, रावणश्च न हन्तुं शक्यः । रामेणैवाशक्यत्वे विशेषः—सुतरां सुग्रीवेण न हन्तुं शक्याः इति वाऽर्थः । किमर्थं तावत् वानरसेनाऽऽनयतम्? रामः, सुग्रीवश्च सर्वं साधयिष्यत इति शङ्कायां उत्तरमिदम् ॥

[1] रक्षसाम्—ज. [2] न शक्यो रावणो—ङ. [3] शक्यो—ङ.

*एवमाख्यातवान् वाली स ह्यभिज्ञो हरीश्वरः ।
†आगमस्तु न मे व्यक्तः [1]श्रुतमात्रं ब्रवीम्यहम् ॥ १८ ॥

ननु रक्षसां एवं संख्या कथं त्वया ज्ञाता इत्यत्राह—एवमित्यादि। आगमस्तु न मे व्यक्तः इति। रावणस्यैवं संख्याबलसंपत्त्यागमः—प्राप्तिप्रकारस्तु न ज्ञातः। अपि तु संख्यामात्रं प्रसंगात् पूर्वं श्रुतं मच्छ्रोत्रेण। अतोऽहं श्रुतमात्रं ब्रवीमि। अब्रवमिति यावत्। अत्र ‡वृद्धाभट्टः—असहायेन सुग्रीवेण ते हन्तुं न शक्याः—इत्यपूरयन्। तथा तस्य हनने कः प्रसङ्गः? येन निषेधः इति तु न जानीमः। प्रकृतं तु रामस्य सहायापेक्षत्वसमर्थनम् ॥ १८ ॥

त्वत्सहायनिमित्तं वै प्रेषिता हरिपुङ्गवाः ।
आनेतुं वानरान् युद्धे सुबहून् हरि[2]यूथपान् ॥ १९ ॥

ननु सत्यं स सहाय इति जानीमः। अपि तु तत्प्रवृत्तिं न करोतीति किल नः कोपः इत्यत्राह—त्वत्सहायेत्यादि ॥ १९ ॥

तांश्च प्रतीक्षमाणोऽयं विक्रान्तान् सुमहाबलान् ।
राघवस्यार्थसिद्ध्यर्थं, [3]न निर्याति हरीश्वरः ॥ २० ॥

अत एव इदानीं तदागमनपर्यन्तं न निर्याति ॥ २० ॥

[4]कृता सुसंस्था, सौमित्रे! सुग्रीवेण यथा पुरा ।
[5]अद्य तैर्वानरैस्सर्वैः आगन्तव्यं महाबलैः ॥ २१ ॥

---

*तारामुखेन अंगदोक्तरामसुग्रीवसख्यकरणवृत्तान्तश्रवणानन्तरं, अतिबलपराक्रमरावणनिरसनविषये मां विहाय दुर्बलं सुग्रीवं रामः कथमवलम्बत इति तारायाः प्रत्युत्तरत्वेनोक्तवानित्यवगम्यते–ती. † आगमः—स्वयमवगमः-गो. ‡ गोविन्दराजः.

[1] श्रवात्तस्स ब्रवीम्यहम्–ङ., श्रवात्तस्य ब्रवीम्यहम्–ज., श्रवणात्तद्ब्रवीम्यहम्–झ.
[2] पुङ्गवान्–ज. [3] नौदासीन्यं गतो हरिः–ङ. [4] कृतात्र संस्था–ङ. [5] उद्यतै–ङ.

तर्हि ते कदा आगमिष्यन्तीत्यत्राह—कृतेत्यादि। सुसंस्थेति। शोभना आगमनकार्यमर्यादा इत्यर्थः। यथापुरा—यथापूर्वं व्यवस्था कृता, तन्मर्यादादृशा अद्य अस्मिन् दिवस एव तैः सर्वैः वानरैः आगन्तव्यम्॥ २१॥

ऋक्षकोटिसहस्राणि गोलाङ्गूलशतानि च।
अद्य त्वामुपयास्यन्ति जहि कोपं, अरिन्दम!
*कोट्योऽनेकास्तु, काकुत्स्थ! [1] कपीनां दीप्ततेजसाम्॥

स्वसेनासंख्या रक्षस्सेनापेक्षया बहुतराधिकसंख्यावती। अतः पर्याप्तत्वं रक्षोबलप्रातिभट्य इत्याशयेन दर्शयति—ऋक्षेत्यादि। शतकोटिः मध्यं, तद्दशगुणात्मिका सहस्रकोटिः अन्तसंख्या, तावत्संख्याकाः ऋक्षाः इत्यर्थः। गोलाङ्गूलानां शतानि—शतकोटिः। तावत्संख्याकास्ते। कपीनां तु अनेकाः कोट्यः इति। परार्धान्ता तु संख्या। ततोऽप्यधिकत्वात् अपरिमिता इत्यर्थः॥ २२॥

तव हि मुखमिदं निरीक्ष्य कोपात्
क्षतजनिभे नयने निरीक्षमाणाः।
हरिवरवनिता न यान्ति शान्तिं
†प्रथमभयस्य हि शङ्किताः स्म सर्वाः॥ २३॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः

———

* अस्यापि उपयास्यन्तीत्यनेनान्वयः। † मरणभयस्यैव सर्वभयापेक्षया तीव्रत्वेन वा प्रथमत्वम्।

[1] हरीणां—ङ.

प्रथममयस्य शङ्किता इति। प्रथमो ज्येष्ठः वाली, तस्यैव भयं, सुग्रीववधभयमित्यर्थः। * निषेधेऽपि विषये षष्ठी आर्षी। अगर्व(२३ १/२)मानः सर्गः ॥ २३ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः

षट्त्रिंशः सर्गः

[लक्ष्मणसमाधानम्]

इत्युक्तस्तारया वाक्यं प्रश्रितं धर्मसंहितम्।
मृदुस्वभावः सौमित्रिः प्रतिजग्राह तद्वचः ॥ १ ॥

अथ सुग्रीवप्रश्रयवचःप्रीतेन लक्ष्मणेन स्वरोषवचनक्षमापणम्। इत्युक्त इत्यादि ॥ १ ॥

तस्मिन् प्रतिगृहीते तु वाक्ये हरिगणेश्वरः।
[1] लक्ष्मणात् † सुमहत् त्रासं वस्त्रं ‡ क्लिन्नमिवात्यजत् ॥ २ ॥

तस्मिन् वाक्ये—ताराया: क्षमापणवाक्ये लक्ष्मणेन प्रतिगृहीते—अङ्गीकृते सतीत्यर्थः ॥ २ ॥

ततः कण्ठगतं माल्यं चित्रं बहुगुणं महत्।
चिच्छेद विमदश्चासीत् सुग्रीवो वानरेश्वरः ॥ ३ ॥

माल्यं—मालां चिच्छेद—त्यक्तवान्। तत्र हेतुः—चित्रमित्यादि। विचित्ररचनं बहुगुणं—बहुप्रकारकाममोहमदकरम्। तत्त्यागफलमेवोक्तं—विमदश्चासीदिति ॥ ३ ॥

---

* 'न लोकाव्यय' इत्यादिना षष्ठ्या निषेधेऽपीत्यर्थः ॥ † सुमहत्—सुमहान्तं—रामानुजीयम्. सुमहत्त्रासमित्याकाराभाव आर्षः—गो. ‡ क्लिन्नं—आर्द्रं वस्त्रमिव—गो.

[1] लक्ष्मणोत्थं महत्—ङ.

स लक्ष्मणं भीमबलं सर्ववानरसत्तमः ।
अब्रवीत् प्रश्रितं वाक्यं सुग्रीवः संप्रहर्षयन् ॥ ४ ॥

लक्ष्मणं संप्रहर्षयन् इत्यन्वयः ॥ ४ ॥

प्रणष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् ।
रामप्रसादात्, सौमित्रे ! पुनः प्राप्तमिदं मया ॥ ५ ॥

कः शक्तस्तस्य देवस्य विख्यातस्य स्वकर्मणा ।
*[1]तादृशं विक्रमं, वीर ! प्रतिकर्तुं, अरिन्दम ! ॥ ६ ॥

तस्य देवस्येति । आदिदेवावतारस्येत्यर्थः । कथमेवं ज्ञायत इत्यत्राह—विख्यातस्येति । अतिमानुषेण ताटकावधादिवालिवधान्तकर्मणा सुस्पष्टं प्रख्यातमादिदेवांशत्वमित्यर्थः । तादृशं विक्रममिति । तज्जनितोपकारमित्यर्थः ॥ ६ ॥

सीतां प्राप्स्यति धर्मात्मा वधिष्यति च रावणम् ।
सहायमात्रेण मया राघवः स्वेन तेजसा ॥ ७ ॥

सहायकृत्यं †किं तस्य येन सप्त महाद्रुमाः ।
शैलश्च वसुधा चैव बाणेनैकेन दारिताः ॥ ८ ॥

सहायसाध्यं कृत्यं सहायकृत्यम् ॥ ८ ॥

धनुर्विस्फारयानस्य यस्य शब्देन, लक्ष्मण !
सशैला कंपिता भूमिः सहायैस्तस्य किन्नु वै ॥ ९ ॥

---

*तादृशं तस्य विक्रमं प्रतिकर्तुं—प्रतिरोद्धुं—तत्पुरतः स्थातुमिति यावत् । देवस्येत्यादिकं स्तुतिवचनं लोकवत् । इदं समनन्तरश्लोके स्पष्टम् ॥ †किमित्यधिक्षेपे । किमर्थमिति यावत् ॥

[1] तादृशं प्रतिकुर्वीत अंशेनापि नृपात्मज—ज., झ.

अनुयात्रां नरेन्द्रस्य करिष्येऽहं, नरर्षभ!
गच्छतो रावणं हन्तुं वैरिणं सपुरस्सरम् ॥ १० ॥

अनुयात्रामिति। सेवामित्यर्थः। पुरस्सरैः सहितं रावणम् ॥

यदि किञ्चिदतिक्रान्तं विश्वासात् प्रणयेन वा।
प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति ॥ ११ ॥

विश्वासात्—अयं कृतघ्नो न भवतीति विश्वासात् प्रणयेन वा यदि किञ्चित् अतिक्रान्तमिति। अतिक्रमः अभूदित्यर्थः। तत्तु प्रेष्यस्य दासस्य क्षमितव्यं—क्षन्तव्यमिति यावत्। निरपराधोऽसंभवीत्याह—न कश्चिदित्यादि। यो दासो नापराध्यति तादृशो न कश्चिदपि समस्ति। पराचित्तस्य अप्रत्यक्षत्वात्, अन्ततः चित्तानुवर्तनस्यैव सर्वथा असंभवात् ॥ ११ ॥

इति तस्य ब्रुवाणस्य सुग्रीवस्य महात्मनः।
अभवल्लक्ष्मणः प्रीतः प्रेम्णा चैनमुवाच ह ॥ १२ ॥

सर्वथा हि मम भ्राता सनाथः, वानरेश्वर!
त्वया नाथेन, सुग्रीव! प्रश्रितेन विशेषतः ॥ १३ ॥

यस्ते, प्रभावः, सुग्रीव! यच्च ते *शौच[1]मीदृशम्।
अर्हस्त्वं कपिराज्यस्य श्रियं भोक्तुमनुत्तमाम् ॥ १४ ॥

शौचं—अन्तःकरणशुद्धिः ॥ १४ ॥

सहायेन च, सुग्रीव! त्वया रामः प्रतापवान्।
वधिष्यति रणे शत्रून् अचिरान्नात्र संशयः ॥ १५ ॥

---

* शौचं–इन्द्रियनिग्रहः–ति.

[1] मार्जवम्–ङ.

धर्मज्ञस्य कृतज्ञस्य संग्रामेष्वनिवर्तिनः ।
उपपन्नं च युक्तं च, सुग्रीव ! तव भाषितम् ॥ १६ ॥

*दोषज्ञः सति सामर्थ्ये कोऽन्यो भाषितुमर्हति ?
वर्जयित्वा मम ज्येष्ठं त्वां च, वानरसत्तम ! ॥ १७ ॥

दोषज्ञः--विद्वान् ॥ १७ ॥

सदृशश्चापि [1] रामस्य विक्रमेण बलेन च ।
सहायो दैवतैर्दत्तः चिराय, हरिपुङ्गव ! ॥ १८ ॥

किन्तु शीघ्रमितः, वीर ! [2]निष्क्राम त्वं मया सह ।
सान्त्वयस्व वयस्यं त्वं भार्याहरण[3]कर्शितम् ॥ १९ ॥

यच्च शोकाभिभूतस्य श्रुत्वा रामस्य भाषितम् ।
मया त्वं परुषाण्युक्तः [4]तच्च त्वं क्षन्तुमर्हसि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षट्त्रिंशः सर्गः

नारी(२०)मानः सर्गः । २० ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षट्त्रिंशः सर्गः

---

*लोके हि सर्वत्र यः कश्चिद्दोषः सुलभ एव । स्वस्मिन् अन्येन दोषे आरोपिते सामान्यतः सर्वोऽपि अन्यस्मिन विद्यमानं दोषं प्रतिबन्दित्वेन ब्रूयादिति लोकवृत्तम् । परन्तु विवेकिना, स्वस्मिन् दोषे अन्येनोद्घाटिते, अन्यस्मिन् दोषं पश्यताऽपि स्वस्मिन् तदुक्तो दोषः स्याच्चेत् विनीतेन भवितव्यम् । सोऽयमुदात्तभावः रामे त्वयि चेति उभयत्रैव मया दृष्ट इत्यर्थः ॥

[1] रामेण—ज. [2] निष्क्रमस्व—ङ. [3] दुःखितम्—ज. [4] तत्सहस्व सखे मम—ज.

सप्तत्रिंशः सर्गः

[वानरसेनासंमेलनम्]

एवमुक्तस्तु सुग्रीवः लक्ष्मणेन महात्मना ।
हनुमन्तं स्थितं पार्श्वे सचिवं त्विदमब्रवीत् ॥ १ ॥

अथ सुग्रीवेण अपरिमितदूतप्रेषणपूर्वं अनेककोटिनिजसेना-संमेलनम् । एवमित्यादि ॥ १ ॥

महेन्द्रहिमवद्विन्ध्यकैलासशिखरेषु च ।
मन्दरे पाण्डुशिखरे पञ्चशैलेषु ये स्थिताः ॥ २ ॥

तरुणादित्यवर्णेषु भ्राजमानेषु [1]सर्वतः ।
पर्वतेषु समुद्रान्ते *पाश्चिमस्यां तु ये दिशि ॥ ३ ॥

आदित्यभवने चैव गिरौ सन्ध्याभ्रसंनिभे ।
[2]पद्मतालवनं भीमं संश्रिता हरिपुङ्गवाः ॥ ४ ॥

अञ्जनाम्बुदसङ्काशाः [3]कुञ्जरप्रतिमौजसः ।
अञ्जने पर्वते चैव ये वसन्ति प्लवङ्गमाः ॥ ५ ॥

[4]मनःशिलागुहावासाः वानराः कनकप्रभाः ।
मेरुपार्श्वगताश्चैव ये धूम्रगिरिसंश्रिताः ॥ ६ ॥

तरुणादित्यवर्णाश्च पर्वते च महारुणे ।
पिबन्तो मधु मैरेयं भीमवेगाः प्लवङ्गमाः ॥ ७ ॥

वनेषु च सुरम्येषु सुगन्धिषु महत्सु च ।
[5]तापसाश्रमरम्येषु वनान्तेषु समन्ततः ॥ ८ ॥

---

* पश्चिमस्यामित्यार्षम्–ति.

[1] नित्यशः–ज. [2] पद्माचलवनं–च. ज. [3] कुञ्जरेन्द्रमहौजसः–ज.
[4] महाशैलगुहा–च. ज. एतदादिश्लोकचतुष्टयमधिकं–झ. [5] तापसानां च रम्येषु–ङ.

तांस्तांस्त्वमानय * क्षिप्रं पृथिव्यां सर्ववानरान् ।
सामदानादिभिः कल्पैः आशु प्रेषय वानरान् ॥ ९ ॥

पाण्डुशिखरत्वविशेषणं महेन्द्रादिपञ्चशैलसाधारणम् । तेषु—पञ्चशैलेषु समुद्रान्तपर्वतविशेषणं तरुणादित्येत्यादि । तथा पश्चिमस्यां दिशि अस्तगिरौ, आदित्यभवने—उदयगिरौ च ये, स्थिताः इति सर्वत्रानुकर्षः । महाशैलाख्यः पर्वतविशेषः । क्षिप्रमानयेत्युक्ते अहमेव गमिष्यामीत्यपेक्षायां, नेत्याह—सामेत्यादि । आदिशब्देन अतिदुष्टविषये दण्डश्च । कल्पैः—उपायैः ॥ २–९ ॥

† प्रेषिताः प्रथमं ये च मया [1] ज्ञाता महाजवाः ।
त्वरणार्थं तु भूयस्त्वं हरीन् संप्रेषयापरान् ॥ १० ॥

ननु प्रेषिता एव पुरेत्यपेक्षायामाह—प्रेषिता इत्यादि । ‘मया ज्ञाता महाजवाः’ इति पाठः । प्रथमं पूर्वमेव महाजवाः दूताः प्रेषिताः इति यत्, तच्च मया ज्ञातमेव । अथापि प्रेषितदूतानां बलानां च त्वरणार्थं—शैघ्र्यार्थं भूयः—अभ्यधिकं पुनश्च अपरान् हरीन् संप्रेषय ॥ १० ॥

ये प्रसक्ताश्च कामेषु दीर्घसूत्राश्च वानराः ।
इहानयस्व तान् सर्वान् शीघ्रं तु मम शासनात् ॥ ११ ॥

कामेषु प्रसक्ताः, अत एव दीर्घसूत्राः—विलम्बितव्यापाराः ॥

* अनयेत्यस्य आनाययेत्यर्थं इति कतकः–ति. † प्रेषिताः—सर्वेषां वानराणामानयनार्थं प्रेषिता ये वानराः ते नाद्यापि प्रत्यागताः । तेषां त्वरणार्थं पुनः प्रेषणम् । एवं तेषु ये कामादिप्रसक्ताः कालं विलम्बयन्ति, तानत्रैवाह्वय—शिक्षार्थम् ॥

[1] दूताः–ङ.

अहोभिर्दशभिर्ये हि नागच्छन्ति ममाज्ञया ।
हन्तव्यास्ते दुरात्मानः राजशासनदूषकाः ॥ १२ ॥

शतान्यथ [1] सहस्राणि कोट्यश्च मम शासनात् ।
प्रयान्तु कपिसिंहानां [2] दिशो मम मते स्थिताः ॥ १३ ॥

प्रेषणीयदूतसंख्यामाह—शतान्यथ सहस्राणि कोटयश्चेति । शतकोटिः मध्यं, तत्सहस्रं परार्धमित्युक्तम् । बहुदूतानामेवैवंसंख्यात्वे बहुसंख्यां ईश्वर एव जानाति । तथैव आनन्त्यमेवाग्रे प्रतिपाद्यते ॥

मेघपर्वतसङ्काशाः छादयन्त इवाम्बरम् ।
घोररूपाः कपिश्रेष्ठाः यान्तु मच्छासनादितः ॥ १४ ॥

प्रागुक्तदूतबाहुल्यमेव दर्शितम्—छादयन्त इवाम्बरं इति ॥

*ते गतिज्ञाः गतिं [3] गत्वा पृथिव्यां सर्ववानराः ।
आनयन्तु हरीन् सर्वान् त्वरिताः शासनान्मम ॥ १५ ॥

गतिं गत्वा—तत्तद्देशगमनं प्राप्य ॥ १५ ॥

तस्य वानरराजस्य श्रुत्वा वायुसुतो वचः ।
दिक्षु सर्वासु विक्रान्तान् प्रेषयामास वानरान् ॥ १६ ॥

ते पदं विष्णुविक्रान्तं पतत्रिज्योतिरध्वगाः ।
प्रयाताः प्रहिता राज्ञा हरयस्तत्क्षणेन वै ॥ १७ ॥

विष्णुविक्रान्तं पदमिति । आकाशमिति यावत् । पतत्रिज्योतिरध्वगाः—पक्षिणां नक्षत्राणां च मार्गगताः इत्यर्थः ॥ १७ ॥

---

* गतिं गत्वा—वेगवत्तरां गतिं गत्वा—ति. गतिज्ञाः—गम्यत इति गतिः—वासस्थानम्—गो. रा.

[1] सहस्राणां—ङ. [2] निदेशे मम ये—ज. [3] ज्ञात्वा—ङ.

ते समुद्रेषु गिरिषु वनेषु च सरस्सु च ।
वानरा वानरान् सर्वान् रामहेतोरचोदयन् ॥ १८ ॥

*मृत्युकालोपमस्याज्ञां [1]राजराजस्य वानराः ।
सुग्रीवस्याययुः श्रुत्वा सुग्रीवभयदर्शिनः ॥ १९ ॥

मृत्युः कालश्च उपमा निग्रहविषये यस्य स तथा ॥ १९ ॥

†ततस्तेऽञ्जनसङ्काशाः गिरेस्तस्मा[2]न्महाजवाः ।
तिस्रः कोट्यः प्लवङ्गानां निर्ययुर्यत्र राघवः‡ ॥ २० ॥

तस्मात् गिरेरिति । अञ्जनगिरेरित्यर्थः ॥ २० ॥

अस्तं गच्छति यत्रार्कः तस्मिन् गिरिवरे [3]स्थिताः ।
तप्तहेममहाभासः तस्मात् कोट्यो दश च्युताः ॥ २१ ॥

कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम् ।
ततः कोटिसहस्राणि वानराणामुपागमन् ॥ २२ ॥

फलमूलेन जीवन्तः हिमवन्तमुपाश्रिताः ।
तेषां कोटिसहस्राणां सहस्रं समवर्तत ॥ २३ ॥

कोटिसहस्रं परार्धमित्युक्तम् । तस्य च सहस्रमित्युक्ते संख्यातीतमेव तद्बलम् ॥ २३ ॥

---

*मृत्युरूपः कालः, मृत्योः काल इति वा । दुरतिक्रमत्वे दृष्टान्तोऽयम् ॥

† 'आययुः' इत्यनेन संग्रहोक्तस्य विवरणं 'ततस्ते' इत्यारभ्य 'पिबन्तीव दिवाकरम्' इत्येतदन्तम् ॥ ‡ यत्र – येन हेतुना राघवो वर्तते, ततः—तस्मादेव हेतोः—**गो.** ततः—तदनन्तरं, यत्र—देशे, राघव इति प्राधान्यान्निर्देशः, तदर्थमेवानयनात् । अर्थात् किष्किन्धामागमन्नित्यर्थः । उत्तरत्र 'सुग्रीवो यत्र वानरः' (श्लो. ३४) इत्येतदपि द्रष्टव्यम् । तात्पर्यतः उभयं समानार्थकम् । राघवः—लक्ष्मणो वा ॥

[1] कपिराजस्य–**ङ.** [2] न्महाबलाः–**ज.** [3] रताः–**ज.**

[1]अङ्गारकसमानानां भीमानां भीमकर्मणाम् ।
विन्ध्याद्वानरकोटीनां सहस्राण्यपतन् द्रुतम् ॥ २४ ॥
क्षीरोदवेलानिलयाः तमालवनवासिनः ।
नारिकेलाशनाश्चैव तेषां संख्या न विद्यते ॥ २५ ॥

स्ववचनेनैव क्षीरोदनिलयानां संख्या न विद्यत इत्याह—क्षीरोदेत्यादि ॥ २५ ॥

वनेभ्यो गह्वरेभ्यश्च सरिद्भ्यश्च महाजवाः ।
आगच्छद्वानरी सेना * पिबन्तीव दिवाकरम् ॥ २६ ॥
† ये तु त्वरयितुं याताः वानराः सर्ववानरान् ।
ते वीरा [2]हिमवच्छैलं ददृशुस्तं महाद्रुमम् ॥ २७ ॥

तं महाद्रुममिति । प्रसिद्धं भगवन्मूलधामयज्ञवटमित्यर्थः । तं ददृशुरिति । तत्र, हिमवतीति शेषः ॥ २७ ॥

तस्मिन् गिरिवरे [3]रम्ये यज्ञो माहेश्वरः पुरा ।
सर्वदेव[4]मनस्तोषः बभौ दिव्यो मनोहरः ॥ २८ ॥

माहेश्वरः । अनुपचरितः कारणप्रजापतिः यज्ञात्मा अन्वर्थदक्षिणामूर्तिः नः कुलदैवतम् , तद्देवताकः दिव्यो यज्ञ इति । दिव्याश्वमेघ इत्यर्थः । सर्वदेवानां मनस्तोषः यस्मिन् स तथा ॥

---

* आकाशदेशाच्छादनात् , उत्प्लुत्योत्प्लुत्यागमनाद्वा दिवाकरं पिबन्तीवेति ॥

† तुशब्दः हनुमत्प्रेरितवानरव्यावर्तकः, नीलेन पूर्वं प्रेरिता इत्यर्थः । तेषामेव लक्ष्मणसन्निधाने समागमनम् , सद्यो हनुमत्प्रेरितानां तदसंभवात्–गो. ये च त्वरयितुं याताः हनुमत्प्रेषिताः, ते महाद्रुमं तं ददृशुः, पूर्वं नीलप्रेषितांश्च ददृशुः । अतस्तेषां तत एव परावृत्तिः–ति. वस्तुतस्तु–सर्ववानरसैन्यागमनमुक्त्वा आनयनार्थं गतानां वानराणां विशेषव्यापार उच्यते–ये त्वित्यादिना—इति स्वरसम् । ‘ त्वरयितुं ’ इति पदं चावधेयम् ॥

[1] अङ्गारसमवर्णाना–ङ. [2] हिमवच्छैले–ञ. [3] पुण्ये–ञ. [4] प्रियकरः–ङ.

अन्ननिष्यन्दजातानि मूलानि च फलानि च ।
अमृतास्वादकल्पानि [1]ददृशुस्तत्र वानराः ॥ २९ ॥

अन्ननिष्यन्देति । दिव्ययज्ञवर्त्यन्नद्रप्सेति यावत् ॥ २९ ॥

तदन्नसम्भवं दिव्यं फलं मूलं मनोहरम् ।
यः कश्चित् सकृदश्नाति मासं भवति तर्पितः ॥ ३० ॥
तानि मूलानि दिव्यानि फलानि च फलाशनाः ।
औषधानि च दिव्यानि जगृहुर्हरियूथपाः ॥ ३१ ॥

औषधानि । सञ्जीविन्यादीनीत्यर्थः ॥ ३१ ॥

तस्माच्च यज्ञायतनात् पुष्पाणि सुरभीणि च ।
आनिन्युर्वानरा गत्वा सुग्रीवप्रियकारणात् ॥ ३२ ॥
ते तु सर्वे हरिवराः पृथिव्यां सर्ववानरान् ।
संचोदयित्वा त्वरिताः यूथानां जग्मुरग्रतः ॥ ३३ ॥

ते तु सर्वे इति । दूतरूपा इत्यर्थः । अग्रतः इति । स्वसंचोदितवानरागमनात् पूर्वमित्यर्थः ॥ ३३ ॥

ते तु तेन मुहूर्तेन यूथपाः शीघ्रगामिनः ।
किष्किन्धां त्वरया प्राप्ताः सुग्रीवो यत्र वानरः ॥ ३४ ॥
ते गृहीत्वौषधीः सर्वाः फलं मूलं च वानराः ।
तं प्रति ग्राहयामासुः वचनं चेदमब्रुवन् ॥ ३५ ॥

ते— प्रेषिताः दूताः ॥ ३५ ॥

सर्वे [2]परिगताः शैलाः [3]समुद्राश्च वनानि च ।
पृथिव्यां वानराः सर्वे शासनादुपयान्ति ते ॥ ३६ ॥

---

[1] जगृहु–ङ. [2] परिसृताः–ज. [3] सरितश्च–ज.

एवं श्रुत्वा ततो हृष्टः सुग्रीवः प्लवगाधिपः ।
प्रतिजग्राह *तत् प्रीतः तेषां सर्वमुपायनम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः

गीता(३७)मानः सर्गः ॥ ३७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः

अष्टात्रिंशः सर्गः

[रामसमीपगमनम्]

प्रतिगृह्य च तत्सर्वमुपायनमुपाहृतम् ।
वानरान् †सान्त्वयित्वा च सर्वानेव व्यसर्जयत् ॥ १ ॥

सुग्रीवस्य रामसन्दर्शनपूर्वं सेनासंमेलननिवेदनम् । प्रतिगृह्येत्यादि ॥ १ ॥

विसर्जयित्वा स हरीन् शूरांस्तान् कृतकर्मणः ।
मेने कृतार्थमात्मानं राघवं च महाबलम् ॥ २ ॥

राघवं चेति । कृतार्थमित्यनुकर्षः ॥ २ ॥

स लक्ष्मणो भीमबलं सर्ववानरसत्तमम् ।
अब्रवीत् प्रश्रितं वाक्यं सुग्रीवं संप्रहर्षयन् ॥
किष्किन्धाया विनिष्क्राम यदि ते, सौम्य! रोचते ॥ ३ ॥

विनिष्क्रामेति संप्रश्ने लोट्, प्रार्थने वा । अत एव उत्तरत्र सुभाषितमित्युक्तम् ॥ ३ ॥

---

* तत् —हिमवत आनीतं मूलफलादिकम् ॥ † अतित्वरयाऽऽगतत्वात् परिश्रान्तत्वेन सान्त्वनम् ॥

तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य सुभाषितम्।
सुग्रीवः परमप्रीतः वाक्यमेतदुवाच ह ॥ ४॥
एवं भवतु गच्छावः *स्थेयं त्वच्छासने मया ॥ ५॥

स्थेयं—अनुष्ठेयम् ॥ ५ ॥

तमेवमुक्त्वा सुग्रीवः लक्ष्मणं शुभलक्षणम्।
विसर्जयामास तदा तारामन्याश्च योषितः ॥ ६ ॥
† एतेत्युच्चैर्हरिवरान् सुग्रीवः समुदाहरत्।
तस्य तद्वचनं श्रुत्वा हरयः शीघ्रमाययुः ॥ ७॥
बद्धाञ्जलिपुटाः सर्वे ये स्युः स्त्रीदर्शनक्षमाः।
तानुवाच ततः प्राप्तान् राजाऽर्कसदृशप्रभः ॥
उपस्थापयत क्षिप्रं शिबिकां मम, वानराः! ॥ ८॥

स्त्रीदर्शनक्षमा इति। स्त्रीगोष्ठ्यामपि राजदर्शनक्षमाः, अत्याप्ताः इत्यर्थः ॥ ८ ॥

श्रुत्वा तु वचनं तस्य हरयः शीघ्रविक्रमाः।
समुपस्थापयामासुः शिबिकां प्रियदर्शनाम् ॥ ९॥
तामुपस्थापितां दृष्ट्वा शिबिकां वानराधिपः।
लक्ष्मणारुह्यतां शीघ्रमिति सौमित्रिमब्रवीत् ॥ १० ॥
इत्युक्त्वा काञ्चनं यानं सुग्रीवः सूर्यसंनिभम्।
‡ [1] बृहद्भिर्हरिभिर्युक्तं आरुरोह सलक्ष्मणः ॥ ११ ॥

---

* स्थेयं—स्थातव्यम्। त्वच्छासने मया वर्तितव्यमित्यर्थः। व्याख्यादृष्ट्या 'त्वच्छासनं' इति पाठः स्याद्वा ॥ † आङ् इत्युपसर्गपूर्वस्य इण्गताविति धातोः लोण्मध्यमपुरुषबहुवचने 'एत' इति रूपम्। एहीति पाठे जात्येकवचनम्। ‡ बृहद्भिः हरिभिः, वाहकैरिति यावत् ॥

[1] बहुभि—ङ.

सलक्ष्मणः आरुरोहेति । एवं एकशिबिकारोहणेन परममैत्री दर्शिता ॥ ११ ॥

पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
शुक्लैश्च वालव्यजनैः धूयमानैस्समन्ततः ॥ १२ ॥
शङ्खभेरीनिनादैश्च [1]हरिभिश्चाभिनन्दितः ।
निर्ययौ प्राप्य सुग्रीवः राज्यश्रियमनुत्तमाम् ॥ १३ ॥
स वानरशतै[2]स्तीक्ष्णैः बहुभिः शस्त्रपाणिभिः ।
परिकीर्णो ययौ तत्र यत्र रामो व्यवस्थितः ॥ १४ ॥
स तं देशमनुप्राप्य श्रेष्ठं रामनिषेवितम् ।
अवातरन्महातेजाः शिबिकायाः सलक्ष्मणः ॥ १५ ॥
आसाद्य च ततो रामं कृताञ्जलिपुटोऽभवत् ।
कृताञ्जलौ स्थिते तस्मिन् वानराश्चाभवंस्तथा ॥ १६ ॥

वानराश्च तथाऽभवन्निति । कृताञ्जलिपुटाः अभवन्नित्यर्थः ॥ १६ ॥

* तटाकमिव तद्दृष्ट्वा रामः कुड्मलपङ्कजम् ।
वानराणां महत् सैन्यं सुग्रीवे प्रीतिमानभूत् ॥ १७ ॥

आह्लादकत्वादितः तटाकदृष्टान्तः । तत् सैन्यमित्यन्वयः ॥

पादयोः पतितं मूर्ध्ना तमुत्थाप्य हरीश्वरम् ।
प्रेम्णा च बहुमानाच्च राघवः परिषस्वजे ॥ १८ ॥
परिष्वज्य च धर्मात्मा निषीदेति ततोऽब्रवीत् ।
† तं निषण्णं ततो दृष्ट्वा क्षितौ रामोऽब्रवीद्वचः ॥ १९ ॥

---

* अञ्जलीनां पद्मसदृशत्वात् सैन्यस्य तटाकत्वरूपणम् ॥ † क्षितौ निषण्णं तमित्यन्वयः ॥

[1] बन्दिभि–च. ञ. [2] भीमैः–क.

धर्ममर्थं च कामं च यस्तु काले निषेवते ।
विभज्य सततं, वीर! स राजा, हरिसत्तम! ॥ २० ॥
हित्वा धर्मं [1] तथाऽर्थं च कामं यस्तु निषेवते ।
स वृक्षाग्रे यथा सुप्तः [2] पतितः प्रतिबुध्यते ॥ २१ ॥

वृक्षाग्रसुप्तः यथा पतितः सन् प्रतिबुध्यते, तथा कामैकपरोऽपि पतितः—राज्यभ्रष्टः पश्चादेव प्रतिबुध्यते इत्यर्थः ॥ २१ ॥

अमित्राणां वधे युक्तः मित्राणां सङ्ग्रहे रतः ।
त्रिवर्गफलभोक्ता च राजा * धर्मेण युज्यते ॥ २२ ॥

त्रिवर्गस्य—धर्मार्थकामलक्षणस्य तत्फलस्य च यथाकालं भोक्ता—सेवकः इत्यर्थः ॥ २२ ॥

उद्योगसमयस्त्वेषः प्राप्तः, शत्रुविनाशन!
संचिन्त्यतां हि [3] समयः हरिभिः सह मन्त्रिभिः ॥ २३ ॥

समयः संचिन्त्यतामिति । सीतान्वेषणादिप्रतिज्ञापूर्त्युपायः चिन्त्यतामित्यर्थः ॥ २३ ॥

एवमुक्तस्तु सुग्रीवः रामं वचनमब्रवीत् ।
प्रणष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् ॥ २४ ॥
त्वत्प्रसादात्, महाबाहो! पुनः प्राप्तमिदं मया!
तव, देव! प्रसादश्च भ्रातुश्च, जयतांवर! ॥ २५ ॥
कृतं न प्रतिकुर्याद्यः † पुरुषाणां स दूषकः ॥ २६ ॥

---

* धर्मेण-राजधर्मेण—गो. त्रिवर्गेषु धर्मस्यान्तर्भूतत्वादेवं व्याख्यानम् । नानाकारेषु धर्मेषु कक्ष्याभेदेन साध्यसाधनभावापन्नधर्मतात्पर्येण वा तथोक्तिः ॥

† पुरुषाणां स दूषकः—पुरुषाधम इति यावत् ।

[1] ततोऽर्थं—ङ. [2] पतन्न प्रति—ङ. [3] पिङ्गेश—ङ

देव—नरदेव! तव, भ्रातुश्चेति । प्रसादादित्यनुकर्षः । पुरुषाणां स दूषक इति । पुरुषाणां मध्ये स एव दूषकः । धर्मनाशकः इत्यर्थः ॥ २६ ॥

एते वानरमुख्याश्च शतशः, शत्रुसूदन!
प्राप्ताश्चादाय बलिनः पृथिव्यां सर्ववानरान् ॥ २७ ॥

एते वानरमुख्याः इति । वानरयूथपतयः इत्यर्थः ॥ २७ ॥

[1] ऋक्षाश्चावहिताः शूराः गोलाङ्गूलाश्च, राघव!
कान्तारवनदुर्गाणां अभिज्ञा घोरदर्शनाः ॥ २८ ॥

देवगन्धर्वपुत्राश्च वानराः कामरूपिणः ।
स्वैः स्वैः परिवृताः सैन्यैः वर्तन्ते* पथि, राघव! ॥२९॥

† शतैः शतसहस्रैश्च कोटिभिश्च प्लवङ्गमाः ।
अयुतैश्चावृता वीराः शङ्कुभिश्च, परन्तप! ॥ ३० ॥

अर्बुदैरर्बुदशतैः मध्यैश्चान्तैश्च वानराः ।
समुद्रैश्च परार्धैश्च हरयो हरियूथपाः ॥
आगमिष्यन्ति ते, राजन्! महेन्द्रसमविक्रमाः ॥३१॥

कोटिलक्षं शङ्कुरित्याहुः । सर्वत्र केचिच्छतैः केचिच्छतसहस्रैः इत्यादिना केचिच्छब्दः योज्यः । परार्धैश्चेति । परिवृता इति सर्वत्रानुकर्षः ॥ ३०-३१ ॥

---

* पथि वर्तन्त इति । आगमिष्यन्त्यचिरादित्यर्थः ॥ † सङ्ख्यालक्षणमुक्तं ज्योतिश्शास्त्रे—'एकं दश शतं अस्मात् सहस्रमयुतं ततः परं लक्षम् । प्रयुतं कोटिमथार्बुदवृन्दे खर्वं निखर्वं च । तस्मान्महासरोजं शङ्कुं सरितां पतिं त्वन्तम् । मध्यं परार्धमाहुः यथोत्तरं दशगुणं तथा ज्ञेयम् ' इति—गो.

[1] ऋक्षाश्च वानराः—च. ज.

[1] मेरुमन्दरसङ्काशाः विन्ध्यमेरुकृतालयाः ।
ते त्वामभिगमिष्यन्ति, राक्षसं [2] य सबान्धवम् ॥ ३२ ॥
निहत्य रावणं संख्ये ह्यानयिष्यन्ति मैथिलीम् ॥ ३३ ॥

ये ह्यानयिष्यन्ति तेऽत्राभिगमिष्यन्तीत्यन्वयः ॥ ३३ ॥

ततस्तमुद्योगमवेक्ष्य [3] बुद्धिमान्
हरिप्रवीरस्य निदेशवर्तिनः ।
बभूव हर्षात् वसुधाधिपात्मजः
प्रबुद्धनीलोत्पल[4]तुल्यदर्शनः ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे अष्टात्रिंशः सर्गः

वर्ग(३४)मानः सर्गः ॥ ३४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे अष्टात्रिंशः सर्गः

एकोनचत्वारिंशः सर्गः

[वानरसेनानिवेशनम्]

इति ब्रुवाणं सुग्रीवं रामो धर्मभृतां वरः ।
बाहुभ्यां संपरिष्वज्य प्रत्युवाच कृताञ्जलिम् ॥ १ ॥

अथ रामाय स्वस्वयूथसहितानां यूथपानां निवेदनम् । इति ब्रुवाणमित्यादि ॥ १ ॥

यदिन्द्रो वर्षते वर्षं न तच्चित्रं [5] भवेत् क्वचित् ।
आदित्यो वा सहस्रांशुः कुर्याद्वितिमिरं नभः ॥ २ ॥

---

[1] मेरुपर्वत–ङ. [2] योद्धुमाहवे–ङ. [3] वीर्यवान्–ङ. [4] दर्शनस्तदा–ङ.
[5] भविष्यति–ङ.

चन्द्रमा [1]रश्मिभिः कुर्यात् पृथिवीं, सौम्य ! *निर्मलाम् ।
त्वद्विधो वाऽपि मित्राणां [2]प्रतिकुर्यात्, परंतप !
एवं त्वयि न तच्चित्रं भवेद्यत्, सौम्य ! [3]शोभनम् ॥ ३ ॥

शुद्धसत्त्वसुमित्रत्वात् तवोपकारः सहजधर्मः इन्द्रादेरिवेति रामः सुग्रीवं स्तौति—यदिन्द्र इत्यादि । वर्षत इति यत्, तत् न चित्रं, स्वाभाविकत्वादिति शेषः । तथा अग्रेऽपि । निर्मलाम्—मलमिति सौरीकिरणसन्तापः, तद्रहिताम्, शीतलामिति यावत् । त्वद्विधः सात्त्विकः मित्राणां प्रत्युपकारेण प्रीतिं कुर्यादिति यत् तदपि न चित्रम् । यदेवं अतस्तावत् प्रकृते परमसात्त्विकेन त्वयापि एतन्मित्रप्रीणनं न चित्रं, हे सौम्य । तत्—तस्मात् त्वत्कृतं सेनामेलनं शोभनं—भद्रं जातम् ॥२-३॥

जानाम्यहं त्वां, सुग्रीव ! सततं प्रियवादिनम् ।
त्वत्सनाथः, सखे ! संख्ये जेताऽस्मि सकलानरीन् ॥ ४ ॥
[4]त्वमेव मे सुहृन्मित्रं साहाय्यं कर्तुमर्हसि ।
यो जहारात्मनाशाय वैदेहीं राक्षसाधमः ॥ ५ ॥
†वञ्चयित्वा तु पौलोमीं अनुह्लादो यथा [5]शचीम् ।
[6]नचिरात् तं [7]हनिष्यामि रावणं निशितैः शरैः ॥ ६ ॥

---

* निर्मलां—स्वच्छां—अन्धकाररहितामिति वा ॥ † यथा पौलोमीपितरं वञ्चयित्वा कृतानुमतिकं कृत्वा शचीं योऽनुह्लादो जहारात्मविनाशाय । इन्द्रः तत्पितरं अनुमन्तारं, हर्तारं चानुह्लादं हत्वा शचीं प्रत्यानीतवानिति पुराणगाथा–ति. इन्द्रेणेप्सितां पौलोमीं तत्पितुः पुलोमस्यानुमत्याऽनुह्लादो जहार । इन्द्रस्त्वनुमन्तारं पुलोमं हत्वा तां पुनरानीयोदवहदिति पौराणिकी कथा–गो.

[1] रजनीं कुर्यात् प्रभया–झ. [2] प्रीतिं–च. ज. [3] निर्मलम्–ङ. [4] एतदर्धस्थाने–त्वं मे भ्राता सखा च त्वं प्रियः सौम्य सुहृच्च मे । त्वं मे सुग्रीव वैदेह्याः साहाय्यं कर्तुमर्हसि–इत्यर्धद्वयं–ङ. [5] दिवि–ङ. [6] अचिरात्–ङ. [7] वधिष्यामि–च. ज.

पौलोम्याः पितरं दृप्तं शतक्रतु[1]रिहाहवे ॥ ७ ॥

य इत्यादि । पौलोम्याः शच्याः पितरं वञ्चयित्वा शचीं अनुह्लादः असुरः यथा–इव, वैदेहीं वञ्चयित्वा यो जहार आत्मनाशाय, दृप्तं तं रावणं अरिहा शतक्रतुरिव नचिरात् हनिष्यामीत्यन्वयः । अत्र *यद्वाभट्टस्तु—इन्द्रेणेप्सितां पौलोमीं तत्पितुः पुलोमस्य अनुमत्या अनुह्लादः जहार, इन्द्रस्तु अनुमन्तारं पुलोमं हत्वा तां च प्रत्यानीय उदवहत् इति पौराणिकी कथा अनुसन्धेयेत्याह । एतत्कथासत्त्वं दैवं वेत्ति । प्रसिद्धिस्तु नमुचिहन्ता बलहन्ता वृत्रहा इत्यादिवत् पुलोमहा इति नास्ति । अपि च पितुः स्वपुत्र्याः स्वेच्छानुमतिश्च नापराधः । नापि च अनुमन्तृहननवचनं प्रकृते दृष्टान्तायोपयुज्यते । एवं साहसमप्रयोजनं प्रालपत् ॥ ६–७ ॥

एतस्मिन्नन्तरे [2]चैव रजः समभिवर्तत ।
उष्णां तीव्रां सहस्रांशोः छादयद्गगने प्रभाम् ॥ ८ ॥

अभिवर्तत—अभ्यवर्ततेति यावत् ॥ ८ ॥

दिशः पर्याकुलाश्चासन् [3]रजसा तेन मूर्छिता ।
चचाल च मही सर्वा सशैलवनकानना ॥ ९ ॥
ततो नगेन्द्रसङ्काशैः तीक्ष्णदंष्ट्रैर्महाबलैः ।
कृत्स्ना [4]संछादिता भूमिः असंख्येयैः प्लवङ्गमैः ॥ १० ॥
निमेषान्तरमात्रेण ततस्तैर्हरियूथपैः ।
कोटीशतपरीवारैः [5]कामरूपिभिरावृता ॥ ११ ॥

ततो नगेन्द्रेत्युक्तार्थस्यैव प्रपञ्चः—निमेषेत्यादिः ॥ ११ ॥

---

* गोविन्दराजः ।

[1] रिवाहवे–ङ. [2] भीमं–ङ. [3] तमसा तेन मूर्छिताः–ङ. [4] वसुमती–ङ.
[5] वानरैर्हरियूथपैः–ख. ङ.

नादेयैः [1]पार्वतीयैश्च सामुद्रैश्च महाबलैः ।
हरिभि[2]र्मेघनिर्ह्रादैः अन्यैश्च [3]वनवासिभिः ॥ १२ ॥

वनवासिभिः । प्रागुक्तपद्मतालवनवासिभिरित्यर्थः ॥ १२ ॥

तरुणादित्यवर्णैश्च शशिगौरैश्च वानरैः ।
पद्मकेसरवर्णैश्च श्वेतै[4]र्मेरुकृतालयैः ॥ १३ ॥
कोटीसहस्रै[5]र्दशभिः श्रीमान् परिवृतस्तदा ।
वीरः शतवलिर्नाम वानरः प्रत्यदृश्यत ॥ १४ ॥
ततः काञ्चनशैलाभः ताराया वीर्यवान् पिता ।
अनेकैर्दशसाहस्रैः कोटिभिः प्रत्यदृश्यत ॥ १५ ॥

तारायाः पिता सुषेणः ॥ १५ ॥

[6]तथा वरेण कोटीनां सहस्रेण समन्वितः ।
पिता रुमायाः संप्राप्तः सुग्रीवश्वशुरो विभुः ॥ १६ ॥

वरेण—श्रेष्ठेन । रुमायाः पिता तारः ॥ १६ ॥

पद्मकेसरसङ्काशः तरुणार्कनिभाननः ।
बुद्धिमान् वानरश्रेष्ठः सर्ववानरसत्तमः ॥ १७ ॥
अनेकैर्बहुसाहस्रैः वानराणां समन्वितः ।
पिता हनुमतः श्रीमान् केसरी प्रत्यदृश्यत ॥ १८ ॥
[7]गोलाङ्गूलमहाराजः गवाक्षो भीमविक्रमः ।
वृतः कोटि[8]सहस्रेण वानराणामदृश्यत ॥ १९ ॥

---

[1] पार्वतेयैश्च—च. [2] मेघसंकाशैः ऋक्षै—ङ. [3] वनचारिभिः—ङ. [4] हेमकृतालयैः—ङ.
[5] बहुभिः—ङ. [6] तथाऽपरेण—ङ. [7] गोलाङ्गूलाधिपः श्रीमान्—ङ. [8] सहस्राणां शतेन समदृश्यत—ङ.

गोलाङ्गूलमहाराजः गवाक्षः वानराणामनीकैरित्यन्वयः। गोलाङ्गूलानामपि वानरावान्तरजातित्वात् तथा ॥ १९ ॥

ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः।
वृतः कोटिसहस्राभ्यां द्वाभ्यां समभिवर्तत ॥ २० ॥
*[1] महाचलनिभैर्घोरैः पनसो नाम यूथपः।
आजगाम महावीर्यः [2] तिसृभिः कोटिभिर्वृतः ॥ २१ ॥
नीलाञ्जनचयाकारः नीलो नामाथ यूथपः।
अदृश्यत महाकायः कोटिभिर्दशभिर्वृतः ॥ २२ ॥
ततः काञ्चनशैलाभः गवयो नाम यूथपः।
आजगाम महावीर्यः कोटिभिः पञ्चभिर्वृतः ॥ २३ ॥
[3] दरीमुखश्च बलवान् यूथपोऽभ्याययौ तदा।
वृतः कोटिसहस्रेण सुग्रीवं समुपस्थितः ॥ २४ ॥
मैन्दश्च द्विविदश्चोभौ अश्विपुत्रौ महाबलौ।
कोटिकोटिसहस्रेण वानराणामदृश्यताम् ॥ २५ ॥
गजश्च बलवान् वीरः कोटिभिस्तिसृभिर्वृतः।
[आजगाम महातेजाः सुग्रीवस्य समीपतः ॥]
ऋक्षराजो महातेजाः जाम्बवान्नाम नामतः ॥ २६ ॥
कोटिभिर्दशभिः [4] प्राप्तः सुग्रीवस्य वशे स्थितः।
[5] रुमण्वान् नाम विक्रान्तः वानरो [6] वानरेश्वरम् ॥ २७ ॥

---

* महाबलनिभैः (पा.)—महाबलेन प्रकाशमानैः–रा.

[1] महाबल–च. ज. [2] पञ्चभिः–ङ. [3] दधीमुखश्च–ङ. [4] व्याप्तः–ज.
[5] रूमणो–च. [6] वानरेश्वरः–ङ.

आययौ बलवांस्तूर्णं कोटीशतसमावृतः ।
ततः कोटिसहस्राणां सहस्रेण शतेन च ॥ २८ ॥
पृष्ठतोऽनुगतः प्राप्तः हरिभिर्गन्धमादनः ।
ततः पद्मसहस्रेण वृतः शङ्कुशतेन च ॥
युवराजोऽङ्गदः प्राप्तः पितृतुल्यपराक्रमः ॥ २९ ॥
पद्मसङ्ख्या युद्धकाण्डे अष्टाविंशे शुकवाक्ये द्रष्टव्या *॥ २९ ॥

ततस्ताराद्युतिस्तारः हरिर्भीमपराक्रमः ।
पञ्चभिर्हरिकोटीभिः दूरतः प्रत्यदृश्यत ॥ ३० ॥
ताराद्युतिः—नक्षत्रप्रभः । तारः रुमापितुः अन्योऽयमपि ॥३०॥

[1]इन्द्रजानुः कपिर्वीरः यूथपः प्रत्यदृश्यत ।
एकादशानां कोटीनां ईश्वरस्तैश्च संवृतः ॥ ३१ ॥
ततो रम्भस्त्वनुप्राप्तः तरुणादित्यसंनिभः ।
अयुतेनावृतश्चैव सहस्रेण शतेन च ॥ ३२ ॥
ततो यूथपतिर्वीरः दुर्मुखो नाम वानरः ।
प्रत्यदृश्यत कोटिभ्यां द्वाभ्यां परिवृतो बली ॥ ३३ ॥
कैलासशिखराकारैः वानरैर्भीमविक्रमैः ।
वृतः कोटिसहस्रेण हनुमान् प्रत्यदृश्यत ॥ ३४ ॥

---

* तत्रैवमुक्तम्—शतं शतसहस्राणां कोटिमाहुर्मनीषिणः । शतं कोटिसहस्राणां शंख इत्यभिधीयते ॥ शतं शंखसहस्राणां महाशंख इति स्मृतम् । महाशंखसहस्राणां शतं बृन्दमिति स्मृतम् ॥ शतं बृन्दसहस्राणां महाबृन्दमिति स्मृतम् । महाबृन्दसहस्राणां शतं पद्ममिति स्मृतम् ॥ शतं पद्मसहस्राणां महापद्ममिति स्मृतम् । महापद्मसहस्राणां शतं खर्वमिहोच्यते ॥ शतं खर्वसहस्राणां महाखर्वमिति स्मृतम् । महाखर्वसहस्राणां समुद्रमभिधीयते ॥ शतं समुद्रसाहस्रं ओघ इत्यभिधीयते । शतमोघसहस्राणां महौघ इति विश्रुतः ॥ (युद्ध.–28स. 33–39)

[1] इन्द्रभानुः—च.

नलश्चापि महावीर्यः संवृतो [1] द्रुमवासिभिः ।
कोटीशतेन संप्राप्तः सहस्रेण शतेन च ॥ ३५ ॥
ततो [2] दधिमुखः श्रीमान् कोटिभिर्दशभिर्वृतः ॥ ३६ ॥
[3] संप्राप्तोऽभिमतस्तस्य सुग्रीवस्य महात्मनः ।
शरभः कुमुदो वह्निः वानरो रंह एव च ॥ ३७ ॥
एते चान्ये च बहवः वानराः कामरूपिणः ।
आवृत्य पृथिवीं सर्वां पर्वतांश्च वनानि च ॥ ३८ ॥
यूथपास्समनुप्राप्ताः तेषां संख्या न विद्यते ।
आगताश्च [4] विशिष्टाश्च पृथिव्यां सर्ववानराः ॥ ३९ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
अभ्यवर्तन्त सुग्रीवं सूर्यमभ्रगणा इव ॥ ४० ॥
कुर्वाणा बहुशब्दांश्च [5] प्रहृष्टा बाहुशालिनः ।
शिरोभिर्वानरेन्द्राय सुग्रीवाय न्यवेदयन् ॥ ४१ ॥

शिरोभिः न्यवेदयन्निति । नैबिड्यात् दूरे स्थित्वा नमस्कारेणैव आत्मानं न्यवेदयन्नित्यर्थः ॥ ४१ ॥

अपरे वानरश्रेष्ठाः सङ्गम्य च यथोचितम् ।
सुग्रीवेण समागम्य स्थिताः प्राञ्जलयस्तदा ॥ ४२ ॥

*अपरे सङ्गम्य—समीपदेशं प्राप्य यथोचितं निवेदयित्वा जग्मुः । महाप्रभवः हनुमदङ्गदादयः समागम्य प्राञ्जलयः सन्तः समीपे स्थिताः इत्यर्थः ॥ ४२ ॥

---

* 'संगम्य' 'समागम्य' इति पदद्वयसद्भावादेवं व्याख्यानम् । संगम्य—परस्परं मिलित्वा—संघीभूयेति यावत् । संघीभूय सुग्रीवेण समागम्य स्थिता इति वा ॥ 'संयम्य' इति पाठे तु न क्लेशः ॥

[1] शैल—ङ. [2] दरीमुखः—ज. [3] संप्राप्तो मातुल—ङ., संप्राप्तोऽभिनदं—ज.
[4] निविष्टाश्च—ज. [5] प्रकृष्टबल—ङ.

सुग्रीवस्त्वरितो रामे सर्वांस्तान् वानरर्षभान् ।
निवेदयित्वा धर्मज्ञः * स्थितः प्राञ्जलिरब्रवीत् ॥ ४३ ॥

सुग्रीव इत्यादि । धर्मज्ञः—राजधर्मज्ञः सुग्रीवः त्वरितः रामाभिमुखं प्राञ्जलिः स्थित एव भूत्वा सर्वांस्तान् वानरर्षभान् यूथपतीन् रामे निवेद्य अथ तान् यूथपानब्रवीत् ॥ ४३ ॥

यथासुखं पर्वत[1]निर्झरेषु
वनेषु सर्वेषु च वानरेन्द्राः ।
† निवेशयित्वा विधिवद्बलानि
बलं बलज्ञः प्रतिपत्तुमीष्टे ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकोनचत्वारिंशः सर्गः

किमिति ? हे वानरेन्द्राः ! यथासुखं पर्वतादिषु यथाविधि बलानि निवेशयित्वा, अथ बलज्ञः--स्वस्वबलनिवेशप्रदेशज्ञो भूत्वा तत्तद्बलाधिप तत्तत्-स्वबलं प्रतिपत्तुं—परिपालयितुं ईष्टे । व्यत्ययाल्लट् । ईश्वरो भवत्वित्यर्थः । भाव(४४)मानः सर्गः ॥ ४४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकोनचत्वारिंशः सर्गः

---

* स्थितः, न तूपविष्ट इत्यर्थः ॥ † एते वानरेन्द्राः बलानि विधिवत् निवेशयित्वा, स्थिता इति शेषः । बलज्ञो भवान् (रामः) एतद्बलं प्रतिपत्तुं—स्वीकर्तुं—आज्ञप्तुं वा ईष्टे—समर्थः । एवं व्याख्याने पूर्वापरभागः स्वरसः ॥

[1] कन्दरेषु-ङ.

चत्वारिंशः सर्गः

[प्राचीदिक्प्रेषणम्]

*अथ राजा समृद्धार्थः सुग्रीवः प्लवगेश्वरः ।
उवाच नरशार्दूलं रामं परबलार्दनम् ॥ १ ॥

अथ सुग्रीवेण सीतान्वेषणाय पूर्वादिदिक्षु वानरयूथपानां प्रस्थापनम् । अथ राजेत्यादि ॥ १ ॥

आगता विनिविष्टाश्च बलिनः [1]कामरूपिणः ।
[2]वानरा वारणेन्द्राभाः ये मद्विषयवासिनः ॥ २ ॥

विनिविष्टाश्चेति । स्वस्वसेनानिवेश इति शेषः, अन्तर्भावितणिः, विनिवेशिताः इति यावत् । ये मद्विषयवासिनः इति । मम वानरसार्वभौमस्य विषये—राज्ये वासिनः इत्यर्थः ॥ २ ॥

त इमे बहुविक्रान्तैः [3]हरिभिर्भीमविक्रमैः ।
आगता वानरा घोराः दैत्यदानवसंनिभाः ॥ ३ ॥

बहुविक्रान्तैः—बहुस्थलेषु कृतापदानैः, अत एव भीमविक्रमैः स्वस्वयूथैः सहेति शेषः । दैत्यदानवयोः अवान्तरभेदः देवेषु सिद्धविद्याधरादिवत् † ॥ ३ ॥

‡ख्यात[4]कर्मापदानाश्च बलवन्तो जितक्लमाः ।
पराक्रमेषु विख्याताः व्यवसायेषु चोत्तमाः ॥ ४ ॥

---

* गतसर्गान्तिमश्लोकस्य विवरणं 'आज्ञापयितुमर्हसि' इति पर्यन्तम् ॥

† दितिः दनुश्च दक्षप्रजापतिपुत्र्यौ कश्यपपत्न्यौ । तत्सन्ततिभेदात् भेदोऽयम् ।

‡ 'अपदानं कर्म वृत्तम्' इत्यमरः ।

[1] कामचारिणः—च. ज. [2] वानरेन्द्रा महेन्द्राभाः—ज. [3] बलिभि—ज.

[4] कर्मपदाताश्च—ङ.

[1] पृथिव्यम्बुचराः, राम ! नानानगनिवासिनः ।
[2] कोटयोघाश्च इमे प्राप्ताः वानरास्तव किङ्कराः ॥ ५ ॥

ख्यातं कर्मणि–युद्धकर्मणि अपदानं—शौर्यं येषां ते तथा । पृथिव्यम्बुचरा इति । आसमुद्रपृथिवीचराः, समुद्रमध्यद्वीपचराश्चेत्यर्थः । कोट्योघाश्च इति पाठः । इदं च बाहुल्योपलक्षणम् ॥ ४–५ ॥

निर्देशवर्तिनः सर्वे सर्वे गुरुहिते रताः ।
अभिप्रेतमनुष्ठातुं तव शक्ष्यन्त्यरिन्दम ! ॥ ६ ॥

गुरुहिते–स्वामिहिते । तवाभिप्रेतमित्यन्वयः ॥ ६ ॥

त इमे बहुसाहस्रैः [3]अनीकैर्भीमविक्रमैः ।
यन्मन्यसे, नरव्याघ्र ! प्राप्तकालं तदुच्यताम् ॥
त्वत्सैन्यं त्वद्वशे युक्तं आज्ञापयितुमर्हसि ॥ ७ ॥

यत् प्राप्तकालं—कालोचितं मन्यसे तदुच्यताम् । नियोगः एषां कर्तव्यः इत्यर्थः । कथं त्वद्बलं मन्नियोज्यमित्यत्राह—त्वत्सैन्यमित्यादि ॥ ७ ॥

काममेषामिदं कार्यं विदितं *[4]मम तत्त्वतः ।
तथापि तु [5]यथातत्त्वं आज्ञापयितुमर्हसि ॥ ८ ॥

इदं कार्यमिति । सीतान्वेषणादिकार्यमित्यर्थः । यथातत्त्वं—यथोचितम् ॥ ८ ॥

इति ब्रुवाणं सुग्रीवं रामो [6]दशरथात्मजः ।
बाहुभ्यां संपरिष्वज्य इदं वचनमब्रवीत् ॥ ९ ॥

---

* विदितं, सीतान्वेषणार्थमेवानीतत्वात् ॥

[1] पृथिव्यम्बरचराः–ङ. [2] कोट्यग्रशश्च–ङ. [3] अनेकैर्बहु–ज. [4] वीर–ङ.
[5] यथायुक्तं–ज. [6] बुद्धिमतांवरः–ङ.

ज्ञायतां [1]मम वैदेही यदि जीवति वा न वा ।
स च देशः, [2]महाप्राज्ञ! यस्मिन् वसति रावणः ॥१०॥
अधिगम्य तु वैदेहीं निलयं रावणस्य च ।
प्राप्तकालं विधास्यामि तस्मिन् काले सह त्वया ॥ ११ ॥

तस्मिन् काल इति । वृत्तान्तावगत्यनन्तरकाल इत्यर्थः ॥११॥

*नाहमस्मिन् प्रभुः कार्ये, वानरेश! न लक्ष्मणः ।
[3]त्वमस्य हेतुः कार्यस्य प्रभुश्च, प्लवगेश्वर! ॥ १२ ॥

अस्य कार्यस्येति । सिद्धेरिति शेषः ॥ १२ ॥

त्वमेवाज्ञापय, विभो! मम कार्यविनिश्चयम् ।
त्वं हि जानासि [4]यत् कार्यं मम, वीर! न संशयः ॥१३॥
†सुहृद्द्वितीयो विक्रान्तः [5]प्राज्ञः कालविशेषवित् ।
भवानस्मद्धिते युक्तः [6]सुकृतार्थोऽर्थवित्तमः ॥ १४ ॥
एवमुक्तस्तु सुग्रीवः विनतं नाम यूथपम् ।
अब्रवीद्रामसांनिध्ये लक्ष्मणस्य च धीमतः ॥ १५ ॥
शैलाभं मेघनिर्घोषं [7]ऊर्जितं [8]प्लवगेश्वरः ।
[9]सोमसूर्यात्मजैः सार्धं वानरैः, वानरोत्तम! ॥ १६ ॥
देशकालनयैर्युक्तः [10]कार्याकार्यविनिश्चये ।
वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ १७ ॥

---

* अस्मिन्—सीतान्वेषणरूपे कार्ये अहं न प्रभुः, न समर्थः, रावणगत्यागत्यादीनां तवैव ज्ञातत्वात् ॥ स्वसैन्यनियोजने नाहं प्रभुरिति वा ॥ † द्वितीयः सुहृत्, लक्ष्मणापेक्षया—ति. 'सुहृद्विनीतः' इति क पाठः—गो.

[1] सौम्य—ज. [2] महावीर—ङ. [3] त्वमेव—ङ. [4] मे कार्यं—ङ. [5] प्राप्तकाल—ङ [6] सुहृदाप्तो—ङ. [7] जीमूतं—ङ. [8] प्लवगेश्वरम्—ञ. [9] सोमसूर्यनिभैः—ञ. [10] विज्ञः कार्ये—च. ञ.

अधिगच्छ दिशं पूर्वां सशैलवनकाननाम् ।
तत्र सीतां च वैदेहीं निलयं रावणस्य च ॥ १८ ॥
मार्गध्वं [1] गिरिशृङ्गेषु वनेषु च नदीषु च ॥ १९ ॥

सोमसूर्यात्मजैरिति । सोमसूर्यमण्डलवर्तिनौ ग्रहकोटिनिविष्टौ देवौ सोमसूर्यौ । मण्डलाधिपतेः भास्करस्य पुत्रः सुग्रीव एव । कार्याकार्यविनिश्चये तदपेक्षितैः देशकालनयैः युक्तः । नयः—नीतिः सामादिरूपिणी । मार्गध्वमिति सामान्यतो नियोगः ॥१६-१९॥

*नदीं भागीरथीं रम्यां सरयूं कौशिकीं तथा ।
कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम् ॥ २० ॥
सरस्वतीं च सिन्धुं च शोणं मणिनिभोदकम् ।
महीं कालमहीं चैव शैलकाननशोभिताम् ॥ २१ ॥

कालिन्दीं यमुनामिति । कलिन्दपर्वतसम्भूतत्वरूपविशेषणवतीम् । यामुनं च महागिरिमिति । यमुनोत्पत्तिभूमिभूतं कालिन्दीगिरिमित्यर्थः । महीकालमह्यौ नद्यौ ॥ २०-२१ ॥

ब्रह्ममालान् विदेहांश्च मालवान् काशिकोसलान् ।
मागधांश्च महाग्रामान् [2] पुण्ड्रान् वङ्गांस्तथैव च ॥
[3] पत्तनं † कोशकाराणां भूमिं च रजताकराम् ॥ २२ ॥

---

* हेमाचलविन्ध्यमध्यदेशवर्त्यार्यावर्तापेक्षया प्राच्यादिविभागो विवक्षितः, न तु मेर्वपेक्षया, स्वावस्थितमाल्यवदपेक्षया वा—ती. शरावती नाम काचिन्नदी हिमवद्विन्ध्यदेशे वलयाकारेण प्रवहति । तदपेक्षया प्राची दिगिदानीं विचेतव्यत्वेनोच्यते, न किष्किन्धापेक्षया, नापिमेर्वपेक्षया—गो. † कोशकाराणां—राजविशेषाणां—गो. स्वर्णकाराणां—ती.

[1] गिरिदुर्गेषु—ज. [2] पुण्ड्रांस्त्वङ्गां—च. ज. [3] भूमिं च—ज.

अथ प्राच्यदेशानुक्रमः ब्रह्ममालानित्यादि। सर्वत्रात्र हिमवद्विन्ध्यमध्यवर्तिमध्यदेशपूर्वापरविभागापेक्षया, 'प्राचां ग्रामनगराणां' इति शास्त्रीयप्राच्यविभागापेक्षया वा मन्तव्यं प्राच्यत्वम्। कोशकाराणां भूमिमिति। कौशेयोपादानतन्तू(त्पत्त्यादि)त्पादकमहालूताकारभूमिमित्यर्थः। रजताकरामिति। रजतखनिमित्यर्थः॥ २२॥

सर्वमेतद्विचेतव्यं मार्गयद्भिस्ततस्ततः।
रामस्य दयितां भार्यां सीतां दशरथस्नुषाम्॥ २३॥
समुद्रमवगाढांश्च पर्वतान् पत्तनानि च।
मन्दरस्य च ये कोटिं संश्रिताः [1]केचिदायताम्॥ २४॥

समुद्रमवगाढान्—समुद्रान्तर्गतान्। आयतां कोटिमित्यन्वयः। द्वीपवर्तिप्रजादर्शनेन तद्देशो विचेयो लक्ष्यते॥ २४॥

*कर्णप्रावरणाश्चैव तथाचाप्योष्ठकर्णकाः।
घोरा लोहमुखाश्चैव [2]जवनाश्चैकपादकाः॥ २५॥
अक्षया बलवन्तश्च [3]पुरुषाः पुरुषादकाः।
[4]किरातास्तीक्ष्णचूडाश्च [5]हेमाङ्गाः प्रियदर्शनाः॥ २६॥
आममीनाशनास्तत्र †किराता द्वीपवासिनः।
अन्तर्जलचरा घोराः नरव्याघ्रा इति श्रुताः॥ २७॥
एतेषामालयास्सर्वे विचेयाः, [6]काननौकसः!॥ २८॥

---

* कर्णप्रावरणाः—आच्छादितकर्णाः, निष्कर्णा इत्यर्थः—गो. †किराताः—अस्वतनवः—ती.

[1] केचिदाश्रयाः. [2] यवना—ङ. [3] तथैव—ञ. [4] किराताः कर्णचूडाश्च—ङ.
[5] हेमाभाः—ञ. [6] कामरूपिणः—ङ.

कर्णप्रावरणाः—प्रावरणं वस्त्रं, तद्वत् विशालपुटाः । ओष्ठपर्यन्तः कर्णः येषां ते ओष्ठकर्णकाः । लोहमुखाः—लोहवत् कृष्णकाठिनमुखाः । एक एव पादः येषां ते एकपादाः । एवमपि जवनाः—वेगगतियुक्ताः । अक्षयाः—अक्षयसन्तानाः । सर्वे एतदुक्ताः पुरुषाः पुरुषादकाः राक्षसभेदाः । तीक्ष्णाः चूडाः—केशपाशाः येषां ते तथा । तैक्ष्ण्यं च सूचीवत् । आममीनाशनाः—आर्द्रमत्स्यभुजः । त एत एव नरव्याघ्राः—नरा एव सन्तः अधः प्रदेशे ऊर्ध्वप्रदेशे च व्याघ्राः । अत एव घोराः । काननौकसः इति सम्बुद्धिः ॥ २५–२८ ॥

*गिरिभिर्ये च गम्यन्ते [1]प्लवनेन प्लवेन च ।
[2]रत्नवन्तं यवद्वीपं सप्तराज्योपशोभितम् ॥ २९ ॥
[3]सुवर्णरूप्यकं चैव [4]सुवर्णाकरमण्डितम् ।
यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः ॥ ३० ॥
दिवं स्पृशति शृङ्गेण देवदानवसेवितः ।
एतेषां गिरिदुर्गेषु [5]प्रपातेषु वनेषु च ॥
मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीम् ॥ ३१ ॥

गिरिभिः ये द्वीपाः गम्यन्ते—गिरेर्गिरिमाक्रम्येत्यर्थः । ये च द्वीपाः प्लवनेन–केवलं प्लवनेन गम्यन्ते । ये च प्लवेन–उडुपभेदेन गम्यन्ते । ततः परं यत्नवन्तो भूत्वा सप्तराज्योपशोभितं द्वीपं तथा सुवर्णद्वीपं रूप्यकद्वीपं च, ततः परं यवाख्यो द्वीपः, तमतिक्रम्य शिशिरो नाम पर्वतोऽस्ति । एतेषां—उक्तद्वीपानामित्यर्थः ॥ ३१ ॥

* एवं जम्बूद्वीपान्वेषणं विधाय द्वीपान्तरान्वेषणं विधत्ते–गिरिभिरित्यादि–गो.

[1] कङ्कनेन–ज. [2] यत्नवन्तो–ङ. [3] सुवर्णकुडचकं चैव–ङ., सुवर्णरूप्यकद्वीपं–ज.
[4] सुवर्णकर–ज. [5] प्रभूतेषु–ङ.

*ततो रक्तजलं शोणं अगाधं शीघ्रगामिनम् ।
गत्वा [1]पारं समुद्रस्य सिद्धचारणसेवितम् ॥ ३२ ॥
तस्य तीर्थेषु रम्येषु विचित्रेषु वनेषु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ३३ ॥

ततो रक्तजलमित्यादि । ततः समुद्रस्य पारं गत्वा तत्र रक्तजलं रक्तवर्णजलं अत एव शोणाख्यं अगाधं शीघ्रवाहिनं नदं प्राप्य तस्य तीर्थेषु—अवतारभेदेषु ॥ ३२-३३ ॥

पर्वतप्रभवा नद्यः [2]सुरम्या बहुनिष्कुटाः ।
मार्गितव्या दरीमन्तः पर्वताश्च वनानि च ॥ ३४ ॥

बहुनिष्कुटाः—बहूपवनप्रदेशाः । दरीमन्तः-दरीयुक्ताः ॥

†ततः समुद्रद्वीपांश्च सुभीमान् द्रष्टुमर्हथ ।
ऊर्मिमन्तं [3]समुद्रं च क्रोशन्तमनिलोद्धतम् ॥ ३५ ॥

ततः समुद्रेति । उक्तप्रदेशात्परतोवर्तिसमुद्रान्तर इति यावत् । स च इक्षुसमुद्रः । ऊर्मिमन्तं-ऊर्मियुक्तम् । अत एव क्रोशन्तं —महाघोषम् ॥ ३५ ॥

तत्रासुरा महाकायाः छायां गृह्णन्ति नित्यशः ।
ब्रह्मणा समनुज्ञाताः दीर्घकालं बुभुक्षिताः ॥ ३६ ॥

तत्र—इक्षुसमुद्रे । समनुज्ञाताः—समनुज्ञातछायाग्रहणशक्त्यादिमन्तः, छायाग्रहणप्राणिभक्षणानुमतिकाश्चेत्यर्थः ॥ ३६ ॥

---

*एवं जम्बूद्वीपं लवणसमुद्रं चोक्त्वा प्लक्षद्वीपप्रदेशानाह—तत इत्यादिना-गो.
†अथेक्षुसमुद्रद्वीपानाह—तत इति-गो.

[1] समुद्रपारस्थम्-ङ. [2] सुभीमबहु-ञ. [3] महारौद्रं-ञ.

तं कालमेघप्रतिमं महोरगनिषेवितम् ।
*[1]अभिगम्य महानादं तीर्थेनैव महोदधिम् ॥ ३७ ॥
ततो रक्तजलं भीमं लोहितं नाम सागरम् ।
[2]गता द्रक्ष्यथ तां चैव बृहतीं कूटशाल्मलीम् ॥ ३८ ॥

इक्षुरसस्यापि श्यामत्वात् तत्समुद्रस्य कालमेघप्रतिनिभत्वम् । तीर्थेनैव—छायाग्राहकासुरपरिहारोपायेन तामसरात्रिगमनेनेत्यर्थः । 'तीर्थं पात्रोपायावतारेषु' इति निघण्ट्वन्तरम् । ततः—इक्षुसागरात्परतः । रक्तं—रक्तवर्णस्वरूपं जलं यस्मिन् स तथा । अत एव लोहितम् । कूटशाल्मली — शाल्मलीद्वीपत्वप्रयोजकः दिव्यसिद्धिदो वृक्षः, जम्बूद्वीपे जम्बूवत् ॥ ३७–३८ ॥

गृहं च वैनतेयस्य नानारत्नविभूषितम् ।
†तत्र कैलाससङ्काशं विहितं विश्वकर्मणा ॥ ३९ ॥

तत्र—कूटशाल्मलीसमीपे ॥ ३९ ॥

[तत्र शैलनिभा भीमाः मन्देहा नाम राक्षसाः ।
[3]शैलशृङ्गेषु लम्बन्ते नानारूपा भयावहाः ॥
ते पतन्ति जले नित्यं सूर्यस्योदयनं प्रति ।
निहता ब्रह्मतेजोभिः अहन्यहनि राक्षसाः ॥
अभितप्ताश्च सूर्येण लम्बन्ते स्म पुनः पुनः ॥]

शैलशृङ्गेषु—सुरासमुद्रान्तर्वर्तिशैलशृङ्गेषु । लम्बन्ते—लम्बपक्षिवत् अधोमुखाः लम्बन्ते । ते पतन्तीत्यादि । सूर्योदयं प्रति प्राप्य

* तीर्थेन—उपायेन— छायाग्राहिपरिहारेण । यद्वा, तीर्थेन-अवतरणेन गन्तव्यम्, नान्येन, तेन छायाग्राहिपरिहारो भविष्यतीति भावः-गो. † तत्र—शाल्मलिद्वीपे-गो.

[1] अतिक्रम्य-ङ. [2] गत्वा-ज. [3] तेषु शृङ्गेषु-ङ.

ऊर्ध्वमुखाः सूर्येण सह युध्यमानाः सूर्येणाभितप्ताः तन्मण्डलमध्यवर्ति-ब्रह्मतेजोभिः तद्विद्यास्त्रतेजोभिः अहन्यहनि त्रैवर्णिकप्रवर्तितैः नित्यं हतास्सन्तः व्यसवः समुद्रजले पतन्ति। पतितास्ते राक्षसाः पुनः पुनश्चोज्जीविताः सर्वां रात्रिं लम्बन्ते स्मेति योजनार्थः। इदं 'शैलशृङ्गेषु लम्बन्ते' इत्यादि श्लोकद्वयं प्रक्षिप्तमेव। एतत्प्रक्षेपकश्च— 'रक्षांसि ह वा पुरोनुवाके' इत्यनुवाकवर्तिनः 'तानि रक्षांसि मन्देहारुणे द्वीपे प्रक्षिपन्ति' इति वाक्यस्य 'मन्देहाख्यान् राक्षसान् अरुणाख्ये द्वीपे प्रक्षिपन्ती'त्यर्थं मन्यमानः कश्चित्। नात्रारुणद्वीपप्रसङ्गः। अर्थतत्त्वं च वाक्यस्य श्रुतिसंविज्ञानभाष्ये अस्मदीये द्रष्टव्यम्। प्राचीनकोशेषु च न दृश्यते। तदव्याख्येयं कुण्डलनीयमेवेदं* श्लोकद्वयम् ॥ ३९ ॥

ततः पाण्डर[1]मेघाभं क्षीरोदं नाम सागरम्।
[2]गता द्रक्ष्यथ दुर्धर्षाः मुक्ताहारमिवोर्मिभिः ॥ ४० ॥

ततः पाण्डरमेघाभमित्यादि। †अत्र सुराक्षीरसमुद्रमध्यवर्तिसर्पिर्दधिसमुद्रद्वीपाविचयनं तत्र प्रायो गिरिदुर्गादिगुप्तस्थलाभावात् तात्पर्यतो नोक्तम्। मार्गवशात् स्वयमेव तद्दर्शनं अवर्ज्यं प्राप्तम्। मुक्ताहारमिति मत्त्वर्थीयाजन्तः। मुक्ताहारवन्तमिवेत्यर्थः ॥ ४० ॥

---

*सार्धश्लोकद्वयमिति युक्तम् ॥ †अत्र मधुसमुद्रानन्तरं सर्पिर्दधिसमुद्रयोः, कुशक्रौञ्चद्वीपयोश्च वक्तव्यत्वेऽपि तान् विहाय क्षीरोदप्राप्त्यभिधानं तदुभयप्राप्तिमन्तरेण क्षीरोदप्राप्तेरसंभवात्। अतः अनुक्तावपि तावुक्तावेव समुद्रौ द्वीपौ चेति बोध्यम्। यद्वा लवणसमुद्रं तन्मध्यद्वीपांश्चोक्त्वा प्लक्षद्वीपशाल्मलिद्वीपक्रौञ्चद्वीपान् इक्षुसुरासर्पिर्दधिसमुद्रांश्च तन्त्रेण दर्शयति—ततः समुद्रद्वीपांश्च सुभीमान् द्रष्टुमर्हथ (श्लो. ३५) इति-**गो.**

[1] संघातं-**ङ.** [2] गत्वा-**ञ.**

तस्य मध्ये महान् श्वेतः ऋषभो नाम पर्वतः ।
दिव्यगन्धैः कुसुमितैः राजतैश्च नगैर्वृतः ॥ ४१ ॥
सरश्च राजतैः पद्मैः ज्वलितैर्हेमकेसरैः ।
नाम्ना सुदर्शनं नाम राजहंसैः समाकुलम् ॥ ४२ ॥

सरश्च नाम्ना सुदर्शनमित्यन्वयः । नामशब्दः प्रसिद्धौ ॥ ४२ ॥

विबुधाश्चारणा यक्षाः किन्नराः साप्सरोगणाः ।
हृष्टाः समभिगच्छन्ति नलिनीं तां रिरंसवः ॥ ४३ ॥

नलिनीम्—प्रागुक्तसुदर्शनं सर इत्यर्थः ॥ ४३ ॥

क्षीरोदं समतिक्रम्य ततो द्रक्ष्यथ, वानराः !
जलोदं सागरश्रेष्ठं सर्वभूतभयावहम् ॥ ४४ ॥

जलोदं—शुद्धजलरूपमुदकं यस्मिन् स तथा ॥ ४४ ॥

तत्र तत् कोपजं तेजः कृतं हयमुखं महत् ।
[1] अस्याहुतं महावेगं ओदनं सचराचरम् ॥ ४५ ॥

तत्र—जलसमुद्रे । तत्—प्रसिद्धं । कोपजं—और्वब्रह्मर्षिकोपजं हयमुखं— बडवामुखं तेजः अस्ति । अस्याहुतं महावेगं प्रति, सचराचरं सर्वं जगत् युगान्ते ओदनं वदन्ति ॥ ४५ ॥

तत्र विक्रोशतां नादः भूतानां सागरौकसाम् ।
श्रूयते [2] च समर्थानां दृष्ट्वा तद्बडबामुखम् ॥ ४६ ॥

तत्र पतनभीत्या विक्रोशतां समर्थानां- प्रबलानामपि सागरौकसां भूतानां नादः श्रूयते ॥ ४६ ॥

---

[1] अस्याहुस्तन्महा, अत्यद्भुतं महा-ङ. [2] चासमर्थानां—ख. ज.

[1]स्वादूदस्योत्तरे तीरे योजनानि त्रयोदश ।
जातरूपशिलो नाम [2]महान् कनकपर्वतः ॥ ४७ ॥

स्वादूदस्य—शुद्धोदकसमुद्रस्य । उत्तरे तीरे इति पाठः । युष्माभिः प्राप्तशुद्धोदपूर्वदिक्तीरापेक्षया उत्तरतीरप्रदेश इत्यर्थः ॥४७॥

तत्र चन्द्रप्रतीकाशं पन्नगं धरणीधरम् ।
पद्मपत्रविशालाक्षं ततो द्रक्ष्यथ, वानराः ! ॥ ४८ ॥

चन्द्रप्रतीकाशं—श्वेतवर्णमिति यावत् ॥ ४८ ॥

*आसीनं पर्वतस्याग्रे [3]सर्वभूतनमस्कृतम् ।
सहस्रशिरसं देवं अनन्तं नीलवाससम् ॥ ४९ ॥
त्रिशिराः काञ्चनः केतुः तालस्तस्य महात्मनः ।
स्थापितः पर्वतस्याग्रे विराजति सवेदिकः ॥
†पूर्वस्यां दिशि निर्माणं कृतं तत्रिदशेश्वरैः ॥ ५० ॥

त्रिशिराः—शिरःप्रदेशवर्तित्रिस्कन्धवानित्यर्थः । सवेदिकः इति । आधारवेदिबन्धसहित इत्यर्थः । अयमेव तालः पूर्वस्यां दिशि पूर्वदिग्व्यवस्थायां त्रिदशेश्वरैः प्रमाणं, अभिज्ञाशङ्कुवत् कृतमित्यर्थः ॥५०॥

ततः परं हेममयः श्रीमानुदयपर्वतः ।
तस्य कोटिर्दिवं स्पृष्ट्वा शतयोजनमायता ॥ ५१ ॥
जातरूपमयी दिव्या विराजति सवेदिका ।
सालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः ॥ ५२ ॥

---

* आसीनमित्यादि पूर्वश्लोकेनान्वेति । † पूर्वदिगवधित्वेन तालरूपः केतुः कल्पित इत्यर्थः—गो.

[1] जलदस्योत्तरे देशे—ङ. [2] सुमहान् कनकप्रभः—ञ. [3] सर्वदेव—च. ञ.

जातरूपमयैर्दिव्यैः शोभते सूर्यसंनिभैः ॥ ५३ ॥

कोटिः—शिखरम् । सवेदिका—सपातनिकपर्वता ॥ ५१-५३ ॥

तत्र योजनविस्तारं उच्छ्रितं दशयोजनम् ।
शृङ्गं सौमनसं नाम जातरूपमयं ध्रुवम् ॥ ५४ ॥

तत्र दशयोजनदीर्घोदयगिरिशिखरे सौमनसं नाम उच्यमानं शृङ्गमस्ति ॥ ५४ ॥

*तत्र पूर्वं पदं कृत्वा पुरा विष्णुस्त्रिविक्रमे ।
द्वितीयं शिखरे मेरोः चकार पुरुषोत्तमः ॥ ५५ ॥

तत्र—सौमनसे प्रथमं पादं पूर्वं कृत्वा द्वितीयं पादं मेरोः शिखरे चकार ॥ ५५ ॥

†उत्तरेण परिक्रम्य जम्बूद्वीपं दिवाकरः ।
दृश्यो भवति भूयिष्ठं शिखरं तन्महोच्छ्रयम् ॥ ५६ ॥

सौमनसशिखरमुत्तरेण जम्बूद्वीपमतिक्रम्य प्राप्य तत्र स्थितानां दिवाकरः दृश्यो भवति ॥ ५६ ॥

---

* विष्णुः त्रिविक्रमे—त्रिविक्रमप्रस्तावे तत्र—सौमनशृङ्गे पूर्वं पदं कृत्वा द्वितीयं पदं मेरोः पश्चिमदिगवधिभूतस्य सावर्णिमेरोः शिखरे चकार । पूर्वपश्चिमदिगवधिभूतयोः उदयाचलसावर्णिमेर्वोः विष्णोः पदविन्यासः बलेः कृत्स्नराज्यग्रहणार्थः । भूमध्यस्थमेरौ पदविन्यासे कृत्स्नाक्रमणं न लभ्येत । वस्तुतस्तु मेरोरेव शिखरे द्वितीयं पदं न्यस्तम् । मेरुशिखरस्य स्वर्गत्वात् । भूमावेकं स्वर्गे द्वितीयं तृतीयं ब्रह्मलोक इति पौराणिकी गाथा—गो. † अस्तानन्तरं उत्तरेण जम्बूद्वीपं परिक्रम्य तन्महोच्छ्रयं शिखरं सौमनसाख्यं प्राप्य स्थितो दिवाकरः जम्बूद्वीपवर्तिनां भूयिष्ठं दृश्यो भवति, सौमनसे शिखर इत्यर्थः । इदं सत्ययुगाभिप्रायम् । त्रेतायां क्षीरसागरमध्यगस्य, द्वापरे सुरोदमध्यगस्य कलौ लङ्कामध्यगस्य जम्बूद्वीपस्थ मनुष्यदृश्यताया अन्यत्रोक्तत्वात्—ति.

तत्र वैखानसा नाम वालखिल्या महर्षयः ।
प्रकाशमाना दृश्यन्ते सूर्यवर्णास्तपस्विनः ॥ ५७ ॥

तत्र—सौमनसशिखर इत्यर्थः ॥ ५७ ॥

*अयं सुदर्शनो द्वीपः पुरो यस्य प्रकाशते ।
तस्मिंस्तेजश्च चक्षुश्च सर्वप्राणभृतामपि ॥ ५८ ॥
शैलस्य तस्य[1] शृङ्गेषु कन्दरेषु वनेषु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ५९ ॥

यस्य पुरः—पुरस्तात् सन्निधौ अयं सुदर्शनो द्वीपः—प्रागुक्त सुदर्शनसरश्चिह्नो द्वीपः प्रकाशते, तस्मिन् सौमनसशिखरे भगवत्युदिते प्राणिनां तेजः—तेजस्सम्बन्धः भवति, चक्षुश्च प्रकाशते; तस्य शैलस्य कन्दरेष्वित्यादि ॥ ५८-५९ ॥

काञ्चनस्य च शैलस्य सूर्यस्य च महात्मनः ।
आविष्टा तेजसा सन्ध्या पूर्वा रक्ता प्रकाशते ॥ ६० ॥

काञ्चनस्य शैलस्य सूर्यस्य च तेजसा पूर्वा सन्ध्या आविष्टा—समाक्रान्ता सती रक्ता प्रकाशमाना सन्ध्या पूर्वा दिगित्येव सैव पूर्वा दिक् निरुच्यते ॥ ६० ॥

†पूर्वमेतत्कृतं द्वारं पृथिव्या भुवनस्य च ।
ये च नोक्ता मया देशाः विचेया तेषु जानकी ॥ ६१ ॥

---

* यस्य तेजसः पुरः—सन्निधौ सर्वप्राणभृतामपि चक्षुः प्रकाशते—विषयग्रहणशक्तं भवति, तत् तेजः सूर्य स्वयं यस्मिन् द्वीपे प्रकाशते—गो. † पूर्वं—प्रथमं पृथिव्याः एतत् द्वारं—ऊर्ध्वस्थानां पृथिवीप्रवेशस्य द्वारं, पृथिवीस्थानां भुवनस्य—ब्रह्मभुवनस्य प्रवेशद्वारं एतदुदयगिरिरूपं—ति.

[1] कुञ्जेषु—ङ. पृष्ठेषु—ज.

पूर्वमेतदित्यादि। च—यस्मात् भुवनस्य प्रकाशनहेतोः सूर्यस्योदयं चापेक्ष्य यस्मात् पूर्वं प्रथमं पृथिव्या एतद्वारं—एतद्दिग्वर्तिमहद्भूविवरणं सृष्टं ब्रह्मणा, तस्मादेषा दिक् पूर्वेत्युच्यते ॥ ६१ ॥

तस्य शैलस्य पृष्ठेषु निर्झरेषु गुहासु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६२ ॥

तस्य शैलस्येति। उदयशैलस्येत्यर्थः ॥ ६२ ॥

ततः परमगम्या स्यात् दिक् पूर्वा त्रिदशावृता।
रहिता चन्द्रसूर्याभ्यां अदृश्या [1]तिमिरावृता ॥ ६३ ॥

ततः परमिति। उदयाद्रेः परस्तादित्यर्थः। त्रिदशावृता-इन्द्रादिभिः तद्दिगधिष्ठातृभिः त्रिदशैः आवृता—अधिष्ठिता। तस्याः परमगम्यत्वे हेतुमाह—रहितेत्यादि ॥ ६३ ॥

शैलेषु तेषु सर्वेषु कन्दरेषु [2]वनेषु च।
ये च नोक्ता मया देशाः विचेया तेषु जानकी ॥ ६४ ॥

उक्तार्थोपसंहारः— शैलेष्वित्यादि ॥ ६४ ॥

एतावद्वानरैः शक्यं गन्तुं, वानरपुङ्गवाः!
अभास्करममर्यादं* न जानीमस्ततःपरम् ॥ ६५ ॥
अधिगम्य तु वैदेहीं निलयं रावणस्य च।
मासे पूर्णे निवर्तध्वं उदयं प्राप्य पर्वतम् ॥ ६६ ॥
ऊर्ध्वं मासान्न वस्तव्यं वसन् वध्यो भवेन्मम।
सिद्धार्थाः सं निवर्तध्वं अधिगम्य च मैथिलीम् ॥ ६७ ॥

सिद्धार्थाः-कृतान्वेषणकृत्याः। समधिगम्य निवर्तध्वमित्यन्वयः ॥

---

* अमर्यादं—ग्रामनगरादिमर्यादारहितं, केवलान्धकारभूतमित्यर्थः-**गो** अभास्करत्वादेव दुरवगमत्वात् अमर्यादमिति वा ॥

[1] तमसा—**ज.** [2] नदीषु च—**ज.**

महेन्द्रकान्तां वनषण्डमण्डितां
दिशं चरित्वा निपुणेन, वानराः!
अवाप्य सीतां रघुवंशजप्रियां
ततो निवृत्ताः सुखिनो भविष्यथ ॥ ६८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चत्वारिंशः सर्गः

अवृत्त(६८ १/२)मानः सर्गः ॥ ६८ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चत्वारिंशः सर्गः

एकचत्वारिंशः सर्गः

[दक्षिणदिक्प्रेषणम्]

ततः प्रस्थाप्य सुग्रीवः तन्महद्वानरं बलम् ।
दक्षिणां प्रेषयामास वानरानभिलक्षितान् ॥ १ ॥

अथ दक्षिणदिगन्वेषणप्रेरणम् । ततः प्रस्थाप्येत्यादि । *अभिलक्षितान्—प्रख्यातान् ॥ १ ॥

नीलमग्निसुतं चैव हनुमन्तं च वानरम् ।
पितामहसुतं चैव जाम्बवन्तं महाबलम् ॥ २ ॥
सुहोत्रं च शरारिं च शरगुल्मं तथैव च ।
गजं गवाक्षं गवयं सुषेणमृषभं तथा ॥ ३ ॥

---

* अभिलक्षितान्—कार्यसमर्थत्वेन निर्णीतान्—ति. दक्षिणदिगभिमुखतया रावणगमनस्य पूर्वं दृष्टत्वात् तद्दिशि समर्थानां प्रेषणम् ॥

1 सुरेन्द्र-ङ,

मैन्दं च द्विविदं चैव [1]विजयं गन्धमादनम् ।
उल्कामुख[2]मसङ्गं च हुताशनसुतावुभौ ॥ ४ ॥

*अग्निहुताशनयोः सर्वतेजोऽधिष्ठातृदेवतात्वेन हुताशनत्वविशिष्टतदवान्तरविशेषणतश्च भेदः । हुताशनसुताविति पाङ्क्तः ॥ ४ ॥

अङ्गदप्रमुखान् वीरान् वीरः कपिगणेश्वरः ।
वेगविक्रमसम्पन्नान् सन्दिदेश विशेषवित् ॥ ५ ॥

विशेषविदिति । विशिष्यान्वेष्टव्यदेशाविशेषविदित्यर्थः ॥ ५ ॥

तेषामसङ्गहं चैव [3]महद्बल†मसङ्गगम् ।
विधाय हरिवीराणां आदिशत् दक्षिणां दिशम् ॥ ६ ॥

असङ्गहमिति । असङ्कोचमिति यावत् । दक्षिणां दिशमादिशदिति । अन्वेष्टव्यत्वेनेति शेषः ॥ ६ ॥

ये केचन समुद्देशाः तस्यां दिशि [4]सुदुर्गमाः ।
कपीशः कपिमुख्यानां स तेषां [5]तानुवाच ह ॥ ७ ॥

तस्यां दिशि ये सुदुर्गमाः तानुवाच हत्यन्वयः ॥ ७ ॥

सहस्रशिरसं विन्ध्यं नानाद्रुमलतायुतम् ।
नर्मदां च नदीं [6]दुर्गां महोरगनिषेविताम् ॥ ८ ॥

अत्राप्यार्यावर्तापेक्षया दक्षिणत्वं परिगृह्य नियोगः—सहस्रशिरसमित्यादि ॥ ८ ॥

---

* 'नीलमग्निसुतं' 'हुताशनसुतौ' इत्यनयोर्विरोधपरिहारार्थं व्याख्या ॥

† असङ्गगं—अविलम्बगामि–गो.

[1] शरभं–ङ. सुषेणं–च. ज. [2] मनङ्गं–ज. [3] महाबलमथाङ्गदम्–ङ.
[4] सुदारुणाः–ङ. [5] तानुदाहरत्–ङ. [6] रम्यां–ज.

[1] ततो गोदावरीं रम्यां कृष्णवेणीं महानदीम् ।
[2] वरदां च [3] महाभागां महोरगनिषेविताम् ॥ ९ ॥

ततो गोदावरीमित्यत्र विन्ध्यपूर्वप्रदेशवर्तिगोदावरीनदीमित्यर्थः । उत्तरत्र 'गोदावरीं च' (१२) इत्यत्र तु दण्डकारण्यवर्तिगोदावरीप्रदेशः विवक्षितः * ॥ ९ ॥

मेखलामुत्कलां चैव दशार्णनगराण्यपि ।
[4] अश्ववन्तीमवन्तीं च सर्वमेवानुपश्यत ॥ १० ॥

मेखलादयो देशभेदाः ॥ १० ॥

[5] विदर्भानृषिकांश्चैव रम्यान् माहिषकानपि ।
तथा [6] वत्सकलिङ्गांश्च [7] कौशिकांश्च समन्ततः ॥ ११ ॥

'ऋषिकां' इति पाठः । वत्साश्च कलिङ्गाश्च वत्सकलिङ्गाः । (उभाः इति देशभेदाः ?) ॥ ११ ॥

[8] अन्वीक्ष्य दण्डकारण्यं सपर्वतनदीगुहम् ।
नदीं गोदावरीं चैव सर्वमेवानुपश्यत ॥ १२ ॥
तथैवान्ध्रांश्च पुण्ड्रांश्च चोलान् पाण्ड्यान् सकेरलान् ।
अयोमुखश्च गन्तव्यः पर्वतो धातुमण्डितः ॥
विचित्रशिखरः श्रीमान् चित्रपुष्पितकाननः ॥
सचन्दनवनोद्देशः मार्गितव्यो महागिरिः ॥ १३ ॥

अयोमुखः इति मलयस्य नामान्तरम् । सचन्दनवनत्वलिङ्गात् ॥

---

* अथवा उत्तरवाक्यस्यावान्तरोपसंहारवाक्यत्वाद्वा न पुनरुक्तिदोषः ॥

[1] भोगावतीं रम्यां कृष्णां–ङ. [2] इदमर्धं कुण्डलितं–ज. [3] वरारोहां–ङ.
[4] अश्रुवन्तीं श्रुवन्तीं च–ङ., आश्रुवन्तीं अवन्तीं च–ज. [5] विदर्भानृष्टिकांश्चैव–ङ. ज.
[6] वङ्ग–ङ., मत्स्य–ज. [7] काशिकांश्च–ङ. [8] अन्विष्य–ङ.

ततस्तामापगां दिव्यां प्रसन्न[1]सलिलां शिवाम् ।
तत्र द्रक्ष्यथ कावेरीं [2]विहितामप्सरोगणैः ॥ १४ ॥

तस्यासीनं नगस्याग्रे मलयस्य महौजसम् ।
*द्रक्ष्यथादित्यसङ्काशं अगस्त्यमृषिसत्तमम् ॥ १५ ॥

तस्येति । अयोमुखपर्यायस्येत्यर्थः ॥ १५ ॥

ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना ।
ताम्रपर्णीं [3]ग्राहजुष्टां तरिष्यथ महानदीम् ॥ १६ ॥

ग्राहजुष्टामिति ताम्रपर्णीविशेषणम् ॥ १६ ॥

सा चन्दन[4]वनैर्दिव्यैः [5]प्रच्छन्ना द्वीपशालिनी ।
कान्तेव [6]युवतिः कान्तं समुद्रमवगाहते ॥ १७ ॥

ततो हेममयं दिव्यं मुक्तामणिविभूषितम् ।
†युक्तं कवाटं पाण्ड्यानां गता द्रक्ष्यथ वानराः ॥ १८ ॥

युक्तं—पुरप्राकारघटितम् ॥ १८ ॥

ततः समुद्रमासाद्य सम्प्रधार्योऽर्थनिश्चयः ।
अगस्त्येनान्तरा तत्र सागरे विनिवेशितः ॥ १९ ॥

---

*तत्राप्यगस्त्याश्रमस्य सत्त्वात् तन्नामकऋष्यन्तरकल्पनाद्वा न पञ्चवटीप्रकरण-विरोधः—रा. यद्यपि पञ्चवटीतः उदग्भागे अगस्त्याश्रमः पूर्वमुक्तः, तथाप्यत्रापि बोधः, वाल्मीकेरनेकदेशेष्वाश्रमवत् । समाननामा अन्य एवायमित्यन्ये—ति. ३५ श्लोकोऽपि द्रष्टव्यः ॥ †युक्तं—योग्यं कवाटं, अनेन नगरं लक्ष्यते—गो. युक्तं—पुरद्वारि निविष्टं, पाण्ड्यानां—राजविशेषाणां कवाटं द्रक्ष्यथ—रा. कवाटमिति नगरनाम वा ॥

[1] सलिलाशयाम्—ज. [2] विहृता—ज. [3] महाग्राहां—ङ. [4] वनैश्चित्रैः—ज.
[5] प्रच्छन्नद्वीपवारिणी—ज. [6] युवती—ज.

[1]चित्रनानानगः श्रीमान् [2]महेन्द्रः पर्वतोत्तमः ।
जातरूपमयः श्रीमान् अवगाढो महार्णवम् ॥ २० ॥

अर्थनिश्चयः संप्रधार्यः—समुद्रतरणरूपकार्यस्य शक्ताशक्तनिश्चयः कर्तव्यः। तत्र तरणसाधनभूतः पर्वतः उपदिश्यते—अगस्त्येनेत्यादि। सागरः इत्यणन्तम्, सागरसम्बन्धिन्यन्तरे—अवकाशे अगस्त्येन विनिवेशितः—प्रतिष्ठापितः नगः—वृक्षः, तस्य श्रीः—समृद्धिः, तद्वान्। अत एव श्रीमान्—सौन्दर्यवान्। अवगाढः—प्रविष्टैकपार्श्वः ॥ १९–२० ।

नानाविधैर्नगैः [3]सर्वैः लताभिश्चोपशोभितम् ।
[4]देवर्षियक्षप्रवरैः अप्सरोभिश्च [5]सेवितम् ॥ २१ ॥
सिद्धचारण[6]सङ्घैश्च प्रकीर्णं सुमनोहरम् ।
*तमुपैति सहस्राक्षः सदा पर्वसु पर्वसु ॥ २२ ॥

सहस्राक्षः तमुपैतीत्यनेन महेन्द्राधिष्ठितत्वात् अन्वर्थनामकत्वं महेन्द्रपर्वतस्य ॥ २२ ॥

द्वीपस्यास्यापरे पारे शतयोजनमायतः ।
अगम्यो मानुषैर्दीप्तः तं मार्गध्वं समन्ततः ॥ २३ ॥
तत्र सर्वात्मना सीता मार्गितव्या विशेषतः ॥ २४ ॥

अस्य द्वीपस्येति। महेन्द्रपर्वतद्वीपस्येत्यर्थः। अपरे पारे इति। पारं—परतीरम्। अपरशब्दो भेदवाची। परतीरविशेषे प्रतिष्ठितमिति शेषः। दीप्तः—स्वर्णभूयिष्ठत्वात् दीप्तः—तेजिष्ठः। सर्वात्मना—सर्वप्रकारेण। विशेषतः इति। एकदेशमप्यनुपेक्ष्येत्यर्थः॥

---

* सहस्राक्षः, तं पर्वतं पर्वसु पर्वसु समुद्रस्नानायागच्छति—गो.

[1] चित्रनानावनः—ङ, चित्रसानुनगः—ज. [2] नगेन्द्रः—ङ. [3] फुल्लैः—च. ज. [4] गन्धर्वयक्ष—ङ. [5] शोभितम्—ज. [6] गन्धर्वैः—ङ.

*स हि देशस्तु वध्यस्य रावणस्य [1]दुरात्मनः ।
राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥ २५ ॥
दक्षिणस्य समुद्रस्य मध्ये [2]तस्य तु राक्षसी ।
†अङ्गारकेति विख्याता [3]छायामाकृष्य भोजनी ॥ २६ ॥

भोक्तुं शीलमस्याः इति भोजनी ॥ २६ ॥

एवं निस्संशयान् कृत्वा संशयान् नष्टसंशयाः ।
मृगयध्वं नरेन्द्रस्य पत्नीममिततेजसः ॥ २७ ॥
तमतिक्रम्य लक्ष्मीवान् समुद्रे शतयोजने ।
गिरिः पुष्पितको नाम सिद्धचारणसेवितः ॥ २८ ॥
चन्द्रसूर्यांशुसङ्काशः [4]सागराम्बुसमावृतः ।
भ्राजते विपुलैः शृङ्गैः अम्बरं विलिखन्निव ॥ २९ ॥
‡तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः ।
श्वेतं [5]राजतमेकं च सेवते यं निशाकरः ॥ ३० ॥

संशयान्—संशयितप्रदेशान् निस्संशयान् कृत्वा, सम्यगन्वेषणेनेति शेषः, ततो नष्टसंशया एव—संप्राप्तसत्त्वासत्त्वनिश्चया एव सन्तः तत्रासत्त्वे सति तमतिक्रम्य मृगयध्वम् । क मार्गणीयमित्यतः—लक्ष्मीवानित्यादि । काञ्चनं शृङ्गं यं भगवान् दिवाकरः सेवते तत्र नित्यं कलया संनिहितो भवतीत्यर्थः । तथा अग्रिममपि व्याख्येयम् ॥

---

* 'मार्गितव्या विशेषतः' इत्यत्र हेतुः—स हीत्यादि । ननु तर्हि इतरदिग्भ्यः कपीनां प्रेषणं किमर्थमिति चेत्—दक्षिणदिशि रावणालयश्रवणेऽपि सीताया अन्यत्र कुत्रापि निवेशनादिसंभावनयेति बोध्यम् ॥ † अङ्गारकेति सिंहिकाया एव नामान्तरं स्याद्वा ॥ ‡ शृङ्गशब्दः अर्धर्चादिः—ति. अतः पुल्लिङ्ग इति शेषः । तस्यैकमिति । दक्षिणायन इति शेषः—गो.

[1] महात्मनः—ङ. [2] वसति—ङ. [3] छायामाक्षिप्य—ज. [4] सागरान्तसमाश्रयः—ङ. [5] रजतशृङ्गं च—ङ.

न तं कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ।
प्रणम्य शिरसा शैलं तं विमार्गत वानराः ॥ ३१ ॥

एवं महादेवताधिष्ठितत्वात्— न तं कृतघ्ना इत्यादि ॥ ३१ ॥

तमतिक्रम्य, [1]दुर्धर्षाः ! सूर्यवान् नाम पर्वतः ।
अध्वना दुर्विगाहेन योजनानि चतुर्दश ॥ ३२ ॥

चतुर्दशेति । उपलक्षित इति शेषः ॥ ३२ ॥

ततस्तमप्यतिक्रम्य वैद्युतो नाम पर्वतः ।
सर्वकामफलैर्वृक्षैः सर्वकाल[2]मनोहरैः ॥ ३३ ॥

तत्र भुक्त्वा [3]वरार्हाणि मूलानि च फलानि च ।
मधूनि पीत्वा [4]मुख्यानि परं गच्छत वानराः ॥ ३४ ॥

तत्र नेत्रमनःकान्तः कुञ्जरो नाम पर्वतः ।
*अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा ॥ ३५ ॥

तत्र योजनविस्तारं उच्छ्रितं दशयोजनम् ।
शरणं काञ्चनं दिव्यं नानारत्नविभूषितम् ॥ ३६ ॥

तत्र योजनेति । कुञ्जरपर्वत इत्यर्थः । अगस्त्यभवनस्यैव वर्णनं— योजनेत्यादि । शरणं—गृहम् ॥ ३६ ॥

तत्र भोगवती नाम सर्पाणामालयः पुरी ।
विशाल[5]कक्ष्या दुर्धर्षा सर्वतः परिरक्षिता ॥ ३७ ॥

---

* इदं तृतीयमगस्त्यस्थानम्—ति. १५ श्लोकोऽत्र द्रष्टव्यः ॥

[1] दुर्धर्षः—ङ. [2] मनोरमैः—ङ. [3] महार्हाणि—ङ. [4] जुष्टानि—ञ. [5] रथ्या—ञ.

रक्षिता पन्नगैर्घोरैः तीक्ष्णदंष्ट्रैर्महाविषैः ।
सर्पराजो [1]महाप्राज्ञः यस्यां वसति वासुकिः ॥
निर्याय मार्गितव्या च सा च भोगवती पुरी ॥ ३८ ॥

तत्रेति। उक्तलक्षणागस्त्यभवनलक्षितदेश इत्यर्थः। भोगवती नाम सर्पाणामालयः पुरी इति नित्यपुल्लिङ्गत्वात्। ननु भोगवती पाताले, तथा भूमेरधः शेषो महीं बिभर्तीति प्रसिद्धम्। किमिदमुच्यते इह भूमेरुपरि तदुभयमिति ? उच्यते। मेरुमारभ्य चक्रवालभूसन्निवेशस्य क्रमनिम्नत्वात् उक्तस्थलयोः परमनिम्नत्वात् निम्नभूतलमेव रसातलमित्याशयेन इदं वचनम्। वस्तुतस्तु शेषस्य क्षित्याधारत्वं भोगवत्याश्च अन्धकारवति भूमेरधःप्रदेशे अधोभुवनत्वेनैव युज्यते। एवं च इदं रावणस्य जनस्थानवत् भूमावपि सर्पाणां किञ्चित् पुरं भोगवत्याख्यमस्ति। तथा शेषमूर्तिरपि भूम्युपर्यपि योगवैभवादस्तीति ध्येयम्। अगस्त्यस्य यथा कुञ्जरपर्वते विश्वकर्मनिर्मितभवनेवासवत् नक्षत्रपदवासश्च ॥ ३८ ॥

तत्र चानन्तरा देशाः ये केचन सुसंवृताः ।
तं च देशमतिक्रम्य महानृषभ[2]संस्थितः ॥ ३९ ॥
सर्वरत्नमयः श्रीमान् ऋषभो नाम पर्वतः ॥ ४० ॥

ऋषभसंस्थितः— ऋषभाकारसंस्थानवान्। तत्रेति। ऋषभ पर्वत इत्यर्थः ॥ ३९–४० ॥

*गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम् ।
दिव्यमुत्पद्यते यत्र तच्चैवाग्निसमप्रभम् ॥ ४१ ॥

---

* गोशीर्षकादयश्चन्दनभेदाः–ति.

[1] महाघोरः–च. ज. [2] पर्वतः–ङ., संस्थितिः–ज.

न तु तच्चन्दनं दृष्ट्वा स्प्रष्टव्यं च कदाचन ।
रोहिता नाम गन्धर्वा: [1] घोरा रक्षन्ति तद्वनम् ॥ ४२ ॥

तत् दिव्यं चन्दनं न स्प्रष्टव्यमित्यत्र हेतुः—रोहिता इत्यादि ॥

तत्र गन्धर्वपतयः पञ्च सूर्यसमप्रभाः ।
शैलूषो ग्रामणीः [2] शिग्रुः [3] शुभ्रो बभ्रुस्तथैव च ॥ ४३ ॥
रविसोमाग्निवपुषां निवासः पुण्यकर्मणाम् ।
अन्ते पृथिव्या दुर्धर्षाः [4] तत्र स्वर्गजितः स्थिताः ॥ ४४ ॥

ऋषभपर्वतात्परतः पृथिव्या अन्ते पुण्यकर्मणां निवासः । ततः परतः स्वर्गजित एव स्थिता भवन्ति ॥ ४४ ॥

[5] ततः परं न वः सेव्यः पितृलोकः सुदारुणः ।
राजधानी यमस्यैषा कष्टेन तमसा वृता ॥ ४५ ॥

तत एव हेतोः—ततः पितृलोकः न वस्सेव्यः—अगम्यः ॥

एतावदेव युष्माभिः वीरा वानरपुङ्गवाः !
शक्यं विचेतुं गन्तुं वा नातो गतिमतां गतिः ॥ ४६ ॥
सर्वमेतत् समालोक्य यच्चान्यदपि दृश्यते ।
गतिं विदित्वा वैदेह्याः संनिवर्तितुमर्हथ ॥ ४७ ॥
* यस्तु मासान्निवृत्तोऽग्रे दृष्टा सीतेति वक्ष्यति ।
मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति ॥ ४८ ॥
ततः [6] प्रियतरो नास्ति मम प्राणाद्विशेषतः ।
† कृतापराधो बहुशः मम बन्धुर्भविष्यति ॥ ४९ ॥

---

* मासात्—मासान्तदिनात् अग्रे—पूर्वं–रा. † कृतापराधः—कृतापराधोऽपि ॥

[1] घोरं–च. ज. [2] शिक्षः–ज. [3] भिक्षुः–ङ., शुकः–ज., शुष्कः–झ.
[4] ततः–ज. [5] नातः परं नरैः सेव्यः–ङ. [6] प्रियतमो–ङ.

अमितबलपराक्रमा भवन्तः
विपुलगुणेषु कुलेषु च प्रसूताः ।
मनुजपतिसुतां यथा लभध्वं
[1]तदधिगुणं पुरुषार्थमारभध्वम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकचत्वारिंशः सर्गः

मनुजपतिसुतां यथा लभध्वं—लप्स्यध्वं इति यावत्, तथा तत्—तत्कार्यमुद्दिश्य अधिगुणं—अधिकगुणोपेतं पुरुषार्थं—पुरुषप्रयत्नमारभध्वम् । आशा(५०)मानः सर्गः ॥ ५० ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकचत्वारिंशः सर्गः

द्विचत्वारिंशः सर्गः

[प्रतीचीदिक्प्रेषणम्]

अथ प्रस्थाप्य सुग्रीवः तान् हरीन् दक्षिणां दिशम् ।
अब्रवीन्मेघसङ्काशं सुषेणं नाम [2]यूथपम् ॥ १ ॥

अथ पश्चिमदिगन्वेषणप्रेरणम् । अथ प्रस्थाप्येत्यादि ॥ १ ॥

तारायाः पितरं राजा श्वशुरं भीमविक्रमम् ।
अब्रवीत् प्राञ्जलिर्वाक्यं अभिगम्य प्रणम्य च ॥ २ ॥

प्राञ्जलिः प्रणम्याब्रवीदिति । श्वशुरत्वान्नतिः* ॥ २ ॥

---

* अत एव साक्षात्तं प्रति नाज्ञा, ‘ सुषेणप्रमुखा यूयं ’ इतीतरान् प्रत्येवाज्ञा ॥

[1] तदनुगुणं—ङ. [2] वानरम्—ज.

[1] मरीचिपुत्रं मारीचं अर्चिष्मन्तं महाकपिम् ।
वृतं कपिवरैः शूरैः महेन्द्रसदृशद्युतिम् ॥ ३ ॥
बुद्धिविक्रमसम्पन्नं वैनतेय[2]समद्युतिम् ।
* [3] मरीचिपुत्रान् मारीचान् [4]अर्चिर्मालान् महाबलान् ॥
ऋषिपुत्रांश्च तान् सर्वान् प्रतीचीमादिशद्दिशम् ।
द्वाभ्यां शतसहस्राभ्यां कपीनां, कपिसत्तमाः !
सुषेणप्रमुखा यूयं वैदेहीं [5]परिमार्गथ ॥ ५ ॥

मरीचिपुत्रं अर्चिष्मदाख्यं मारीचं प्रधानं, तथा अन्यान् अर्चिर्मालाख्यान् तथा अन्यांश्च मरीचिपुत्रान् मारीचान् । मारीचशब्दस्य अर्थान्तरेऽपि व्युत्पत्तिसम्भवात् मारीचानिति । परिमार्गथ— परिमार्गध्वमिति यावत् ॥ ५ ॥

[6] सुराष्ट्रान् सहबाह्लीकान् शूरान् भीमांस्तथैव च ।
स्फीतान् जनपदान् रम्यान् विपुलानि पुराणि च ॥ ६ ॥

शूराश्च भीमाश्च देशविशेषाः । विपुलानि-विशालानि ॥ ६ ॥

पुन्नागगहनं कुक्षिं वकुलोद्दालकाकुलम् ।
तथा केतकषण्डांश्च मार्गध्वं, [7]हरियूथपाः ! ॥ ७ ॥

कुक्षिः—देशविशेषः ॥ ७ ॥

प्रत्यक्स्रोतोद्गमाश्चैव नद्यः शीतजलाः शिवाः ।
तापसानामरण्यानि कान्तारा गिरयश्च ये ॥ ८ ॥

---

* 'मारीचं' इति ज्येष्ठ उक्तः, मारीचा इति तदनुजा उच्यन्ते-गो.

[1] महर्षिपुत्रं-ज. झ. [2] समं जवे-ङ. [3] इदमर्धं अधिकं-झ.
[4] अर्चिर्ध्वजान्-ङ. [5] परिमार्गत —झ. [6] सौराष्ट्रान्—ज. [7] हरिपुङ्गवाः—ज.

प्रत्यङ्मुखाः स्रोतोद्गमाः यासां तास्तथा। अरण्यानि। स्थलानीति शेषः ॥ ८ ॥

ततः *स्थलीं मरुप्रायां [1]अत्युच्चशिरसः शिलाः।
गिरिजालावृतां दुर्गां [2]मार्गित्वा पश्चिमां दिशम् ॥ ९ ॥
ततः पश्चिममागम्य समुद्रं द्रष्टुमर्हथ।
[3]तिमिनक्रायुतजलं अक्षोभ्यमथ, वानराः! ॥ १० ॥

पश्चिममागम्यैव समुद्रं द्रष्टुमर्हथ—अत एव पश्चिमं गत्वा समुद्रं द्रक्ष्यथ ॥ १० ॥

ततः केतकषण्डेषु तमालगहनेषु च।
कपयो †विहरिष्यन्ति नारिकेलवनेषु च ॥ ११ ॥

कपय इति। युष्मत्सैनिकाः इति शेषः ॥ ११ ॥

[4]तत्र सीतां च मार्गध्वं निलयं रावणस्य च।
[5]वेलातटनिविष्टेषु पर्वतेषु वनेषु च ॥ १२ ॥
[6]मुरचीपत्तनं चैव [7]मृतं चैव [8]जटीपुरम्।
‡अवन्ती[9]मङ्गलोपां च [10]तथा चालक्षितं वनम् ॥ १३ ॥
राष्ट्राणि च विशालानि पत्तनानि ततस्ततः ॥ १४ ॥

मृतं—मृताख्यं पुरं। अवन्त्यङ्गलोपे पुरे। आलक्षिताख्यं वनम् ॥

---

* स्थली—अकृत्रिमा भूमिः—रा. † 'मरुप्रायां' इत्युक्तप्रदेशापेक्षयाऽस्य सुखावहत्वसूचनाय 'विहरिष्यन्ति' इति ॥ ‡ पूर्वस्यां दिश्यवन्तीयमन्या—गो.

[1] अत्युग्रशिखराः—ङ. अत्युच्चशिशिराः—ज. [2] मार्गध्वं—ङ. [3] मीननक्रा—ङ. [4] ह्रदमर्थमधिकं—झ. [5] वेकातल—ज. [6] मुरवीपत्तनं—ङ. [7] रम्यं—ङ. [8] नदीपुरम्, जलापुरम्—ङ., जटापुरम्—ज. [9] मङ्गलेपाश्च—ज. [10] तथा चावक्षितं—ङ.

सिन्धुसागरयोश्चैव सङ्गमे तत्र पर्वतः ।
महान् [1] हेमगिरिर्नाम शतश्रृङ्गो महाद्रुमः ॥ १५ ॥

महान्तो द्रुमाः यस्मिन् स तथा ॥ १५ ॥

तस्य प्रस्थेषु रम्येषु सिंहाः [2] पक्षगमाः स्थिताः ।
तिमिमत्स्यगजांश्चैव *नीडान्यारोपयन्ति ते ॥ १६ ॥

तस्य रम्येषु प्रस्थेषु ये स्थिताः पक्षगमाख्याः सिंहविशेषाः ते तिम्यादीन् स्वानि नीडान्यारोपयन्ति । अत्र नीडशब्दात् तेषां सिंहानां पक्षगमत्वं अन्वर्थमित्यवधेयम् ॥ १६ ॥

तानि नीडानि सिंहानां गिरिश्रृङ्गगताश्च ये ।
†दृप्तास्तृप्ताश्च मातङ्गाः तोयदस्वननिःस्वनाः ॥
[3] विचरन्ति विशालेऽस्मिन् तोयपूर्णे समन्ततः ॥ १७ ॥

तोयपूर्णे इति । प्रस्थेष्वित्यनुकर्षः ॥ १७ ॥

तस्य श्रृङ्गं दिवस्पर्शं काञ्चनं चित्रपादपम् ।
सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः ॥ १८ ॥
कोटिं तत्र [4] समुद्रस्य काञ्चनीं शतयोजनाम् ।
दुर्दर्शां ‡पारियात्रस्य गता द्रक्ष्यथ, वानराः ! ॥ १९ ॥

कोटिं—श्रृङ्गम् । समुद्रस्येति । मध्य इति शेषः ॥ १९ ॥

---

* नीडानि आरोपयन्ति—लालनार्थं नीडेषु स्थापयन्तीत्यर्थः-रा. अत एव महाद्रुमा इति पूर्वमुक्तम्-गो. † दृप्ताः—सपक्षसिंहादृतत्वेन प्राप्तगर्वाः—सिंहानां तानि नीडानि-रा. विचरन्ति—सिंहनीडाश्रयसानुषु विचरन्तीत्यर्थः-गो. ‡ पारियात्रः इति कस्यचित् गिरेर्नाम ।

[1] सोमगिरि-ञ. [2] पक्षमृगाः-ङ. [3] विहरन्ति-ङ. [4] समुद्रे तु-ङ.

कोट्यस्तत्र [1] चतुर्विंश द्गन्धर्वाणां तरस्विनाम् ।
वसन्त्यग्निनिकाशानां [2] घोराणां [3] पापकर्मणाम् ॥ २० ॥

घोराणां, अत एव पापकर्मणां—संहर्तॄणामित्यर्थः । कोटयः—समवेता इत्यनुकर्षः ॥ २० ॥

[4] पावकार्चिःप्रतीकाशाः समवेताः [5] सहस्रशः ।
* [6] नात्यासादयितव्यास्ते वानरैर्भीमविक्रमैः ॥ २१ ॥

नात्यासादयितव्या इति । अन्यदुर्गमाः, अन्यदुष्प्रधर्षा इति यावत् ॥ २१ ॥

नादेयं च फलं तस्मात् देशात् किञ्चित् प्लवङ्गमैः ।
दुरासदा हि ते वीराः सत्त्ववन्तो महाबलाः ॥ २२ ॥
फलमूलानि ते तत्र [7] रक्षन्ते भीमविक्रमाः ।
तत्र यत्नश्च कर्तव्यः मार्गितव्या च जानकी ॥ २३ ॥
न हि तेभ्यो भयं किञ्चित् † कपित्वमनुवर्तताम् ॥ २४ ॥

नादेयं—अग्राह्यम् । तत्र यत्नश्च कर्तव्य इति । मार्गण इति शेषः । ननु पापकारिणः नात्यासादयितव्याः इत्युक्तम् । तत् कथं परिमार्गणं इत्यत्राह—न हि तेभ्य इत्यादि । कपित्वमिति । तद्देशीय-मृगपक्षिवत् प्राकृतकपिमृगस्वभावमवलम्बमानानामित्यर्थः ॥ २२-२४ ॥

तत्र वैडूर्यवर्णाभः वज्रसंस्थानसंस्थितः ।
नानाद्रुमलताकीर्णः वज्रो नाम महागिरिः ॥ २५ ॥

---

* नात्यासादयितव्याः—नातिसमीपं प्राप्तव्याः-गो. † कपित्वमनुवर्तताम्—प्रौढभावं परित्यज्य मुग्धभावे तिष्ठतां न भयमित्यर्थः ॥

[1] चतुस्त्रिंशत्-ङ. [2] महतां-झ. [3] कामरूपिणाम्-ज. [4] पाकशासनसं-ङ. [5] समन्ततः-ञ. [6] नान्यैस्ते दर्शितव्यास्ते-ङ. [7] रक्षन्तो-ङ.

श्रीमान् *समुदितस्तत्र योजनानां शतं समम् ।
गुहास्तत्र विचेतव्याः प्रयत्नेन, प्लवङ्गमाः ! ॥ २६ ॥

वैडूर्यस्येव वर्णः आभा च यस्य स तथा। वज्रवत् अतिकठिनसंस्थानेन संस्थितः तथा। योजनानां शतं समं सम्पूर्णमवष्टभ्य समुदितः-प्रतिष्ठितः ॥ २५-२६ ॥

चतुर्भागे समुद्रस्य चक्रवान्नाम पर्वतः ।
तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा ॥ २७ ॥

चतुर्भाग इति। पश्चिमसमुद्रस्य पश्चिमचतुर्थभागप्रदेश इत्यर्थः ॥

†तत्र पञ्चजनं हत्वा हयग्रीवं च दानवम् ।
आजहार ततश्चक्रं शङ्खं च पुरुषोत्तमः ॥ २८ ॥

पञ्चजनं—तदाख्यम् । हयस्येव ग्रीवा यस्य स तथा ॥ २८ ॥

तस्य सानुषु [1] चित्रेषु विशालासु गुहासु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २९ ॥
[2] योजनानां ततः षष्टिः वराहो नाम पर्वतः ।
सुवर्णशृङ्गः [3] सुश्रीमान् अगाधे वरुणालये ॥ ३० ॥
तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम् ।
यस्मिन् वसति दुष्टात्मा नरको नाम दानवः ॥ ३१ ॥

---

*समुदितः—प्रतिष्ठितः–ति. †चक्ररक्षकं हयग्रीवाख्यं दानवं हत्वा चक्रं, पञ्चजनाख्यं दानवं हत्वा तदस्थिभूतं पाञ्चजन्याख्यं शङ्खं च जग्राह। कृष्णः पञ्चजनं हत्वा पाञ्चजन्यं जग्राहेत्युच्यते, तत्तु विष्ण्ववतारेऽप्यस्तीति ज्ञेयम्—गो.

[1] रम्येषु–च. ज. [2] योजनानि चतुष्षष्टिः–ज. [3] सुमहान्–ज.

[1] तत्र सानुषु [2] चित्रेषु [3] विशालासु गुहासु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ३२ ॥
तमतिक्रम्य शैलेन्द्रं *काञ्चनान्तर[4]निर्दरः ।
पर्वतः सर्वसौवर्णः [5]धाराप्रस्रवणायुतः ॥ ३३ ॥

काञ्चनान्तराः—काञ्चनगर्भाः निर्दराः यस्मिन् स तथा, तं प्राप्य स्थिताः सर्वतो गर्जन्तीत्यन्वयः ॥ ३३ ॥

तं गजाश्च वराहाश्च सिंहा व्याघ्राश्च सर्वतः ।
अभिगर्जन्ति सततं †तेन शब्देन दर्पिताः ॥ ३४ ॥

तेन शब्देन मतङ्गजादिशब्देन उपलक्षितः इत्यर्थः । दर्पिताः गजादयः इति योजना । ३४ ॥

यस्मिन् ‡हरिहयः श्रीमान् महेन्द्रः पाकशासनः ।
अभिषिक्तः सुरै राजा [6]मेघवान् नाम पर्वतः ॥ ३५ ॥
तमतिक्रम्य शैलेन्द्रं महेन्द्रपरिपालितम् ।
षष्टिं गिरिसहस्राणि काञ्चनानि गमिष्यथ ॥ ३६ ॥
तरुणादित्यवर्णानि भ्राजमानानि सर्वतः ।
जातरूपमयैर्वृक्षैः शोभितानि सुपुष्पितैः ॥ ३७ ॥

तमतिक्रम्येति । मेघवत्पर्वतमतिक्रम्येत्यर्थः । षष्टिं गिरिसहस्राणि इति । षष्टिसंख्यानीति यावत् । शतं ब्राह्मणा इति पङ्क्त्यादिनिपातनात् साधु ॥ ३६-३७ ॥

---

* काञ्चनान्तरनिर्दरः—सौवर्णमयान्तरप्रदेशवत्कन्दरः-गो. † तेन शब्देन—स्वशब्देन-गो. स्वगर्जितेन-रा. ‡ हरिहयः—श्यामवर्णाश्वयुक्त-गो. तेन न पौनरुक्त्यमिति भावः ॥

[1] इदं पद्यमधिकं—झ [2] रम्येषु—ङ. ज. [3] काननेषु—ङ. [4] दर्शनम्—ज. [5] नाना-ङ. [6] मेघो नाम स—ज.

तेषां मध्ये स्थितो राजा मेरुरु[1]त्तमपर्वतः ।
आदित्येन प्रसन्नेन शैलो दत्तवरः पुरा ॥ ३८ ॥

तेषां षष्टिसहस्रपर्वतानां मध्ये राजेव स्थितः मेरुः—मेरुवत् काञ्चनः यः उत्तमः श्रेष्ठः पर्वतोऽस्ति । अयं तु सावर्णिमेरुः, सावर्णिस्तु मनुः 'कश्यपोऽष्टमः, स महामेरुं न जहाति' इति कश्यपो भगवान् प्रजापतिः । महामेरुश्च भूमध्ये कैलासादुत्तरतः । अत एवास्माकं मेरोर्दक्षिणपार्श्वे इति सङ्कल्पः । भूमध्यस्थो मेरुः रत्नमयः सर्वतो वृतः इति आर्यभटादिसर्वज्योतिर्विदां सिद्धान्तः । सावर्णिमेरुरयं समुद्रवर्तिपारियात्रवज्रचक्रवन्मेघवत्पर्वतानामपि पश्चिमत इति स्पष्टमुच्यते ॥ ३८ ॥

तेनैवमुक्तः शैलेन्द्रः सर्व एव त्वदाश्रयाः ।
मत्प्रसादाद्भविष्यन्ति दिवा रात्रौ च काञ्चनाः ॥ ३९ ॥

आदित्येन दत्तवरः इत्युक्तः वरः कीदृशः इत्यपेक्षायां -तेनेत्यादि । एवमुक्त इत्येवंशब्दार्थः — सर्व एवेत्यादि ॥ ३९ ॥

त्वयि ये चापि वत्स्यन्ति देवगन्धर्व[2]दानवाः ।
ते भविष्यन्ति *[3] भक्ताश्च प्रभया [4] काञ्चनप्रभाः ॥ ४० ॥
[5] विश्वेदेवाश्च मरुतः वसवश्च दिवौकसः ।
आगम्य पश्चिमां सन्ध्यां †[1]मेरुमु[1]त्तमपर्वतम् ॥ ४१ ॥
आदित्यमुपतिष्ठन्ति तैश्च सूर्योऽभिपूजितः ।
अदृश्यः सर्वभूतानां अस्तं गच्छति पर्वतम् ॥ ४२ ॥

---

* रक्ताः (पा.)–प्रभया रक्ता भविष्यन्तीत्यन्वयः-गो. † मेरुसदृशत्वान्मेरुम्-गो.

[1] त्तर–ङ.झ. [2] सेविताः–ङ. [3] रत्नानां, रक्ताश्च–ङ. [4] काञ्चना इव–ङ.

[5] आदित्या वसवो रुद्रा मरुतश्च दिवाकराः–ङ. [6] एतदादि श्लोकद्वयं अधिकम्–झ.

विश्वेदेवादयः तं उक्तपर्वतं सावर्णिमेरुमागम्य तत्र स्थित्वा ततः परं दशसहस्रयोजनात् परतः स्थिते अस्तगिरौ पश्चिमां सन्ध्यां प्राप्तां उपतिष्ठन्ते। तैस्सर्वैः सूर्यः अभिपूजितस्सन् सर्वभूतानामदृश्यो यथा भवति तथा अस्तं गच्छति ॥ ४१–४२ ॥

योजनानां सहस्राणि [1]दश तानि दिवाकरः ।
[2]मुहूर्तार्धेन तं शीघ्रं अभियाति शिलोच्चयम् ॥ ४३ ॥

उ[3]त्तमपर्वतादिति दूरे अस्तगिरिः इत्येतद्दर्शयति—योजनानां सहस्राणीत्यादि । तानीति । उक्तसंख्याकयोजनानीत्यर्थः । मुहूर्तार्धेनेत्यादि । एकघटिकामात्रेणेत्यर्थः । अतीत्येति शेषः । एवंस्थिते—'आगम्य पश्चिमां सन्ध्यां मेरुमु[3]त्तमपर्वतम्' इत्यत्र यद्वाभट्टस्तु—अस्मदपेक्षया पश्चिमसन्ध्यायां उ[3]त्तमपर्वतमेरुमासाद्य वर्तमानं आदित्यमुपतिष्ठन्तीत्याह । एवं अस्मदपेक्षयेति विशेषणमध्याहरता मेरुशब्देन महामेरुरेवोच्यत इति तदाशयो गम्यते । ननु सावर्णिमेरुरेव तेनापि विवक्ष्यते । स्वरूपवर्णनमेव अस्मदपेक्षयेति विशेषणम् इति । एवमपि सन्ध्यायां मेरुमासाद्य वर्तमानत्वजल्पः मिथ्या । ततः परं घटिकात ऊर्ध्वं अस्तगिरिं प्राप्य अस्तादनन्तरं किल सन्ध्या । ननु उत्तरदिगन्वेषणप्रेरणसमये एतस्यैव महामेरुत्वे भूमध्यस्थत्वसङ्कल्पादिविरोधः स्पष्टः । अन्वेषणानियोगस्तु मेरोः मर्त्यस्रोतोऽगम्यत्वस्य सर्वप्रसिद्धत्वात्, स्वेन च तदनवलोकनात्, तत्र वक्ष्यमाणोत्तरदिगन्वेषणानियोगस्य भूमाध्यस्थानापेक्षत्वाच्च ॥ ४३ ॥

शृङ्गे तस्य महद्दिव्यं भवनं सूर्यसंनिभम् ।
प्रासादगणसम्बाधं विहितं विश्वकर्मणा ॥ ४४ ॥

---

[1] शतानि च–ङ. [2] निमेषान्तरमात्रेण देवो याति–ङ. [3] त्तर–ग.

शोभितं तरुभिश्चित्रैः नानापक्षिसमाकुलैः ।
[1]निकेतं पाशहस्तस्य वरुणस्य महात्मनः ॥ ४५ ॥

प्रासादेत्यादि वरुणपुरीवर्णनम् ॥४४-४५ ॥

*अन्तरा [2]मेरुमस्तं च तालो दशशिरा महान् ।
जातरूपमयः श्रीमान् भ्राजते चित्रवेदिकः ॥ ४६ ॥

दशशिराः ताल इति । प्राच्यत्रिस्कन्धतालवत् अत्रापि दशस्कन्धतालः ॥ ४६ ॥

तेषु सर्वेषु दुर्गेषु सरस्सु च सरित्सु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ४७ ॥
यत्र तिष्ठति धर्मज्ञः तपसा स्वेन [3]भावितः ।
मेरुसावर्णिरित्येव ख्यातो वै ब्रह्मणा समः ॥ ४८ ॥

ब्रह्मणा सम इति । महामेरुवर्तिप्रजापातसम इत्यर्थः ॥ ४८ ॥

प्रष्टव्यो मेरुसावर्णिः महर्षिः सूर्यसंनिभः ।
प्रणम्य शिरसा भूमौ प्रवृत्तिं मैथिलीं प्रति ॥ ४९ ॥
†एतावज्जीवलोकस्य भास्करो रजनीक्षये ।
कृत्वा वितिमिरं सर्वं अस्तं गच्छति पर्वतम् ॥ ५० ॥
एतावद्वानरैः शक्यं गन्तुं, वानरपुङ्गवाः !
अभास्करममर्यादं न जानीमस्ततः परम् ॥ ५१ ॥

एतावदिति । सावर्णिमेरुपर्यन्तं इत्यर्थः ॥ ५१ ॥

---

*मेरुमस्तं च अन्तरा—मध्ये—रा. †एतावत् उदयास्तादिमध्यं वितिमिरं कृत्वा—गो.

[1] निकेतः—ङ. [2] मेरुमद्रिं च—ङ. [3] भूषितः—ङ.

अधिगम्य तु वैदेहीं निलयं रावणस्य च ।
अस्तपर्वतमासाद्य पूर्णे मासे निवर्तत ॥ ५२ ॥

निवर्ततेति । निवर्तध्वमिति यावत् ॥ ५२ ॥

ऊर्ध्वं मासान्न वस्तव्यं वसन् वध्यो भवेन्मम ।
सहैव शूरो युष्माभिः श्वशुरो मे गमिष्यति ॥
श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्टकारिभिः ॥ ५३ ॥
गुरुरेष महाबाहुः श्वशुरो मे महाबलः ।
भवन्तश्चापि विक्रान्ताः प्रमाणं सर्वकर्मसु ॥ ५४ ॥

दिष्ट—सन्दिष्टम् । प्रमाणमिति । कर्तव्याकर्तव्यनिश्चायकाः इत्यर्थः ॥ ५३-५४ ॥

प्रमाणमेनं संस्थाप्य *पश्यध्वं पश्चिमां दिशम्[2] ।
[दृष्टायां तु नरेन्द्रस्य पत्न्याममिततेजसः ।]
कृतकृत्या भविष्यामः कृतस्य प्रतिकर्मणा ॥ ५५ ॥

अथापि प्रमाणमेनं संस्थाप्य पश्यध्वमित्यर्थः ॥ ५५ ॥

अतोऽन्यदपि यत् कार्यं कार्यस्यास्य [3]हितं भवेत् ।
संप्रधार्य भवद्भिश्च देशकालार्थसंहितम् ॥ ५६ ॥

अस्य कार्यस्येति । रावणवधान्तरामकार्यस्येत्यर्थः ॥ ५६ ॥

ततः सुषेणप्रमुखाः [4]प्लवङ्गाः
सुग्रीववाक्यं निपुणं निशम्य ।

---

* पश्यध्वं – पश्यत, आत्मनेपदमार्षम्—गो.

[1] अवगम्य—ज. [2] एतदनन्तरं—भवन्तः परिपश्यन्तु यथा दृश्येत जानकी— इत्यधिकं—ङ. [3] प्रियं—ज. [4] प्लवङ्गमाः—ज.

आमन्त्र्य सर्वे [1] प्लवगाधिपं ते
जग्मुर्दिशं तां वरुणाभिगुप्ताम् ॥ ५७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे द्विचत्वारिंशः सर्गः

वश(५४)मानः १) सर्गः ॥ ५४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे द्विचत्वारिंशः सर्गः

त्रिचत्वारिंशः सर्गः

[उत्तरदिक्प्रेषणम्]

ततः संदिश्य सुग्रीवः श्वशुरं पश्चिमां दिशम् ।
वीरं शतबलिं नाम वानरं [2] वानरेश्वरः ॥ १ ॥
उवाच राजा * [3] सर्वज्ञः सर्ववानर[4]सत्तमः ।
वाक्यमात्महितं चैव रामस्य च हितं तदा ॥ २ ॥

अथोत्तरदिगन्वेषणप्रेषणम् । ततः संदिश्येत्यादि । सर्वज्ञ इति । सर्वदेशवृत्तान्ताभिज्ञ इत्यर्थः ॥ १-२ ॥

वृतः शतसहस्रेण [5] त्वद्विधानां वनौकसाम् ।
† वैवस्वतसुतैस्सार्धं [6] प्रतिष्ठस्व स्वमन्त्रिभिः ॥ ३ ॥

वैवस्वतसुतैः—धर्मपुत्रैः ॥ ३ ॥

---

* सर्वज्ञः—देशवृत्ताभिज्ञः—ति.   † वैवस्वतसुतैः—यमसुतैः—ति.

[1] प्लवगाधिपास्ते—ञ. [2] वानरर्षभम्—ङ. [3] धर्मज्ञः—ङ., झ. [4] सत्तमम्—ङ. [5] मद्विधानां—ङ. [6] प्रविष्टः सर्वमन्त्रिभिः—ञ.

दिशं ह्युदीचीं, [1]विक्रान्त! हिमशैलावतंसिकाम् ।
सर्वतः परिमार्गध्वं रामपत्नीं [2]यशस्विनीम् ॥ ४ ॥

विक्रान्तेति शतबलेस्संबुद्धिः । सर्वत इत्यादिना सामान्यतो नियोगः ॥ ४ ॥

अस्मिन् [3]कार्ये विनिर्वृत्ते कृते दाशरथेः प्रिये ।
ऋणान्मुक्ता भविष्यामः *कृतार्थार्थविदां [4]वराः ॥ ५ ॥

विनिर्वृत्ते--विशेषेणानुष्ठिते । कृतार्थाः--कृतकृत्याः, अर्थविदः—लब्धाभीष्टार्थाश्च तथा ॥ ५ ॥

कृतं हि प्रियमस्माकं राघवेण महात्मना ।
तस्य चेत् प्रतिकारोऽस्ति सफलं जीवितं भवेत् ॥ ६ ॥
†अर्थिनः कार्यनिर्वृत्तिं अकर्तुरपि यश्चरेत् ।
तस्य स्यात् सफलं जन्म किं पुनः पूर्वकारिणः ॥ ७ ॥

अर्थिनः--स्वस्मिन् प्रयोजनार्थिनः कार्यनिर्वृत्तिं--स्वप्रयोजनानुष्ठानं यश्चरेत्—अनुतिष्ठेत्, प्रयोजनमिति शेषः ॥ ७ ॥

‡एतां बुद्धिं [5]समास्थाय, दृश्यते जानकी यथा ।
तथा भवद्भिः कर्तव्यं अस्मत्प्रियहितैषिभिः ॥ ८ ॥
अयं हि सर्वभूतानां मान्यस्तु नरसत्तमः ।
§अस्मासु च गतः प्रीतिं रामः परपुरञ्जयः ॥ ९ ।

---

*कृतार्थाः, अर्थविदांवर, संधिरार्षः-ति. †अस्माकं अनुपकर्तुरपि अस्मत्साहाय्यार्थिनः कृते यत्किञ्चित् क्रियेत चेत्, तावतैव जन्म सफलं भवेच्चेत्, अस्माकं उपकर्तुर्विषये किं वक्तव्यमिति भावः ॥ ‡अस्मज्जन्मैवानेन सफलं भवेदिति स्वनिष्ठयैव जानक्यन्वेष्टव्या, न केवलं भृतकबुद्ध्येति भावः । §स्वयमेव नरोत्तमः अस्मासु च प्रीतिं गतः-इत्यर्थः ।

[1] विक्रान्ता-ङ. [2] अनिन्दिताम्-ङ. [3] कार्यै हि, [4] वर-ञ. [5] पुरस्कृत्य-ङ.

इमानि बहुदुर्गाणि * नद्यः शैलान्तराणि च ।
भवन्तः परिमार्गन्तु बुद्धिविक्रमसंपदा ॥ १० ॥

इमानीति । वक्ष्यमाणानीति शेषः ॥ १० ॥

तत्र म्लेच्छान् पुलिन्दांश्च शूरसेनांस्तथैव च ।
प्रस्थलान् भरतांश्चैव कुरूंश्च सह मद्रकैः ॥ ११ ॥

प्रस्थलाः भरताश्च देशविशेषाः । कुरून्—दक्षिणकुरून् ॥

[1] काम्भोजयवनांश्चैव [2] शकानां पत्तनानि च ।
[[3]बाह्लीकानृषिकांश्चैव पौरवानथ [4] टङ्कणान् ।
चीनान् परमचीनांश्च [5] नीहारांश्च पुनःपुनः ।]
अन्वीक्ष्य [6] वरदांश्चैव हिमवन्तं विचिन्वथ ॥ १२ ॥
लोध्रपद्मकषण्डेषु देवदारुवनेषु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १३ ॥

लोध्रपद्मकषण्डेष्विति । हैमवतेष्विति शेषः । पद्मकः—दिव्यगन्धवृक्षविशेषः ॥ १३ ॥

ततः सोमाश्रमं गत्वा देवगन्धर्वसेवितम् ।
कालं नाम महासानुं पर्वतं तं गमिष्यथ ॥ १४ ॥

तं कालं पर्वतमित्यन्वयः ॥ १४ ॥

महत्सु तस्य [7] शैलस्य पर्वतेषु गुहासु च ।
विचिनुध्वं महाभागां रामपत्नीमनिन्दिताम् ॥ १५ ॥

---

* नद्यः—नदीः—गो. पूर्वार्धं भिन्नं वाक्यं वा, लोकरीत्या। उत्तरार्धे तस्सर्वमित्यर्थादापतति ।

[1] कांबोजान् पर्वतांश्चैव—ङ. [2] शकानारट्टकानपि—ङ. [3] बह्लीकान् निषधांश्चैव—ङ. [4] कङ्कणान्—ङ. [5] नगरांश्च—ङ. [6] बर्बरांश्चैव—ङ. [7] शैलेषु निर्दरेषु—ङ.

तमतिक्रम्य शैलेन्द्रं हेमगर्भं महागिरिम् ।
ततः सुदर्शनं नाम पर्वतं गन्तुमर्हथ ॥ १६ ॥

तमतिक्रम्येति । कालपर्वतमित्यर्थः ॥ १६ ॥

ततो देवसखो नाम पर्वतः पतगालयः ।
नानापक्षिगणाकीर्णः विविधद्रुमभूषितः ॥ १७ ॥

देवसख इति पर्वतः । पतगाः—पक्षिणः ॥ १७ ॥

तस्य [1]काननषण्डेषु [2]निर्झरेषु गुहासु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १८ ॥
तमतिक्रम्य चाकाशं सर्वतश्शतयोजनम् ।
*अपर्वतनदीवृक्षं सर्वसत्त्वविवर्जितम् ॥ १९ ॥

तमतिक्रम्य—देवसखपर्वतमतिक्रम्य । आकाशं—शून्यं देशम् । किंशून्यमित्यतः—अपर्वतेत्यादि ॥ १९ ॥

तं तु शीघ्रमतिक्रम्य कान्तारं रोमहर्षणम् ।
†कैलासं पाण्डुरं [3]प्राप्य हृष्टा यूयं भविष्यथ ॥ २० ॥
तत्र पाण्डुरमेघाभं जाम्बूनद[4]परिष्कृतम् ।
कुबेरभवनं [5]रम्यं निर्मितं विश्वकर्मणा ॥ २१ ॥
विशाला नलिनी यत्र प्रभूतकमलोत्पला ।
हंसकारण्डवाकीर्णा ‡अप्सरोगणसेविता ॥ २२ ॥

नलिनी—सरसी ॥ २२ ॥

---

* इरिणप्रदेश इत्यर्थः ॥ † यद्यपि कैलासो हिमवदेकदेश इति पुराणान्तरोक्तं, तथापि तदविरुद्धं ज्ञेयम्; मध्ये शून्यप्रदेशेऽपि तावत्पर्यन्तं हिमवानिति—गो. ‡ अत्र संधिरार्षः ॥

[1] काञ्चनखण्डेषु—च. ज. [2] निर्दरेषु—च. ज. [3] शैलं प्राप्य हृष्टा—ङ.

[4] परिच्छदम्—ङ. [5] दिव्यं—ङ.

तत्र वैश्रवणो राजा [1]सर्वलोकनमस्कृतः ।
धनदो रमते श्रीमान् गुह्यकैः सह यक्षराट् ॥ २३ ॥
[2]तस्य चन्द्रनिकाशेषु पर्वतेषु गुहासु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २४ ॥

तस्येति । धनदस्येत्यर्थः ॥ २४ ॥

क्रौञ्चं तु गिरिमासाद्य *बिलं तस्य सुदुर्गमम् ।
अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत् स्मृतम् ॥ २५ ॥
वसन्ति हि महात्मानः तत्र सूर्यसमप्रभाः ।
[3]देवैरभ्यर्थिताः सम्यक् [4]देवरूपा महर्षयः ॥ २६ ॥

महात्मानः तत्रेति । क्रौञ्चगुहायामित्यर्थः ॥ २६ ॥

क्रौञ्चस्य तु गुहाश्चान्याः सानूनि शिखराणि च ।
[5]दर्दुराश्च नितम्बाश्च विचेतव्यास्ततस्ततः ॥ २७ ॥
[क्रौञ्चस्य शिखरं चापि निरीक्ष्य च ततस्ततः ।]
†अवृक्षं कामशैलं च मानसं विहगालयम् ।
न गतिस्तत्र भूतानां देवानां न च रक्षसाम्[6] ॥ २८ ॥

कामशैलमिति पर्वतस्य विशेषणं—अवृक्षमिति । मानसमिति पर्वतः ॥ २८ ॥

स च सर्वैर्विचेतव्यः [7]ससानुप्रस्थभूधरः ।
क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम पर्वतः ॥ २९ ॥

---

* बिलं—स्कन्दशक्तिकृतं विवरम्—ति. गो. † अवृक्षं—अवृक्षाख्यं—गो.

[1] सर्वभूत—ङ. [2] तत्र—ङ. [3] देवैरभ्यर्चिताः—ङ. [4] दिव्यरूपाः—ङ. [5] निर्झराश्च, निर्दराश्च—ङ. [6] एतदनन्तरं—तत्र सर्वं विचेतव्यं पर्वतो देवमानसः—इत्यधिकं—झ. [7] पर्वतो बहुकन्दरः—ङ.

स सर्वैरिति। क्रौञ्चपर्वत इत्यर्थः। सानूनि, प्रस्थाः, भूधराः--पर्यन्तभूधराः, तैश्च तैश्च सहितः--ससानुप्रस्थभूधरः। मैनाकपर्वतोऽयं समुद्रमग्नादन्यः ॥ २९ ॥

मयस्य भवनं तत्र दानवस्य स्वयं कृतम्।
मैनाकस्तु विचेतव्यः ससानुप्रस्थ कन्दरः ॥ ३० ॥
*स्त्रीणामश्वमुखीनां च निकेतस्तत्र तत्र तु।
तं देशं समतिक्रम्य आश्रमं सिद्धसेवितम् ॥ ३१ ॥
सिद्धा वैखानसा यत्र वालखिल्याश्च तापसाः।
वन्दितव्यास्ततस्सिद्धाः तपसा वीतकल्मषाः ॥ ३२ ॥
प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः।
हेमपुष्कर[2]संछन्नं तत्र वैखानसं सरः ॥ ३३ ॥

वैखानसानामिदं--वैखानसम् ॥ ३३ ॥

तरुणादित्यसंकाशैः हंसैर्विरचितं शुभैः।
†औपवाह्यः कुबेरस्य सार्वभौम इति [3]स्मृतः ॥ ३४ ॥
गजः पर्येति तं देशं सदा [4]सह करेणुभिः।
‡तत्सरस्समतिक्रम्य नष्टचन्द्रदिवाकरम् ॥
अनक्षत्रगणं व्योम निष्पयोद[5]मनादिमत् ॥ ३५ ॥

तत्सर इति। वैखानससर इत्यर्थः। समतिक्रम्य वर्तमानं व्योम--कियानवकाशः। नष्टचन्द्रदिवाकरं--चन्द्रादिसर्वज्योतिर्गणप्रकाशरहितम् ॥ ३५ ॥

---

* अश्वमुखीनां—किम्पुरुषस्त्रीणां–गो. † औपवाह्यः--वाहनम्। ‡ अथ महामेरुपर्यन्तेऽलावृतप्रदेशानुपदिशति–तत्सर इति–गो.

[1] भूतलः–ङ. [2] संपन्नं–ङ. [3] श्रुतः–ङ. [4] हस्ति–ङ. [5] मनादितम्–ङ.

गभस्तिभिरिवार्कस्य स तु देशः [1]प्रकाशते ।
विश्राम्यद्भिस्तपस्सिद्धैः देवकल्पैः स्वयंप्रभैः ॥ ३६ ॥

तर्हि किं महानन्धकारः ? नेत्याह—गभस्तिभिरित्यादि । स तु देशः प्रकाशत इति । चन्द्रादिज्योतींष्यभिभूय स्वमाहिम्ना स्वगभस्तिभिः स्वयमेव प्रकाशते । तस्य तथा तेजस्वित्वे हेतुमाह—विश्राम्यद्भिरित्यादि । विश्राम्यद्भिः—सुखोपविष्टैः, तपस्सिद्धैः, अत एव देवकल्पैः, अत एव स्वयंप्रभैः—स्वगभस्तिवैभवैः स्वदेशं सूर्यादिवत् भासयद्भिरिति शेषः । एतेन सुस्पष्टं अह्नि चन्द्रादेरिव तेषां गभस्तिभिः अभिभूतत्वेन चन्द्रादेस्तदभाववर्णनम् । *यद्वा-भट्टस्तु—नियतमार्गवर्तिनां चन्द्रादीनां तत्र संचाराभावात् नष्ट-चन्द्रादिमत्त्वमिति ; पश्यन्तु ततः परं अशेषसुप्रसिद्धचन्द्रादिचारवता-मुत्तरकुरूणामुपदेशे जाग्रति, मध्ये नष्टचन्द्रादिमद्देशवर्णनसाहसम् ॥३६॥

तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा ।
उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः ॥ ३७ ॥
[2]ते नयन्ति परं तीरं सिद्धान् प्रत्यानयन्ति च ।
उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः ॥ ३८ ॥

निम्नगेति अस्तीति शेषः । अन्तर्महासुषिरवेणवः—कीचकाः । परं तीरमिति । शैलोदाया इति शेषः । कृतपुण्यानां प्रतिश्रयाः—निवासभूताः, भोगभूमिरिति यावत् ॥ ३७-३८ ॥

ततः काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः ।
नीलवैदूर्य[3]पत्राढ्याः नद्यस्तत्र सहस्रशः ॥ ३९ ॥

---

*गोविन्दराजः, महेश्वरतीर्थो वा ॥

[1]प्रकाशयते-ज. [2]तैश्च यान्ति परं तीरं सिद्धाः-ङ. [3]पद्माभाः, पत्राभिः-ङ.

रक्तोत्पल[1]वनैश्चैव मण्डिताश्च हिरण्मयैः ।
तरुणादित्य[2]संकाशाः भान्ति तत्र जलाशयाः ॥ ४० ॥

'ततः काञ्चनपद्माभिः' इत्यादि 'गुणास्तत्र मनोरमाः' (५१) इत्यन्तं उत्तरकुरुदेशस्य भोगभूमित्वप्रदर्शनम् । पद्मिनीभिः—सरसीभिः कृतोदकाः—कृतजलावगाढाः । तथा दिव्यनद्योऽपि सन्तीत्याह—नानेत्यादि । जलाशयाः—तडाकादयः ॥ ३९-४० ॥

महार्हमणि[3]रत्नैश्च काञ्चनप्रभकेसरैः ।
[4]नीलोत्पलवनैश्चित्रैः स देशः सर्वतो वृतः ॥ ४१ ॥
निस्तुलाभिश्च मुक्ताभिः मणिभिश्च महाधनैः ।
* [5]उद्भूतपुलिनास्तत्र [6]जातरूपैश्च निम्नगाः ॥ ४२ ॥

निस्तुलं—वर्तुलम् । मणिभिः जातरूपैश्च उद्भूतपुलिनाः—उत्क्षिप्तपुलिनवत्यः ॥ ४२ ॥

सर्वरत्न[7]मयैश्चित्रैः अवगाढा † नगोत्तमैः ।
जातरूपमयैश्चापि हुताशनसमप्रभैः ॥ ४३ ॥

अवगाढाः—व्याप्ताः ॥ ४३ ॥

नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ।
दिव्यगन्धरसस्पर्शाः सर्वकामान् स्रवन्ति च ॥ ४४ ॥

पत्ररथाः—पक्षिणः ॥ ४४ ॥

---

* उद्भूतपुलिनाः (पा.)—उन्नतपुलिनाः—गो. † नगाः—पर्वताः—गो. ति.

[1] वनैश्चारु—ङ. [2] सदृशैः—ङ. [3] पत्रैश्च—ङ. [4] नीलनीरजषण्डैश्च—ङ. [5] उद्धूत—ङ. [6] जातरूपमयाः शुभाः—ङ. [7] मयैर्दिव्यैः—ङ.

[1]नानाकाराणि वासांसि फलन्त्यन्ये नगोत्तमाः ।
[मुक्तावैदूर्यचित्राणि भूषणानि तथैव च ॥
स्त्रीणां चाप्यनुरूपाणि पुरुषाणां तथैव च ।
सर्वर्तुसुखसेव्यानि फलन्त्यन्ये नगोत्तमाः ॥
[2]महार्हमणिचित्राणि [3]फलन्त्यन्ये नगोत्तमाः ।]
शयनानि प्रसूयन्ते चित्रास्तरणवन्ति च ॥ ४५ ॥
मनःकान्तानि माल्यानि फलन्त्यत्रापरे द्रुमाः ।
[4]पानानि च महार्हाणि भक्ष्याणि विविधानि च ॥ ४६ ॥
*स्त्रियश्च गुणसंपन्नाः रूपयौवनलक्षिताः ।
गन्धर्वाः किन्नराः सिद्धा नागा विद्याधरास्तथा ॥ ४७ ॥
रमन्ते [5]सततं तत्र नारीभि[6]र्भास्वरप्रभाः ॥ ४८ ॥
[7]सर्वे सुकृतकर्माणः सर्वे रतिपरायणाः ।
सर्वे कामार्थसहिताः वसन्ति सहयोषितः ॥ ४९ ॥
गीतवादित्र[8]निर्घोषः सोत्कृष्टहासितस्वनः ।
श्रूयते सततं तत्र सर्वभूत[9]मनोरमः ॥ ५० ॥

'वासांसि फलन्त्यन्ये नगोत्तमाः' इत्यनन्तरं 'शयनानि प्रसूयन्ते' इत्यादिमध्य द्वित्राः श्लोकाः प्रक्षिप्ताः । कचित् कोशेषु

---

* रूपयौवनलक्षिताः गुणसंपन्नाः स्त्रियश्च अपरे द्रुमाः फलन्ति–रा

[1] नानारूपाणि–ङ. [2] महार्हाणि च–ङ. [3] हैमान्यन्ये–ङ. [4] फलानिच–ङ. [5] सहिताः–ङ. [6] भास्कर–ङ. [7] सर्वे च कृत–ङ. [8] निर्घुष्टाः सोद्घुष्टहसितस्वराः । श्रूयन्ते–ङ. [9] मनोरमाः–ङ,

'विद्याधरास्तथा। रमन्ते सततं तत्र' इत्यत्र द्विताः श्लोकाः प्रतिक्षिप्ताः ॥ ५० ॥

[1]तत्र नामुदितः कश्चित् नात्र कश्चिदसत्प्रियः* ।
अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः ॥ ५१ ॥

असत्—अविद्यमानं प्रियं यस्य स तथा ॥ ५१ ॥

†[2]तमतिक्रम्य शैलेन्द्रं उत्तरः ‡पयसां निधिः ।
तत्र सोमगिरिर्नाम मध्ये हेममयो महान् ॥ ५२ ॥

मध्य इति । उत्तरसमुद्रमध्य इत्यर्थः ॥ ५२ ॥

[इन्द्रलोकगता ये च ब्रह्मलोकगताश्च ये ।
देवास्तं समवेक्षन्ते गिरिराजं दिवं[4] गताः ।।]
स तु देशो विसूर्योऽपि तस्य भासा प्रकाशते ।
[5]सूर्यलक्ष्म्याऽभिविज्ञेयः तपतेव विवस्वता ॥ ५३ ॥

स तु देश इति । सोमगिरिद्वीपदेश इत्यर्थः । विसूर्योऽपि—सूर्यकिरणसञ्चाररहितोऽपीत्यर्थः । तस्य भासा—सोमगिरिप्रभया तपता—विवस्वता युक्तदेश इव सूर्यलक्ष्म्या—सूर्यार्पितदेशश्रिया युक्तः प्रकाशते ॥ ५३ ॥

भगवांस्तत्र विश्वात्मा शंभुरेकादशात्मकः ।
ब्रह्मा वसति देवेशः ब्रह्मर्षिपरिवारितः ॥ ५४ ॥

---

* असत्प्रियः—अविद्यमानाङ्गनः-गो. असत्कर्मविषयकप्रीतिमान्-शा. † अत्र सुमेर्वन्वेषणं नोक्तं, तत्र रक्षसां वासासंभवादित्याहुः-ति. ‡ पयसां निधिः-लवणसमुद्रः-गो.

[1] नात्र-ङ. [2] समतिक्रम्य तं देशं-ङ. [3] हेम-ङ. [4] गतम्-ङ. [5] रवया लक्ष्म्या-ङ.

भगवान्—सहजषाड्गुण्यः। तत्र—सोमगिरौ। अत्र—*यद्वाभट्टस्य श्राद्धप्रलापः—'भगवान्—विष्णुः' इत्येवं प्रलप्य 'शंभुरेकादशात्मकः ब्रह्मा वसति' इति विशेषणत्रयमपि नारायणे योज्य-मित्याह। अयमपि पापिष्ठो ब्रह्मद्वेषः विनष्टचक्षुरन्याय्यं प्रलप्य दुर्ब्राह्मणो नश्यतु। शं अस्मात् भवतीति शंभुः, ब्रह्ममंडलमधिष्ठाय तेनैव सर्वजगत्सुखयात्रोत्पादनस्य प्रसिद्धत्वात्। एकादशात्मकः—एकादशानुवाकार्थैकादशरुद्ररूपः। ब्रह्मा—भगवान् चतुर्मुखः। श्रीरुद्र-चतुर्मुखब्रह्माभेदः अशेषश्रुतिस्मृतिप्रसिद्धः ब्रह्मसिद्धान्तमूलग्रन्थे, बहु-प्रकरणग्रन्थेषु चातिस्पष्टं प्रदर्शितः। इदमप्यपरोक्षब्रह्मरुद्राभेदवचनं तत्र प्रमाणमुपन्यसनीयं मामकैः। प्रकरणं चेदं सूर्यवत्—प्रकाश-प्रतिपादकम् ॥ ५४ ॥

न कथञ्चन गन्तव्यं कुरूणामुत्तरेण वः।
†अन्येषामपि भूतानां नात्र क्रामति वै गतिः ॥ ५५ ॥

---

* भगवान्—नारायणः। रूढनामधेयम्। स हि भगवच्छब्देन झटिति प्रतीयते। अयमत्र पदान्वयः—विश्वात्मा भगवान् ब्रह्मर्षिपरिवारितः तत्र वसति। एकादशात्मकः शंभुः ब्रह्मर्षिपरिवारितः तत्र वसति। देवेशो ब्रह्मा, ब्रह्मर्षिपरिवारितः तत्र वसतीति—ती. विश्वात्मा—विश्वशरीरकः भगवान्—षाड्गुण्यपरिपूर्णो वासुदेवः, 'एवमेव महान् शब्दः मैत्रेय भगवानिति। परमब्रह्मभूतस्य वासुदेवस्य नान्यगः'—इत्युक्तेः। न चेदमपि शम्भुविशेषणम्, एकादशात्मकत्वविरोधात्। न हि विश्वात्मकत्वं एकादशात्मकत्वं चैकत्र संभवति। एकादशात्मकः—एकादशमूर्तिः शम्भुः—रुद्रः, देवेशः—ब्रह्मा ब्रह्मर्षिपरिवारितस्तत्र वसति। इयं च क्रिया सर्वत्र संबध्यते। यद्यत्र कश्चित् प्रकरणाभावात् विष्णुरत्र नोच्यत इति कथयेत्, तर्हि रुद्रोऽपि नोच्यते। कथमिति चेत्; शंभावयतीति शम्भुरिति व्युत्पत्त्या 'शंभूब्रह्मत्रिलोचनौ' इति कोशकारवचनाच्च सर्वाण्यपि विशेषणानि ब्रह्मपराणि भवेयुरिति—गो. † अन्येषामपि—शक्तिविशेष-विशिष्टदैत्यादीनामपि। वः—युष्माभिः न गन्तव्यम्—गो.

नात्र गतिः क्रामतीति कार्यब्रह्मलोकत्वात, ब्रह्मविद्ब्रह्मर्षिव्यतिरिक्तस्य तत्राप्रसङ्गात ॥ ५५ ॥

स हि [1]सोमगिरिर्नाम देवानामपि दुर्गमः ।
तमालोक्य ततः क्षिप्रं उपावर्तितुमर्हथ ॥ ५६ ॥

तदेवोक्तं—देवानामपि दुर्गम इति ॥ ५६ ॥

एतावद्वानरैः शक्यं गन्तुं, वानरपुङ्गवाः !
अभास्करममर्यादं न जानीमस्ततः परम् ॥ ५७ ॥

सर्वमेतद्विचेतव्यं यन्मया परिकीर्तितम् ।
यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः ॥ ५८ ॥

तत्रापि मतिः क्रियतामिति । अन्वेषणायेति शेषः ॥ ५८ ॥

ततः कृतं दाशरथेर्महत् प्रियं
महत्तरं चापि ततो मम प्रियम् ।
कृतं भविष्यत्यनिलानलोपमाः !
*विदेहजादर्शनजेन कर्मणा ॥ ५९ ॥

विदेहजायाः—वैदेह्याः दर्शनमुद्दिश्य जातं—विदेहजादर्शनजं, तेन कर्मणा—अन्वेषणकर्मणा ॥ ५९ ॥

ततः कृतार्थाः सहिताः सबान्धवाः
मयाऽर्चिताः सर्वगुणैर्मनोरमैः ।

---

* विदेहजादर्शनजेन—सीतादर्शनजनकेन कर्मणा—रा. वस्तुतस्तु, विदेहजादर्शननिमित्तेन प्राप्तान्वेषणकर्मणेति स्वरसम् । सफलेनान्वेषणकर्मणेति तात्पर्यकं पदमिदम् ॥

[1] हेम—ङ.

चरिष्यथोर्वीं प्रति शान्त[1]शात्रवाः
सहप्रिया *भूतधराः प्लवङ्गमाः ॥ ६० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः

भूतधराः—भूतैः ध्रियमाणशौर्योपकारादिसद्गुणाः । अनन्त-(६० १/२)मानः सर्गः ॥ ६० ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः

चतुश्चत्वारिंशः सर्गः

[कार्यजवसूचना]

विशेषेण तु सुग्रीवो हनूमत्यर्थमुक्तवान् ।
स हि तस्मिन् हरिश्रेष्ठे निश्चितार्थोऽर्थसाधने ॥ १ ॥

अथ सुग्रीवेण हनूमति विशिष्य कार्यसिध्याशंसने सति राम-†स्तस्मिन्नभिज्ञानं प्रयच्छति । विशेषेण त्वित्यादि । 'हनूमत्यर्थ-मुक्तवान्' इत्यत्रोक्तो हेतुः—स हीत्यादि ॥ १ ॥

अब्रवीच्च हनूमन्तं विक्रान्तमनिलात्मजम् ।
सुग्रीवः परमप्रीतः ‡ प्रभुः सर्ववनौकसाम् ॥ २ ॥

---

*भूतधराः—प्राणिभृतः प्राणिभिरुपजीव्या इति यावत्—गो., ति. भृताः प्राप्तजीविका इत्यर्थः—रा. भूतधरामिति पाठे पृथिवीविशेषणम्—छ. वस्तुतस्तु—भूतधराः—पुष्टा इति वा ॥ †दानधर्मप्रदानत्वाभावेन न्यासमात्ररूपत्वात् सप्तमी ॥ ‡सर्ववनौकसां प्रभुः—रा.

[1] शत्रवः—ङ.

अथोक्तप्रकार एव प्रदर्श्यते—अब्रवीच्चेत्यादि। सर्ववनौकसामिति। मध्य इति शेषः॥ २॥

न भूमौ *नान्तरिक्षे वा नाम्बरे नामरालये।
नाप्सु वा [1]गतिसङ्गं ते पश्यामि, हरिपुङ्गव! ॥ ३॥

किमब्रवीत्? इत्यतः—न भूमावित्यादि। अन्तरिक्षः पृथिव्यासन्नपक्षिमार्गः आकाशः। अम्बरं—मेघमार्गः। अमरालयः—स्वर्गः। गतिसङ्गः—गतिप्रतिबन्धः॥ ३॥

[2]सासुराः सहगन्धर्वाः [3]सनागनरदेवताः।
विदिताः सर्वलोकास्ते ससागरधराधराः॥ ४॥

सासुरा इत्यादि लोकविशेषणम्॥ ४॥

गतिर्वेगश्च तेजश्च लाघवं च, महाकपे!
पितुस्ते सदृशं, वीर! मारुतस्य महौजसः॥ ५॥

लाघवं—क्षिप्रकारित्वम्॥ ५॥

तेजसा वाऽपि ते भूतं न समं भुवि विद्यते।
तद्यथा लभ्यते सीता [4]तत् त्वमेवानुचिन्तय॥ ६॥
त्वय्येव, हनुमन्! [5]अस्ति बलं बुद्धिः पराक्रमः।
देशकालानुवृत्तिश्च नयश्च, नयपण्डित! ॥ ७॥

देशकालानुवृत्तिः—देशकालोचितकर्मानुष्ठानम्। नये—नीतिशास्त्रे पण्डितः—समर्थः, तस्य संबुद्धिः॥ ७॥

---

* अन्तरिक्षे—निरालम्बे मेघादिसंचारमार्गे, अम्बरे—वातचक्राक्रान्तप्रदेशे, अमरालये—प्रबलाधिष्ठिते—स्वर्गे—गो.

[1] गतिभङ्गं-ङ. [2] सामराः, सन्नुराः-ङ. [3] सनागहरि, सनागोरग-ङ. [4] तत्त्व-ङ. [5] स्वस्ति-ङ.

*ततः कार्यसमासङ्गमवगम्य हनूमति ।
विदित्वा हनुमन्तं च चिन्तयामास राघवः ॥ ८ ॥

ततः कार्येति । एवं सुग्रीववचनेनेत्यर्थः । कार्यसमासङ्ग— कार्यसिद्धिं क्षिप्रकारित्वसामर्थ्याद्यनुभवतः स्वयं च कार्यसाधकं विदित्वा, तस्मिन् स्वकर्तव्यं चिन्तयामास ॥ ८ ॥

सर्वथा निश्चितार्थोऽयं हनूमति हरीश्वरः ।
[1]निश्चितार्थतरश्चापि हनूमान् कार्यसाधने ॥ ९ ॥

उक्तार्थं एवाभिनीय प्रकाश्यते—सर्वथेत्यादि । हरीश्वरोऽयं हनूमति निश्चितार्थः, स्वदशाऽपि हनूमान् कार्यसाधने निश्चितार्थतरः ॥

तदेवं प्रस्थितस्यास्य परिज्ञातस्य कर्मभिः ।
भर्त्रा परिगृहीतस्य ध्रुवः कार्यफलोदयः † ॥ १० ॥

एवं प्रस्थितस्य, अन्तर्भावितणिनिः, भर्त्रा प्रस्थापितस्य, कर्मभिः परिज्ञातस्य—परीक्षितस्य, परिगृहीतस्य—श्रेष्ठतया पक्षीकृतस्य कार्यफलोदयः—सीतादर्शनप्राप्तिः अस्य ध्रुवः—निश्चितः ॥

तं समीक्ष्य महातेजाः ‡व्यवसायोत्तरं हरिम् ।
कृतार्थ इव [2]संहृष्टः प्रहृष्टेन्द्रियमानसः ॥ ११ ॥

एवं व्यवसायोत्तरं—कार्यसाधनश्रेष्ठं हरिं—मारुतिं तदा समीक्ष्य प्रहृष्टेन्द्रियमानसो बभूव ॥ ११ ॥

---

*अस्मिन् सुग्रीवेण स्वकार्यभारो निक्षिप्त इति ज्ञात्वा—गो. † एतदनन्तरं इतीति शेषः । ‡ दृढव्यवसायमिति यावत् ।

[1] निश्चितार्थकरं—ङ. [2] संवृत्तः—ङ.

ददौ तस्य ततः प्रीतः स्वनामाङ्कोपशोभितम् ।
*अङ्गुलीयमभिज्ञानं राजपुत्र्याः परंतपः ॥ १२ ॥

ततः—निश्चितसाधकत्वादेव हेतोः । राजपुत्र्याः अभिज्ञानं—प्रत्यभिज्ञासाधनम् ॥ १२ ॥

अनेन त्वां, हरिश्रेष्ठ ! चिह्नेन जनकात्मजा ।
मत्सकाशादनुप्राप्तं † अनुद्विग्नाऽनुपश्यति ॥ १३ ॥
व्यवसायश्च ते, वीर ! सत्त्वयुक्तश्च विक्रमः ।
सुग्रीवस्य च संदेशः सिद्धिं कथयतीव मे ॥ १४ ॥
स तद्गृह्य हरिश्रेष्ठः [1]कृत्वा मूर्ध्नि कृताञ्जलिः ।
वन्दित्वा चरणौ चैव प्रस्थितः प्लवगर्षभः ॥ १५ ॥
स तत् प्रकर्षन् ‡हरिणां महद्बलं
बभूव वीरः पवनात्मजः कपिः ।
गताम्बुदे व्योम्नि विशुद्धमण्डलः
शशीव नक्षत्रगणोपशोभितः ॥ १६ ॥

तत् बलमित्यन्वयः ॥ १६ ॥

---

*ननु त्यक्तसकलधनस्य वन्यवृत्त्या वर्तमानस्य कुतोऽङ्गुलीयकमिति चेत्—इदमेकमेतत्कार्यार्थं रक्षितवान् । अत एव 'अङ्गुलीयकमुन्मुच्य' इति नोक्तम् । यद्वा रामनामाङ्कितमङ्गुलीयकं सीतायाः, कदाचित् रावणागमनात् पूर्वं प्रणयपरत्वेन रामेण स्वीकृतमिति बोध्यम् । यद्वा भार्यास्नेहेन कनिष्ठिकायां सदा मुद्रिका धार्यत इति देशाचारः । यद्वा विवाहकाले जनकेन दत्तमिदं वरालङ्कारत्वेन, 'गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम्' (सु. का. 36–4) इत्युक्तेः-गो. † अनुद्विग्ना—उद्वेगरहिता, निरातङ्केति यावत् ॥ ‡ दीर्घाभाव आर्षः-गो. ति. रा.

[1] स्थाप्य—ङ.

अतिबल! बलमाश्रितस्तवाहं
हरिवरविक्रम! विक्रमैरनल्पैः।
पवनसुत! यथाऽधिगम्यते सा
जनकसुता हनुमन्! तथा कुरुष्व ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः

अतिबलेत्यादिवचनं रामसुग्रीवसाधारणम्। हे अतिबल! हरिवरविक्रम—सिंहश्रेष्ठविक्रम! पवनसुत! हनुमन्! अहं तवैव बलमाश्रितोऽस्मि। अतः अनल्पैः विक्रमैः जनकसुता यथाऽधिगम्यते, तथा कुरुष्व। *वर्ग(३४)मानः (?) सर्गः ॥ १७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः

पञ्चचत्वारिंशः सर्गः

[वानरप्रस्थानम्]

†सर्वांश्चाहूय सुग्रीवः प्लवगान् प्लवगर्षभः।
समस्तांश्चाब्रवीद्राजा रामकार्यार्थसिद्धये ॥ १ ॥

अथ प्रेषितानां हरीणामन्वेषणोद्योगः। सर्वांश्चेत्यादि। सर्वान् तानाहूय भूयोऽब्रवीत् ॥ १ ॥

‡एवमेतद्विचेतव्यं [1]भवद्भिर्वानरोत्तमैः।
तदुग्रशासनं भर्तुः विज्ञाय हरिपुङ्गवाः ॥
§शलभा इव संछाद्य मेदिनीं संप्रतस्थिरे ॥ २ ॥

---

*कतकेन तु चतुस्त्रिंशत्संख्यश्लोकः सर्गोऽयमुक्तः—ति. †सर्वानाहूय, ततस्समस्तान्—संघीभूतान् प्लवगानब्रवीत्। यद्वा—सम इति छेदः। समः—पक्षपातरहितः—गो. ‡एवमित्यारभ्यानन्तरं इतिकरणं द्रष्टव्यम्। §शलभा इति बहुत्वमात्रे दृष्टान्तः—गो.

[1] यन्मया परिकीर्तितम्—ङ.

उक्तिप्रकारः—एवमित्यादि । तदुग्रेत्यादिना प्राप्तनियोगाना-
मुद्योगः । शलभाः—उत्पातकालप्रवृत्ताः असंख्याताः प्राणिविशेषाः ॥

रामः प्रस्रवणे तस्मिन् [1]न्यवसत् सहलक्ष्मणः ।
प्रतीक्षमाणस्तं मासं यः सीताऽधिगमे कृतः ॥ ३ ॥

सीताधिगमे—सीतावृत्तान्तपरिज्ञाने ॥ ३ ॥

उत्तरां तु दिशं [2]रम्यां गिरिराजसमावृताम् ।
*प्रतस्थे सहसा वीरः हरिश्शतबलिस्तदा ॥ ४ ॥

गिरिराजः—हिमवान् ॥ ४ ॥

पूर्वां दिशं प्रति ययौ विनतो हरियूथपः ।
ताराङ्गदादिसहितः [3]प्लवगः पवनात्मजः ॥ ५ ॥

अगस्त्याचरितामाशां दक्षिणां हरियूथपः ।
पश्चिमां च दिशं घोरां सुषेणः प्लवगेश्वरः ॥ ६ ॥

प्रतस्थे हरिशार्दूलः दिशं वरुणपालिताम् ।
ततः सर्वा दिशो राजा[4]चोदयित्वा यथातथम् ॥ ७ ॥
[5]कपिसेनापतिर्वीरः मुमोद सुखितः सुखम् ॥ ८ ॥

यथातथं—यथास्वे यथातथमिति निपातः ॥ ८ ॥

---

* प्रतस्थे—प्रस्थातुमुद्युक्तः, सर्गान्ते सुग्रीवसन्निधौ सन्नाहकथनात्—गो.

[1] उवास—ङ. [2] गम्यां—ङ. [3] हनुमान्—च. [4] प्रस्थाप्य विजयाय तान्—ङ
[5] कपिसेनापतीन् मुख्यान्—ङ.

एवं [1] संचोदितास्सर्वे राज्ञा वानर[2]यूथपाः ।
स्वां स्वां दिशमभिप्रेत्य त्वरिताः संप्रतस्थिरे ॥ ९ ॥

अभिप्रेत्य—उद्दिश्य ॥ ९ ॥

*नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
[3] क्ष्वेलन्तो धावमानाश्च [4] विनदन्तो महाबलाः ॥ १० ॥

नादादयः शब्दावान्तरभेदाः सन्नाहोद्रेकजाः ॥ १० ॥

एवं संचोदिताः सर्वे राज्ञा वानरयूथपाः ।
आनयिष्यामहे सीतां हनिष्यामश्च रावणम् ॥ ११ ॥

अहमेको [5] वधिष्यामि प्राप्तं रावणमाहवे ।
ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजाम् ।
वेपमानां श्रमेणाद्य भवद्भिः स्थीयतामिति ॥ १२ ॥

जनकात्मजाविशेषणं—श्रमेण वेपमानामित्यादि ॥ १२ ॥

एक एवाहरिष्यामि पातालादपि जानकीम् ।
[6] विधमिष्याम्यहं वृक्षान् [7] दारयिष्याम्यहं गिरीन् ॥१३॥

धरणीं दारयिष्यामि [8] क्षोभयिष्यामि सागरान् ।
†अहं योजनसंख्यायाः [9] प्लवेयं नात्र संशयः ॥ १४ ॥

शतयोजनसंख्यायाः शतं समधिकं ह्यहम् ।
भूतले सागरे वाऽपि शैलेषु च वनेषु च ॥ १५ ॥

---

* आनयिष्यामह इति नदन्त इत्यन्वयः–गो. † अहं योजनसंख्यायाः शतं प्लावितेत्येकस्य वचनम्, योजनसंख्यायाः शतं समधिकमित्यन्यस्य–गो.

[1] संबोधिताः–ङ. [2] पुङ्गवाः–ङ. [3] क्ष्वेडन्तो–ङ. [4] ययुः प्लवगसत्तमाः–ङ. झ. [5] हनिष्यामि–ङ. [6] विमथिष्याम्यहं–ङ. [7] पातयिष्याम्यहं–ङ. [8] शोषयिष्यामि–ङ. [9] प्लविता–ङ.

पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः ।
[1]इत्येकैकस्तदा तत्र वानरा बलदर्पिताः ॥ १६ ॥
ऊचुश्च वचनं [2]तस्य हरिराजस्य सन्निधौ ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः

अतर्क(१७ १/२)मानः सर्गः ॥ १७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः

षट्चत्वारिंशः सर्गः

[भूमण्डलपरिचयकथनम्]

गतेषु वानरेन्द्रेषु रामः सुग्रीवमब्रवीत् ।
कथं भवान् विजानीते सर्वं वै मण्डलं भुवः ॥ १ ॥

अथ रामेण सुग्रीवस्य कृत्स्नभूमण्डलपरिज्ञानसिद्धिप्रश्ने, उत्तरम् । गतेष्वित्यादि ॥ १ ॥

सुग्रीवश्च ततो रामं उवाच प्रणतात्मवान् ।
श्रूयतां सर्वमाख्यास्ये विस्तरेण, [3]नरर्षभ ! ॥ २ ॥

प्रणतः आत्मा—देहः अस्यास्तीति तथा ॥ २ ॥

---

[1] इत्येकैकं तदा—क. [2] तत्र—ङ. [3] वचो मम—ङ.

* यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम् ।
[1] प्रतिकालयते वाली मलयं प्रति पर्वतम् ॥
तदा विवेश महिषः मलयस्य गुहां प्रति ॥ ३ ॥

यदा तु दुन्दुभिमित्यादितः उक्तार्थानुवादः स्पष्टः । अपि त्वत्र दुन्दुभिमहिषशब्दतः मायावी दानव एव विवक्ष्यते, बिलप्रवेशादितदीयकृत्यानामेवोपदेशात् । 'मायावी नाम तेजस्वी दुन्दुभेः पूर्वजः सुतः' (९-४) इति पूर्वं मायाविनो दुन्दुभिज्येष्ठपुत्रत्वस्योक्तत्वात् दुन्दुभिपुत्रे दुन्दुभिशब्दः । दुन्दुभेर्महिषाकारत्वात् पुत्रोऽपि महिषाकारः ॥ ३ ॥

विवेश वाली तत्रापि मलयं तज्जिघांसया ।
ततोऽहं तत्र निक्षिप्तः गुहाद्वारि †[2] विनीतवत् ॥ ४ ॥

---

* पूर्वोक्तमायाविवृत्तान्तस्यैवेदानीमनूद्यमानत्वात् अत्र दुन्दुभिशब्देनाभेदोपचारात् तत्पुत्रो मायाव्येवोच्यते–ती. केचिदत्र दुन्दुभिशब्देन उपचारान्मायाव्येवोच्यते, मायाविनो वृत्तान्तस्यानुवादादित्याहुः—तन्न—महिषाकृतिमित्यस्य विरोधात् । 'तदा विवेश महिषः', 'महिषो विनशेत्' इति पुनः पुनरुक्तेश्च । रामेण विदितवृत्तान्तश्च न वचनमर्हति च । तर्हि कथमुपपत्तिरिति चेत्—उच्यते—पूर्वं मायाविवृत्तान्ताभिधानात्, अत्र महिषवृत्तान्ताभिधानाच्च तदानीमुभावप्यागताविति वेदितव्यम् । तत्र महिषः कथञ्चित् स्वात्मानं गोपयित्वा वालिनि विनिर्गते, पुनः मत्तः कदाचिदागत्य वालिना हत इत्यविरोधः । वक्ष्यत्येवमन्यत्रापि विषये । रावणेन सीतोपप्लवे उद्युक्ते मन्दोदरी धान्यमालिन्यौ निवारिण्यौ । तत्रैका पूर्वमुक्ता, अन्या वानरसन्निधावनुवादे । तस्मादयमृषेः स्वभाव इति बोध्यम्—गो. परं त्वेवं समर्थने सुग्रीवः प्रथमवारमपराधं कृत्वा तत्फलमनुभूयापि अप्राप्तबुद्धिः द्वितीयवारमपि तमेवापराधं कृतवानिति अत्यन्तमसमञ्जसं स्यात् । वस्तुतस्तु—प्राणिमात्रसहजं बुद्धिवैरूप्यादिकं चित्रयितुं वा एवं ऋषिर्वदतीति युक्तम् ।
† विनीतवत्—विनययुक्तमिति क्रियाविशेषणम्–गो.

[1] परिकालयते–ङ. [2] विनीतवान्–ङ.

न च निष्क्रामते वाली तदा संवत्सरे गते ।
ततः क्षतजवेगेन आपुपूरे तदा बिलम् ॥ ५ ॥
तदहं विस्मितो दृष्ट्वा भ्रातुः शोकविषार्दितः ।
अथाहं *[1] गतबुद्धिस्तु सुव्यक्तं निहतो गुरुः ॥ ६ ॥
शिला पर्वतसंकाशा बिलद्वारि [2] मया कृता ।
अशक्नुवन् निष्क्रमितुं महिषो [3]विनशेदिति ॥ ७ ॥

निहत इति गतबुद्धिः—प्राप्तबुद्धिः । विनशेत्—विनशिष्यतीति यावत् ॥ ७ ॥

ततोऽहं[4]मागां किष्किन्धां निराशस्तस्य जीविते ।
राज्यं च सुमहत् [5]प्राप्य तारां च रुमया सह ॥ ८ ॥
मित्रैश्च सहित[6]स्तस्य वसामि विगतज्वरः ।
आजगाम [7]ततो वाली हत्वा तं †[8] वानरर्षभः ॥ ९ ॥
ततोऽहमददां राज्यं गौरवाद्भययन्त्रितः ।
स मां जिघांसुर्दुष्टात्मा वाली प्रव्यथितेन्द्रियः ॥ १० ॥
परिकालयते [9]वाली धावन्तं सचिवैः सह ॥ ११ ॥

परिकालयते—निष्कासयति स्म । अपि च सचिवैस्सह धावन्तं मां अनुधावति स्मेति शेषः ॥ ११ ॥

---

* गतबुद्धिः—प्राप्तबुद्धिः-गो., रा. † दानवर्षभं (पा.)—मायाविनम्—गो.

[1] कुबुद्धि—ङ. [2] महाऽऽवृता—ङ. [3] विनशिष्यति—ङ. [4] मायां—ङ.
[5] प्राप्तं तारया रुमया—ङ. [6] स्तत्र—ङ. [7] तदा—ङ. [8] दानवर्षभम्—ङ.
[9] कोपात्—ङ.

ततोऽहं वालिना तेन *[1] सोऽनुबद्धः [2] प्रधावितः ।
नदीश्च विविधाः पश्यन् वनानि [3] नगराणि च ॥ १२ ॥

ततः तेन वालिना अनुबद्धः—अनुद्रुतः अहं प्रधावितोऽस्मि ॥

आदर्शतलसंकाशा ततो वै पृथिवी मया ।
अलातचक्रप्रतिमा दृष्टा गोष्पदव[4]त्तदा ॥ १३ ॥

ततो वै इति । तदनुधावनहेतोर्मया गोष्पदवत् परिक्रम्यमाणेयं पृथिवी अलातचक्रप्रतिमा, आदर्शतलसंकाशा च दृष्टा । अत्र गोष्पदवदित्यनेन लङ्घनाप्रयासः प्रदर्शितः । आदर्शतलेत्यनेन भूचक्रवर्तिसर्वपदार्थस्यानुभवः ॥ १३ ॥

पूर्वां दिशं ततो गत्वा पश्यामि विविधान् द्रुमान् ।
पर्वतान् सदरीन् रम्यान् सरांसि विविधानि च ॥ १४ ॥

उक्त एवार्थो विव्रियते—पूर्वां दिशमित्यादि ॥ १४ ॥

उदयं तत्र पश्यामि पर्वतं धातुमण्डितम् ।
क्षीरोदं सागरं चैव नित्य†मप्सरसालयम् ॥ १५ ॥

अप्सरसालयमिति । अकारान्तोऽप्सरसशब्दः छान्दसः ॥ १५ ॥

[5]परिकालयमानस्तु वालिनाऽभिद्रुतो ह्यहम् ।
पुनरावृत्त्य सहसा प्रस्थितोऽहं तदा, विभो ! ॥ १६ ॥

पुनरावृत्त्येति । उदयगिरेर्भुवमिति शेषः ॥ १६ ॥

---

* सानुबन्धः (पा.) सामान्यः–गो. † अप्सरसा–अप्सरसाम् , पूर्वसवर्णदीर्घः–गो.

[1] सानुबन्धः–ङ. [2] प्रधर्षितः–ङ. [3] विविधानि च–ङ. [4] त्कृता–च. ज.
[5] परिकाल्यमानस्तु तदा–ज.

[पुनरावर्तमानस्तु वालिनाऽभिद्रुतो द्रुतम् ।]
दिशस्तस्यास्ततो भूयः प्रस्थितो दक्षिणां दिशम् ।
*विन्ध्यपादपसंकीर्णां चन्दनद्रुमशोभिताम् ॥ १७ ॥

†[1]द्रुमशैलान्तरे पश्यन् भूयो दक्षिणतो[2]ऽपराम् ।
[3]पश्चिमां च दिशं प्राप्तः वालिना समभिद्रुतः ॥ १८ ॥

संपश्यन् विविधान् देशान् अस्तं च गिरिसत्तमम् ।
[4]प्राप्य चास्तं गिरिश्रेष्ठं उत्तरं संप्रधावितः ॥
हिमवन्तं च मेरुं च समुद्रं च तथोत्तरम् ॥ १९ ॥

हिमवन्तं च मेरुं चेति । महामेरुं चेत्यर्थः । एवमिहोत्तरदिगनुक्रमेण यथाप्राप्तमेरुवर्णनात् सावर्णिमेरुः पश्चिमभागे भूचक्रस्य ॥ १९ ॥

यदा न [5] विन्दे शरणं वालिना समभिद्रुतः ।
ततो मां बुद्धिसंपन्नः हनूमान् वाक्यमब्रवीत् ॥ २० ॥

इदानीं मे स्मृतं, राजन्! यथा वाली हरीश्वरः ।
मतङ्गेन तदा शप्तः ह्यस्मिन्नाश्रममण्डले ॥ २१ ॥

प्रविशेद्यदि वा वाली मूर्धाऽस्य शतधा भवेत् ।
[6]तत्र वासः सुखोऽस्माकं निरुद्विग्नो भविष्यति ॥ २२ ॥

---

* विन्ध्यपादपेत्यनेन किष्किन्धाया दक्षिणतोऽपि विन्ध्यपर्वतशेषोऽस्तीति गम्यते–**गो.** † द्रुमान्तरे शैलान्तरे च तद्व्यवहितं वालिनं पश्यन् अपरां पश्चिमां दिशं समभिद्रुत इति शेषः–**ति.** दक्षिणस्यां दिशि द्रुमशैलान् पश्यन् सन् अपरां—तद्भिन्नां पश्चिमां दिशं प्राप्तः–**रा.**

[1] द्रुमशैलांस्ततः–ङ. [2] ऽपरान्–ङ. [3] अपरां च–च. ज. [4] प्राप्तः–ङ. [5] बिन्दं–ङ. [6] अत्र–ङ.

तत इति। एवं सर्वतो भीषयित्वा विद्रावणे सति बुद्धिसंपन्नो हनूमान् मां प्रत्यब्रवीत्। किमित्यत्र—इदानीमित्यादि। मे स्मृतं—मया स्मृतम्। किं स्मृतमित्यतः—यथेत्यादि। तदा—पूर्वकाले हि—अस्मिन् आश्रममण्डले यदा वाली प्रविशेत्, तदा अस्य मूर्धा शतधा भवेदिति हरीश्वरो वाली मतङ्गेन यथा शप्तः, तथा मया स्मृत इत्यन्वयः। किं तत इत्यतः—तत्रेत्यादि। तदा—पूर्वकाले तत्र—मतङ्गाश्रमप्रदेशे निरुद्विग्नः—निर्भयः सुखः वासः भविष्यतीत्याहेति पूर्वेण संबन्धः ॥ २०–२२ ॥

तत्र पर्वतमासाद्य ऋश्यमूकं, नृपात्मज!
न विवेश तदा वाली मतङ्गस्य भयात्तदा ॥ २३ ॥

आसाद्येति। स्थिताः स्म इति शेषः ॥ २३ ॥

एवं मया तदा, राजन्! प्रत्यक्षमुपलक्षितम्।
पृथिवीमण्डलं [1]सर्वं गुहामस्यागतस्ततः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः

अस्येति। ऋश्यमूकस्येत्यर्थः। अत्र (२४ १/२) मानः सर्गः ॥ २४ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः

---

[1] कृत्स्नं यथा ह्यादर्शमण्डलम्—ङ.

सप्तचत्वारिंशः सर्गः

[वानरप्रत्यागमनम्]

दर्शनार्थं तु वैदेह्याः सर्वतः [1] कपिकुञ्जराः ।
व्यादिष्टाः कपिराजेन यथोक्तं जग्मुरञ्जसा ॥ १ ॥

अथ दक्षिणातिरिक्तदिगन्वेषकाणां पुनरागमनम् । दर्शनार्थं त्वित्यादि । यथोक्तं—स्वस्वान्वेषणायोक्तदेशमनतिक्रम्येत्यर्थः ॥ १ ॥

ते सरांसि * सरित्कक्षान् [2] आकाशं नगराणि च ।
नदीदुर्गांस्तथा [3] देशान् विचिन्वन्ति समन्ततः ॥ २ ॥

आकाशमित्यादि । वनगिर्यनावृतकेवलप्रदेशमित्यर्थः । नदीभिः—महाप्रवाहैः दुर्गाः— गन्तुमशक्याः देशाः नदीदुर्गाः ॥ २ ॥

सुग्रीवेण [4] समाख्याताः सर्वे वानर[5]यूथपाः ।
प्रदेशान् प्रविचिन्वन्ति सशैलवनकाननान् ॥ ३ ॥
विचित्य दिवसं सर्वे सीताऽधिगमने धृताः ।
समायान्ति स्म † मेदिन्यां निशाकालेषु वानराः ॥ ४ ॥

दिवसं विचित्येत्यत्यन्तसंयोगे द्वितीया । दिवसविशेषणं रात्र्यां विचयनायोगात् । धृताः—उद्युक्ता इत्यर्थः । मेदिन्यामिति । यत्नाविचेयभूप्रदेशमित्यर्थः ॥ ४ ॥

---

* कक्षान्—गुल्मान्, लतागृहानित्यर्थः-गो. सरित्तीरवर्तिलतागृहानिति यावत् । सरित्प्रदेशानिति वा ॥ † मेदिन्यां सर्वाधारभूतायां, निद्रासौकर्यार्थमिति भावः-ति.

[1] कपियूथपाः-ङ. [2] ग्रामांश्च-ङ. [3] शैलान्-ङ. [4] समाख्यातान्-ङ.
[5] पुङ्गवाः-ङ.

*[1] सर्वर्तुकांश्च देशेषु वानरास्सफलद्रुमान् ।
आसाद्य रजनीं शय्यां चक्रुः सर्वेष्वहस्सु ते ॥ ५ ॥

तेषु देशेषु सर्वर्तुकान्—नित्यसन्निहितस्वस्वर्तुयुक्तान्, अत एव नित्यफलद्रुमान्, सर्वेष्वहस्सु विचयनसमये समासाद्य—कामं प्राश्य, रजनीं—रजन्यां शय्यां चक्रुः ॥ ५ ॥

† तदहः प्रथमं कृत्वा मासे प्रस्रवणं गताः ।
कपिराजेन संगम्य निराशाः कपि[2]कुञ्जराः ॥ ६ ॥

तदह इति । प्रस्थानदिवसमित्यर्थः । तदहः प्रथमं कृत्वा गताः पुनर्मासे प्रस्रवणमागता इति योजना । कपिराजेन संगम्य निराशा अभवन्निति शेषः ॥ ६ ॥

विचित्य तु दिशं पूर्वां यथोक्तां सचिवैः सह ।
अदृष्ट्वा विनतः सीतां आजगाम महाबलः ॥ ७ ॥

उक्तार्थस्यैव प्रपञ्चः—विचित्येत्यादि ॥ ७ ॥

[3] दिशमप्युत्तरां [4] सर्वां विचित्य स महाकपिः ।
आगतः सह सैन्येन वीरः शतबलिस्तदा ॥ ८ ॥
सुषेणः पश्चिमामाशां विचित्य सह वानरैः ।
समेत्य मासे पूर्णे तु सुग्रीवमुपचक्रमे ‡ ॥ ९ ॥

---

* सर्वर्तुकामान् (पा.)—काम्यन्त इति कामाः—पुष्पफलादयः, सर्वर्तुसंभवफलपुष्पादियुक्तान् इत्यर्थः । सफलान्—वानरैरुपभुज्यमानत्वेन सफलान् द्रुमानासाद्य सर्वेष्वहस्सु—एकमासान्तर्गतसर्वदिनेषु रजनीं—रजन्यामेव शय्यां चक्रुः—**गो.** † तदहः—प्रस्थानदिनं प्रथमं कृत्वा—तदारभ्य मासे पूर्णे सति निराशाः—सीतान्वेषणे निरुत्साहाः सन्तः, कपिराजेन संगम्य—तस्मै स्वागमनं निवेद्येत्यर्थः, प्रस्रवणं—माल्यवन्तं गताः—**गो.** ‡ उपचक्रमे—उपागतः—**गो.**

[1] सर्वर्तुकामान्—ङ. [2] यूथपाः—ङ. [3] उत्तरांश्च दिशं—ङ. [4] सीतां—ङ.

तं प्रस्रवणपृष्ठस्थं समासाद्याभिवाद्य च ।
आसीनं सह रामेण सुग्रीवमिदमब्रुवन् ॥ १० ॥
विचिताः पर्वताः सर्वे वनानि [1] गहनानि च ।
निम्नगाः [2] सागरान्ताश्च सर्वे जनपदाश्च ये ॥ ११ ॥

सागरान्ताः—सागरमध्यवर्तिद्वीपाः ॥ ११ ॥

गुहाश्च [3] विचिताः सर्वाः यास्त्वया परिकीर्तिताः ।
विततश्च महागुल्माः लताविततसंतताः ॥ १२ ॥

लताविततैः—लताप्रतानैः संतताः—समन्तात् व्याप्ताः विततः-विशालाः महागुल्माः—लतागृहविशेषाः ॥ १२ ॥

गहनेषु च देशेषु दुर्गेषु विषमेषु च ।
* सत्त्वान्यतिप्रमाणानि विचितानि हतानि च ॥
[4] ये चैव गहना देशाः विचितास्ते पुनःपुनः ॥ १३ ॥

उदारसत्त्वाभिजनो [5] हनूमान्
स मैथिलीं [6] ज्ञास्यति, [7] वानरेन्द्र !
दिशं तु यामेव गता तु सीता
[8] तामास्थितो वायुसुतो हनूमान् ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे सप्तचत्वारिंशः सर्गः

...त्त्वनिश्चयसिद्धमर्थं दर्शयति—उदारसत्त्वेत्यादि ।

अवा... ...१/२ ॥

...काण्डे सप्तचत्वारिंशः सर्गः

...अनन्तरसर्गे १६ श्लोकोऽत्र द्रष्टव्यः ॥

...षाः सर्वाः सशैलवनकाननाः—ङ.

[4] ह... ...स्यति—ङ. [7] वानरेन्द्रः—ङ.

[8] ...

अष्टचत्वारिंशः सर्गः

[कण्डूवनाद्यन्वेषणम्]

सह ताराङ्गदाभ्यां तु सहसा हनुमान् कपिः ।
सुग्रीवेण यथोद्दिष्टं गन्तुं देशं प्रचक्रमे ॥ १ ॥

अथ दक्षिणदिगन्वेषणप्रपञ्चः । सह तारेत्यादि । प्रचक्रमे, अन्वेष्टुमिति शेषः ॥ १ ॥

स तु दूरमुपागम्य सर्वैस्तैः कपिसत्तमैः ।
विचिनोति स्म विन्ध्यस्य गुहाश्च [1] गहनानि च ॥ २ ॥
* पर्वताग्रान् नदी दुर्गान् सरांसि [2] विपुलद्रुमान् ।
वृक्षषण्डांश्च विविधान् पर्वतान् [3] घनपादपान् ॥ ३ ॥
अन्वेषमाणास्ते सर्वे वानराः सर्वतो दिशम् ।
न सीतां [4] ददृशुर्वीराः मैथिलीं जनकात्मजाम् ॥
ते भक्षयन्तो मूलानि फलानि विविधान्यपि ॥ ४ ॥

फलानि विविधान्यपि भक्षयन्तः अन्वेषमाणाः ते इति पूर्वेणान्वयः ॥ ४ ॥

[5][अन्वेषमाणा दुर्धर्षाः न्यवसंस्तत्र तत्र हि ।
स तु देशो दुरन्वेषो गुहागहनवान् महान् ॥]
निर्जलं निर्जनं शून्यं गहनं घोरदर्शनम् ॥ ५ ॥

---

* पर्वतान् (पा.) विन्ध्यस्य प्रत्यन्तपर्वतान् गोमन्तत्र्यम्बकादीन्—ती.

[1] विपिनानि च—ङ. [2] विपुलानि च—ङ. [3] वनपादपान्—ङ

[4] ददृशुस्सर्वे—ङ. [5] इदं पद्यमधिकं—झ.

अतः परं 'निर्जलं निर्जनं' इति श्लोकः। अत्र यथादर्शित-योजनाशक्त्या स्वसौकर्याय मध्ये कञ्चन श्लोकं प्राक्षिपन् केचित् प्राचीनपुस्तकेषु ॥ ५ ॥

[1][त्यक्त्वा तु तं ततो देशं सर्वे वै हरियूथपाः ।]
तादृशान्यप्यरण्यानि विचित्य भृशपीडिताः ।
स देशश्च दुरन्वेषः गुहागहनवान् महान् ॥ ६ ॥

तादृशान्यपीति। दुरन्वेषाण्यपीत्यर्थः। भृशपीडिता इति। मृगपक्षिमूलफलशून्यत्वात् क्षुत्पिपासाभ्यामिति शेषः। स देश इति प्रागुक्तनिर्जलादिमान् देश इत्यर्थः। स देशो यद्यपि दुरन्वेषः, अथापि तमपि विचित्य तु तं देशं त्यक्त्वाऽन्यं देशं विविशुरित्यन्वयः। * यद्वाभट्टस्तु 'निर्जलं' इत्यर्धानन्तरं 'त्यक्त्वा तु तं ततो देशं' इत्यादि पठति। निर्जलादिदेशं त्यक्त्वेत्यन्वयः सिध्येत्। एवञ्च किमन्विष्टं स्यात् दुरन्वेषदेशानन्वेषणे सति। प्राचीनपाङ्क्पाठश्च तथा नास्ति ॥ ६ ॥

देशमन्यं [2]दुरन्वेषं विविशुश्चाकुतोभयाः ।
यत्र वन्ध्यफला वृक्षाः विपुष्पाः पर्णवर्जिताः ॥ ७ ॥
निस्तोयाः सरितो यत्र मूलं यत्र सुदुर्लभम् ॥ ८ ॥

वन्ध्यफला इति। वन्ध्यं—अनुत्पन्नं फलं येषां ते तथा। यत्र वन्ध्यफलत्वादयो विशेषास्तस्मिन्। तस्य कण्डोर्वन इत्यग्रेण संबन्धः ॥

न सन्ति महिषा यत्र न मृगा न च हस्तिनः ।
शार्दूलाः पक्षिणो वाऽपि ये चान्ये वनगोचराः ॥ ९ ॥

---

* गोविन्दराजः।

[1] इदमर्धं, तादृशेत्यर्धानन्तरं—ङ. [2] दुराधर्षं—झ.

न चात्र वृक्षा नौषध्यः [1] न लता नापि वीरुधः ।
* स्निग्धपत्राः स्थले यत्र पद्मिन्यः फुल्लपङ्कजाः ॥ १० ॥
प्रेक्षणीयाः सुगन्धाश्च भ्रमरैश्चापि वर्जिताः ।
कण्डुर्नाम महाभागः सत्यवादी तपोधनः ॥
महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः ॥ ११ ॥

लताः—वृक्षगुल्मावलम्बिन्यः । वीरुधः — भूप्रतानवत्यः । यत्र स्थले स्निग्धपत्राः पद्मिन्यश्च नेत्यनुकर्षः । भ्रमरैश्चापि वर्जिताः—असंयुक्ताः । फुल्लपङ्कजानि च न सन्ति, यत्र च वने कण्डुर्नाम महर्षिरासीत् ॥ १०-११ ॥

तस्य तस्मिन् वने पुत्रः [2] बालो द्वादशवार्षिकः ।
प्रनष्टो † जीवितान्ताय [3] क्रुद्धस्तेन महामुनिः ॥ १२ ॥

तस्य तस्मिन् वने पूर्वं, इदानीं उक्तलक्षणवर्जित इति शेषः । द्वादशवार्षिकस्तस्य पुत्रो जीवितान्ताय—जीवितान्तं गत्वा, प्रनष्ट इत्यर्थः । तेन—एवं बालदुर्मरणेन क्रुद्धोऽभूत् ॥ १२ ॥

तेन धर्मात्मना शप्तं कृत्स्नं तत्र महद्वनम् ।
अशरण्यं दुराधर्षं [4] मृगपक्षिविवर्जितम् ॥ १३ ॥

---

* स्निग्धपत्रा—इत्यादि । अत्रापि 'न सन्ति' इत्यनुषज्यत इति केचित् (तीर्थः)—तन्न, भ्रमरैश्चापि वर्जिता इत्यनन्वयात् । किन्तु भ्रमरैरप्यनुपभुक्तं स्थलपद्मिनीमात्रमित्यर्थः । सर्वेऽपि महातटाकाः स्थलपद्मिनीत्वं गता इति भावः । अन्यं देशं विविशुरिति पूर्वेणान्वयः—गो. † जीवितान्ताय—जीवितान्तकराय वनाय क्रुद्धः—ती. तत्र (पा.)—वने विषये जीवितान्ताय—तस्य नाशाय—गो. प्रध्वंसाय—रा.

[1] न वल्यो—ङ. [2] बालः षोडशवार्षिकः—ङ., बालको दशवार्षिकः—झ. [3] क्रुद्धस्तत्र—झ. [4] कृत्स्नं पक्षि—ङ.

ततः तेन धर्मात्मना--शापानुग्रहसमर्थप्रबलधर्मवता तत्र काले महत् वनं शप्तमभूत्। ततः शापात् अशरण्यत्वादिस्वभावमभूत्। अशरण्यं--अनावासम्॥ १३॥

तस्य ते [1] काननांस्तांश्च गिरीणां कन्दराणि च।
[2] प्रभवानि नदीनां च विचिन्वन्ति समाहिताः॥ १४॥

तस्य त इति। ते वानराः तस्य ऋषेः काननान् तांश्चेत्यादि। नदीनां प्रभवानीति। उत्पत्तिस्थानानीत्यर्थः। इदानीं ता नद्यो निर्जलाः॥ १४॥

तत्र चापि महात्मानः नापश्यन् जनकात्मजाम्।
हर्तारं रावणं वाऽपि सुग्रीवप्रियकारिणः॥ १५॥
ते प्रविश्य च तं भीमं लतागुल्मसमावृतम्।
[3] ददृशुर्भीमकर्माणं [4] असुरं सुर[5]निर्भयम्॥ १६॥

ते प्रविश्येति। वनान्तरमिति शेषः। लतागुल्मसमावृतं—छन्नम्। सुरेभ्यो निर्भयः--सुरनिर्भयः, तथा वरदानादिति शेषः॥ १६॥

तं दृष्ट्वा वानरा [6] घोरं स्थितं शैल[7]मिवापरम्।
गाढं परिहिताः सर्वे दृष्ट्वा तं पर्वतोपमम्॥ १७॥

गाढं परिहिताः--दृढबद्धवस्त्राः, सन्नद्धा इति यावत्॥ १७॥

सोऽपि [8] तान् वानरान् सर्वान् नष्टाः स्थेत्यब्रवीद्बली।
अभ्यधावत सङ्क्रुद्धः मुष्टिमुद्यम्य [9] संहितम्॥ १८॥

---

[1] काननान्तांश्च—ङ. झ. [2] प्रभूतानि—ङ. [3] ददृशुः क्रूर—ङ. [4] आसुरं—ङ. [5] मर्दनम्—ङ. [6] घोराः—ङ. [7] मिवासुरम्—ङ. [8] मारीचतनयः—ङ. [9] संस्थितान्, दक्षिणम्—ङ.

तमापतन्तं सहसा वालिपुत्रोऽङ्गदस्तदा ।
रावणोऽयमिति ज्ञात्वा तलेनाभिजघान ह ॥ १९ ॥

स वालिपुत्राभिहतः वक्त्राच्छोणितमुद्वमन् ।
असुरो न्यपतद्भूमौ पर्यस्त इव पर्वतः ॥ २० ॥

पर्यस्तः-–विशीर्णः ॥ २० ॥

ते तु तस्मिन्निरुच्छ्वासे वानरा जितकाशिनः ।
* व्यचिन्वन् प्रायशस्तत्र सर्वं तद्गिरिगह्वरम् ॥ २१ ॥

जितकाशिनः-–जितभयाः ॥ २१ ॥

विचितं तु [1] ततस्सर्वं सर्वे ते [2] काननौकसः ।
अन्यदेवापरं † घोरं विविशुर्गिरिगह्वरम् ॥ २२ ॥

विचितं—कृतविचयनम् ॥ २२ ॥

ते विचित्य पुनः खिन्नाः विनिष्पत्य [3] समागताः ।
एकान्ते [4] वृक्षमूले तु निषेदुर्दीनमानसाः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे अष्टचत्वारिंशः सर्गः

———

अङ्गार(२३ १/२)मानः सर्गः ॥ २३ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे अष्टचत्वारिंशः सर्गः

———

* तस्मिन्नसुरे रावणभ्रान्त्या तत्समीपवने चिरमन्वेषितवन्त इति बोध्यम्—गो.

† अपरं—अदूरं, 'परं दूरान्यमुख्येषु' इति वैजयन्ती–गो.

[1] ततः कृत्वा–ङ, झ. [2] काननं पुनः–ङ. [3] समाहिताः–ङ.
[4] वृक्षमूलेषु–ङ.

एकोनपञ्चाशः सर्गः

[रजतगिरिगवेषणम्]

अथाङ्गदस्तदा सर्वान् वानरानिदमब्रवीत् ।
[1] परिश्रान्तो महाप्राज्ञः समाश्वास्य शनैर्वचः ॥ १ ॥

पुनश्च तेषामन्वेषणयत्नः । अथाङ्गद इत्यादि । समाश्वास्य, वानरानिति शेषः ॥ १ ॥

वनानि गिरयो नद्यः दुर्गाणि गहनानि च ।
दर्यो गिरिगुहाश्चैव विचितानि समन्ततः ॥ २ ॥
तत्र तत्र महास्माभिः जानकी न च दृश्यते ।
* [2] तद्वा रक्षो हृता येन सीता सुरसुतोपमा ॥ ३ ॥
[3] कालश्च नो महान् यातः सुग्रीवश्चोग्रशासनः ।
तस्माद्भवन्तः [4] सहिताः विचिन्वन्तु समन्ततः ॥ ४ ॥

कालश्च नो महान् यात इति । मासपरिमित इति शेषः । न च शनैर्गम्यत इति वक्तुं शक्यमित्याह—सुग्रीव इत्यादि । यदेवं, अतः—तस्मादित्यादि ॥ ४ ॥

विहाय तन्द्रीं शोकं च [5] निद्रां चैव समुत्थिताम् ।
विचिनुध्वं यथा सीतां पश्यामो जनकात्मजाम् ॥ ५ ॥
अनिर्वेदं च † दाक्ष्यं च मनसश्चापराजयम् ।
कार्यसिद्धिकराण्याहुः तस्मादेतद्ब्रवीम्यहम् ॥ ६ ॥

---

* जानकी न दृश्यते, तत् रक्षो वा न दृश्यत इत्यन्वयः ॥ † दाक्ष्यं—उत्साहः, 'दक्ष उत्साहे' इत्युक्तेः—गो.

[1] परिश्रान्तान् महाप्राज्ञान्—ङ. [2] तथा रक्षोऽपहर्ता च सीतायाश्चैव दुष्कृती—ङ. [3] कालश्च वो—ङ. [4] सहसा—ङ. [5] निद्रां च समुपस्थिताम—ङ.

अनिर्वेदं—अखेदम्। दाक्ष्यं—सामर्थ्यम्। अपराजयं—कार्यापराङ्मुखत्वम्। मानसं—मनोव्यापारः। एतदिति वक्ष्यमाणम्॥

[1]अद्यापीदं वनं दुर्गं विचिन्वन्तु वनौकसः।
खेदं त्यक्त्वा [2]पुनस्सर्वैः वनमेतद्विचीयताम्॥ ७॥
अवश्यं क्रियमाणस्य दृश्यते कर्मणः फलम्।
[3]परं निर्वेदमागम्य *न हि नोन्मीलनं क्षमम्॥ ८॥

नोन्मीलनं—अनुन्मीलनमिति यावत्। अनुद्योग इत्यर्थः। न क्षमं—न युक्तम्॥ ८॥

सुग्रीवः [4]क्रोधनो राजा तीक्ष्णदण्डश्च, वानराः!
भेतव्यं †तस्य सततं रामस्य च महात्मनः॥ ९॥

तत्र हेतुः—सुग्रीव इत्यादि॥ ९॥

[5]हितार्थमेतदुक्तं वः क्रियतां यदि रोचते।
उच्यतां वा क्षमं यन्नः सर्वेषामेव, वानराः!॥ १०॥

यत् नः क्षमं, अन्यद्वा, तदुच्यतामिति योजना॥ १०॥

अङ्गदस्य वचः श्रुत्वा वचनं गन्धमादनः।
[6]उवाचाव्यक्तया वाचा पिपासाश्रमखिन्नया॥ ११॥
सदृशं खलु वो वाक्यं अङ्गदो यदुवाच ह।
हितं [7]चैवानुकूलं च क्रियतामस्य भाषितम्॥ १२॥

---

* मीलनं (पा.)—नेत्रमीलनं, कर्तव्यमकृत्वा तूष्णींभाव इत्यर्थः—गो.

† संबन्धसामान्यविवक्षया षष्ठी—रा.

[1] अद्य चान्यद्वनं—ङ. [2] पुनस्सर्वं—ङ. [3] अलं . . . न हि नो मीलनं—ङ.
[4] कोपनो—ङ. [5] यथार्थं—ङ. [6] उवाच व्यक्तया—ङ. [7] चैवानुरूपं—ङ.

पुनर्मार्गामहे शैलान् कन्दरांश्च [1] दरीस्तथा ।
काननानि च शून्यानि गिरिप्रस्रवणानि च ॥ १३ ॥

यथोद्दिष्टानि सर्वाणि सुग्रीवेण महात्मना ।
विचिन्वन्तु [2] वनं सर्वे गिरिदुर्गाणि [3] सर्वशः ॥ १४ ॥

ततस्समुत्थाय पुनः वानरास्ते महाबलाः ।
विन्ध्यकानन[4]संकीर्णां विचेरुर्दक्षिणां दिशम् ॥ १५ ॥

ते शारदाभ्रप्रतिमं श्रीमद्रजतपर्वतम् ।
शृङ्गवन्तं दरीमन्तं अधिरुह्य च, वानराः ! ॥ १६ ॥

तत्र [5] लोध्रवनं रम्यं सप्तपर्णवनानि च ।
[6] व्यचिन्वंस्ते हरिवराः सीतादर्शनकाङ्क्षिणः ॥ १७ ॥

तस्याग्रमधिरूढास्ते श्रान्ता विपुलविक्रमाः ।
न पश्यन्ति स्म वैदेहीं रामस्य महिषीं प्रियाम् ॥ १८ ॥

ते तु दृष्टिगतं [7] दृष्ट्वा तं शैलं बहुकन्दरम् ।
[8] अध्यारोहन्तु हरयः वीक्षमाणाः समन्ततः ॥ १९ ॥

दृष्टिगतं—दृष्टिगोचरम् ॥ १९ ॥

अवरुह्य ततो भूमिं [9] श्रान्ता विगतचेतसः ।
स्थित्वा मुहूर्तं तत्राथ वृक्षमूलमुपाश्रिताः ॥ २० ॥

ते मुहूर्तं [10] समाश्वस्ताः *[11] किञ्चिद्भग्नपरिश्रमाः ।
पुनरेवोद्यताः कृत्स्नां मार्गितुं दक्षिणां दिशम् ॥ २१ ॥

---

* किञ्चिद्भग्नपरिश्रमाः—किञ्चिन्न्यूनपरिश्रमाः इति भावः ॥

[1] शिलास्तथा—च. ज. [2] वने सर्वे—ङ. [3] संगताः—ज. [4] संपूर्णा—ङ.
[5] कोद्रवनं—ङ. [6] विचिन्वन्तो—ङ. [7] कृत्वा—ङ. [8] अवारोहन्त—ङ., झ. [9] भ्रान्ता—ङ.
[10] समायस्ताः—ङ. [11] किञ्चिद्रत—ङ.

हनुमत्प्रमुखास्ते तु प्रस्थिताः प्लवगर्षभाः ।
विन्ध्य[1]मेवादितस्तावत् विचेरुस्ते ततस्ततः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः

आदितस्तावत् विन्ध्यमेव विचेरुरिति, अन्वेषणायेति शेषः । तावच्छब्दो वाक्यालङ्कारे । रात्रि(२२)मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः

पञ्चाशः सर्गः

[ऋक्षबिलप्रवेशः]

सह ताराङ्गदाभ्यां तु संगम्य हनुमान् कपिः ।
विचिनोति स्म विन्ध्यस्य गुहाश्च गहनानि च ॥ १ ॥
सिंहशार्दूल[2]जुष्टाश्च [3]शिलाश्च सरितस्तथा ।
विषमेषु नगेन्द्रस्य महाप्रस्रवणेषु च* ॥ २ ॥

अथ ऋक्षाबिलप्रवेशः–सहेत्यादि । विषमेषु–क्लेशावहेषु ॥१-२॥

आसेदुस्तस्य शैलस्य कोटिं दक्षिणपश्चिमाम् ।
तेषां तत्रैव वसतां †स कालो व्यत्यवर्तत ॥ ३ ॥

---

* अस्य 'विचिनोति स्म' इत्यनेनान्वयः । † 'मासः पूर्णो बिलस्थानां' (पृ. 452) इत्युत्तरत्राङ्गदवचनस्य बिल एवान्यो मासो गत इत्यर्थो वक्ष्यते–गो.

[1] मेवादितः कृत्वा–ङ. [2] जुष्टेषु–ङ. [3] गुहाश्च–ङ.

दक्षिणपश्चिमां तस्य कोटिमिति । नैऋतिभागमित्यर्थः । स काल इति । सुग्रीवकल्पित इत्यर्थः ॥ ३ ॥

*स हि देशो दुरन्वेषः गुहागहनवान् महान् ।
†तत्र वायुसुतः सर्वं विचिनोति स्म पर्वतम् ॥
परस्परेण [1]हनुमान् अन्योन्यस्याविदूरतः ॥ ४ ॥

स हि देश इति । नैऋतविन्ध्यकोटिप्रदेश इत्यर्थः । परस्परेण प्रत्येकं अन्योन्यस्याविदूरतः संगतो भूत्वा हनुमान् विचिनोति स्म ॥

गजो गवाक्षो गवयः शरभो गन्धमादनः ।
मैन्दश्च द्विविदश्चैव सुषेणो हनुमानपि ॥ ५ ॥
अङ्गदो युवराजश्च तारश्च वनगोचरः ।
गिरिजालावृतान् देशान् मार्गित्वा दक्षिणां दिशम् ॥ ६ ॥
विचिन्वन्तस्ततस्तत्र ददृशुर्विवृतं बिलम् ।
दुर्गमृक्षबिलं नाम ‡दानवेनाभिरक्षितम् ॥ ७ ॥
क्षुत्पिपासापरीताश्च श्रान्ताश्च सलिलार्थिनः ।
अवकीर्णं लतावृक्षैः ददृशुस्ते महाबिलम् ॥ ८ ॥

लताश्च वृक्षाश्च—लतावृक्षाः ॥ ८ ॥

[2]ततः क्रौञ्चाश्च हंसाश्च सारसाश्चापि §निष्क्रमन् ।
जलार्द्राश्चक्रवाकाश्च रक्ताङ्गाः पद्मरेणुभिः ॥ ९ ॥

निष्क्रमन्—निष्क्रामन्तीति यावत् ॥ ९ ॥

---

* ननु विचेतव्यप्रदेशेषु बहुषु विद्यमानेषु कथमत्रैव मासं क्षपितवन्त इत्याशङ्क्याऽऽह—स हीति—गो. † तत्रेति । अत्र संगमय्येत्यध्याहार्यम्—गो. ‡ दानवेन—मयेन—गो., ति. § निष्क्रमन्—निरक्रमन्—गो., ति.

[1] रहिता—ह्म. [2] तत्र—ङ.

ततस्तद्बिलमासाद्य सुगन्धि दुरतिक्रमम् ।
विस्मयव्यग्रमनसः बभूवुर्वानरर्षभाः ॥ १० ॥

सुगन्धीति । बिलान्तर्वक्ष्यमाणदिव्यगन्धपुष्पादिसुरभिवातसंगादिति शेषः ॥ १० ॥

*संजातपरिशङ्कास्ते तद्बिलं प्लवगोत्तमाः ।
[1]अभ्यपद्यन्त संहृष्टाः तेजोवन्तो महाबलाः ॥ ११ ॥

संजातपरिशङ्काः—संजातजलसत्त्वसंभावनाः । तेजोवन्त इति मतुप् छान्दसः ॥ ११ ॥

[2]नानासत्त्वसमाकीर्णं दैत्येन्द्रनिलयोपमम्
दुर्दर्शमतिघोरं च दुर्विगाहं च सर्वशः ॥ १२ ॥

दैत्येन्द्रनिलयः—पातालम् ॥ १२ ॥

ततः पर्वतकूटाभः हनुमान् [3]पवनात्मजः ।
अब्रवीत् वानरान् [4]सर्वान् कान्तारवन[5]कोविदः ॥

कान्तारवनकोविदः—तत्प्रदेशप्रवेशादिसमर्थः इत्यर्थः ॥ १३ ॥

†गिरिजालावृतान् देशान् मार्गित्वा दक्षिणां दिशम् ।
वयं सर्वे परिश्रान्ताः न च पश्याम मैथिलीम् ॥ १४ ॥

अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः ।
जलार्द्राश्चक्रवाकाश्च निष्पतन्ति स्म [6]सर्वतः ॥ १५ ॥

---

* संजातपरिशङ्काः—किमिदं पातालम् ? उतान्यन्मायामयम् ? इति संदिहानाः—गो. † दक्षिणां दिशं प्राप्य गिरिजालावृतान् मार्गित्वा—रा.

[1] अभ्यपद्यन्त—ङ. [2] महासर्प—ङ. [3] मारुतात्मजः—ज. [4] घोरान्—ङ. [5] कोविदान्—ङ. [6] सर्वशः—ज.

नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः ।
तथा चेमे बिलद्वारे स्निग्धास्तिष्ठन्ति पादपाः ॥ १६ ॥

इत्युक्तास्तद्बिलं सर्वे विविशुस्तिमिरावृतम् ।
अचन्द्रसूर्यं हरयः ददृशू रोमहर्षणम् ॥ १७ ॥

इत्युक्ता इति । हनुमतेति शेषः ॥ १७ ॥

निशाम्य तस्मात् सिंहांश्च [1] तांस्तांश्च मृगपक्षिणः ।
प्रविष्टा हरिशार्दूलाः बिलं तिमिरसंवृतम् ॥ १८ ॥

निशाम्य--अवलोक्य ॥ १८ ॥

न तेषां [2] सज्जते [3] चक्षुः न तेजो न पराक्रमः ।
*वायोरिव गतिस्तेषां दृष्टिस्तमसि वर्तते ॥ १९ ॥

न सज्जते--न प्रतिबध्यते ॥ १९ ॥

ते प्रविष्टास्तु वेगेन तद्बिलं कपिकुञ्जराः ।
प्रकाशमाभिरामं च ददृशुर्देशमुत्तमम् ॥ २० ॥
ततस्तस्मिन् बिले [4] दुर्गे नानापादपसंकुले ।
अन्योन्यं संपरिष्वज्य जग्मुर्योजनमन्तरम् ॥ २१ ॥

अन्योन्यं संपरिष्वज्य—आलिङ्गनं कृत्वा, तिमिरदेशविनिर्गमनजसंतोषवशादिति शेषः । † भट्टस्तु—अन्योन्यहस्तावलम्बनं

---

* यद्यपि वायोरिव गतिः; तथापि यतो दृष्टिस्तमसि प्रतिबद्धा वर्तते, अतो वेगेन परस्परहस्तग्रहणपूर्वकं प्रविष्टा इत्यर्थः-ति. † गोविन्दराजः, महेश्वरतीर्थौ वा ॥

[1] व्याघ्रांश्च—ङ. [2] विद्यते—ङ. [3] दृष्टिः—ञ. [4] भीमे—च. ञ.

कृत्वेत्याह । *नान्धकारः, नापि दुर्बलाः ; कुतोऽन्योन्यहस्तावलम्बनप्रसङ्गः । नापि च परिष्वङ्गशब्दः हस्तावलम्बनवाची ॥ २१ ॥

ते नष्टसंज्ञास्तृषिताः संभ्रान्ताः सलिलार्थिनः ।
†परिपेतुर्बिले तस्मिन् कश्चित्कालमतन्द्रिताः ॥ २२ ॥

ते नष्टसंज्ञा इति । तृषावशादिति शेषः । तदेव दर्शितं—तृषिता इत्यादिना । परिपेतुः—अधोमार्गावलम्बनेन गच्छन्ति स्म ॥

ते कृशा दीनवदनाः परिश्रान्ताः प्लवङ्गमाः ।
‡आलोकं ददृशुर्वीराः निराशा जीविते तदा ॥ २३ ॥
ततस्तं देशमागम्य [1]सौम्यं वितिमिरं [2]वनम् ।
ददृशुः काञ्चनान् [3]वृक्षान् दीप्तवैश्वानरप्रभान् ॥ २४ ॥

आलोकमेव ददृशुः, न तु जलम् । अतो जीविते निराशा यदा बभूवुः, तदा उच्यमानलक्षणं तं देशमागम्य काञ्चनवृक्षान् ददृशुः ॥

[4]सालांस्तालांश्च पुन्नागान् ककुभान् [5]वञ्जुलान् धवान् ।
चम्पकान्नागवृक्षांश्च कर्णिकारांश्च पुष्पितान् ॥ २५ ॥

---

*नान्धकार इति । अत्र १९ श्लोकस्य टिप्पणी द्रष्टव्या । ५२ सर्गस्य १४ श्लोकोऽपि द्रष्टव्यः ॥ †परिपेतुरिति लोकवदुक्तिः, अस्वातन्त्र्यादौ हि तथा व्यपदेशो लोके । ‡आलोकं–प्रकाशम्–गो. प्रकाशितदेशम्–रा. यदा जीविते निराशा अभवन् , तदाऽकस्माद् आलोकं ददृशुः । ततः तं आलोकदेशमागम्येत्यादि ॥

[1] सर्वे–ङ. [2] समं–ङ. [3] दिव्यान् दीप्तान्–ङ. [4] सालांस्तमालान्–ञ. [5] वकुलान्–ङ.

स्तबकैः काञ्चनैश्चित्रैः रक्तैः किसलयैस्तथा ।
आपीडैश्च लताभिश्च [1]हेमाभरणभूषितान् ॥ २६ ॥

आपीडैः—स्तबकशेखरैः लताभिश्चेति । संयुक्तानिति शेषः ॥

तरुणादित्यसंकाशान् वैदूर्यमयवेदिकान् ।
विभ्राजमानान् वपुषा पादपांश्च हिरण्मयान् ॥ २७ ॥

पादपान् *ददृशुः ॥ २७ ॥

नीलवैदूर्यवर्णाश्च पद्मिनीः [2]पतगावृताः ।
महद्भिः काञ्चनैः [3]पद्मैः वृता बालार्कसन्निभैः ॥ २८ ॥

पद्मिनीः—पद्मवत्यः ॥ २८ ॥

जातरूपमयैर्मत्स्यैः [4]महद्भिश्च सकच्छपैः ।
नलिनीस्तत्र ददृशुः प्रसन्नसलिलावृताः ॥ २९ ॥

उच्यमानविशेषणा नलिनीश्च ददृशुः ॥ २९ ॥

काञ्चनानि विमानानि राजतानि तथैव च ।
तपनीयगवाक्षाणि मुक्ताजालावृतानि च ॥ ३० ॥
हैमराजतभौमानि वैदूर्यमणिमन्ति च ।
ददृशुस्तत्र हरयः गृहमुख्यानिसर्वशः ॥ ३१ ॥

मुक्ताखचितैः जालैः, मुक्तासमूहैर्वा आवृतानि गवाक्षाणि ददृशुः ।
हेमरजतभूमिविकाराणि—हैमराजतभौमानि ॥ ३०-३१ ॥

---

* ददृशुरित्यागामिनाऽन्वय इत्यर्थः ॥

[1] हेमभारवि–ङ. [2] पतगैर्वृताः–ङ. [3] वृक्षैः–ज. [4] महद्भिश्चाथ पङ्कजैः–ङ.

पुष्पितान् फलिनो वृक्षान् प्रवालमणिसन्निभान् ।
काञ्चनभ्रमरांश्चैव मधूनि च समन्ततः ॥ ३२ ॥

प्रवालाः मणयः—वैडूर्याणि च, तत्सन्निभास्तथा ॥ ३२ ॥

मणिकाञ्चनचित्राणि शयनान्यासनानि च ।
[1] महार्हाणि च यानानि दद्दशुस्ते समन्ततः ॥ ३३ ॥

हैमराजतकांस्यानां भाजनानां च संचयान् ।
अगरूणां च दिव्यानां चन्दनानां च संचयान् ॥ ३४ ॥

शुचीन्यभ्य वहार्याणि मूलानि च फलानि च ।
महार्हाणि च [3] यानानि मधूनि रसवन्ति च ॥ ३५ ॥

यानं—शिबिकादि ॥ ३५ ॥

दिव्यानामम्बराणां च महार्हाणां च सञ्चयान् ।
कम्बलानां च चित्राणां अजिनानां च संचयान् ॥ ३६ ॥

[4] (तत्र तत्र च विन्यस्तान् दीप्तान् वैश्वानरप्रभान् ।
दद्दशुर्वानराः शुभ्रान् जातरूपस्य संचयान् ॥)

तत्र तत्र विचिन्वन्तः [5] बिले तस्मिन् [6] महाबलाः ।
दद्दशुर्वानराः शूराः स्त्रियं काञ्चिददूरतः ॥ ३७ ॥

तां दृष्ट्वा भृशसंत्रस्ताः चीरकृष्णाजिनाम्बराम् ।
तापसीं नियताहारां ज्वलन्तीमिव तेजसा ॥ ३८ ॥

---

[1] विविधानि विशालानि—ञ. एतदादिपद्यत्रयमधिकं—झ. [2] वहाराणि—ञ.
[3] मत्स्यानि—ङ., पानानि—ञ. [4] इदं पद्यमधिकं—झ. [5] वने—ङ. [6] महाप्रभाः—ञ.

विस्मिता हरयस्तत्र [1]व्यवतिष्ठन्त सर्वशः ।
पप्रच्छ हनुमांस्तत्र काऽसि त्वं कस्य वा बिलम् ॥ ३९ ॥

व्यवतिष्ठन्त---व्यवस्थिताः---तूष्णीमवस्थिता बभूवुः ॥ ३९ ॥

ततो हनूमान् गिरिसन्निकाशः
कृताञ्जलिस्तामभिवाद्य वृद्धाम् ।
पप्रच्छ का त्वं *भवनं बिलं च
रत्नानि [2]हेमानि वदस्व कस्य ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चाशः सर्गः

'पप्रच्छ हनुमान्' इत्यत्रोक्तार्थस्यैव सविशेषं प्रतिपादनं—ततो हनूमानित्यादि । अनभि(४० १/२)मानः सर्गः ॥ ४० ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चाशः सर्गः

एकपञ्चाशः सर्गः

[स्वयंप्रभोपचारः]

इत्युक्त्वा हनुमांस्तत्र †[3]पुनः कृष्णाजिनाम्बराम् ।
अब्रवीत्तां महाभागां तापसीं धर्मचारिणीम् ॥ १ ॥

अथ हनुमत्पृष्टायास्तापस्याः प्रत्युत्तरम् । इत्युक्त्वेत्यादि । 'का त्वं, कस्य भवनं' इत्युक्तरीत्येत्यर्थः ॥ १ ॥

---

* भवनं बिलं इत्यादिकं कस्येत्यन्वयः ॥ † एवं पृष्ट्वा पुनः विस्तरेणाब्रवीदित्यर्थः ॥

[1] व्यवातिष्ठन्त—ङ. [2] चैतानि—ङ. [3] चीर—ञ.

इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् ।
क्षुत्पिपासापरिश्रान्ताः परिखिन्नाश्च सर्वशः ॥ २ ॥

पुनरब्रवीदिति किमब्रवीदित्यतः—इदं प्रविष्टा इत्यादि । सहसा—हठात् * ॥ २ ॥

महद्धरण्या विवरं प्रविष्टाः स्म पिपासिताः ।
इमांस्त्वेवंविधान् भावान् विविधानद्भुतोपमान् ॥
दृष्ट्वा वयं प्रव्यथिताः संभ्रान्ता [1] नष्टचेतसः ॥ ३ ॥

महत् धरण्या विवरमित्यादिनाप्युक्तार्थस्य प्रतिपादनम् । अद्भुतोपमान्—आश्चर्यकल्पान् भावान्—पदार्थान् ॥ ३ ॥

कस्यैते काञ्चना वृक्षाः तरुणादित्यसन्निभाः ।
शुचीन्यभ्य[2]वहार्याणि मूलानि च फलानि च ॥ ४ ॥
काञ्चनानि विमानानि राजतानि गृहाणि च ।
तपनीयगवाक्षाणि मणिजालावृतानि च ॥ ५ ॥
पुष्पिताः फलवन्तश्च पुण्याः सुरभिगन्धिनः ।
इमे जाम्बूनदमयाः पादपाः कस्य तेजसा ॥ ६ ॥

कस्य तेजसेति । संभूता इति शेषः । जाता इत्याकर्षो वा ॥

काञ्चनानि च पद्मानि जातानि विमले जले ।
कथं मत्स्याश्च सौवर्णाः [3] चरन्ति सह कच्छपैः ॥ ७ ॥

---

* अकस्मादिति यावत् ।

[1] नष्टचेतनाः–ङ. [2] वहाराणि–ज. [3] दृश्यन्ते–ज.

[1] आत्मानमनुभावं च कस्य चैतत्तपोबलम् ।
अजानतां नः सर्वेषां सर्वमाख्यातुमर्हसि ॥ ८ ॥

आत्मानं—स्वत्स्वरूपम् । अनुभावं—स्वद्वैभवम् । एतत् कस्य तपोबलम्? तव वा? अन्यस्य वा? इत्येवं अजानताम् ॥ ८ ॥

एवमुक्ता हनुमता तापसी धर्मचारिणी ।
प्रत्युवाच हनूमन्तं सर्वभूतहिते [2] रता ॥ ९ ॥

* मयो नाम महातेजाः मायावी [3] दानवर्षभः ।
तेनेदं निर्मितं सर्वं मायया काञ्चनं वनम् ॥ १० ॥

तेनेति । मायाविना मयेनेत्यर्थः । मायया—विचित्रनिर्माणशक्त्या ॥ १० ॥

पुरा दानवमुख्यानां विश्वकर्मा बभूव ह ।
येनेदं काञ्चनं दिव्यं निर्मितं भवनोत्तमम् ॥ ११ ॥

को नाम मयः? इत्यपेक्षायां, तत्प्रसिद्धिमाह—पुरेत्यादि । विश्वकर्मेति । शिल्पीति यावत् । येनेदं निर्मितं, स तु पुरा दानवानां विश्वकर्मा बभूव ह—प्रसिद्धम् ॥ ११ ॥

स तु वर्षसहस्राणि तपस्तप्त्वा महावने ।
पितामहाद्वरं लेभे सर्वमौशनसं धनम् ॥ १२ ॥

---

* मयो नाम त्रिपुराधिपतिः त्रिपुरे नष्टे स्वरक्षणार्थमिदं बिलं कृतवानिति मत्स्यपुराणे त्रिपुरदहनप्रस्तावेऽभिहितम् । मायया विचित्रशक्त्या मायावी—मायायुक्तः दानवर्षभ इत्यनेन नायमसुरतक्षा मय इति सूचितम्—गो.

[1] आत्मनस्त्वनुभावाद्वा—ज. [2] रतम्—ङ. [3] वानरर्षभ—ज.

कथमस्यैवं निर्माणशक्तिरित्यत आह—स तु वर्षेत्यादि । पितामहात् वरं--विचित्रसृष्टिसामर्थ्यं लेभे । अपि च सर्वं औशनसं धनं--एवं निर्माणसाधनपदार्थजातं च लेभे--पितामहाज्ञया शुक्रात् प्राप्तवानित्यर्थः । *भट्टस्तु--औशनसं धनं--शिल्पशास्त्रज्ञान-मित्याह । उशनस एव तावत् शिल्पशास्त्रासाधारणज्ञानधनत्वं विमतम् । अपि वा, तथापि तत्सिद्ध्यै तस्यैव कर्तव्या, न तु पितामहमुद्दिश्य वर्षसहस्रतपः ॥ १२ ॥

[1]विधाय सर्वं बलवान् सर्वकामेश्वरस्तदा ।
उवास सुखितः कालं कञ्चिदस्मिन् महावने ॥ १३ ॥

बलवानिति । उक्तवरद्वयरूपबलवानित्यर्थः । सर्वकामेति । स्वसृष्टसर्वभोग्यविशेषणां ईश्वरः भोक्ता सन् सुखित उवास ॥ १३ ॥

†तमप्सरसि हेमायां सक्तं दानवपुङ्गवम् ।
विक्रम्यैवाशनिं गृह्य जघानेशः पुरन्दरः ॥ १४ ॥

हेमाख्यायां अप्सरसि सक्तं, अशनिं गृह्य--गृहीत्वा विक्रम्यैव-युद्धं कृत्वैव पुरन्दरो जघान । ननु असुरशिल्पी मयो नित्यः । तस्य कथं हननम्? ननु इन्द्राणामप्यनित्यत्वे का नाम मयस्य नित्यता? प्रसिद्धिस्तु यो यः असुरशिल्पिपदं प्राप्तः, स स मयाख्यः । ततश्च इन्द्रवदेव पदाविच्छेदात् प्रवाहनित्यत्वम् ॥ १४ ॥

इदं च ब्रह्मणा दत्तं हेमायै [2]वनमुत्तमम् ।
शाश्वताः कामभोगाश्च गृहं चेदं हिरण्मयम् ॥ १५ ॥

---

* महेश्वरतीर्थः । † तं—स्वपुत्रीं मन्दोदरीं रावणाय दत्तवन्तम्—गो.

[1] वनं विधाय बलवान्—ङ. झ. [2] भवनोत्तमम्—ङ.

तस्मिन् हते इदं च वनं मयभुक्तायै हेमायै भगवता ब्रह्मणा दत्तम्, तस्या एव न्यायप्राप्तत्वात्। अत्र च ब्रह्मद्वेषी * ब्राह्मणाधमो ब्रह्मशब्दार्थापलापायाह। कथम्? अत्र ब्रह्मशब्दः ब्रह्मनिष्ठदानवविश्वकर्मणीति। कथं दानवस्य तद्विवक्षितपरब्रह्मनिष्ठत्वम्? कथं च पुरन्दरहेतन दानम्? ननु पितामहोपासकत्वादेव साकारब्रह्मनिष्ठत्वमस्ति। किं तथोपासका रावणहिरण्यादयोऽपि ब्रह्माणः? नश्यतु पापी प्रलप्यान्न्याय्यम् ॥ १५ ॥

दुहिता मेरुसावर्णेः अहं [1] तस्याः स्वयंप्रभा।
इदं रक्षामि भवनं हेमायाः, वानरोत्तम! ॥ १६ ॥

स्वयंप्रभेत्यनेनान्वर्थनाम्ना सूर्यालोकप्रसक्तिरहितेऽपि तत्र स्वतेजसा प्रकाशनसामर्थ्यं दर्शितम् ॥ १६ ॥

मम प्रियसखी हेमा नृत्तगीतविशारदा।
तया दत्तवरा चास्मि रक्षामि [2] भवनोत्तमम् ॥ १७ ॥

ननु हेमाया एव भगवता दत्तत्वात् तवात्र कः प्रसङ्गः? इत्यत्राह—मम प्रियसखीत्यादि। दत्तवरा — दत्तरक्षणसामर्थ्या। चकारेण, सखीत्वतः प्रार्थितरक्षणा चेत्यर्थः ॥ १७ ॥

† किं कार्यं कस्य वा हेतोः कान्ताराणि प्रपश्यथ।
कथञ्चेदं वनं दुर्गं युष्माभि[3]रुपलक्षितम् ॥ १८ ॥

---

* महेश्वरतीर्थः। † किं कार्यमिति कार्यस्वरूपप्रश्नः। कस्य वेत्यादि फलप्रश्नः।

[1] नाम्ना—ङ. [2] भवनं महत्—च. [3] रभिलक्षितम्—ङ.

एवं स्वं वृत्तान्तमुक्त्वा हनुमदादीनां वृत्तान्तं पृच्छति--किं कार्यमित्यादि ॥ १८ ॥

इमान्यभ्य[1]वहाराणि मूलानि च फलानि च ।
भुक्त्वा पीत्वा च पानीयं [2]सर्वं मे [3]वक्तुमर्हथ[4] ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकपञ्चाशः सर्गः

अभ्यवहाराणि—अभ्यवहार्याणीत्यर्थः । अथैर्य(१९ १/२)मानः सर्गः ॥ १९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकपञ्चाशः सर्गः

---

[1] वहार्याणि—ङ.   [2] सत्यं—ङ.   [3] वक्तुमर्हसि.

[4] एतदनन्तरं—एवमुक्ते शुभे वाक्ये तापस्या धर्मसंहिते ।
हनुमान् हरिशार्दूलः प्रत्युवाच स्वयंप्रभाम् ।
अर्थिनः स्म तदर्थं च चर धर्ममनुत्तमम् ॥
मृगमाणान्निराहारान् संजीवय, तपोधने !
तच्छ्रुत्वा वचनं तस्य तापसी धर्मचारिणी ।
आदाय फलमूलानि विधिनोपजहार सा ॥
प्रतिगृह्य तु ते तस्याः तथातिथ्यं वनेचराः ।
क्षुधार्ता भक्षयामासुः प्रशसन्तस्तपोधनाम् ।
ते भक्षयित्वा तत्सर्वं पीत्वा सुरभि वारि च ।
सर्वे ददृशुरालोकान् सर्वतो वानरा गुहाम् ॥
प्रसन्नवदनाश्चासन् सर्वे संहृष्टमानसाः ।
संजातं बलवीर्यं च तत्र तेषां वनौकसाम् ।
तर्पिता विविधैर्मूलैः फलैश्शीतेन वारिणा ॥—इत्यधिकं—ङ.

द्विपञ्चाशः सर्गः

[बिलप्रवेशकारणकथनम्]

*अथ तानब्रवीत् सर्वान्[1] विश्रान्तान् हरियूथपान् ।
इदं वचनमेकाग्रा तापसी धर्मचारिणी ॥ १ ॥

अथ स्वयंप्रभायै हनुमता स्वीयवृत्तान्तनिवेदनम् । अथेत्यादि । इदं—वक्ष्यमाणम् ॥ १ ॥

वानराः ! यदि वः खेदः प्रणष्टः फलभक्षणात् ।
यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि कथ्यताम् ॥

यदि चैतदिति । 'किं कार्यं कस्य वा हेतोः इत्यादितः प्राक् पृष्टार्थतत्त्वमित्यर्थः ॥ २ ॥

तस्यास्तद्वचनं श्रुत्वा हनुमान् मारुतात्मजः ।
आर्जवेन यथातत्त्वं आख्यातुमुपचक्रमे ॥ ३ ॥
†राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ।
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकावनम् ॥ ४ ॥
लक्ष्मणेन सह भ्रात्रा[3] वैदेह्या चापि भार्यया ।
तस्य भार्या जनस्थानात् रावणेन हृता बलात् ॥ ५ ॥

बलात्—बलात्कारेण ॥ ५ ॥

---

* अथ—'भुक्त्वा पीत्वा' इत्युक्त्यनन्तरं, तथैव भुक्त्वा पीत्वा विश्रान्तिस्वीकारानन्तरम् । † सर्वलोकराजत्वोक्त्या तस्येश्वरत्वं सूचितम्—गो. वस्तुतस्तु भृत्यानां स्वस्वामिविषये एवं वादः सहजः, 'दासोऽहं कोसलेन्द्रस्य' इति ह्यात्मानमुद्घोषयति हनुमान् ॥

[1] विक्रान्तान्—ङ. [2] तां कथाम्—ङ. [3] सीतया सह—ङ.

वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः ।
राजा वानरमुख्यानां येन प्रस्थापिता वयम् ॥ ६ ॥
अगस्त्याचरितामाशां दक्षिणां यमरक्षिताम् ।
सहैभिर्वानरै[1]र्मुख्यैः अङ्गदप्रमुखैर्वयम् ॥ ७ ॥
रावणं सहिताः सर्वे राक्षसं कामरूपिणम् ।
सीतया सह वैदेह्या मार्गध्वमिति चोदिताः ॥ ८ ॥

'अङ्गदप्रमुखैः वानरैः सहिताः सर्वे यूयं सहिताः—समवेताः सन्तः रावणं सीतया सह मार्गध्वं' इति चोदिताः स्म ॥ ७-८ ॥

विचित्य तु [2] वयं सर्वे समग्रां दक्षिणां दिशम् ।
बुभुक्षिताः परिश्रान्ताः वृक्षमूलमुपाश्रिताः ॥ ९ ॥

अत एव—विचित्येत्यादि ॥ ९ ॥

विवर्णवदनाः सर्वे [3] सर्वे *ध्यानपरायणाः ।
नाधिगच्छामहे पारं मग्नाश्चिन्तामहार्णवे ॥ १० ॥

नाधिगच्छामहे पारमिति । चिन्तामहार्णवस्येति शेषः ॥ १० ॥

चारयन्तस्ततश्चक्षुः दृष्टवन्तो [4] वयं बिलम् ।
लतापादप[5]संछन्नं तिमिरेण समावृतम् ॥ ११ ॥
अस्माद्धंसा जलक्लिन्नाः [6]पक्षैस्सलिल[7]विस्रवैः ।
कुरराः सारसाश्चैव निष्पतन्ति पतत्रिणः ॥ १२ ॥

---

* ध्यानपरायणाः—सुग्रीवाज्ञास्मरणनिरताः–रा. वस्तुतस्तु-चिन्तापराः, तत्रैव चिन्तार्णवे मग्नाः—इति लोकवदुक्तिर्वा ॥

[1] घोरैः–ङ. [2] वनं सर्वं–ज. [3] सदा–ङ. [4] महत्–ज. [5] संपन्नं–ज. [6] निर्यान्ति विवृताद्बिलात्–ङ. [7] रेणुभिः–ज.

शरणं त्वां प्रपन्नाः स्मः सर्वे वै, धर्मचारिणि !
यः कृतः समयोऽस्माकं सुग्रीवेण महात्मना ॥ २ ॥

स च कालो ह्यतिक्रान्तः [1]बिले नः परिवर्तताम् ।
सा त्वमस्मा[2]द्बिलाद्धोरात् उत्तारयितुमर्हसि ॥ ३ ॥

यः समय इति । कालावधिरित्यर्थः ॥ २-३ ॥

[3]तस्मात् सुग्रीववचनात् अतिक्रान्तान् गतायुषः ।
त्रातुमर्हसि नः सर्वान् सुग्रीवभय[4]शङ्कितान् ॥ ४ ॥

गतायुष इति । नष्टजीवितानित्यर्थः । तत्र हेतुः—सुग्रीववचनादतिक्रान्तानिति ॥ ४ ॥

***महच्च कार्यमस्माभिः कर्तव्यं, धर्मचारिणि !**
तच्चापि न कृतं कार्यं अस्माभिरिह वासिभिः ॥ ५ ॥

एवमुक्ता हनुमता तापसी वाक्यमब्रवीत्[5] ।
जीवता दुष्करं मन्ये प्रविष्टेन निवर्तितुम् ॥ ६ ॥

तपसस्तु प्रभावेण नियमोपार्जितेन च ।
सर्वानेव बिलादस्मात् [6]उद्धरिष्यामि वानरान् ॥ ७ ॥

---

* ननु तत्कार्यसाधनायागतानां युष्माकं कथं भीतिरित्यत आह—यत् महत् कार्यं—सीतान्वेषणं अस्माभिः कर्तव्यं, तदपि न कृतम्—**रा.**

[1] बिलेऽस्मिन्—**ङ.** [2] द्बिलादस्मान्—**ङ.** [3] अस्मान्—**ङ.** [4] कर्शितान्—**ङ.**
[5] एतदनन्तरं—**इदं** दैवतराजेन पुरा शक्रेण संयुगे । असुरार्थं विमुक्तेन तदा वज्रेण पातितम् । दुर्धर्षं तु दुरासादं नानारत्नसमन्वितम् । महाप्राज्ञेन रत्यर्थं निर्मितं विश्वकर्मणा । एवं दैवविसृष्टे तु बिलेऽस्मिन् वज्रदारिते—इत्यधिकं—**ङ.**
[6] तारयिष्यामि—**ज.**

प्रविष्टेन—इदं बिलं प्रविष्टेन प्राणिना अस्मात् जीवता निवर्तितुं दुष्करं मन्ये । तर्हि वयं किं कुर्मः ? इत्यत्राह—तपस इत्यादि ॥ ६-७ ॥

[1]निमीलयत चक्षूंषि, सर्वे वानरपुङ्गवाः ।
न हि निष्क्रमितुं शक्यं अनिमीलितलोचनैः ॥ ८ ॥
[2]ततो निमीलिताः सर्वे सुकुमाराङ्गुलैः करैः ।
सहसा पिदधुर्दृष्टिं हृष्टा गमनकाङ्क्षिणः ॥ ९ ॥

निमीलिताः सन्तः, अज्ञानादुन्मीलनभिया सुकुमाराङ्गुलैः करैश्च सहसा दृष्टिं पिदधुः । 'सुकुमाराङ्गुलैः' इति समासान्तः छान्दसः ॥ ९ ॥

वानरास्तु महात्मानः हस्तरुद्धमुखास्तदा ।
निमेषान्तरमात्रेण बिलादुत्तारितास्तया ॥ १० ॥

ततस्तान् वानरान् सर्वान् तापसी धर्मचारिणी ।
[3]निस्सृतान् विषमात्तस्मात् समाश्वास्येदमब्रवीत् ॥ ११ ॥

इदमब्रवीदिति । दिङ्मोहशान्त्यर्थमिति शेषः ॥ ११ ॥

एष विन्ध्यो गिरिः श्रीमान् नानाद्रुमलताकुलः ।
* एष प्रस्रवणः शैलः सागरोऽयं महोदधिः ॥ १२ ॥

---

* अयं प्रस्रवणः किष्किन्धासमीपवर्तिप्रस्रवणादन्य इति बोध्यम्-रा. प्रस्रवणः— किष्किन्धासमीपप्रस्रवणादन्योऽयमित्याहुः । अत्युच्चत्वात् ततोऽपि तस्य दर्शनमित्यन्ये—ति.

[1] निमीलयन्तु—ङ. [2] ततः संमीलिताः—ङ. [3] निर्गतान्—ङ.

स्वस्ति वोऽस्तु गमिष्यामि भवनं, वानरर्षभाः !
इत्युक्त्वा तद्बिलं श्रीमत् प्रविवेश स्वयंप्रभा * ॥ १३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः

श्लोक(१३)मानः सर्गः ॥ १३ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः

चतुःपञ्चाशः सर्गः

[अङ्गदनिर्वेदः]

ततस्ते ददृशुर्घोरं सागरं वरुणालयम् ।
अपारमभिगर्जन्तं घोरैरूर्मिभि[1]राकुलम् ॥ १ ॥

अथ बिलादुत्तार्य स्वयंप्रभाबिलगमनानन्तरं, ऋतुलिङ्गतः कालातिपातं निश्चित्याङ्गदस्य प्रायःप्रवृत्तिः । एवमिह पूर्वापेक्षया प्रकरणविच्छेदात् इह सर्गारम्भः । तथा च पाङ्क्तो विच्छेदः प्रकाशते । अन्ये त्विह नावच्छिन्दन्ति ग्रन्थाल्पीयस्त्वादिमत्या । ततस्त इत्यादि ॥ १ ॥

मयस्य मायाविहितं गिरिदुर्गं विचिन्वताम् ।
तेषां मासो व्यतिक्रान्तः यो राज्ञा समयः कृतः ॥ २ ॥

समयः कृत इति । अवधिः कृत इत्यर्थः ॥ २ ॥

---

* झ. पुस्तके नात्र सर्गविच्छेदः । महेश्वरतीर्थगोविन्दराजयोरपि नात्र सर्गविच्छेदः संमतः ॥

[1] रावृतम्—ङ.

*विन्ध्यस्य तु गिरेः पादे संप्रपुष्पितपादपे ।
उपविश्य [1] महात्मानः चिन्तामापेदिरे तदा ॥ ३ ॥

विन्ध्यस्य तु गिरेः पाद इति । विन्ध्यगिरेः नैर्ऋतदिग्वर्तिपादपर्वत इत्यर्थः । तदेति । शिशिरारम्भसमय इत्यर्थः ॥ ३ ॥

† ततः पुष्पातिभाराग्रान् लताशतसमावृतान् ।
द्रुमान् वासन्तिकान् दृष्ट्वा बभूवुर्भयशङ्किताः ॥ ४ ॥

पुष्पातिभारयुक्तानि अग्राणि येषां, ते तथा । वासन्तिकान्—वसन्तकालफलवदाम्रादीन् द्रुमान् ॥ ४ ॥

‡ ते वसन्तमनुप्राप्तं [2] प्रतिवेद्य परस्परम् ।
§ नष्टसन्देश [3] कालार्था निपेतुर्धरणीतले ॥ ५ ॥

'भयशङ्किता बभूवुः' इत्युक्तार्थस्यैव सविशेषं प्रतिपादनं—त इत्यादि । ते वसन्तं अनुप्राप्तं—प्रकृतशिशिरर्तोरासन्नकालतया प्राप्तम् । नष्टः सन्देशकाले—राजसन्देशप्राप्तमासकाले अनुष्ठेयोऽर्थः येषां, ते तथा ॥ ५ ॥

ततस्तान् कपिवृद्धांस्तु शिष्टांश्चैव वनौकसः ।
वाचा मधुरयाऽऽभाष्य यथावदनुमान्य च ॥ ६ ॥

---

* 'हिमवद्विन्ध्यशैलाभ्यां प्रायो व्याप्ता वसुन्धरा' इति भेषजकल्पोक्तिः—**गो.** † ये वसन्ते फलन्ति, ते शिशिरे पुष्प्यन्ति—**गो.** ‡ अनुप्राप्तं—प्रत्यासन्नं, तदानीं हि शिशिरः । तथा हि—शरत्कालान्ते मार्गशीर्षे मासि सेनां सन्निधाप्य पौषमासमवधिं कृत्वा प्रस्थापितवान् । स पौषः, माघश्चातीतः, फाल्गुन एव प्रवृत्त इति तेन वसन्तः प्रत्यासन्न एव, न प्राप्तः—**गो.** § नष्टः सन्देशकालरूपः अर्थः येषां ते—**रा.** निपेतुः, जङ्घाबलक्षयादिति लोकसिद्धमिदम् ॥

[1] महाभागाः—ङ. [2] प्रतिबुद्धय, प्रतिबुद्धाः—ङ. [3] कार्यार्थाः—ङ.

स तु सिंहवृषस्कन्धः पीनायतभुजः कपिः ।
युवराजो महाप्राज्ञः अङ्गदो वाक्यमब्रवीत् ॥ ७ ॥

ततस्तानिति । भयात् भूतलपतितानित्यर्थः । अनुमान्य—संपूज्येत्यर्थः । महाप्राज्ञ अङ्गद इत्यसन्धिः छान्दसः ॥ ६-७ ॥

शासनात् कपिराजस्य वयं सर्वे विनिर्गताः ।
मासः पूर्णो बिलस्थानां, हरयः! किं न बुध्यते ॥८॥

शासनात् व्यतिक्रान्तत्वं दर्शयति—मास इति । अस्माकं अन्वेषणावधित्वेन दत्तः पुष्यमास इत्यर्थः । किं न बुध्यत इति । कालात्ययमिति शेषः ॥ ८ ॥

*वयमाश्वयुजे मासि कालसङ्ख्याव्यवस्थिताः ।
प्रस्थिताः सोऽपि चातीतः [1]किमतः कार्यमुत्तरम् ॥ ९ ॥

स्वयमेव कालात्ययप्रकारं दर्शयति—वयमाश्वयुज इत्यादि । अत्रापि आश्वयुजमासासन्नकार्तिकमासान्त इत्यर्थः । कालसंख्या-

---

* वयमाश्वयुजे मासि हनुमच्चोदितेन सुग्रीवेण त्रिपञ्चरात्रसंख्यया नियम्य समाहूताः । ततो मार्गशीर्षे लक्ष्मणचोदितेन तेन दशरात्रसंख्यया समाहूताः । ततः सीतान्वेषणे पौषमासमवधिं दत्वा तेन प्रेषिताः । एवमाश्वयुजमासमारभ्य कालसंख्यया व्यवस्थितानामस्माकं कालविस्मरणं न युक्तमित्यर्थः । यद्वा आश्वयुजे मासि—दशम्यामुत्थितायामितिवत् सामीप्याधिकरणविवक्षया सप्तमी । तेन कार्तिकमास उच्यते, 'कार्तिके समनुप्राप्ते त्वं रावणवधे यत । एष नः समयः सौम्य ! प्रविश त्वं स्वमालयम्' इत्युक्तकालातिक्रमप्रयुक्तरामकोपदर्शनात्, कार्तिकान्तो विवक्षितः । 'प्रस्थिताः सोऽपि चातीतः किमतः कार्यमुत्तरम्' इत्यत्र 'अपि च' इत्यनेन मार्गणावधिभूतमार्गशीर्षानन्तरमासः समुच्चीयते—ती. कालसंख्याव्यवस्थिताः—कालसंख्यया नियमिताः वयं आश्वयुजे मासि हनुमच्चोदितेन सुग्रीवेण पञ्चदशरात्रसंख्यया नियम्य समाहूताः । ततो मार्गशीर्षे लक्ष्मणचोदितेन तेन दशरात्रसंख्यया समाहूताः । ततः सीतान्वेषणे पौषमासमवधिंकृत्वा

[1] किमेतत्—ङ.

व्यवस्थिताः। कार्तिकान्ते प्रथमं हनुमद्बोधितेन सुग्रीवेण पञ्चदश-रात्रकालसंख्यया वानराणामानयनाय दूता व्यवस्थिताः—नियम्य प्रवर्तिताः ॥ ९ ॥

भवन्तः प्रत्ययं प्राप्ताः नीतिमार्गविशारदाः।
हितेष्वभिरता भर्तुः [1] निसृष्टाः सर्वकर्मसु ॥ १० ॥

तेन प्रेषिताः। एवमाश्वयुजमासमारभ्य कालसंख्यया व्यवस्थितानामस्माकं कालविस्मरणं न युक्तमित्यर्थः। **अन्ये त्वाहुः**—आश्वयुजे मासि, 'दशम्यां उत्थितायां'मितिवत् सामीपिकाधिकरणविवक्षया सप्तमी। तेन 'कार्तिके समनुप्राप्ते त्वं रावणवधे यत' २६–१६ इत्युक्तकालातिक्रमणप्रयुक्तरामक्रोधदर्शनात् कार्तिकान्तो विवक्षितः। सोऽपि चातीतः, सः—मार्गणावधिभूतमार्गशीर्षमासः। अपि चेत्याभ्यां पदाभ्यां तदनन्तरभूतौ पौषमाघौ समुच्चीयेते। अतश्च फाल्गुन एव प्राप्त इति भाव इति—**गो.** वयमिति। आश्वयुजे अतीतप्राय इति शेषः। 'कार्तिके समनुप्राप्ते त्वं रावणवधे यत' **इत्युक्तेः**। ततः पञ्चदशरात्रकालसंख्यया प्रवर्तितदूतैः व्यवस्थिता मिलिताः। एवञ्चामान्तमानेनाश्विन-स्योत्तरे दीपोत्सवामायुते पक्षे सर्वसेनागमनं किष्किन्धायां, रामस्य क्रोधस्तु तत्रैव पक्षे कार्तिकमन्निधावपि तदुद्यमाभावकृतः। ततः कार्तिकेऽवधिरन्वेषणस्य ततो मार्गशुक्ल इदं वचनम्। पायस्तद्वर्षे पौषः क्षयमासः, 'कार्तिकादित्रये नान्यतः' इत्युक्तेः। अतो मार्गशुक्ल एव आम्रादीनां पुष्पोद्गमः, उत्पाततो वा। तादृशरीत्या पुष्पोद्गमं दृष्ट्वाऽपि वसन्तामन्ननाऽनुमानेन भयोपपत्तिः। **कतकादयस्तु**—अन्वेषणेऽवधित्वेन दत्तः पौषो मासः। 'आश्वयुजे' इत्यस्य तत्प्रत्यासन्नकार्तिकान्त इत्यर्थः। कालसंख्येति। कार्तिकोत्तरं पञ्चदशरात्रसंख्याकालेनावधिना वानरानयनाय दूतप्रेषणम्। ततः पूर्णि-मान्तमानेन मार्गशुक्ले सर्ववानरानयनम्। ततः पौषाद्यदिने दिक्ष्वन्वेषणाय वानर-प्रस्थानम्। तत्र पौषे माघकृष्णीयकिञ्चिद्दिनसहितेऽतीते इदं वाक्यमित्याहुः। तेषां—सीतानयनोत्तरं सीतां प्रति द्वादशमासा रावणावधिरिति स्पष्टमेव। पम्पायां चैत्रे आगमन इत्यस्योक्तत्वात्, ततः पूर्वं फाल्गुने सीतापहार इति च स्पष्टमेव। एवं च माघकृष्णे तच्छुक्लादौ वा हनूमतः सीतासमीपगमने हनूमन्तं प्रति 'वर्तते दशमो मासः द्वौ तु शेषौ, प्लवङ्गम?' इति सीतोक्तिविरोधः। किञ्च हनूमतो लङ्काप्रवेशदिने प्रदोषसमय एव पूर्णकलाचन्द्रोदयवर्णनं च विरुद्धमित्याहुः—**ति.**

[1] निर्दिष्टाः, निर्विष्टाः—ङ.

अथ मार्गशीर्षे लक्ष्मणचोदितेन पुनश्च दशरात्रसंख्यया नियम्य दूताः प्रवर्तिताः। एवं द्विप्रकारप्रवर्तितदूतेभ्यः, प्रत्ययं—राजनियोगं ज्ञात्वा भवन्तः सर्वे प्राप्ताः मार्गशीर्षान्ते। अथ नीतिमार्गविशारदाः भर्तुः हितेष्वभिरता यूयं पौषमासमवधीकृत्य सर्वकर्मसु—सर्वत्रान्वेषणकर्मसु निसृष्टाः ॥ १० ॥

[1] कर्मस्वप्रतिघाताश्च दिक्षु [2] विश्रुतपौरुषाः।
मां पुरस्कृत्य निर्याताः [3] पिङ्गाक्षप्रतिचोदिताः ॥ ११ ॥

ततः—कर्मस्वप्रतिघातत्वादिगुणा यूयं पिङ्गाक्षप्रचोदिताः सन्तः मां पुरस्कृत्यान्वेष्टुं निर्याताः। तेषां नः स कालश्च बिले गतः ॥११॥

इदानीमकृतार्थानां मर्तव्यं नात्र संशयः।
हरिराजस्य सन्देशं अकृत्वा कः सुखी भवेत् ॥ १२ ॥

अतः—इदानीं अकृतार्थानामस्माकं अनुष्ठेयतत्त्वं—मर्तव्यं—देहत्याग एवानुष्ठेयः, नात्र संशयः। कुत एवमित्यतः—हरिराजस्येत्यादि। सर्वत्रात्रोक्तर्तुमासविशेषवाचिशब्दानां लक्षणाश्रयणबीजं तु 'कार्तिके समनुप्राप्ते त्वं रावणवधे यत। एष नः समयः सम्यक् प्रविश त्वं स्वमालयम्' (२६-१७) इति कार्तिकान्ते प्रवृत्तिप्रतिपादकरामवचनमेव ॥ १२ ॥

तस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम्।
*प्रायोपवेशनं युक्तं सर्वेषां च वनौकसाम् ॥ १३ ॥

स्वयं प्रायोपवेशनमेव युक्तमिति। प्राणत्यागायेति शेषः। न तु राजनिग्रहात् त्याग इत्यर्थः ॥ १३ ॥

---

* प्रायाय—अन्तगमनाय उपवेशनं— शयनं प्रायोपवेशनम्—गो.

[1] कर्मस्वप्रतिमास्सर्वे—ङ. [2] विश्रान्त—ङ. [3] पिङ्गाक्षेशप्रचो—ङ.

तीक्ष्णः प्रकृत्या सुग्रीवः * स्वामिभावे व्यवस्थितः।
न क्षमिष्यति नः सर्वान् अपराधकृतो गतान् ॥ १४ ॥

स्वामिभावे निग्रहानुग्रहादिकृद्राजभावे। व्यवस्थितः— रामानुग्रहेण प्रतिष्ठितः इत्यर्थः ॥ १४ ॥

† अप्रवृत्तौ च सीतायाः पापमेव करिष्यति।
तस्मात् क्षममिहाद्यैव [1] प्रायोपविशनं हि नः ॥
त्यक्त्वा‡ पुत्रांश्च दारांश्च धनानि च गृहाणि च ॥ १५ ॥

प्रायोपविशनमिति छान्दसः ॥ १५ ॥

[2] ध्रुवं नो [3] हिंसिता राजा सर्वान् प्रतिगतानितः।
वधेनाप्रतिरूपेण श्रेयान् मृत्युरिहैव नः ॥ १६ ॥

अपराधमूलप्राणनाशत्वात्— अप्रतिरूपेणेति ॥ १६ ॥

§ न चाहं यौवराज्येन सुग्रीवेणाभिषेचितः।
नरेन्द्रेणाभिषिक्तोऽस्मि रामेणाक्लिष्टकर्मणा ॥ १७ ॥
स पूर्वं बद्धवैरो मां राजा दृष्ट्वा व्यतिक्रमम्।
घातयिष्यति दण्डेन तीक्ष्णेन कृतनिश्चयः ॥ १८ ॥

पूर्वं मां — मां प्रति बद्धवैरः स राजा, इदानीं व्यतिक्रमं— आज्ञालङ्घनं दृष्ट्वा घातयिष्यत्येवेति योजना ॥ १८ ॥

---

* स्वामिभाव इति लोकवदुक्तिः, नियमैकसक्तं स्वामिनं तदाश्रिताः एवमेव किल वदन्ति लोके। † अप्रवृत्तौ—अवार्तायां-गो. प्रवृत्त्यलाभे-रा. ‡ पुत्रादि त्यक्त्वा प्रायोपवेशनं गन्तुं— कर्तुं क्षमं—युक्तमित्यन्वयः-ति. § त्वां यौवराज्ये कृतवान् सुग्रीवः कथं हिंस्यादित्यत्राह—न चाहमिति-गो.

[1] गन्तुं प्रायोपवेशनम्-ज. [2] ध्रुवं वो-ङ. [3] हिंसते-ज

*किं मे सुहृद्भिर्व्यसनं पश्यद्भिर्जीवितान्तरे ।
इहैव प्रायमासिष्ये पुण्ये सागररोधसि ॥ १९ ॥

मे जीवितान्तरे—जीवितावधौ—जीवितनाशे मम व्यसनं पश्यद्भिरपि सुहृद्भिः किं साध्यम् ? राजाज्ञया प्राप्तदुःखे न किमपीत्यर्थः । यद्देवं, अतः — इहैवेत्यादि ॥ १९ ॥

एतच्छ्रुत्वा कुमारेण युवराजेन भाषितम् ।
सर्वे ते वानरश्रेष्ठाः करुणं वाक्यमब्रुवन् ॥ २० ॥

†तीक्ष्णः प्रकृत्या सुग्रीवः प्रियासक्तश्च राघवः ।
[1]समीक्ष्याकृतकार्यांस्तु तस्मिंश्च समये गते ॥ २१ ॥

प्रियायां सक्तः—अनुरक्तस्तथा ॥ २१ ॥

[2]अदृष्टायां तु वैदेह्यां दृष्ट्वा चैव समागतान् ।
‡राघवप्रियकामार्थं घातयिष्यत्यसंशयम् ॥ २२ ॥

न क्षमं [3]चापराद्धानां गमनं स्वामिपार्श्वतः ।
[4]प्रधानभूताश्च वयं सुग्रीवस्य समागताः ॥ २३ ॥

स्वामिपार्श्वतः – स्वामिपार्श्वे ॥ २३ ॥

---

*सुहृदो मद्व्यसनप्रदर्शनेन क्लेशयित्वा मम किं प्रयोजनमित्यर्थ –गो.

†इयमपि लोकवदुक्तिः । राजा स्वाधिकारेऽप्रमादं पश्यति । रामस्तु स्वपत्नीविषयमेव महान्तं मन्यत इति लोकसहजोक्तिः ॥ ‡परेषां पुरतः स्वाधिकारप्रदर्शनं हि स्वामिनां स्वभाव इति भावः ॥

[1] इदमर्धं कुण्डलितम्—ङ. [2] एतदाद्यर्धत्रयमधिकम्—झ. [3] सापराधानां—ङ.
[4] इदमर्धं कुण्डलितम्-ङ.

इहैव सीता[1]मन्विष्य प्रवृत्तिमुपलभ्य वा ।
नो चेद्गच्छाम तं वीरं गमिष्यामो यमक्षयम् ॥ २४ ॥

उपलभ्य वा गच्छामः ; नो चेत्—प्रवृत्त्यनुपलंभश्चेत् यमक्षयं इहैव स्थित्वा गमिष्यामः ॥ २४ ॥

प्लवङ्गमानां तु भयार्दितानां
श्रुत्वा वचस्तार इदं बभाषे ।
अलं विषादेन बिलं प्रविश्य
वसाम सर्वे यदि रोचते [2]वः ॥ २५ ॥

बिलं—स्वयंप्रभाबिलम् ॥ २५ ॥

इदं हि मायाविहितं सुदुर्गमं
प्रभूत[3]पुष्पोदकभोज्यपेयकम् ।
इहास्ति नो नैव भयं पुरन्दरात्
न राघवात् वानरराजतोऽपि वा ॥ २६ ॥

कथमिह स्थित्या प्राणत्राणमित्यत्राह—इदं हीत्यादि ॥ २६ ॥

*श्रुत्वाऽङ्गदस्यापि वचोऽनुकूलं
ऊचुश्च सर्वे हरयः प्रतीताः ।
यथा [4]न हिंस्येम तथा विधानं
असक्तमद्यैव विधीयतां नः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चतुःपञ्चाशः सर्गः

———

* अङ्गदस्याप्यनुकूलं तारस्य वचनमित्यन्वयः–गो.

[1] मन्वीक्ष्य–ङ. [2] वचः–ङ. [3] वृक्षोदक–ज. [4] न हन्येम–ङ.

अङ्गदस्यापीत्यपिशब्देन तारस्यापि वच इत्यर्थः। असक्तं—अविलम्बम्। तार(२६)मानः सर्गः॥ २६॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चतुःपञ्चाशः सर्गः

———

पञ्चपञ्चाशः सर्गः

[हनुमद्वचनम्]

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि।
अथ मेने हृतं राज्यं हनुमानङ्गदेन तत्॥ १॥

अथ अप्रतिषिद्धमनुमतमिति न्यायेन तारोक्तबिलावस्थानमनुमन्यताऽङ्गदेन सुग्रीवाज्ञामुल्लङ्घ्य स्वातन्त्र्येण वानरराज्यं प्रतितिष्ठासितं मत्वा सुग्रीवसचिवो हनुमान् अङ्गदाशयानुसारिणो विभेद्य, अथ स्वातन्त्र्यावस्थानमशक्यार्थं तवापीत्यङ्गदमपि बोधयति। तथा ब्रुवतीत्यादि। ताराधिपतिवर्चसि तारे तथा ब्रुवति, तुशब्दात् अङ्गदे च तदनुमन्यमाने सति, अथ—अनन्तरं तत्—तस्मात् तारवचोऽङ्गीकारादेव हेतोः अङ्गदेन राज्यं—स्वस्वामिसुग्रीवकपिसाम्राज्यं हृतं मेने॥ १॥

*बुद्ध्या ह्यष्टाङ्गया युक्तं चतुर्बलसमन्वितम्।
चतुर्दशगुणं मेने हनुमान् वालिनः सुतम्॥ २॥
आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः।
शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया॥ ३॥

---

* 'ग्रहणं धारणं चैव स्मरणं प्रतिपादनम्। ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः' इत्युक्ताष्टाङ्गयुक्तया। चतुर्बलसमन्वितं—बाहुबलमनोबलोपायबलबन्धुबलयुक्तम्—गो.

बृहस्पतिसमं बुद्ध्या विक्रमे सदृशं पितुः ।
*** शुश्रूषमाणं तारस्य [1] शुक्रस्येव पुरन्दरम् ॥ ४ ॥**

ननु कथमङ्गदाद्राज्यापहारचिन्ता ? इत्यत्र—तत्सामर्थ्यं तस्मिन् संभावितमिति मन्यत इत्याह—बुद्ध्येत्यादि । अष्टाङ्गया—अष्टगुणया, ते गुणास्तु—'शुश्रूषा श्रवणं शश्वत् ग्रहणं धारणं तथा । ऊहापोहेऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः' इति प्रसिद्धाः । चतुर्बलं—सामादि चतुरुपायबलम् । चतुर्दशगुणास्तु—'देशकालज्ञता दार्ढ्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानिता दाक्ष्यं ऊर्जः संवृतमन्त्रता । अविसंवादिता शौर्यं भक्तिज्ञत्वं कृतज्ञता । शरणागतवात्सल्यममर्षित्वमचापलम्' । एवमाद्युच्यमानसर्वगुणकं वालिनः सुतं तारस्य वचः शुश्रूषमाणं यतोऽपश्यत्, ततः हनुमान् अङ्गदेन हृतं राज्यं मेने इत्यन्वयः । शुक्रस्येव पुरन्दरमिति विपरीतोपदेशग्रहे दृष्टान्तः, अभूतोपमेयम् ॥ २-४ ॥

भर्तुरर्थे परिश्रान्तं सर्वशास्त्र[2]विशारदः ।
† अभिसन्धातुमारेभे हनुमानङ्गदं ततः ॥ ५ ॥

भर्तुः—स्वभर्तुः सुग्रीवस्य अर्थे—विनियोगकरणे परिश्रान्तं—विमुखम् । सर्वशास्त्रविशारद इति हनुमद्विशेषणम् । अभिसंधातुं—समाधातुं, समाधित्सुर्हनुमानित्यर्थः ॥ ५ ॥

---

* तारस्य शुश्रूषमाणं—नटस्य शृणोतीतिवत् कारकशेषत्वात् षष्ठी । शुक्रस्येव पुरन्दरमिति पुरन्दरशब्दसन्निधानात् अत्र शुक्रशब्दः बृहस्पतिपरः । यद्वा कस्यांचिदवस्थायां हितमुपदिशत शुक्रस्य वचनं पुरन्दरः श्रुतवानित्यवगम्यते । 'गुरोरिव पुरन्दरम्' इति क्वचित्पाठः—**गो.** शुक्रस्य शुश्रूषमाणं पुरन्दरमिव, तारस्य शुश्रूषमाणं, प्रतिकूलं अनुकूलमिव भावयन्तमिति वा ॥ † अभिसन्धातुं—अनुकूलयितुम्—**गो.**

[1] गुरोरिव—ङ. [2] विशारदं, विदां वरम्—ङ.

स चतुर्णामुपायानां *[1] द्वितीयमुपवर्णयन् ।
भेदयामास तान् सर्वान् वानरान् वाक्यसंपदा ॥ ६ ॥

उपायचतुष्टयं—सामभेददानदण्डरूपम् । तत्र द्वितीयः—भेदः, तमुपवर्णयन् इति हेतौ शतृप्रत्ययः, भेदोपायावलम्बनेन हेतुनेत्यर्थः । तान् सर्वानिति । अङ्गदानुवर्तिन इत्यर्थः । वाक्यसंपदा — भेदजननक्षमलौकिकालौकिकन्यायोपेतवाक्यसमृद्ध्येनेत्यर्थः । 'हीनाश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः' इत्यादीनि तानि वाक्यानि ॥ ६ ॥

तेषु सर्वेषु भिन्नेषु ततोऽभीषयदङ्गदम् ।
भीषणैर्[2]बहुभिर्वाक्यैः कोपापायसमन्वितैः ॥ ७ ॥

अभीषयत् — न्यायप्रदर्शनेन भयमुत्पादयामास । कोपापायसमन्वितैः — कोपापनयनसामर्थ्यसमन्वितैः ॥ ७ ॥

त्वं समर्थतरः † पित्रा युद्धे, तारेय ! वै[3] धुरम् ।
दृढं धारयितुं शक्तः कपिराज्यं यथा पिता ॥ ८ ॥

भीषणमेव क्रियते—त्वमित्यादिना । त्वं पित्रा — सुग्रीवेण सह युद्धे समर्थतरः । राज्यं—'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति कर्मणि ष्यञ् , राजकृत्यभूतं धुरं—भारं दृढं धारयितुं च शक्तः, यदि कपिराज्यराजकर्तारः सर्वे त्वामन्वयुः ॥ ८ ॥

---

* तृतीयं—(पा.) भेदं—'साम दानं च भेदश्च दण्डश्चेति यथाक्रमं' इति क्रमनियमाव—गो. † पित्रा—पितुः—गो. पञ्चम्यर्थे षष्ठीति भाव ॥

[1] तृतीय—ङ. [2] विविधै—ङ. [3] ध्रुवम—ङ.

* नित्यमस्थिरचित्ता हि [1] कपयः, हरिपुङ्गव !
नाज्ञाप्यं विषहिष्यन्ति पुत्रदारान् विना त्वया ॥ ९ ॥

न च तत्समस्तीत्याह—नित्यमित्यादि। नन्वस्थैर्ये किं कारणमित्यत्राह—पुत्रदारान् विनेति। पुत्रदाराणां किष्किन्धावर्तिनां सुग्रीवायत्तत्वात् त्वया सह निलवर्तने तद्वियोगः स्पष्टः। ननु निगृह्य स्ववशे स्थापयिष्य—इत्यत्र, तदशक्यमित्याह—नाज्ञाप्यमिति। भावे कृत्यः, आज्ञापनं न विषहिष्यन्तीति ; त्वत्तोऽप्यधिकबलत्वादिति शेषः ॥

त्वां नैते † [2] ह्यनुरज्ञेयुः प्रत्यक्षं प्रवदामि ते।
यथाऽयं जाम्बवान्नीलः सुहोत्रश्च [3] महाकपिः ॥ १० ॥
न ह्यहं [4] त इमे सर्वे सामदानादिभिर्गुणैः।
दण्डेन वा त्वया शक्याः सुग्रीवादपकर्षितुम् ॥ ११ ॥

यदेवं, अतः—त्वां, विहाय पुत्रदारान् नानुरञ्जयेयुः। न रञ्जयेयुरित्ययमर्थः न परोक्ष इत्याह—प्रत्यक्षं प्रवदामि त इति। तद्यथा स्पष्टं भवति, तथा प्रदर्शयामीति शेषः। प्रदर्शनमेव करोति—जाम्बवानित्यादि। अहमिति स्वस्य च निर्देशः। गुणैः—उपायैः ॥

‡ विगृह्यासनमप्याहुः दुर्बलेन [5] बलीयसा।
आत्मरक्षाकरस्तस्मात् न विगृह्णीत दुर्बलः ॥ १२ ॥

---

* पुत्रदारैर्विरहितत्वात् त्वया आज्ञाप्यं—त्वदाज्ञामिति यावत् न विषहिष्यन्ति। त्वं तु यद्यपि शक्तः, परन्तु कपयः न ते सहकरिष्यन्तीति भावः॥ † नानुयुञ्जेयुः (पा.)—नानुवर्तेरन्—गो. ‡ बलीयसः खलु दुर्बलेन सह विगृह्यासनं—अवस्थानं आहुः—शक्यं भवेदपीति भावः, न तु आत्मरक्षार्थी दुर्बलः बलीयसा सह विगृह्य स्थातुं शक्त इति भावः ॥

[1] हरयः—ङ. [2] ह्यनुयुञ्जेयुः, ह्यनुजीवेयुः—ङ. [3] महाबलः—ङ. [4] न च ते—ङ. [5] बलीयसः—ङ., झ.

ननु गच्छत यूयमपि, मयैव स्थीयत इति मन्यमानं प्रत्याह— विगृह्येत्यादि। बलीयसा पुरुषेण, स्वस्माद्दुर्बलेन विगृह्याप्यासनं शक्यमाहुः, न तु दुर्बलस्य बलीयसा विगृह्य। यदेवं, अतः— तस्मात् आत्मरक्षाकरः—आत्मरक्षार्थी दुर्बलः बलीयसा न विगृह्णीत ॥

यां चेमां मन्यसे *धात्रीं एतद्बिलमिति श्रुतम्।
एतल्लक्ष्मणबाणानां ईषत्कार्यं [1] विदारणे ॥ १३ ॥

अथ तारोपदेशादनिस्तार एवेत्याह—यां चेमामित्यादि। यां चेमां गुहां धात्रीं—धारिकां प्रतिष्ठाकरीं मन्यसे, नेयं प्रतिष्ठेति शेषः। कुत इत्यतः—एतदित्यादि। यदेतद्बिलं—ऋक्षबिलं—निर्भयमिति तारात् श्रुतं, एतत् लक्ष्मणबाणानामित्यादि। एतत्—एतद्विषयकं दारणं लक्ष्मणबाणानां ईषत्कार्यं—ईषत्करमिति यावत्; खलभावः छान्दसः ॥

स्वल्पं हि कृतमिन्द्रेण क्षिपता ह्यशनिं पुरा
लक्ष्मणो निशितैर्बाणैः भिन्द्यात् पत्रपुटं यथा ॥ १४ ॥
लक्ष्मणस्य तु नाराचाः बहवः सन्ति तद्विधाः।
वज्राशनिसमस्पर्शाः गिरीणामपि दारणाः ॥ १५ ॥

पुरा अशनिं क्षिपता—मायाबलेन भूतलान्यतरानिर्मितपुरवर्तिमयवधार्थं अशनिं तत्प्रदेशभुवि क्षिपता इन्द्रेण स्वल्पं विदारणं कृतं भुवः, न तु काञ्चनवनपुरं भूधरवर्ति भग्नं, इदानीं लक्ष्मणस्तु निशितैर्बाणैः पत्रपुटमिवानायासेन सवनं काञ्चनवनं भिन्द्यात्, द्वारस्य पूर्वमेव सिद्धत्वात् अप्रयासः। †अन्यस्तु बिलवासिनं मयमुद्दिश्य अशनिं क्षिपता

---

* धात्रीं—रक्षकां—गो. ईषत्कार्यं—परिश्रममन्तरा साध्यमित्यर्थः—गो. † महेश्वरतीर्थः, गोविन्दराजो वा। परन्तु लोकक्रममनुसृत्य तैस्तथा व्याख्यातमिति प्रतिभाति।

[1] विदारणम्—ङ.

इन्द्रेण स्वरूपं बिलद्वारं कृतम्। इदानीं लक्ष्मणः पत्रपुटमिव एतद्बिलं भिन्द्यात् इति ब्रूते। द्वारस्य पूर्वमेव सिद्धत्वात् पत्रपुटवद्रूपस्य बिलस्य सिद्धये विदारणीयांशस्याभावात् निशितैर्बाणैः बिलं भिन्द्यात् इत्यसत्। तथा इन्द्रेणापि बिलद्वारं स्वरूपं कृतमित्यप्यसत्। पूर्वमेव बिलवासिनो मयस्येति जल्प्यमानत्वात्। तद्विधा इत्यस्य विवरणं—वज्राशनिसमस्पर्शा इति। वज्रं हस्तस्थं, अशनिः मेघस्थः ॥ १५॥

*,[1]अवस्थानं यदैव त्वं आसिष्यसि, परन्तप!
तदैव हरयः सर्वे त्यक्ष्यन्ति कृतनिश्चयाः ॥ १६ ॥

हे परन्तप! त्वं यदैव अस्मिन् भूबिले अवस्थानं आसिष्यसि—प्राप्स्यसि, तदैव सर्वे हरयः कृतनिश्चयाः—कृतस्वनाशनिश्चयाः त्वां त्यक्ष्यन्ति ॥ १६ ॥

स्मरन्तः पुत्रदाराणां † नित्योद्विग्ना बुभुक्षिताः।
[2]खेदिता दुःखशय्याभिः त्वां करिष्यन्ति पृष्ठतः॥ १७॥

तथा राज्यवर्तिपुत्रदारादि स्मरन्तः नित्योद्विग्नाः--नित्यं सरामलक्ष्मणात् सुग्रीवात् भीताः बुभुक्षिताः--पुत्रदारादिसुखभोगेप्सवः त्वया दुःखशय्याभिः—दुःखावस्थापनेन खेदिताः सन्तः त्वां पृष्ठतः करिष्यन्ति--तृणीकरिष्यन्ति, एवं कृत्वा सर्वथा त्यक्ष्यन्त्येव ॥ १७ ॥

स त्वं हीनः सुहृद्भिश्च हितकामैश्च बन्धुभिः।
‡ तृणादपि भृशोद्विग्नः स्पन्दमानाद्भविष्यसि ॥ १८॥

---

* अवस्थाने (पा.)—बिले—गो. † पुत्रदारादिवियोगादेव नित्योद्विग्नाः—सदोत्कण्ठिता इति वा॥ ‡ तृणादपि भयहेतोः भृशं उद्विग्न इति वा॥ इयमपि लोकवदुक्तिः॥

[1] अवस्थाने—ङ., झ. [2] दुःखादुःखतरं गत्वा किं करिष्यन्ति दुर्गताः—ङ.

एवं सति—स त्वं हीन इत्यादि । स्पन्दमानात् तृणादपि लघुरिति शेषः । अत एव भृशोद्विग्नो भविष्यसि ॥ १८ ॥

[1]अत्युग्रवेगा निशिताः [2]घोरा लक्ष्मणसायकाः ।
*[3]अपावृत्तं जिघांसन्तः महावेगा दुरासदाः ॥ १९ ॥

अतः परं—अत्युग्रवेगाः निशिताः घोराः लक्ष्मणसायकाः अपावृत्तं—व्युत्थितं त्वां जिघांसन्तः भवेयुः । सर्वत्रात्र लक्ष्मणग्रहणं क्रूरस्वभावत्वात्, †रामकृत्यालक्ष्यत्वाच्च ॥ १९ ॥

‡अस्माभिस्तु गतं सार्धं विनीतवदुपस्थितम् ।
आनुपूर्व्यात्तु सुग्रीवः राज्ये त्वां स्थापयिष्यति ॥ २० ॥

एवं वास्तवं भयं प्रदर्श्य, सुग्रीवसमाश्रयणमेव ते हितमिति समाधत्ते—अस्माभिरित्यादि । विनीतवत्—विनीतो भूत्वा उपस्थितं त्वां आनुपूर्व्यात्—ज्येष्ठपुत्रत्वप्रयुक्तानुक्रमात् प्राप्ते राज्ये स्थापयिष्यतीति ॥ २० ॥

[4]धर्मराजः पितृव्यस्ते प्रीतिकामो दृढव्रतः ।
शुचिः सत्यप्रतिज्ञश्च न त्वां जातु जिघांसति ॥ २१ ॥

अत्र प्रमाणमाह—धर्मराज इत्यादि । धर्ममार्गवर्ती राजा तथा । ते प्रीतिकाम एव भवति, न त्वां जातु जिघांसति ॥ २१ ॥

---

* अपवृत्तं (पा)—वृत्तहीन-गो. † रामकृत्यासुग्रीवस्यातिहीनत्वादिति भावः ॥ वस्तुतस्तु—क्रूरस्वभावत्वादित्ययुक्तमेव । लक्ष्मणक्रोधस्यैतैः प्रत्यक्षमनुभूतत्वात् तस्यैव पर्याप्तत्वाद्वा तथोक्तिः ॥ ‡अस्माभिस्सार्धमित्यन्वयः ॥

1 न च जातु न हिंस्युस्त्वां—ङ., झ. 2 रामलक्ष्मण—ङ. 3 अपवृत्त—ङ., झ.
4 धर्मकामः—ङ., झ.

*प्रियकामश्च ते मातुः तदर्थं चास्य जीवितम् ।
तस्यापत्यं च नास्त्यन्यत् तस्मात्, अङ्गद! गम्यताम् ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः

इतश्च सर्वथैवमेवेत्याह–प्रियकाम इत्यादि । अस्य जीवितं तदर्थमिति । त्वन्मातृप्रीतिसंपादनप्रयोजनमित्यर्थः । गम्यतामिति । अस्माभिस्तु सार्धमिति शेषः । रुद्र(२२)मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः

षट्पञ्चाशः सर्गः

[वानरप्रायोपवेशः]

श्रुत्वा हनुमतो वाक्यं प्रश्रितं धर्मसंहितम् ।
स्वामिसत्कारसंयुक्तं अङ्गदो वाक्यमब्रवीत् ॥ १ ॥

अथ अङ्गदे हनुमदुक्तन्यायतः तारोक्तं प्रतिक्षिप्य प्रायमध्यवस्यति सर्वे प्रायमुपविशन्ति । श्रुत्वेत्यादि । स्वामिसत्कारसंयुक्तं—सुग्रीवसन्मानोपेतं, इदं हनुमद्वाक्यविशेषणम् ॥ १ ॥

†स्थैर्यमात्ममनश्शौचं आनृशंस्यमथार्जवम् ।
विक्रमश्चैव धैर्यं च सुग्रीवे नोपपद्यते ॥ २ ॥

---

* त्वन्मातृप्रीतिसंपादनपरः, तस्यामेव दत्तजीवितः, पुत्रविहीनश्च तव विप्रियं न कुर्यात् इत्यर्थः ॥　† आत्ममनसोः शौचम्–ति.

आत्मनो मनः—स्वान्तःकरणं, तस्य शौचं—कामादिदोषराहित्यम् ॥ २ ॥

भ्रातुर्ज्येष्ठस्य यो भार्यां* जीवतो महिषीं प्रियाम् ।
धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः ॥ ३ ॥
कथं स धर्मं जानीते येन भ्रात्रा[1] महात्मना ।
युद्धायाभिनियुक्तेन बिलस्य पिहितं मुखम् ॥ ४ ॥

नोपपद्यत इति प्रतिज्ञातं समर्थयते—भ्रातुरित्यादि । जीवतो मम, समक्षमिति शेषः । जीवतो ज्येष्ठस्य भार्यामित्यन्यः । नैतदस्ति, न हि वालिजीवनसमये तारा सुग्रीवेण स्वीकृता, यदि बिलाशिलाप्रक्षेपानन्तरं स्वीकृतेति कल्प्यते तदा तस्य भ्रातुर्मृतत्वज्ञानमेव । धर्मराज इति यदुक्तं हनुमता, तत् प्रत्याख्याति—कथं स इत्यादि । उक्तरूपजुगुप्सितकर्मकारीत्यर्थः । युद्धायाभिनियुक्तेनेति । युद्धार्थं गच्छता बिलरक्षणनियुक्तेनेत्यर्थः ॥ ३–४ ॥

सत्यात् पाणिगृहीतश्च कृतकर्मा महायशाः ।
विस्मृतो राघवो येन स कस्य तु कृतं स्मरेत् ॥ ५ ॥

सत्यात् अग्निसाक्षिकतया पाणिगृहीतः—मित्रं कृतः राघवोऽपि येन नृशंसेन अस्थिरेण विस्मृतः, सः कस्य सुकृतं—उपकारं स्मरेत्, न कस्यापि । अतः कथं कृतज्ञ इत्यर्थः ॥ ५ ॥

लक्ष्मणस्य भयात् येन नाधर्मभयभीरुणा ।
आदिष्टा मार्गितुं सीतां [2]धर्ममस्मिन् कथं भवेत् ॥ ६ ॥

---

* जीवत इत्यनेन भ्रातुर्मरणानन्तरं तद्भार्यापरिग्रहः कुलधर्म इत्यवगम्यते—गो.

[1] दुरात्मना—ज [2] धर्मस्तस्मिन्—ङ.

ननु कथमकृतज्ञः? प्रवर्तमानकार्यत्वादित्यत्रोपाधिमाह---लक्ष्मणस्येत्यादि। धर्म--धर्मधीमूलं प्रवर्तनं अस्मिन् कथं भवेत्? प्रवर्तनस्य भयोपाधित्वात् ॥ ६ ॥

तस्मिन् पापे कृतघ्ने तु [1] स्मृतिहीने चलात्मनि।
आर्यः को विश्वसेज्जातु तत्कुलीनो [2] जिजीविषुः ॥ ७ ॥

यदेवं, अत --तस्मिन् पाप इत्यादि। तत्कुलीनः---तज्ज्ञातिकोटिपतितः ॥ ७ ॥

*राज्ये [3]पुत्रं प्रतिष्ठाप्य सगुणो निर्गुणोऽपि वा।
कथं शत्रुकुलीनं मां सुग्रीवो जीवयिष्यति ॥ ८ ॥

उक्तार्थस्य विवरण---राज्य इत्यादि। सुग्रीवः सगुणो निर्गुणोऽपि वाऽस्तु। न मे तद्विचारणं किञ्चित्। अपि तु शत्रुकुलीनं ---शत्रुपुत्रं मां पुत्रमिति मत्वा राज्ये प्रतिष्ठाप्य कथं जीविष्यति, न कथमपि। †अन्यस्तु जनिष्यमाणं पुत्रं राज्ये प्रतिष्ठाप्य मां कथं जीवयिष्यतीत्याह। इदानीं पुत्रस्यैवाभावे तत्स्थापनहेतुकतया इदानीं जीवनाभावः कथं शक्यवादः? ॥ ८ ॥

‡भिन्नमन्त्रो[4]ऽपराद्धश्च हीनशक्तिः कथं ह्यहम्।
किष्किन्धां प्राप्य जीवेयं अनाथ इव दुर्बलः ॥ ९ ॥

---

*तव यौवराज्यस्थापनं किं विस्मृतोऽसीत्यत्राह--राज्य इति। पुत्रः--जनिष्यमाणः स्वपुत्रः--गो. †गोविन्दराजः, महेश्वरतीर्थो वा। शिरोमणिरप्येवमेवाह ॥ ‡भिन्नमन्त्रः--मदाशयस्य मदप्रियैः भवद्भिः ज्ञातत्वात्।

[1] स्मृतिभिन्ने--ङ. [2] विशेषतः--ज. [3] पुत्रः प्रतिष्ठाप्यः--ङ., झ. [4] विरुद्धश्च--ङ.

इतश्च न जीवयिष्यतीत्याह—भिन्नमन्त्र इत्यादि । इदानीं दैवात् कृतबिलप्रवेशरूपः भिन्नः—विरुद्धः मन्त्रः—विचारः यस्य स तथा । एवं मन्त्रस्य कस्यापि मुखाच्छ्रवणे अवश्यंभाविनि सति स्पष्टं अपराद्धश्च भवामि । हीनशक्तिः—तदपेक्षया हीनबलः हनुमदुक्तरीत्या सहायबलहीनश्च । ९ ॥

*उपांशुदण्डेन हि मां [1]बन्धनेनोपपादयेत् ।
शठः क्रूरो नृशंसश्च सुग्रीवो राज्यकारणात् ॥ १० ॥

उपांशुदण्डस्यैव रूपं—बन्धनेनेत्यादि । पुत्र इति कृत्वा न वधिष्यति, अपि तु बालवत् अपराद्ध इति बन्धनमेव करोतीति निरचिनोत् ॥ १० ॥

†बन्धनाद्वाऽवसादान्मे श्रेयः प्रायोपवेशनम् ।
[2]अनुजानीत मां सर्वे गृहं गच्छन्तु वानराः ॥ ११ ॥

तदेव द्रढयन्नाह—बन्धनादित्यादि ॥ ११ ॥

अहं वः प्रतिजानामि नागमिष्याम्यहं पुरीम् ।
इहैव प्रायमासिष्ये श्रेयो मरणमेव मे ॥ १२ ॥
अभिवादनपूर्वं तु [3] राघवौ बलशालिनौ ।
अभिवादनपूर्वं तु [4] राजा कुशलमेव च ॥ १३ ॥

राजा—सुग्रीवः कुशलमेव वाच्य इत्याकर्षः । न त्विदानीं मया दुःखवशादुक्तं कुशलमित्यर्थः । राघवौ बलशालिनौ कुशलं वाच्याविति विपरिणामः ॥ १३ ॥

---

* उपांशुदण्डेन—रहस्यदण्डरूपेण । उपपादयेत्—प्रापयेत्—गो. † वेति प्रसिद्धौ, बन्धनरूपावसादात्—गो.

[1] बाधनेनो—ङ. [2] अनुजानन्तु—ङ. [3] राजा कुशलमेव च—ङ. [4] राघवौ बलशालिनौ—ङ.

*वाच्यस्तातो यवीयान् मे सुग्रीवो वानरेश्वरः ।
आरोग्यपूर्वं कुशलं वाच्या माता रुमा[1] च मे ॥ १४ ॥

अथ मातृकुशलविज्ञापनानुक्रमप्रकाशनशेषतया, आरोग्यपूर्वत्वविशेषाभिधित्सया च पुनः सुग्रीवकुशलविज्ञापनं--वाच्यस्तात इत्यादि । 'राघवौ बलशालिनौ' इत्यनन्तरं 'वाच्यस्तातः' इति पाङ्क्तः पाठक्रमः । तद्योजनाशक्तया पाठव्यत्यासं परः पठति स्म ॥ १४ ॥

मातरं चैव मे तारां आश्वासयितुमर्हथ ।
प्रकृत्या प्रियपुत्रा सा सानुक्रोशा तपस्विनी ॥ १५ ॥
विनष्टमिह मां श्रुत्वा व्यक्तं हास्यति जीवितम् ।
एतावदुक्त्वा वचनं वृद्धांस्तानभिवाद्य च ॥
[1]विवेश चाङ्गदो भूमौ रुदन् दर्भेषु [2]दुर्मनाः ॥ १६ ॥

वृद्धाः—जाम्बवदादयः ॥ १६ ॥

तस्य संविशतस्तत्र रुदन्तो वानरर्षभाः ।
नयनेभ्यः प्रमुमुचुः उष्णं वै वारि दुःखिताः ॥ १७ ॥
सुग्रीवं चैव निन्दन्तः प्रशंसन्तश्च वालिनम् ।
परिवार्याङ्गदं सर्वे [3]व्यवसन् प्रायमासितुम् ॥ १८ ॥

सुग्रीवं चैव निन्दन्त इति । अङ्गदपक्ष्या इति शेषः । व्यवसन्--व्यवास्यन् इति यावत् ॥ १८ ॥

[4]मतं तद्वालिपुत्रस्य विज्ञाय प्लवगर्षभाः ।
उपस्पृश्योदकं [5]तत्र प्राङ्मुखास्समुपाविशन् ॥ १९ ॥

---

* मे यवीयान् तातः—पितृव्यः वानरेश्वरः राजा सुग्रीव इति वाऽन्वयः ॥

[1] संविवेशाङ्गदो—ङ. [2] दुर्मुखः—ज [3] व्यवास्यन्—ङ., झ. [4] तद्वाक्यं वालि—ज. [5] विन्ध्ये—ङ., सर्वे—ज.

दाक्षिणाग्रेषु दर्भेषु उदक्तीरं समाश्रिताः ।
मुमूर्षवो हरिश्रेष्ठाः एतत् क्षममिति स्म ह ॥ २० ॥

हरिश्रेष्ठा अपि एतत्—प्रायोपवेशनमेव अद्य अस्माकं क्षम — युक्तमिति मन्यन्ते स्मेति शेषः । युवराजानि मूलराजानियुक्त म्रियमाणे तं परित्यज्य गमनं अस्माकं अयुक्तमिति प्रायस्यैव क्षमत्वं मत्वाऽवसायः * ॥ २० ॥

† रामस्य वनवासं च क्षयं दशरथस्य च ।
जनस्थानवधं चैव वधं चैव जटायुषः ॥ २१ ॥
हरणं चैव वैदेह्याः वालिनश्च वधं रणे ।
रामकोपं च वदतां हरीणां भयमागतम् ॥ २२ ॥

'रामस्य वनवासं च' इत्यादिः अग्रिमसर्गविस्तरणीयार्थसंक्षेपः । वदतां, उक्त्वा शोचतां भयं आगतं—आरादग्रिमसर्गप्रदर्श्यमानसंपातिभक्षणवचनजं भयमित्यर्थः ॥ २२ ॥

[1] एवं वदद्भिर्बहुभिर्महीधरः
महाद्रिकूटप्रतिमैः प्लवङ्गमैः ।
बभूव सन्नादित[2]निर्दरान्तरः
भृशं नदद्भिर्जलदै[3]रिवाम्बरम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः

---

* वस्तुतस्तु, वालिपुत्रे प्रीत्या, सुग्रीवाद्भीत्या च तथेति युक्तम् । अनुपदमेवेदं स्पष्टम् ॥ † संकटकाले पूर्ववृत्तचिन्तनं सर्वेषां सहजम् ॥

[1] स संविशद्भिः—ङ. [2] निर्झरा—ङ. [3] रिवोल्बणैः—ङ.

भृश नर्दाद्भिरिति । उक्तरूपभयवशादिति शेषः* । अंगार-(२३ १/२)मानः सर्गः ॥ २३ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः

सप्तपञ्चाशः सर्गः

[सम्पातिसङ्गमः]

उपविष्टास्तु ते सर्वे यस्मिन् † प्रायं [1]गिरिस्थले।
हरयो गृध्रराजश्च तं देशमुपचक्रमे ॥ १ ॥

अथ हरिभिः शोकप्रसङ्गे जटायुर्वधकीर्तने सति तच्छ्रुत्वा संपातेः तद्वृत्तान्तप्रश्नः । उपविष्टा इत्यादि । गिरिस्थले—गिरिप्रवेशे, विन्ध्यनैर्ऋतपादपर्वतस्येत्यर्थः । तथाऽत्र सर्वत्र विधिः ॥ १ ॥

संपातिर्नाम नाम्ना तु चिरजीवी विहङ्गमः ।
भ्राता जटायुषः श्रीमान् प्रख्यातबलपौरुषः ॥ २ ॥

कन्दरादभिनिष्क्रम्य स विन्ध्यस्य महागिरेः ।
उपविष्टान् हरीन् दृष्ट्वा हृष्टात्मा गिरमब्रवीत् ॥ ३ ॥

‡ विधिः किल नरं लोके विधानेनानुवर्तते ।
यथाऽयं विहितो भक्ष्यः चिरान्मह्य[2]मुपागतः ॥ ४ ॥

---

* वस्तुतस्तु 'एवं वदद्भिः' इत्यस्य प्रतिकोटितया इदं मयविशेषणमिति युक्तम् ॥

† प्रायं उपविष्टा इत्यन्वयः ॥ ‡ विधिः विधानेन नरमनुवर्तते इत्यन्वयः । यस्मिन् काले यद्भवितव्यं तत् विधिः संपादयतीति भावः ॥

[1] गिरेस्तटे—ङ. [2] मिहागतः—ङ.

विधिः—क्रियाफलम् । नरमिति । प्राणिनामित्यर्थः । विधानेन—प्राचीनकर्मानुसारेण । यथा—तद्यथा उच्यते यस्मादयं अस्माकं विहितः भक्ष्यः—आमिषरूपः इहागतः ॥ ४ ॥

परम्पराणां भक्षिष्ये वानराणां *मृतं मृतम् ।
उवाचेदं वचः पक्षी तान्निरीक्ष्य प्लवङ्गमान् ॥ ५ ॥

यतश्च परम्पराणां—पङ्क्तितः पङ्क्तित उपविष्टानां वानराणां मध्ये मृतं मृतं क्रमात् भक्षिष्ये, तस्मादिति पूर्वेण संबन्धः ॥ ५ ॥

तस्य तद्वचनं श्रुत्वा भक्ष्यलुब्धस्य पक्षिणः ।
अङ्गदः †परमायस्तः हनुमन्तमथाब्रवीत् ॥ ६ ॥

परमायस्तः—परमखिन्नः ॥ ६ ॥

पश्य ‡[1]सीताऽपदेशेन साक्षाद्वैव[2]स्वतो यमः ।
इमं देशमनु[3]प्राप्तः वानराणां विपत्तये ॥ ७ ॥

सीतापदेशेन—सीताव्याजेन, प्राप्तप्रायोपवेशानामिति शेषः ॥

रामस्य न कृतं कार्यं [4]राज्ञो न च वचः कृतम् ।
हरीणामियमज्ञाता विपत्तिः सहसाऽऽगता ॥ ८ ॥

अज्ञाता—अचिन्तिता ॥ ८ ॥

---

* कोटिशो विद्यमानेषु तदा तदा बहूनां मरणस्यावश्यकत्वात्, गृध्राणां मृतप्राणिभक्षकत्वात् एवमुक्तिः । मृतमित्यस्य मारितमिति वाऽर्थः ॥ †परमायस्तः—परमोद्विग्नः-गो. ‡असाकमेतद्दशाप्राप्तिः सीतैव मूलमिति भावः ॥

[1] गृध्रापदेशेन–ज. [2] स्वतं यमम्–ङ. [3] प्राप्तं–ङ. [4] न कृतं राजशासनम्–ङ.

वैदेह्याः प्रियकामेन कृतं कर्म जटायुषा ।
गृध्रराजेन यत्तत्र श्रुतं वस्तदशेषतः ॥ ९ ॥
तथा सर्वाणि भूतानि तिर्यग्योनिगतान्यपि ।
प्रियं कुर्वन्ति रामस्य त्यक्त्वा प्राणान् यथा वयम् ॥ १० ॥

वैदेहीनिमित्तं तिर्यग्योनिनामस्माकमिव तिर्यग्योन्यन्तरस्यापि विपत्तिर्जातेत्याह—वैदेह्या इत्यादि । प्रत्यक्षं ह्रियमाणाया इति शेषः । रामस्य प्रियं कुर्वन्तीत्यनेन राममहिमा दर्शितः ॥ ९-१० ॥

*अन्योन्यमुपकुर्वन्ति स्नेहकारुण्ययन्त्रिताः ।
[1]तेन तस्योपकारार्थं त्यजतात्मानमात्मना ॥ ११ ॥

स्नेहकारुण्ययन्त्रिता इति । रामस्येति शेषः । तत इति । उक्तस्नेहकारुण्ययन्त्रणनिमित्तत इत्यर्थः । तस्येति । रामस्येत्यर्थः ॥

प्रियं कृतं हि रामस्य धर्मज्ञेन जटायुषा ।
राघवार्थे परिश्रान्ता वयं संत्यक्तजीविताः ॥ १२ ॥
कान्ताराणि प्रपन्नाः स्म न च पश्याम मैथिलीम् ।
स सुखी गृध्रराजस्तु रावणेन हतो रणे ॥ १३ ॥

सुखीति । सुखित्वमेव द्राङ्मरणनिर्भयपरलोकगातिप्रदर्शनेन दर्शयति—रावणेनेत्यादि ॥ १३ ॥

†मुक्तश्च सुग्रीवभयात् गतश्च परमां गतिम् ।
जटायुषो विनाशेन राज्ञो दशरथस्य च ॥
हरणेन च वैदेह्याः संशयं [2]हरयो गताः ॥ १४ ॥

---

*स्नेहकारुण्ययन्त्रिताः, तेन कारुण्यादिना तस्य—रामस्योपकारार्थं आत्मानमात्मना—स्वप्रेरणयैवेति भावः, त्यजता अन्योन्यमुपकुर्वन्तीत्यन्वयः ॥ †मुक्तश्चेति । अनेन सर्वतिर्यग्योनिराजत्वं कपीन्द्रस्य सूचितम्—ति.

[1] ततः—ज. [2] मरणे—ङ.

जटायुषो विनाशेनेति। द्राग्विनाशेनेत्यर्थः। यदि पुनश्च घटिकामात्रं युद्धतो निरोधयेत्, तदा द्रागेव रामदृष्टिं प्राप्तो रावणः सीतां न हरिष्यतीत्याशयः। राज्ञो दशरथस्य च द्राग्विनाशेन च हरयः प्राणसंशयं गताः। पुनश्च पक्षमात्रमपि यदि राजा जीवेत्—तदा भरतेन सहागत्य रामं प्रत्यानयेदेवेत्याशयः। हरणेन चेति चकारात् लक्ष्मणप्रस्थापनेन च प्राप्तेन वैदेह्या हरणेनेति योजना॥ १४॥

रामलक्ष्मणयोर्वासः अरण्ये सह सीतया।
राघवस्य च बाणेन वालिनश्च तथा वधः॥ १५॥
*रामकोपादशेषाणां राक्षसानां तथा वधः।
कैकेय्या वरदानेन इदं हि विकृतं कृतम्॥ १६॥

अथ सर्वानर्थपरमकारणमनुस्मृत्य शोचन्ति—रामलक्ष्मणयोरित्यादि। इदं हि प्रसिद्धं विकृतं—सर्वानर्थकृत्यं कैकेय्या राज्ञो वरदानेनैव कृतम्॥ १६॥

तदसुखमनुकीर्तितं †वचः
भुवि पतितांश्च समीक्ष्य वानरान्।
भृश[1]चलितमतिर्महामतिः
कृपणमुदाहृतवान् स [2]गृध्रराट्॥ १७॥

भृशं चलितमतिः—क्षुभितचित्तः। कृपणं—दीनम्॥ १७॥

---

* राक्षसानां वधः जनस्थाने॥ † वचः समीक्ष्य—श्रुत्वा॥

[1] चकित—ङ. [2] गृध्रराजः—ङ.

[1] तत्तु श्रुत्वा तदा वाक्यं अङ्गदस्य मुखोद्गतम् ।
अब्रवीद्वचनं गृध्रः तीक्ष्णतुण्डो [2] महास्वनः ॥ १८ ॥

उक्तसंग्रहश्लोकार्थस्यैव प्रपञ्चः *—तत्त्वित्यादि ॥ १८ ॥

कोऽयं गिरा घोषयति प्राणैः [3] प्रियतरस्य मे ।
जटायुषो वधं भ्रातुः कम्पयन्निव मे मनः ॥ १९ ॥

को घोषयति, सोऽयं मया प्रष्टव्य इति शेषः ॥ १९ ॥

कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः ।
नामधेयमिदं भ्रातुः चिरस्याद्य मया श्रुतम् ॥ २० ॥

प्रश्नमेव करोति—कथमित्यादि ॥ २० ॥

इच्छेयं गिरिदुर्गाच्च भवद्भिरवतारितुम् ।
यवीयसो गुणज्ञस्य श्लाघनीयस्य विक्रमैः ॥ २१ ॥
अतिदीर्घस्य कालस्य [4] परितुष्टोऽस्मि कीर्तनात् ॥ २२ ॥

गिरिदुर्गात् भवद्भिरवतारितु इच्छेयमिति, आत्मानमिति शेषः । अवतारणप्रयोजनमाह—यवीयस इत्यादि । कनिष्ठस्येत्यर्थः । 'स्थूलदूर' इत्यादिना यणादिपरलोपादिः ॥ २१–२२ ॥

† तदिच्छेयमहं श्रोतुं विनाशं, वानरर्षभाः !
भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः ॥ २३ ॥

---

* आसर्गान्तमिति भावः ॥ † अवतारणप्रयोजनं उच्यते विनाशं श्रोतुमिच्छेयमिति । यवीयसः अतिदीर्घस्य कालस्य परिकीर्तनादित्यन्वयः ॥

[1] इति—ङ. [2] महाखगः—ङ. [3] प्रियतमस्य—ङ. [4] तुष्टोऽस्मि परिकीर्ते—ङ.

तस्यैव च मम भ्रातुः सखा दशरथः *कथम् ?
यस्य रामः प्रियः पुत्रः ज्येष्ठो गुरुजनप्रियः ॥ २४ ॥

श्रोतुमिच्छेयमिति । युष्मत्समीपमागत्येति शेषः । अन्वयस्तु—यस्य रामः उच्यमानगुणकः प्रियः पुत्रः, स दशरथः तस्य मम भ्रातुरिव मम च सखा । अतः तत्स्नेहात् प्रयतमानस्य जनस्थाननिवासिनस्तस्य जटायुषः मम भ्रातुः विनाशः कथमभूदिति । तस्य विनाशं श्रोतुमिच्छेयमिति । अत्र तु कथं सखेति योजनमशक्यम्, उत्तरत्र एवं सखेत्युत्तराभावात् ॥ २३-२४ ॥

सूर्यांशुदग्धपक्षत्वात् न शक्नोम्युपसर्पितुम् ।
इच्छेयं पर्वतादस्मात् अवतर्तुं, [1] अरिंदमाः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः

अथ स्वस्यावतारणापेक्षाहेतुमाह — सूर्येत्यादि । अवतर्तुमिति । अवतारयितुमिति यावत् । मित्र(२५)मानः सर्गः ॥ २५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः

---

* जटायुषो विनाशः कथमभवदिति तस्य विनाशं श्रोतुमिच्छेयमिति । कथं सखेत्यन्वयस्तु नोचितः, तदुत्तरस्याग्रेऽभावात्—ति. कथं लोकान्तरं गत इति शेषः—रा. अत्र 'कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः', 'सखा दशरथः कथम्' इत्येवमनुवादात् पूर्वमिदमप्यङ्गदेनोक्तमिति ध्येयम्—गो.

[1] प्लवङ्गमाः—ङ.

अष्टपञ्चाशः सर्गः

[अङ्गदवाक्यम्]

शोकाद्भ्रष्टस्वरमपि श्रुत्वा [1] ते हरियूथपाः ।
श्रद्दधुर्नैव तद्वाक्यं कर्मणा तस्य शङ्किताः ॥ १ ॥

अथाङ्गदेन गृध्रराजपृष्टप्रत्युत्तरम् । शोकेत्यादि । भ्रष्टस्वरमपीति । भक्षणवचनस्वरापेक्षया भ्रष्टस्वरमित्यर्थः । एवं स्वरेण यद्यप्ययं स्वनुमानशोकः, 'परितुष्टोऽस्मि' (पूर्वसर्गे २२ श्लो.) इति श्रद्धेयवचनश्च ; अथापि न श्रद्दधुः । तत्र हेतुः——कर्मणा शङ्किता इति । भक्षणार्थमतिसन्धानमेव करोतीत्यबुध्यन्त इत्यर्थः ॥ १ ॥

ते प्रायमुपविष्टास्तु दृष्ट्वा गृध्रं प्लवङ्गमाः ।
चक्रुर्बुद्धिं तदा *[2] रौद्रां सर्वान्नो भक्षयिष्यति ॥ २ ॥

तदेव दर्शितं——चक्रुरित्यादि ॥ २ ॥

[3] सर्वथा प्रायमासीनान् यदि नो भक्षयिष्यति ।
कृतकृत्या भविष्यामः क्षिप्रं सिद्धिमितो गताः ॥
† एतां बुद्धिं ततश्चक्रुः सर्वे ते [4] वानरर्षभाः ॥ ३ ॥

क्षिप्रं सिद्धिमिति । शीघ्रमरणमित्यर्थः ॥ ३ ॥

अवतार्य गिरेः शृङ्गात् गृध्रमाहाङ्गदस्तदा ।
बभूवर्क्ष[5]रजा नाम वानरेन्द्रः प्रतापवान् ॥ ४ ॥

---

* बुद्धेः रौद्रत्वं भक्षकदृष्ट्या । † एतां बुद्धिं—भक्षणाभीष्टत्वबुद्धिम्—ति.

[1] वानर—ज. [2] क्रूरां—ङ. [3] सर्वांश्च—ङ. [4] हरियूथपा:—ज. [5] रजो—ज.

* ममार्यः [1]पार्थिवः, पक्षिन्! [2]धार्मिकस्तस्य चात्मजौ।
सुग्रीवश्चैव वाली च [3]पुत्रावोघबलावुभौ ॥ ५ ॥

तत्र 'कोऽयं घोषयति' इति प्रथमप्रश्नस्योत्तरं—बभूवर्क्षरजा इत्यादि। आर्यः—पूज्यः ॥ ५ ॥

लोके विश्रुतकर्माऽभूत् राजा वाली पिता मम।
राजा कृत्स्नस्य जगतः इक्ष्वाकूणां [4]महारथः ॥ ६ ॥
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकावनम्।
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ ७ ॥
पितुर्निदेशनिरतः धर्म्यं पन्थानमाश्रितः।
तस्य भार्या जनस्थानात् रावणेन हृता बलात् ॥ ८ ॥
रामस्य तु पितुर्मित्रं जटायुर्नाम गृध्रराट्।
ददर्श सीतां वैदेहीं ह्रियमाणां विहायसि ॥ ९ ॥
रावणं विरथं कृत्वा †स्थापयित्वा च मैथिलीम्।
परिश्रान्तश्च वृद्धश्च रावणेन हतो रणे ॥ १० ॥

रावणेन विहायसीति। ह्रियमाणामिति शेषः। स्थापयित्वा चेति। भूमाववशतयेति शेषः ॥ १० ॥

एवं गृध्रो हतस्तेन रावणेन बलीयसा।
संस्कृतश्चापि रामेण [5]गतश्च गतिमुत्तमाम् ॥ ११ ॥
ततो मम पितृव्येण सुग्रीवेण महात्मना।
चकार राघवः सख्यं सोऽवधीत् पितरं मम ॥ १२ ॥

---

* आर्यः—पितामहः पार्थिवः, वानराणामिति शेषः—ति. आर्यः पितामहः—गो.

† स्थापयित्वा, भूमावति शेषः—ति. रावणेन सीतापहरणं स्तंभयित्वेति भावः ॥

[1] पूर्वकः—ङ. [2] धार्मिकौ तस्य—ज. [3] पुत्रौ देवबलान्वितौ—ङ. [4] महाबलः—ङ. [5] जगाम—ङ

मम पित्रा [1] निरुद्धो हि सुग्रीवः सचिवैः सह ।
निहत्य वालिनं रामः ततस्तमभिषेचयत् ॥ १३ ॥

भ्रातुर्वधे कारणमाह—मम पित्रेत्यादि । निरुद्ध इति निरुद्धराज्य इत्यर्थः ॥ १३ ॥

स राज्ये स्थापितस्तेन सुग्रीवो वानराधिपः ।
राजा वानरमुख्यानां [2] तेन प्रस्थापिता वयम् ॥ १४ ॥
एवं रामप्रयुक्तास्तु मार्गमाणास्ततस्ततः ।
वैदेहीं नाधिगच्छामः रात्रौ सूर्यप्रभामिव ॥ १५ ॥
ते वयं दण्डकारण्यं विचित्य सुसमाहिताः ।
अज्ञानात्तु प्रविष्टाः स्म [3] धरण्या विवृतं बिलम् ॥ १६ ॥
मयस्य मायाविहितं तद्बिलं च विचिन्वताम् ।
व्यतीतस्तत्र नो मासः यो राज्ञा समयः कृतः ॥ १७ ॥
ते वयं कपिराजस्य सर्वे वचनकारिणः ।
कृतां * संस्थामतिक्रान्ताः भयात् प्रायमुपास्महे ॥ १८ ॥
क्रुद्धे तस्मिंस्तु काकुत्स्थे सुग्रीवे च सलक्ष्मणे ।
गतानामपि सर्वेषां तत्र नो नास्ति जीवनम् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे अष्टपञ्चाशः सर्गः

अधिक(१९ १/२)मानः सर्गः ॥ १९ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे अष्टपञ्चाशः सर्गः

---

* संस्थां —व्यवस्थाम्—गो. मर्यादाम्—रा.

[1] विरुद्धः—ङ [2] येन—ज. [3] धर्मिण्या—ङ.

एकोनषष्टितमः सर्गः

[सीताप्रवृत्तिश्रवणम्]

इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः * ।
[1] सबाष्पान् वानरान् गृध्रः प्रत्युवाच [2] महास्वनः ॥ १ ॥

अथाङ्गदेन पृष्टसीतावृत्तान्तात् संपातेः सीतावृत्तान्तावगतिः । इत्युक्त इत्यादि । त्यक्तजीवितैः—जीवितनिराशैः । सबाष्पान्—अश्रुपूर्णनयनान् ।। १ ॥

यवीयान् मम स भ्राता जटायुर्नाम, वानराः!
यमाख्यात हतं युद्धे रावणेन बलीयसा ॥ २ ॥

यमाख्यातेति । आख्यान्ति स्मेति यावत् ॥ २ ॥

वृद्धभावादपक्षत्वात् शृण्वंस्तदपि मर्षये † ।
न हि मे शक्तिरस्त्यद्य भ्रातुर्वैरविमोक्षणे ॥ ३ ॥

तदपीति । भ्रातृवधमपीति यावत् ॥ ३ ॥

पुरा वृत्रवधे वृत्ते [3] स चाहं च जयैषिणौ ।
आदित्यमुपयातौ [4] स्वः ज्वलन्तं रश्मिमालिनम् ॥ ४ ॥
आवृत्त्याकाश[5]मार्गेण जवेन [6] स्वर्गतौ भृशम् ।
मध्यं प्राप्ते [7] दिनकरे जटायुरवसीदति ॥ ५ ॥
तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितम् ।
पक्षाभ्यां छादयामास स्नेहात् परम[8]विह्वलम् ॥ ६ ॥

---

* त्यक्तजीवितैः—त्यक्तजीवनाशभयैः–ति. † नो चेदद्यैव भ्रातृवधप्रतीकारं कुर्यामिति भावः ।।

[1] सबाष्पो वानरान् , सबाष्पनयनान्–ङ. [2] महाबलः–ङ. [3] परस्पर–ङ., झ. [4] स्म–ङ. [5] मार्गे तु–ङ. [6] स्म गतौ–ङ. [7] सवितरि–ङ. [8] विह्वल–ङ.

'अद्य मे शक्तिर्नास्ति' इत्युक्तिसूचितां पूर्वकालस्वमहच्छक्तिं दर्शयति—पुरेत्यादि। 'वृत्रवधे वृत्ते' इत्यनेन स्वयोः पतनबलपरीक्षाकालसूचनमात्रम्। जयैषिणाविति। पतनप्राशस्त्यप्रकाशेच्छू इति यावत्। आदित्यमुपयातौ स्वः—येनादित्य उत्पत्य प्रथमं प्राप्यते—स आवयोः प्रबल इति प्रतिज्ञापूर्वमिति शेषः—इति प्राचीनाः*। तैस्तु 'आचचक्षे मुनेस्सर्वं सूर्यानुगमनं तदा' (६२–१) इति संपातिवक्ष्यमाणसूर्यानुगमनमात्रं दृष्ट्वा उक्तम्; न तूत्तरवाक्यवर्तिवज्रव्रणयुक्तस्ववर्णनं दृष्टम्। अस्माभिस्तूच्यते—'पुरा वृत्रवधे वृत्ते सति स च जटायुरहं च जयैषिणौ—अद्य इन्द्र एव किल प्रबलः, तं जेष्याव इति इन्द्रजयैषिणौ भूत्वा प्रथममाकाशमार्गेण स्वर्गतावभूव। ततः गरुडवद्भृशं जवेन तं विजित्यावृत्त्य ज्वलन्तं रश्मिमालिनमादित्यमपि दर्पात् उपयातौ स्वः। उपयातयोरावयोर्मध्यं जटायुस्तु सवितरि मध्यं प्राप्तेऽवसीदति स्म। अथ—तमहं भ्रातरमित्यादि। अत्र तु सर्वं पदं सार्थम्। परत्र तु 'स्वर्गतौ' इति पदं नान्वितम्। आवृत्त्येति पदं च व्यर्थम्। इन्द्रप्रसङ्गश्च व्यर्थः। जयैषिण विति पदं चासङ्गतम्, न किलादित्यं जेतुमेतौ गतौ इत्युक्तम्। नापि चान्योन्यं जिगीषया। जिगीषा तु स्पर्धामूला, सा तु नास्ति, इति भ्रातुः स्वपक्षतो दाहपरिहारेण स्पष्टा। एवञ्च 'आदित्यमुपयातौ स्वः, सवितरि मध्यं गते जटायुरवसीदति स्म' इत्येतावत एव वक्तव्यत्वात्,

---

* महेश्वरतीर्थगोविन्दराजयोरपि इदमेव सम्मतम्। वस्तुतस्तु—बालानामयं स्वभावः, परस्परस्पर्धनं, प्रीतिकरणं च। सूर्यं प्रत्युद्गतयोर्विषये इन्द्रेण वज्रप्रयोगस्तु, तस्य त्रिलोकाधिपतित्वात्, त्रिलोकीयोगक्षेमाधिकृतत्वाच्च। अयमंशः सूर्यं प्रत्युद्गते हनूमति इन्द्रेण वज्रप्रयोगस्य वक्ष्यमाणत्वात् (67–23) स्पष्टः। अतः प्राचीनव्याख्यैव साधीयसी॥

सर्वमन्यत् व्यर्थं, असङ्गतं च स्पष्टम्। स्नेहात् पक्षाभ्यां छादयामासेति लिडुत्तमः समाच्छादयमिति यावत। अपरोक्षऽप्यार्षो लिट् ॥ ६ ॥

निर्दग्धपक्षः पतितः [1]विन्ध्येऽहं, वानरर्षभाः !
अहमस्मिन् वसन् भ्रातुः प्रवृत्तिं नोपलक्षये ॥ ७ ॥

निर्दग्धपक्ष इति। सूर्यकिरणेनेति शेषः। जटायुषः प्रवृत्तिमित्यन्वयः ॥ ७ ॥

* जटायुषस्त्वेवमुक्तः भ्रात्रा संपातिना तदा।
युवराजो महाप्राज्ञः प्रत्युवाचाङ्गदस्तदा ॥ ८ ॥
जटायुषो यदि भ्राता श्रुतं ते गदितं मया।
† आख्याहि यदि जानासि निलयं तस्य रक्षसः ॥ ९ ॥

यदि जटायुषो रामभक्तस्य भ्राता, यदि च मया गदितं रामवृत्तान्तं त्वया श्रुतं यदि च तस्य रक्षसो निलयं जानासि, तर्हि आख्याहि, प्रार्थने लोट् ॥ ९ ॥

अदीर्घ[2]दर्शिनं तं वै रावणं [3]राक्षसाधमम्
अन्तिके यदि वा दूरे यदि जानासि शंस नः ॥ १० ॥

अदीर्घदर्शिनमिति। भाव्यनर्थाकलनाशक्तमिति यावत्। रावणं अन्तिके दूरे वा तिष्ठतीति यदि जानासि तदा नः शंस ॥१०॥

ततोऽब्रवीन्महातेजाः ज्येष्ठो भ्राता जटायुषः।
आत्मानुरूपं वचनं वानरान् संप्रहर्षयन् ॥ ११ ॥

---

* जटायुषो भ्रात्रेत्यन्वयः। † ‘र[illegible]गेन बलीयसा’ (श्लो. २) इत्यादिवचनात् रावणपरिचयसंभावनया एवं प्रश्नः। तथैव सोऽपि स्वस्य रावणपरिचयं वक्ष्यति ॥

[1] विन्ध्येऽस्मिन्–ङ. [2] दर्शनं– . [3] राक्षसाधिपम्–ङ.

निर्दग्धपक्षो गृध्रोऽहं [1]हीनवीर्यः, प्लवङ्गमाः !
वाङ्मात्रेण तु रामस्य करिष्ये [2]साह्यमुत्तमम् ॥ १२ ॥

रामस्य साह्यमिति । रामकार्यप्रवृत्तानां युष्माकमित्यर्थः ॥१२॥

जानामि वारुणान् लोकान् विष्णोस्त्रैविक्रमानपि ।
[3]देवासुरविमर्दान् वाऽप्यमृतस्य च मन्थनम् ॥ १३ ॥

वारुणान् लोकान्--जलप्रधानलोकान्--अधोलोकानिति यावत् । तथा विष्णोस्त्रैविक्रमान्--त्रिविक्रमजितान् । भूप्रधानान्--भूरादिलोकानपीत्यर्थः । विमर्दः--युद्धम् । भगवदहङ्गादितत्क्षणपर्यन्तं सर्वे वृत्तान्ताः परिज्ञाताः निवेदिताः प्रागुक्तविशेषणैः ॥ १३ ॥

रामस्य [4]यदिदं कार्यं कर्तव्यं प्रथमं मया ।
[5]जरया च हृतं तेजः प्राणाश्च शिथिला मम ॥ १४ ॥
तरुणी रूपसंपन्ना सर्वाभरणभूषिता ।
ह्रियमाणा मया दृष्टा रावणेन दुरात्मना ॥ १५ ॥
क्रोशन्ती राम रामेति लक्ष्मणेति च भामिनी ।
भूषणान्यपविध्यन्ती गात्राणि च विधून्वती ॥ १६ ॥
सूर्यप्रभेव शैलाग्रे तस्याः कौशेयमुत्तमम् ।
असिते राक्षसे भाति यथा [6]वा तटिदम्बुदे ॥ १७ ॥
तां तु सीतामहं मन्ये रामस्य परिकीर्तनात् ।
श्रूयतां मे कथयतः निलयं तस्य रक्षसः ॥ १८ ॥

तां त्विति । रावणह्रियमाणां दृष्टां इत्यर्थः । सीतां मन्ये इत्यत्र हेतुमाह--रामस्य परिकीर्तनादिति ॥ १८ ॥

---

[1] गतवीर्यः--ङ. [2] प्रिय--ङ. [3] महासुर--ङ. [4] दयितं--ङ.
[5] जरयाऽपहृतं--ङ. [6] विद्युदिवाम्बरे--ज.

पुत्रो विश्रवसः *साक्षात् भ्राता वैश्रवणस्य च ।
अध्यास्ते नगरीं लङ्कां रावणो नाम राक्षसः ॥ १९ ॥

लङ्कां अध्यास्ते ॥ १९ ॥

इतो द्वीपे समुद्रस्य संपूर्णे शतयोजने ।
तस्मिन् लङ्का पुरी रम्या निर्मिता विश्वकर्मणा ॥ २० ॥

सा च लङ्का इतः शतयोजने—शतयोजनात्परतः स्थिते समुद्रस्य द्वीपे, तिष्ठतीति शेषः । तस्मिन् द्वीपे सा च लङ्कापुरी विश्वकर्मणा निर्मिता ॥ २० ॥

जाम्बूनदमयैर्द्वारैः चित्रैः काञ्चनवेदिकैः[1] ।
प्राकारेणार्कवर्णेन महता सु[2]समावृता ॥ २१ ॥
तस्यां वसति वैदेही दीना कौशेयवासिनी ।
रावणान्तःपुरे रुद्धा राक्षसीभिः [3]समावृता ॥
जनकस्यात्मजा राज्ञः तत्र द्रक्ष्यथ मैथिलीम् ॥ २२ ॥

तत्र द्रक्ष्यथ मैथिलीम् । एतदनन्तरं द्वे श्लोके काचित् प्रक्षिप्ते ॥

[4][लङ्कायामथ गुप्तायां सागरेण समन्ततः ।
संप्राप्य सागरस्यान्तं संपूर्णं शतयोजनम् ॥
आसाद्य दक्षिणं तीरं ततो द्रक्ष्यथ रावणम् ।
तत्रैव त्वरिताः क्षिप्रं विक्रमध्वं, प्लवङ्गमाः ॥]
ज्ञानेन खलु पश्यामि दृष्ट्वा प्रत्यागमिष्यथ ॥ २३ ॥

---

* साक्षात्—औरसः—रा.

[1] एतदनन्तरं—प्रासादैर्हैमवर्णैश्च महद्भिः सुसमा कृता—इत्यधिकम्—ङ.
[2] समाहिता—ङ. [3] सुरक्षिता—ङ. [4] इदमधिकं—झ.

अथ—ज्ञानेनेत्यादि । देवयोनित्वादहं खलु दिव्यज्ञानेन यूयं तां दृष्ट्वा प्रत्यागमिष्यथेत्यपि पश्यामि । ततः निस्संशयं गच्छतेति शेषः ॥ २३ ॥

*आद्यः पन्थाः कुलिङ्गानां ये चान्ये धान्यजीविनः ।
द्वितीयो [1]बलिभोजानां ये च वृक्षफलाशिनः ॥ २४ ॥
†भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैस्सह ।
श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम् ॥ २५ ॥
बलवीर्योपपन्नानां रूपयौवनशालिनाम् ।
षष्ठस्तु पन्था हंसानां वैनतेयगतिः परा ॥
‡वैनतेयाच्च नो जन्म सर्वेषां, वानरर्षभाः ! ॥ २६ ॥

अथ स्वस्य देवयोनित्वप्रदर्शनशेषतया पक्षिमार्गानाह—आद्यः पन्था इत्यादि । आकाशमार्ग इत्यर्थः । कुलिङ्गाः—कलविङ्का इत्यर्थः—ஊர்க்குருவி । अन्ये धान्यजीविनः—पारावतादयः । बलिभोजाः—वायसाः, बलीन् भुञ्जत इति बलिभोजाः, पचाद्यच् । वृक्षफलाशिनः—शुकादयः । भासाः—जलवायसाः । वैनतेयाच्च नो जन्मेति । विनतापुत्रादरुणादित्यर्थः । एतत्तु 'द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च । तस्माज्जातोऽहमरुणात् संपातिस्तु ममाग्रजः' इत्यरण्यकाण्डे (१४-३२) जटायुर्वाक्यात् स्पष्टम् ॥ २४-२६ ॥

---

* धान्यजीविनः पक्षिविशेषाः कुलिङ्गाः, 'ये चान्ये धान्यजीविनः' इति वचनात्-गो. एवमेव 'वृक्षफलाशिनः' इत्यपि बलिभोजानां विशेषणमित्याशयः ॥ † भासाः-जलवायसाः, श्येनविशेषा इत्यप्याहुः-गो. ‡ अत्र गृध्राणां पृथगुक्तेः संपातिजटायुषोः साधारणगृध्रत्वाभावः सूचितः ॥

[1] बलिपुष्टानां-ङ.

*[1] गर्हितं तु कृतं कर्म येन स्म पिशिताशिना ।
प्रतिकार्यं च मे तस्य वैरं भ्रातुः कृतं भवेत् ॥ २७ ॥

एवं दिव्यज्ञानेन ईषत्सहायकरणं ममापि वैरशुद्धिप्रयोजनायेत्याह—गर्हितमित्यादि । परदारचौर्यहरणरूपं गर्हितं कर्म । येन उक्तरूपं विगर्हितं कर्म कृतं, तस्य पिशिताशिनः भ्रातृकृतं वैरमुद्दिश्य यत् प्रतिकार्यं तच्च मे कृतं भवेत् युष्मत्प्रवर्तनेन ॥ २७ ॥

इहस्थोऽहं प्रपश्यामि रावणं जानकीं तथा ।
अस्माकमपि सौपर्णं दिव्यं चक्षुर्बलं तथा ॥ २८ ॥

ननु कथमहस्थः लङ्कास्थां सीतां पश्यसीति शङ्कां निवर्तयति—इहस्थ इत्यादि । सौपर्णं—सुपर्णालिङ्गकचक्षुष्मतीब्रह्मविद्यासिद्धिजम् । सा च विद्या बह्वृचब्राह्मणगततृतीयपञ्चिकायां गुरुमुखादवगन्तव्या ॥ २८

तस्मादाहारवीर्येण निसर्गेण च, वानराः !
आयोजनशतात् साग्रात् वयं पश्याम नित्यशः ॥ २९ ॥

तस्मात्—उक्तदिव्यविद्यासिद्धिजचक्षुर्बलेन तथा निसर्गेण मांसविशेषाहारबलेन च, आङ् अभिविधौ, साग्रात् शतात् किञ्चिदभ्यधिकात् ॥ २९ ॥

---

*अयं श्लोकः 'चरणयोश्चिनां' (३१) इत्यनन्तरं निवेशनीय इत्याहुः—गो. अथवा स्वस्य महान्तमपकारं कृतवतः, 'नो जन्म' इति प्रसक्तया मध्ये तदा तदा स्मरणस्य लोकस्वभावत्वादेवमत्र कथनम् । एवञ्च गर्हितं कर्म—स्वभ्रातृवधः । अत एवोत्तरार्धे वैरनिर्यातनमुच्यते । अत्र स्मेति वाक्यशैली ॥

[1] अयं श्लोकः 'विहिता पादमूले' (३१) इत्यर्धानन्तरं पठनीयः—ङ. अयं श्लोकः अधिकः—झ.

अस्माकं विहिता दृष्टिः निसर्गेण च दूरतः ।
विहिता *[1] पादमूले तु वृत्तिश्चरणयोधिनाम् ॥ ३० ॥

अस्माकं तु निसर्गेण—जातिस्वाभाव्येन दूरतः—दूरवर्ति-दर्शनबलसंपादकेन भक्ष्यविशेषेणैव वृत्तिः विहिता चरणयोधिनां—कुक्कुटादीनामेव तु स्वावासवृक्षमूलप्रदेशेषु वृत्तिः ॥ ३० ॥

उपायो दृश्यतां कश्चित् लङ्घन लवणाम्भसः[2] ।
[3]अभिगम्य तु वैदेहीं समृद्धार्था गमिष्यथ ॥ ३१ ॥

उपायः दृश्यतां—अन्विष्यताम् गमिष्यथेति । किष्किन्धामिति शेषः ॥ ३१ ॥

समुद्रं † नेतुमिच्छामि भवाद्भिर्वरुणालयम् ।
प्रदास्याम्युदकं भ्रातुः स्वर्गतस्य महात्मनः ॥ ३२ ॥

समुद्रं भवाद्भिर्मां नतुमिच्छामि । प्रयश भिन्नकर्तृकेऽपि सर्वत्रात्र तुमुन् ॥ ३२ ॥

ततो नीत्वा तु तं देशं तीरं नदनदीपतेः ।
निर्दग्धपक्षं संपातिं वानराः सुमहौजसः । ३३ ।
पुनस्तं प्रापयित्वा च तं देशं पतंगश्वरम् ।
बभूवुर्वानरा हृष्टाः ‡ प्रवृत्तिमुपलभ्य ते ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः

— ——

वर्ग(३३)मानः (?) सर्ग ॥ ३४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः

———

* पादमूले—पादविकीर्णप्रदेशे, वृत्तिः—जीवनम्-गो. न वयं तादृशा इति लोकबदुक्तिरित्याशयः ॥ † नेतुं—नाययितुम्-नि. ‡ प्रवृत्ति- कर्तव्यमूढानां स्वेषां उत्तरकर्तव्यमार्गमित्यर्थः ।

[1] वृक्षमूले-ज. [2] एतदनन्तरं-द्वीपे द्वीपे समुद्रस्य तस्य धामानि सन्ति वै । यावन्न गच्छेरस तया तानि सार्धं प्लवङ्गमाः-इत्यधिकं-झ. [3] अधिगम्य-ङ.

षष्टितमः सर्गः

[सुपार्श्ववचनानुवादः]

* ततस्तदमृतास्वादं गृध्रराजेन भाषितम् ।
निशम्य [1] वदतो हृष्टाः ते वचः प्लवगर्षभाः ॥ १ ॥

अथ जाम्बवता सीतादर्शनादिकं त्वदेकसाक्षिकम्? अपि वाऽन्यसाक्षिकमपीति दार्ढ्याय पृष्टो गृध्रराजः अन्यसाक्षिकत्वमप्याह । ततस्तदित्यादि । 'निशम्य वदतो हृष्टाः' इति पाठः । ते प्लवगर्षभाः गृध्रराजेन भाषितं अमृतास्वादं वचो निशम्य तत् † वदतः—अनुवदतः हृष्टा बभूवुः । हर्षजोऽनुवादः प्रसिद्धो लोकस्य ॥ १ ॥

जाम्बवान् वानरश्रेष्ठः सह सर्वैः प्लवङ्गमैः ।
भूतलात् [2] सहसोत्थाय [3] गृध्रराजमथाब्रवीत् ॥ २ ॥

भूतलादुत्थायेति ‡ प्रायोपवेशं त्यक्त्वेत्यर्थः । गृध्रराजानमब्रवीदिति । समासान्तस्यानित्यत्वान्न टच् ॥ २ ॥

क्व सीता केन वा दृष्टा को वा [4] हरति मैथिलीम् ।
तदाख्यातु भवान् सर्वं गतिर्भव वनौकसाम् ॥ ३ ॥

किमब्रवीदित्यतः—क्व सीतेत्यादि । जानकीं को वा हरति स? हृता च सा क्वाद्य वर्तते? ह्रियमाणा च सीता केन वा दृष्टा? त्वया? अन्येन वा? तत्सर्वं विशिष्य भवानाख्यातुमर्हति ।

---

* 'ततस्तदमृतास्वादं' इत्यारभ्य पञ्च सर्गाः प्रक्षिप्ताः सर्वकोशेष्वदर्शनात्—गो. 'ह्रियमाणा मया दृष्टा' इत्यादिपूर्वविरोधाच्चेति योज्यम् ॥ † वदत इत्यत्र नुमभाव आर्षः–ति. ‡ वस्तुतस्तु प्रश्नौत्कण्ठ्यात्तथा लोकस्वभावः । अत एव 'सहसा' इति ॥

[1] मुदिताः–ङ., वदता–झ. [2] सहसोत्पत्य–ङ. [3] गृध्रराजानमब्र–ञ.
[4] जानाति जानकीम्–ङ.

सामान्यतः त्वत्तः श्रुतवृत्तान्ता*दङ्गदमुखाच्छ्रुतम् । तच्छ्रुत्वा प्रायादुत्थितानां सर्वेषां विशिष्य वक्तुमर्हतीत्यर्थः ॥ ३ ॥

को दाशरथिबाणानां वज्रवेगनिपातिनाम् ।
स्वयं लक्ष्मणमुक्तानां न चिन्तयति विक्रमम् ॥ ४ ॥

न चिन्तयति विक्रमं, स जानकीहर्ता क इत्यन्वयः ॥ ४ ॥

स हरीन् †[1] प्रीतिसंयुक्तान् सीताश्रुतिसमाहितान् ।
पुनराश्वासयन् प्रीतः इदं वचनमब्रवीत् ॥ ५ ॥

पुनराश्वासयन्निति । अन्यसाक्षिकताप्रदर्शनेन भूयः स्वोक्तार्थं प्रत्याययन्नित्यर्थः ॥ ५ ॥

श्रूयतामिह वैदेह्याः यथा मे हरणं श्रुतम् ।
येन चापि ममाख्यातं यत्र वाऽयतलोचना ॥ ६ ॥

येन चापि समाख्यातं—न केवलं स्वानुभावात्, अपि तु येन मम पुत्रेणाप्याख्यातं वैदेह्या हरणं, यथा मे श्रुतं, यत्र सा आयतलोचना च वर्तते इति श्रुतं, तदपि इह—इदानीं श्रूयताम् ॥ ६ ॥

अहमस्मिन् गिरौ दुर्गे बहुयोजनमायते ।
‡ चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः ॥ ७ ॥

प्रतिज्ञातमर्थं प्रतिपादयति—अहमस्मिन्नित्यादि । क्षीणः प्राणः—बलं पराक्रमश्च यस्य सः क्षीणप्राणपराक्रमः ॥ ७ ॥

---

* अङ्गदप्रश्नस्यैव संपातिना उत्तरदानादेवमुक्तिः । † प्रतिसंयुक्तान्–(पा.)—त्यक्तप्रायोपवेशान्–ति. ‡ इन्द्रेण पातितत्वात् पतितः ।

[1] प्रतिसंमुक्तान्–च., ज.

तं मामेवं [1]गतं पुत्रः सुपार्श्वो नाम नामतः ।
आहारेण यथाकालं बिभर्ति पततां वरः ॥ ८ ॥

तीक्ष्णकामास्तु गन्धर्वाः तीक्ष्णकोपा भुजङ्गमाः ।
मृगाणां तु भयं तीक्ष्णं तथा तीक्ष्णक्षुधा वयम् ॥ ९ ॥

तीक्ष्णः कामः—कामविकारो येषां ते तथा । तथाहि श्रुतिः 'स्त्रीकामा वै गन्धर्वाः' इति । तथेति । यथा कामादिविषये गन्धर्वादेस्तैक्ष्ण्यं *स्वभावात्, तथा वयं पतङ्गा अपि तीक्ष्णक्षुधाश्च ॥ ९ ॥

स कदाचित् क्षुधार्तस्य ममाहाराभिकाङ्क्षिणः ।
† [2]गतस्सूर्येऽहनि प्राप्तः मम पुत्रो ह्यनामिषः ॥ १०

यस्मादेवं, तस्मात्—क्षुधार्तस्य, अत एव आहाराकाङ्क्षिण मम आहारार्थं अह्नि सूर्ये—सूर्यो यकाले गत मम पुत्रः मायं अन मिषश्चागतः ॥ १० ॥

स मया [3]वृद्धभावाच्च कोपाच्च परिभर्त्सितः ।
[4]क्षुत्पिपासापरीतेन कुमारः पततांवरः ॥ ११ ॥

स मामाहारसंरोधात् पीडितं [5]प्रीतिवर्धनः ।
अनुमान्य यथातत्त्वं इदं वचनमब्रवीत् ॥ १२ ॥

---

* तैक्ष्ण्यं—अन्झत्वम् । 'क्षुत्पिपासापरीतेन' इति वक्ष्यमाणोपपादकतयाऽयं श्लोकः प्रवृत्तः ॥ † 'गतसूर्येऽहनि' इति पाठे मायाह्ने इत्यर्थः । प्रातर्गत इति लोकवदेव स्वयं लभ्यते ॥

[1] गतः—ज. [2] गतसूर्ये—ङ. [3] ऽऽहारसंरोधात् पीडितः प्रीतिवर्धनः—ज.
[4] अयं श्लोकः कुण्डलितः—ज. [5] प्रीतिवर्धनम्—ङ.

यस्मादेवं, तस्मात्—स मयेत्यादि । मम आहारसंरोधात् पीडितः—खिन्नः सः मम प्रीतिवर्धनः सन् मामनुमान्य—क्षमापयित्वा यथातत्त्वं इदं – वक्ष्यमाणं वचनमब्रवीत् ॥ १२ ॥

अहं, तात ! यथाकालं आमिषार्थी खमाप्लुतः ।
महेन्द्रस्य गिरेर्द्वारं आवृत्त्य च समास्थितः ॥ १३ ॥
ततः सत्त्वसहस्राणां सागरान्तरचारिणाम् ।
पन्थानमेकोऽध्यवसं *सन्निरोद्धुमवाङ्मुखः ॥ १४ ॥

पन्थानं सन्निरोद्धुमित्यन्वयः ॥ १४ ॥

तत्र कश्चिन्मया दृष्टः सूर्योदयसमप्रभाम् ।
[1]स्त्रियमादाय गच्छन् वै भिन्नाञ्जनचयोपमः ॥ १५ ॥

सूर्योदयसमप्रभां —उदितसूर्यसमप्रभाम् ॥ १५ ॥

सोऽहम[2]भ्यवहारार्थी तौ दृष्ट्वा कृतनिश्चयः ।
तेन साम्ना विनीतेन पन्थानमभियाचितः ॥ १६ ॥

तौ दृष्ट्वेति । स्त्रीपुरुषावित्यर्थः । कृतनिश्चयः इति । इमावेव हत्वा पितुरभ्यवहारार्थं नेष्यामीति कृतनिश्चय इत्यर्थः । ततः तेन विनीतेन सता साम्नैव पन्थानमभियाचितोऽस्मि । अत एव असौ त्यक्त इति शेषः ॥ १६ ॥

न हि सामोपपन्नानां प्रहर्ता विद्यते क्वचित् ।
नीचेष्वपि जनः कश्चित् किं, अङ्ग ! बत मद्विधः ॥ १७ ॥

तत्र हेतुः—न हीत्यादि ॥ १७ ।

---

* सन्निरोद्धु—आहारार्थं ग्रहणायेति भावः ॥

[1] नारी—ङ.   [2] मभ्यवहारार्थं—ज.

*स यातस्तेजसा व्योम संक्षिपन्निव [1]वेगितः ।
अथाहं [2]खेचरैर्भूतैः अभिगम्य †सभाजितः ॥ १८ ॥

अथ—सस्त्रीकस्य तस्य विसर्जनानन्तरं खेचरैर्भूतैः—सिद्धचारणादिभिः सभाजितः—पूजितोऽस्मि ॥ १८ ॥

दिष्ट्या [3]‡जीवति सीतेति ह्यब्रुवन्मां महर्षयः
कथञ्चित् सकलत्रोऽसौ गतस्ते स्वस्त्यसंशयम् ॥ १९ ॥

किमिति—सा सीता दिष्ट्या जीवति । अतस्तस्या हननं तवेषत्करं, दैवात्तदहननात् तव श्रेयो जात इति । अथ महर्षयश्च मामब्रुवन्निति—किमित्यतः—असौ पुरुषः सकलत्रः—त्वद्दृष्टस्त्रिया त्वदहतया संगतः कथञ्चित् असंशयं सकलत्रो गतश्चेत् ते स्वस्त्यस्तु ॥

एवमुक्तस्ततोऽहं तैः सिद्धैः परमशोभनैः ।
स च मे रावणो राजा रक्षसां प्रतिवेदितः ॥ २० ॥

अथ स च हर्ता रावण इति तैः प्रतिबोधितोऽस्मि, सा च दाशरथेर्भार्येत्यपीति शेषः ॥ २० ॥

[4]हरन् दाशरथेर्भार्यां रामस्य जनकात्मजाम् ।
भ्रष्टाभरणकौशेयां [5]शोकवेगपराजिताम् ॥ २१ ॥
रामलक्ष्मणयोर्नाम [6]क्रोशन्तीं मुक्तमूर्धजाम् ।
एष ‡कालात्ययस्तावत् इति कालविदां वरः ॥
एतमर्थं समग्रं मे सुपार्श्वः प्रत्यवेदयत् ॥ २२ ॥

---

* वेगातिशयनिरूपणं ‘व्योम संक्षिपन्निव’ इति । तदनुगुणशक्तिकथनं ‘तेजसा’ इति ॥ † सभाजितः—प्रार्थ्यमानतत्त्यागेन प्रशंसितः—रा. अत्र हेतूक्तिः समनन्तरार्धेन ॥ ‡ कालात्ययः—कालातिक्रमहेतुः—गो.

[1] वेगतः—ङ. [2] खचरै—ङ. [3] जीवसि तातेति—ङ. [4] पश्यन्—ज. [5] सीतां शोकपरायणाम्—ङ. [6] विक्रोशन्तीं मुहुर्मुहुः—ङ.

अतः अहं दाशरथेर्भार्यां उच्यमानविशेषणां पश्यन्, स्थित इति शेषः। एष तावत् मे कालात्ययः—कालातिपातहेतुरिति—समग्रं एतं—उक्तं अर्थं वाक्यविदां वरः सुपार्श्वः मे प्रत्यवेदयत् ॥ २२ ॥

तच्छ्रुत्वाऽपि हि मे बुद्धिः नासीत् काचित् पराक्रमे।
अपक्षोऽहं कथं पक्षी कर्म किञ्चिदुपक्रमे ॥ २३ ॥

तच्छ्रुत्वाऽपीति। पूर्वं सामान्यतो मयाऽनुभूतस्य, पश्चात् हर्ता रावणः, हृता च दाशरथिपत्न्यवेति निश्चित्य श्रुत्वापीत्यर्थः ॥ २३ ॥

यत्तु शक्यं मया कर्तुं * वाग्बुद्धि[1]गुणवर्तिना।
श्रूयतां तत् प्रवक्ष्यामि भवतां पौरुषाश्रयम् ॥ २४ ॥

वाग्बुद्धिभ्यां साध्यो यो गुणः—उपकारलक्षणः तन्मात्र वर्तनशीलस्तेन तथा। पौरुषस्य विक्रमस्य आश्रयभूतः—प्रतिष्ठाभूतस्तथा ॥ २४ ॥

वाङ्मतिभ्यां तु सर्वेषां करिष्यामि प्रियं हि वः।
यद्धि दाशरथेः कार्यं मम तन्नात्र संशयः ॥ २५ ॥

युष्मभ्यं क्रियमाणोऽयं वाङ्मत्युपकारः न युष्मत्प्रयोजनः केवलम्, अपि तु मत्प्रयोजनोऽपीत्याह — वाङ्मतिभ्यामित्यादि। दाशरथेः कार्यमुद्दिश्य वः सर्वेषां वाङ्मतिभ्यां हि—यत् प्रियं करिष्यामः, तत् मम कार्यमेव, नात्र संशयः ॥ २५ ॥

[2]तद्भवन्तो मतिश्रेष्ठाः बलवन्तो [3]मनस्विनः।
[4]प्रेषिताः कपिराजेन देवैरपि दुरासदाः ॥ २६ ॥

---

* बचसा बुद्धिगुणेन—समीचीनोपदेशादिना च—रा.

[1] बद्धवर्तिना—ङ. [2] ते भवन्तो—ङ. [3] यशस्विनः—ज. [4] सहिताः—ङ.

का चास्मद्वक्तव्यबुद्धिरित्यत्र–कार्यसिद्धिसंशयं मद्वचनप्रामाण्येन त्यक्त्वा त्वरितं कृत्ये प्रवृत्तिरेव कर्तव्येत्याह—तद्भवन्त इत्यादि ॥ २६॥

रामलक्ष्मणबाणाश्च *[1] निशिताः कङ्कपत्रिणः ।
त्रयाणामपि लोकानां पर्याप्ता[2]स्त्राणनिग्रहे ॥ २७ ॥

त्राणं च निग्रहश्चेति द्वन्द्वैकवद्भावः ॥ २७ ॥

कामं खलु दशग्रीवः तेजोबलसमन्वितः ।
भवतां तु समर्थानां न किञ्चिदपि दुष्करम् ॥ २८ ॥

न किञ्चिदपि दुष्करमिति । लोकदृष्ट्याप्रबलोऽपि रावणः रामलक्ष्मणसुग्रीवाणां ईषत्करहनन इत्यर्थः ॥ २८ ॥

तदलं †कालसङ्गेन क्रियतां बुद्धिनिश्चयः ।
न हि कर्मसु ‡ सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ २९ ।

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षष्टितमः सर्गः

———

उदार(२८ १/२)मानः सर्गः ॥ २८ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षष्टितमः सर्गः

———

* विहिताः (पा.), विधात्रेति शेषः–ति., चालिताः–रा. † कालसङ्गः—कालविलम्बः–गो., ति. ‡ सज्जन्ते—अलसा भवन्ति–ति.

[1] विहिताः–च., ज. [2] शत्रुनिग्रहे–ङ.

एकषष्टितमः सर्गः

[संपातिपुराणवृत्तम्]

ततः कृतोदकं स्नातं तं गृध्रं हरि[1]यूथपाः ।
उपविष्टा गिरौ [2]रम्ये परिवार्य समन्ततः ॥ १ ॥

अथ संपातिः पुनश्च स्ववचनविश्वासे दृष्टप्रत्ययत्वं दर्शयिष्यन् तत्पीठिकतया विन्ध्यपतनानन्तरजनितनिजवृत्तान्तमाह । ततः कृतोदकमित्यादि ॥ १ ॥

तमङ्गदमुपासीनं तैस्सर्वैर्हरिभिर्वृतम् ।
*जनितप्रत्ययो हर्षात् संपातिः पुनरब्रवीत् ॥ २ ॥

जनितप्रत्ययः—'एष्यन्त्यन्वेषकाः' (श्लो. ६२-११) इति निशाकरमुनिपुङ्गवोक्तप्रकारेण रामदूतागमनदर्शनात् निशाकरोक्तपक्ष प्ररोहादिस्वाभ्युदये च जनितविश्वासः संपातिः उक्तहेतुजहर्षात् पुनश्च समुपासीनं अङ्गदं प्रत्यब्रवीत् ॥ २ ॥

कृत्वा निश्शब्दमेकाग्राः शृण्वन्तु हरयो मम ।
[3]तत्त्वं संकीर्तयिष्यामि यथा जानामि मैथिलीम् ॥ ३ ॥

तत्त्वमित्यादि । मैथिलीं जानामीतीममर्थं यथा चेत तत्त्वं प्रतिपद्यध्वे, तथा संकीर्तयिष्यामि ॥ ३ ॥

अस्य विन्ध्यस्य शिखरे पतितोऽस्मि [4]पुरा ह्यहम् ।
[5]सूर्यातपपरीताङ्गः निर्दग्धः सूर्यरश्मिभिः ॥ ४ ॥

---

* जनितविश्वासो यथा भवति, तथा—गो. जनितः—उत्पादितः प्रत्ययः—अङ्गदादिषु विश्वासः येन सः—रा.

[1] पुङ्गवाः—ङ. [2] दुर्गे—ङ. [3] तथ्यं—झ. [4] पुरा वने, महावने—ङ. [5] सूर्यताप—ज.

लब्धसंज्ञस्तु *षड्रात्रात् विवशो विह्वलन्निव ।
वीक्षमाणो दिशः सर्वाः नाभिजानामि किञ्चन ॥ ५ ॥

सूर्यरश्मिभिः निर्दग्धः, अत एव विवशः, षड्रात्रात् परं लब्धसंज्ञः । विह्वलन्निव–परमार्त एव सन् ॥ ४-५ ॥

ततस्तु सागरान् शैलान् नदीः सर्वाः सरांसि च ।
[1]वनानि च प्रदेशांश्च समीक्ष्य मतिरागमत् ॥ ६ ॥
हृष्टपक्षिगणाकीर्णः [2]कन्दरोदरकूटवान् ।
दक्षिणस्योदधेस्तीरे विन्ध्योऽयमिति [3]निश्चितः ॥ ७ ॥

कन्दराण्युदरे यस्य स तथा । तादृशः कूटः–शृङ्गं अस्यास्तीति तथा ॥ ७ ॥

†आसीच्चात्राश्रमः पुण्यः सुरैरपि सुपूजितः ।
ऋषिर्निशाकरो नाम यस्मिन्नुग्रतपा भवत् ॥ ८ ॥

'उग्रतपा भवत्' इति सन्धिः छान्दसः‡ ॥ ८ ॥

अष्टौ वर्षसहस्राणि तेनास्मिन् ऋषिणा [4]विना ।
वसतो मम, [5]धर्मज्ञाः! स्वर्गते तु निशाकरे ॥ ९ ॥

निशाकरे ऋषौ स्वर्गते तु तेन विना वसत इत्यन्वयः । वर्षसहस्राणि, व्यतीतानीति शेषः ॥ ९ ॥

---

* अत्र 'षण्मासादूर्ध्वं इति शिरोमणिव्याख्या ॥ † निशाकरः अत्र वसतीति संपातिना पूर्वमेवावगतमिति गम्यते ११ श्लोको द्रष्टव्यः ॥ ‡ भवत्—अभवत् इति पदमित्यर्थः ॥

[1] वनान्युदधिवेलां च–ङ. [2] कन्दरान्तर–ङ. [3] निश्चयः–ङ. [4] गिरौ–ज. [5] धर्मज्ञे–ज.

आतीर्य च विन्ध्याग्रात् कृच्छ्रेण विपुलाच्छनैः ।
तीक्ष्णदर्भां वसुमतीं दुःखेन पुनरागतः ॥ १० ॥
तमृषिं द्रष्टुकामोऽस्मि दुःखेनाभ्यागतो भृशम् ।
जटायुषा मया चैव बहुशोऽधिगतो हि सः ॥ ११ ॥

अथ तत्स्थितिकाले तद्दर्शनप्रवृत्तिमाह—आतीर्येत्यादि । तीक्ष्णाः दर्भाः यस्यां सा तथा । द्रष्टुकामोऽस्मीति । द्रष्टुकामोऽभूवमित्यर्थः । अत एव-दुःखेन तदभ्याशं भृशदुःखेनाभ्यागतोऽस्मि । ननु कथं तद्वासः त्वया ज्ञायते? इत्यत्राह-जटायुषेत्यादि ॥ १०-११ ॥

तस्याश्रमपदाभ्याशे ववुर्वाताः सुगन्धिनः ।
वृक्षो [1]नापुष्पितः कश्चिद् अफलो वा न [2]विद्यते ॥१२॥
उपेत्य चाश्रमं पुण्यं वृक्षमूलमुपाश्रितः ।
द्रष्टुकामः प्रतीक्षेऽहं भगवन्तं निशाकरम् ॥ १३ ॥
[3]अथापश्यमदूरस्थं ऋषिं ज्वलिततेजसम् ।
कृताभिषेकं दुर्धर्षं उपावृत्तमुदङ्मुखम् ॥ १४ ॥

उदङ्मुखमुपावृत्तं दक्षिणसमुद्रे स्नात्वा उदङ्मुखतया प्रत्यावृत्तमित्यर्थः ॥ १४ ॥

तमृक्षाः सृमरा व्याघ्राः सिंहा [4]नागाः सरीसृपाः ।
परिवार्योपगच्छन्ति [5]धातारं प्राणिनो यथा ॥ १५ ॥

स्वसेवायोग्यताप्रदर्शनाय तिर्यग्योनिभिरपि सेव्यत्वं तस्य तपोमहिमानं दर्शयति—तमृक्षा इत्यादि ॥ १५ ॥

---

[1] वाऽपुष्पितः-ङ. [2] दृश्यते-ञ. [3] अथ पश्यामि दूरस्थं-ञ. [4] नाना-ञ.
[5] दातारं-ञ.

ततः प्राप्तमृषिं ज्ञात्वा तानि सत्त्वानि वै * ययुः ।
प्रविष्टे राजनि यथा सर्वं सामात्यकं बलम् ॥ १६ ॥
प्राप्तमिति । आश्रमं प्राप्तमित्यर्थः ॥ १६ ॥

ऋषिस्तु दृष्ट्वा मां [1]प्रीतः प्रविष्टश्चाश्रमं पुनः ।
मुहूर्तमात्रान्निष्क्रम्य ततः कार्यमपृच्छत ॥ १७ ॥
† सौम्य! वैकल्यतां दृष्ट्वा रोम्णां ते नावगम्यते ।
अग्निदग्धाविमौ पक्षौ [2]त्वक् चैव व्रणिता तव ॥ १८ ॥
ते रोम्णामित्यन्वयः ॥ १८ ॥

गृध्रौ द्वौ दृष्टपूर्वौ मे मातरिश्वसमौ जवे ।
गृध्राणां चैव राजानौ भ्रातरौ कामरूपिणौ ॥ १९ ॥
ज्येष्ठो हि त्वं तु, संपाते! जटायुरनुजस्तव ।
मानुषं [3]रूपमास्थाय गृह्णीतां चरणौ मम ॥ २० ॥
गृह्णीतां—अगृह्णीताम् ॥ २० ॥

किं ते व्याधिसमुत्थानं पक्षयोः पतनं कथम् ।
दण्डो वाऽयं [4]धृतः केन सर्वमाख्याहि पृच्छतः ॥ २१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे एकषष्टितमः सर्गः

किं त इति । किं—कीदृशमित्यर्थः । व्याधिसमुत्थानमिति षष्ठीतत्पुरुषः । अयं दण्डश्च—प्रहारश्च व्रणकरः केन धृतः—कृतः । कर(२१)मानः सर्गः ॥ २१ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे एकषष्टितमः सर्गः

---

* ययुः—पर्यगच्छन्निति भावः ॥ † रोम्णां वैकल्यात् त्वं न प्रत्यभिज्ञायसे इत्यर्थः । अथवा रोमवैकल्यहेतुर्नावगम्यत इत्यर्थः ॥

[1] हृष्टः—ज. [2] प्राणाश्चापि शरीरके—ज. [3] वपुरा—ङ. [4] कृतः—ङ.

द्विषष्टितमः सर्गः

[संपातिशोकः]

*ततस्तद्दारुणं कर्म दुष्करं [1] साहसात् कृतम् ।
आचचक्षे मुनेः सर्वं सूर्यानुगमनं तदा ॥ १ ॥

अथ पृष्टवृत्तान्तस्य मुनेः संपातिप्रत्युत्तरम् । ततस्तदित्यादि । तत् दारुणं—इन्द्रयुद्धं दुष्करं—अन्येन केनचित्कर्तुमशक्यं यत् कर्म साहसात् बलदर्पजात् कृतं; तत् प्रथममाचचक्षे ॥ १ ॥

भगवन्! व्रणयुक्तत्वात् लज्जया व्याकुलेन्द्रियः ।
परिश्रान्तो न शक्नोमि वचनं प्रतिभाषितुम् ॥ २ ॥

कथमाख्यातवानसीत्यतः तत् प्रतिपादयति—भगवन्नित्यादि । हे भगवन्! व्रणयुक्तत्वात्—इन्द्रयुद्धे इन्द्रप्रहारजव्रणयुक्तत्वात् परिश्रान्तः, तथा पक्षनाशफलकानुचितकर्मजलज्जयाऽऽकुलितेन्द्रियश्च हं सम्यक् प्रतिभाषितुं न शक्नोमि—कथञ्चित् ब्रवीमीति शेषः ॥ २ ॥

अहं चैव जटायुश्च [2] संघर्षाद्दर्पमोहितौ ।
आकाशं पतितौ [3] वीरौ जिज्ञासन्तौ पराक्रमम् ॥ ३ ॥

संघर्षात्—पतनविषयकस्पर्धया । पराक्रमं-पतनविषयकम् ॥

कैलासशिखरे [4] बध्वा मुनीनामग्रतः पणम् ।
रविः स्यादनुयातव्यः यावदस्तं महागिरिम् ॥ ४ ॥

---

* दुष्करं—अन्यैः कर्तुमशक्यं तत्—इन्द्रकर्तृकपराभवरूपं, दारुणं कर्म-सूर्यानुगमनं च रा. वज्रघातहेतुत्वात् सूर्यानुगमनमेव दारुणमित्युच्यते ॥

[1] सहसा-ज. [2] संघर्षाद् गर्व-ज. [3] दूराद्-ज. [4] कृत्वा-ङ.

पणं बध्वेति । *प्रतिज्ञां कृत्वेति यावत् । तत्स्वरूपमेव प्रदर्श्यते--रविरित्यादि । रविः यावत् अस्तं महागिरिं यायात्, ततः प्राक् आवाभ्यां रविरनुगतव्यः— अनुप्राप्तव्य इति ॥ ४ ॥

अथावां युगपत् प्राप्तौ अपश्याव महीतले ।
रथचक्रप्रमाणानि नगराणि पृथक्पृथक् ॥ ५ ॥

एवं प्रतिज्ञाय अथ आवां युगपत् प्राप्ताविति, आकाशमिति शेषः । अपश्याव-दृष्टवन्तौ ॥ ५ ॥

क्वचिद्वादित्रघोषांश्च [1]ब्रह्मघोषांश्च शुश्रुवः ।
गायन्तीश्चाङ्गना बह्वीः पश्यावो रक्तवाससः ॥ ६ ॥

क्वचिदिति । †ऊर्ध्वादिवप्रदेशभेद इत्यर्थः ॥ ६ ॥

तूर्णमुत्पत्य चाकाशं आदित्यपथमाश्रितौ ।
आवामालोकयावस्तत् वनं शाद्वल[2]संस्थितम् ॥ ७ ॥

आकाशमिति । आदित्यपथादर्वाक्तनमिति शेषः । भूवर्ति सर्वं वनं शाद्वलसंस्थितं—शाद्वलानां-बालतृणवद्देशानामिव संस्थितं—संस्थानं यस्य तत् तथा ॥ ७ ॥

‡उपलैरिव संछन्ना दृश्यते भूः शिलोच्चयैः ।
आपगाभिश्च संवीता सूत्रैरिव वसुन्धरा ॥ ८ ॥

उपलैः— सूक्ष्मपाषाणैः ॥ ८ ॥

---

* स्वेन पूर्वं (पृष्ठे ४८१) अन्यथा व्याख्यातत्वात् एवमत्र व्याख्यानम् ॥ † गृध्राणां सूक्ष्मेन्द्रियशक्तिकत्वात् भूगतानामेव वादित्रादीनामनुभवो वा । अत एवानन्तरश्लोके 'तूर्णमुत्पत्य' इति सुदूरगमनमुच्यते ॥ ‡ वनानि केवलं हरितानि दृश्यन्ते स्म । पर्वताः शिला इव, नद्यः सूत्राणीव च दृश्यन्ते स्मेति भावः ॥

[1] क्वचिद्भूषणनिस्वनान्-ङ. [2] सन्निभम्-ङ.

हिमवांश्चैव विन्ध्यश्च मेरुश्च सुमहान्नगः ।
भूतले संप्रकाशन्ते नागा इव जलाशये ॥ ९ ॥

नागाः—गजाः ॥ ९ ॥

तीव्रः स्वेदश्च खेदश्च भयं चासीत्तदाऽऽवयोः ।
समाविशति *[1] मोहश्च तमो मूर्छा च दारुणा ॥ १० ॥

तदेति । मध्याह्ने सवितृसमीपप्राप्तिकाल इत्यर्थः । मोहः—दिङ्मोहः । ततः—मोहानन्तरं अतिदारुणा मूर्छा—सेन्द्रियमनउपप्लवो मूर्छा ॥ १० ॥

न दिग्विज्ञायते याम्या नाग्नेयी न च वारुणी ।
† युगान्ते नियतो लोकः [2] हतो दग्ध इवाग्निना ॥ ११ ॥

उक्ते एव मोहमूर्छे प्रकाशयेते—न दिगित्यादि । युगान्ते नियतः—नियतदाहोऽपि लोकः आवाभ्यां तत्काले सौराग्निना दग्ध इव दृष्टोऽभूत् ॥ ११ ॥

मनश्च मे हतं भूयः सन्निवर्त्य तु संश्रयम् ।
यत्नेन महता [3] ह्यस्मिन् [4] पुनः संधाय चक्षुषि ॥ १२ ॥
‡ यत्नेन महता भूयः रविः समवलोकितः ।
तुल्यः पृथ्वीप्रमाणेन भास्करः प्रतिभाति नौ ॥ १३ ॥

मनश्च मे भूयः—अभ्यधिकं संश्रयं—दर्शनाश्रयं चक्षुः प्राप्य हतं—सौरतेजसा प्रतिहतदर्शनशक्तिकमभूत् । चक्षुषि पुनस्सन्धायेति । मन इति शेषः । कथं रविरवलोकित इत्यत्र तत्प्रकारमाह- तुल्य इत्यादि ॥

* मोहः—चित्तविभ्रमः । मूर्छा–इन्द्रियैस्सह मनस उपप्लवः । तमः–अज्ञानम्–गो. † प्रलये महाभूतानां यथा न दिगादि ज्ञायेत, तथेति वा ॥ ‡ यत्नेन सन्धाय भूयो महता यत्नेन रविः समवलोकित इत्यन्वयः ॥

[1] शोकश्च मोहो–ङ. [2] हतदग्धः–ङ. [3] महान्–ङ. [4] मनः–ज.

जटायुर्मा[1]मनापृच्छय * निपपात महीं [2]ततः ।
तं दृष्ट्वा तूर्णमाकाशात् आत्मानं मुक्तवानहम् ॥ १४ ॥

तत इति । सूर्यदर्शनानन्तरं इत्यर्थः । अनापृच्छयेति । मोहवशादिति शेषः । तं दृष्ट्वेति । मोहात् पतन्तं जटायुषं दृष्ट्वेत्यर्थः । आकाशादात्मानं मुक्तवानिति । सूर्यसमीपवर्त्याकाशप्रदेशात् स्वशरीरं तूर्णं उपसंहृतवान्, अधःप्रदेशाज्जटायूरक्षणार्थमित्यर्थः ॥ १४ ॥

पक्षाभ्यां च मया गुप्तः जटायुर्न [3]प्रदह्यते ।
प्रमादात्तत्र निर्दग्धः पतन् वायुपथादहम् ॥ १५ ॥
आशङ्कये[4] निपतितं जनस्थाने जटायुषम् ।
अहं तु पतितो विन्ध्ये दग्धपक्षो जडीकृतः ॥ १६ ॥

प्रमादात्——स्वपक्षयोः जटायुपरित्राणविषयकचित्ताभिष्वङ्गात् तत्र——तस्मिन् काले निर्दग्धः—निर्दग्धपक्षः । अथ वायुपथात् पतन्नहं आशङ्कये—अनुमितवान् , न तु प्रत्यक्षतो दृष्टवानित्यर्थः ॥

राज्येन हीनो भ्रात्रा च पक्षाभ्यां विक्रमेण च ।
[5]सर्वथा मर्तुमेवेच्छन् पतिष्ये शिखराद्गिरेः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे द्विषष्टितमः सर्गः

———

सर्वथा मर्तुमेवेच्छन् भूत्वा गिरेः शिखरात् पतिष्ये इत्यैच्छमिति शेषः । साय(१७)मानः सर्गः ॥ १७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे द्विषष्टितमः सर्गः

———

* अनापृच्छय—किञ्चिदप्यनुक्त्वा । तावद्विह्वल इति भावः ॥

[1] मनादृत्य-ङ. [2] प्रति—ङ. [3] प्रदह्यत—ज. [4] आशङ्के तं—ङ. झ.

[5] जनस्थाने—सर्वथा मर्तुकामोऽहं रक्षणीयस्त्वया मुने—झ.

त्रिषष्टितमः सर्गः

[निशाकरमुनिवाक्यम्]

एवमुक्त्वा मुनिश्रेष्ठं अरुदं दुःखितो भृशम् ।
अथ ध्यात्वा मुहूर्तं तु भगवानिदमब्रवीत् ॥ १ ॥

अथ खिन्नस्य संपातेः ऋषिणा समाश्वासनम् । एवमुक्त्वेत्यादि ॥ १ ॥

पक्षौ च ते प्रपक्षौ च पुनरन्यौ भविष्यतः ।
प्राणाश्च चक्षुषी चैव विक्रमश्च बलं च ते ॥ २ ॥

पक्षप्रपक्षौ—सूक्ष्ममहापक्षौ * ॥ २ ॥

पुराणे सुमहत् कार्यं भविष्यं हि मया श्रुतम् ।
दृष्टं मे तपसा चैव श्रुत्वा च विदितं[1] मया ॥ ३ ॥

'भविष्यं' इत्यकारान्तत्वमार्षम् । पुराण इति । नारदादिभिरुच्यमाने भविष्यद्रामचरितरूप इत्यर्थः । पुराणे श्रुत्वा विदितं मया, तपसा दृष्टं च एवम् ॥ ३ ॥

राजा दशरथो नाम कश्चिदिक्ष्वाकु[2]नन्दनः ।
तस्य पुत्रो महातेजाः रामो नाम भविष्यति ॥ ४ ॥

किं तदित्यतः—राजेत्यादि ॥ ४ ॥

अरण्यं च सह भ्रात्रा लक्ष्मणेन गमिष्यति ।
[3]तस्मिन्नर्थे नियुक्तः सन् पित्रा सत्यपराक्रमः ॥ ५ ॥

तस्मिन्नर्थ इति । अरण्यगमनरूपकृत्य इत्यर्थः ॥ ५ ॥

---

* पक्षः —महापक्षः । प्रपक्षः—सूक्ष्मपक्षः ॥

[1] मम—ङ. [2] बधंनः—ङ. [3] अस्मिन्नर्थे—ङ.

नैर्ऋतो रावणो नाम तस्य भार्यां हरिष्यति ।
राक्षसेन्द्रो [1] जनस्थानात् अवध्यः सुरदानवैः ॥ ६ ॥
सा च [2] कामैः प्रलोभ्यन्ती भक्ष्यैर्भोज्यैश्च मैथिली ।
न भोक्ष्यति महाभागा दुःखे मग्ना यशस्विनी ॥ ७ ॥

प्रलोभ्यन्तीति । प्रलोभ्यमानेति यावत् ॥ ७ ॥

परमान्नं तु वैदेह्याः * ज्ञात्वा दास्यति वासवः ।
यदन्नममृतप्रख्यं [3] सुराणामपि दुर्लभम् ॥ ८ ॥

'परमान्नं तु पायसम्' । ज्ञात्वेति । निराहारतामिति शेषः । वासवो दास्यतीति । स्वमनुष्यद्वारेति शेषः ॥ ८ ॥

† तदन्नं मैथिली प्राप्य विज्ञायेन्द्रादिदं त्विति ।
अग्रमुद्धृत्य रामाय भूतले निर्वपिष्यति ॥ ९ ॥

इन्द्रात्—इन्द्रपुरुषादेव, न तु रावणपुरुषादिति विज्ञाय—राम आगमिष्यति, रावणं वधिष्यति, त्वया च संवत्सरतृप्तिकरमिदमन्नं गृहीत्वा देवकार्यसिद्धये प्राणा धर्तव्या इत्यादि वचनतो निश्चित्येत्यर्थः । निर्वपिष्यति—दास्यति ॥ ९ ॥

---

* ज्ञात्वा, अनशनमिति शेषः—गो. † ननु त्रेतायां अस्थिप्राणत्वमस्योक्तत्वात् जीवितुं शक्यत एवेति चेत्-न—तथा सत्यपि क्षीणतायां देहे रूपे रावणस्यानुरागभङ्गेन तत्पुण्याक्षये तस्य वधो न स्यादिति रूपलावण्याद्यहानाय तदन्नेनादोषात् । रावणस्य तु तथैव रूपादिदर्शनेन मद्दत्ताहारग्रहणेऽपि वन्यफलादीन्याहारं करोतीति बुद्ध्या तस्यां नामनुष्यत्वनिश्चयः । एतेन आहारं— विनाऽपि पूर्वरूपादिसत्त्वेन तस्य तस्याममनुष्यत्वबुद्धौ तत्संबन्धात् रामेऽपि तत्त्वबुद्धौ रामतो रावणवधो न स्यादित्यपास्तम्—ति. वस्तुतस्तु—६०तमसर्गारम्भे गोविन्दराजोक्तरीत्या (तत्रत्यटिप्पणी द्रष्टव्या) एतेषां सर्गाणां प्रक्षिप्तत्वमेव युक्तं भाति । तर्हि सीता कीदृशमाहारं स्वीकृतवती ? इत्यादिप्रश्नास्तु बालिशानां केवलमिति सूते ।

[1] जनस्थाने—ङ. [2] प्रलोभिता तेन—ङ. [3] सुराणामति—ङ.

यदि जीवति मे भर्ता [1]लक्ष्मणेन सह प्रभुः ।
देवत्वं गच्छतोर्वाऽपि तयोरन्नमिदं त्विति ॥ १० ॥

दानाय भाषामन्त्रः—यदीत्यादि । यदि जीवति तदाऽप्युपतिष्ठतु । देवत्वमिति । कालान्तर इति शेषः ॥ १० ॥

एष्यन्त्यन्वेषकास्तस्याः रामदूताः प्लवङ्गमाः ।
आख्येया राममहिषी त्वया तेभ्यः, विहङ्गम ! ॥ ११ ॥
सर्वथा हि न गन्तव्यं ईदृशः क्व गमिष्यसि ।
देशकालौ प्रतीक्षस्व पक्षौ त्वं प्रतिपत्स्यसे ॥ १२ ॥

न हि गन्तव्यमिति । इमं देशं विहायेति शेषः ॥ १२ ॥

[2]यदा प्रवृत्तिं तां सर्वां आख्यास्यसि, विहङ्गम !
तदैव पक्षौ वर्णश्च तव सर्वं भविष्यति ॥ १३ ॥
[3]उत्सहेऽहमहं कर्तुं अद्यैव त्वां सपक्षकम् ।
त्वयाऽपि खलु [4]तत्कार्यं तयोश्च नृपपुत्रयोः ॥ १४ ॥
ब्राह्मणानां [5]सुराणां च मुनीनां वासवस्य च ।
इहस्थस्त्वं तु लोकानां हितं कार्यं करिष्यसि ॥ १५ ॥

अद्यैव त्वां सपक्षं कर्तुमुत्सहेऽयमिति । यदि त्वया देवकार्यायेह न स्थातव्यं स्यादिति शेषः । यद्येवं, अतः—इहस्थ इत्यादि । त्वयाऽपि तयोर्नृपपुत्रयोः कार्यं—कर्तव्यं खलु, तथापि देवयोनित्वादिति शेषः । तदवस्थानस्य लोकहितत्वमेव दर्शयति—ब्राह्मणानामित्यादि । वासवस्य चेति । कार्यमित्यनुकर्षः ॥ १३-१५ ॥

---

[1] लक्ष्मणो वाऽपि देवरः—ज. [2] इदं पद्यमधिकं—ङ. [3] नोत्सहेय—ज.
[4] कर्तव्यं—ङ. [5] गुरूणां—ज.

*इच्छाम्यहमपि द्रष्टुं भ्रातरौ रामलक्ष्मणौ ।
नेच्छे चिरं धारयितुं प्राणांस्त्यक्ष्ये कलेवरम् ॥
महर्षिस्त्वब्रवीदेवं दृष्टतत्त्वार्थदर्शनः ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः

इच्छामीत्यादि । दृष्टतत्त्वार्थदर्शनः—दृष्टं–सिद्धं तत्त्वार्थदर्शनं यस्य स तथा । एवंविधः महर्षिस्त्वेवं भाव्यर्थमब्रवीदिति यतः, तत एव तु हेतोः अहमपि तदा रामलक्ष्मणौ द्रष्टुमिच्छति स्म । यदि महर्षिर्नाब्रक्ष्यत्, तदा प्राणानेव चिरं धारयितुं नेच्छे—नैच्छम्, अपि तु कलेवरं त्यक्ष्य इत्यैच्छम् । अमेय(१५ १/२)मानः सर्गः ॥ १६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः

चतुष्षष्टितमः सर्गः

[संपातिपक्षप्ररोहः]

एतैरन्यैश्च बहुभिः वाक्यैर्वाक्यविदां वरः ।
मां प्रशस्याभ्यनुज्ञाप्य प्रविष्टः स [1]स्वमाश्रमम् ॥ १ ॥

अथैवमङ्गदादीन् प्रत्यभिज्ञापयतः संपातेः पक्षप्ररोहः । एतैरित्यादि । मां प्रशस्येति । भाविदेवकार्यसाधकत्वेन स्तुत्वा मामनुज्ञाप्य—आमन्त्र्य ॥ १ ॥

---

*अन्ये तु—निशाकरमुनिवाक्यमेवेदं, अहं पदार्थोऽपि स एवेत्याहुः—तिदनेव स्वरसम् । 'मां प्रत्येवं वक्तुस्तव रामदिदृक्षा किं नास्ति?' इति प्रश्नस्य सहजत्वात् तदुत्तररूपमिदं पद्यम् ॥

[1] स्वमालयम्—ज.

कन्दरात्तु विसर्पित्वा पर्वतस्य शनैश्शनैः ।
अहं विन्ध्यं समारुह्य भवतः प्रतिपालये ॥ २ ॥

कन्दरात्तु विसर्पित्वा—ततः परं शनैः निर्दरात्तु विसर्पित्वा अहं विन्ध्यं—विन्ध्याशिखरम् ॥ २ ॥

अद्य त्वेतस्य कालस्य साग्रं वर्षशतं * गतम् ।
देशकालप्रतीक्षोऽस्मि हृदि कृत्वा मुनेर्वचः ॥ ३ ॥

एतस्य कालस्येति । मुनिनाऽवस्थापितस्य तद्वियोगादनन्तरप्रवृत्तकालस्येत्यर्थः । साग्रं वर्षशतमिति । अष्टवर्षसहस्राणीति यावत् । तथा प्रागेव (६१—९) तेनोक्तम् । निशाकरे स्वर्गते त्वनन्तरप्रवृत्तस्यैतस्य कालस्येति योजना ॥ ३ ॥

महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे ।
मां निर्दहति संतापः [1] वितर्कैर्बहुभिर्वृतम् ॥ ४ ॥

वितर्कैः—विचारैः ॥ ४ ॥

[2] उत्थितां मरणे बुद्धिं मुनिवाक्यैर्निवर्तये ।
बुद्धिर्या तेन मे दत्ता [3] प्राणानां रक्षणाय तु ॥
सा मेऽपनयते दुःखं दीप्तेवाऽग्निशिखा तमः ॥ ५ ॥

निवर्तये स्मेति शेषः ॥ ५ ॥

---

* शतशब्दः अनन्तवाची—ति.

[1] विविधै—ङ. [2] उदितां—ङ. [3] प्राणसंरक्षणं मम—ङ.

युद्ध्यता च मया वीर्यं *रावणस्य दुरात्मनः ।
पुत्रः संतर्जितो वाग्भिः न त्राता मैथिली कथम् ॥ ६ ॥
तस्या विलपितं श्रुत्वा तौ च सीतावियोजितौ ।
न मे दशरथस्नेहात् पुत्रेणापादितं प्रियम् ॥ ७ ॥

रावणस्य वीर्यमिति । अशक्यप्रतियोग्यमिति शेषः । कथं न त्रातेति संतर्जित इति योजना । ननु सीतेत्यपरिज्ञानात् अत्राणमित्याह —तस्या विलपितमित्यादि । हा राम ! लक्ष्मण ! इत्येवं अस्माकं तस्या विलपितं श्रुत्वा, तद्व्यापविषयीभूतौ तौ तया विनाकृतौ रामलक्ष्मणाविति सुज्ञानम्, सा च रामपत्नीति सुज्ञाना । अतः कथं विलपितं श्रुत्वाऽपि न त्रातेति तर्जितः । ननु एवमपि रामलक्ष्मणबन्धुः काचिदियं स्त्रीत्येतावदेव तेन ज्ञातुं शक्यम्, अथापि रक्षणीयत्वप्रयोजकस्वमित्रसंपातितत्त्वज्ञानाभावात् कथमत्राणे तर्जनप्रसङ्गः ?—उच्यते—पित्रा निशाकरर्ष्युपदिष्टार्थस्य बोधितत्वात् रामस्य स्वीयत्वं स्वावगमम् । पुत्रत्वाच्च ऋष्युपदिष्टार्थकथनस्यावश्यकम् । तस्मात्तर्जनम् । एवं दशरथस्नेहात् अवश्यकर्तव्यं प्रियं पुत्रेण मे नापादितम् ॥ ७ ॥

तस्य त्वेवं ब्रुवाणस्य [1]सहितैर्वानरैस्सह ।
उत्पेतुस्तु तदा पक्षौ समक्षं वनचारिणाम् ॥ ८ ॥

तस्य त्वेवमित्यादि । एवं ब्रुवाणस्य तस्य पक्षौ उत्पेततुः ॥

स दृष्ट्वा स्वां तनुं [2]पक्षैः उद्गतैररुण[3]च्छदैः ।
प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत् ॥ ९ ॥

---

* रावणस्य वीर्यं युध्यता —मत्पुत्रवीर्यादधिकमिति जानता–ति.

[1] संपाते–ङ. [2] पक्षैः–ङ. [3] प्रभैः–ङ.

पत्रैः—पक्षैः अरुणच्छदैः रक्तैः, अरुणः—सूर्यः, तच्छादनसमर्थतया पूर्ववद्दग्धैरित्यर्थः ॥ ९ ॥

[1]ऋषेर्निशाकरस्यैव [2]प्रभावा[3]दमितौजसः ।
आदित्यरश्मिनिर्दग्धौ पक्षौ मे पुनरुत्थितौ ॥ १० ॥

यौवने वर्तमानस्य ममासीत् यः पराक्रमः ।
[4]तमेवाद्यानुगच्छामि बलं पौरुषमेव च ॥ ११ ॥

सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ ।
पक्षलाभो ममायं वः सिद्धिप्रत्ययकारकः ॥ १२ ॥

*पौराणं-पुराणसिद्धम् । सिद्धिप्रत्ययः-कार्यसिद्धिविश्वासः ॥

इत्युक्त्वा स हरीन् सर्वान् संपातिः [5]पतगोत्तमः ।
उत्पपात गिरेः शृङ्गात् [6]जिज्ञासुः खगमां गतिम् ॥१३॥

गतिं जिज्ञासुरिति । उत्थितपक्षैः प्राग्वत् स्वगतिं ज्ञातुमिच्छुः ॥

तस्य तद्वचनं श्रुत्वा प्रीतिसंहृष्टमानसाः ।
बभूवुर्हरिशार्दूलाः †विक्रमाभ्युदयोन्मुखाः ॥ १४ ॥

विक्रमसाध्ये अभ्युदये सीताऽऽगमलक्षणे उन्मुखाः तथा ॥१४॥

---

* एतद्व्याख्यादृष्ट्या 'बलं पौरुषमेव च' इत्यत्र 'बलं पौराणमेव च' इति पाठः स्यादिति ॥ † हताशानां तेषां पुनः उत्साहस्य प्राप्त्या विक्रमस्य अभ्युदयोन्मुखाः बभूवुरिति वा । एतच्चानन्तरश्लोके स्पष्टम् ॥

[1] निशाकरस्य राजर्षेः–ज. [2] प्रसादा–ज. [3] दमितात्मनः–ङ. [4] तमेवाद्याव–ज. [5] पततां वरः–ङ. [6] संपातिः खगतिस्तदा–ङ.

अथ पवनसमानविक्रमाः
प्लवगवराः प्रतिलब्धपौरुषाः ।
* अभिजिदभिमुखां दिशं ययुः
जनकसुतापरिमार्गणोन्मुखाः ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे चतुष्षष्टितमः सर्गः

प्रतिलब्धं—प्राप्तं पौरुषं—प्रवृत्तिकालः यैस्ते तथा, अभिजिदभिमुखां—अभिजेतव्यविषयभूतां दिशं—दक्षिणदिशम् । अभिजिन्नक्षत्रयुक्तां दिशमित्यन्यः । प्रसिद्धमेव विशेषणं वाच्यं अभिजिदवाप्रसिद्धं, तस्य दक्षिणदिक्प्रकाशकत्वं अगस्त्योदयादिवत् सुतरामप्रसिद्धम् । अमेय(१५ १/२)मानः सर्गः ॥ १५ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे चतुष्षष्टितमः सर्गः

पञ्चषष्टितमः सर्गः

[समुद्रलङ्घनालोचनम्]

आख्याता गृध्रराजेन † समुत्पत्य प्लवङ्गमाः ।
[2] संगम्य प्रीतिसंयुक्ताः विनेदुः [3] सिंहविक्रमाः ॥ १ ॥

अथ सागरं गत्वा तत्तारणाय विचारः । आख्याता इत्यादि । आख्यातसीतावृत्तान्ता इत्यर्थः ॥ १ ॥

---

* अभिजिदभिमुखाः—अभिजिन्मुहूर्तप्रवर्तक्षत्राः । एवं प्रक्षिप्ताः पञ्च सर्गाः गताः—गो † समुत्पत्य, संगम्य—इत्यादिकं हर्षसंरम्भकृत्यम् ॥

[1] दभिमुखा—ङ. [2] संगताः—ङ. [3] भीम—ङ.

संपातेर्वचनं श्रुत्वा हरयो *[1] रावणक्षयम् ।
हृष्टाः सागरमाजग्मुः सीतादर्शनकाङ्क्षिणः ॥ २ ॥

रावणक्षयं—रावणविनाशमुद्दिश्योक्तं वचनं श्रुत्वा ॥ २ ॥

[2] अभिक्रम्य तु तं देशं ददृशुर्भीमविक्रमाः ।
† कृत्स्नं लोकस्य महतः [3] प्रतिबिम्बमवस्थितम् ॥ ३ ॥

तं देशमिति । आसमुद्रतीरदेशमित्यर्थः । प्रतिबिम्बमवस्थितमिति पाठः । महतो लोकस्य सचन्द्रार्कग्रहस्य कृत्स्नं प्रतिबिम्बं यत्रावस्थितं, तस्य दक्षिणस्येत्यादि । ‡ यद्वाभट्टस्तु—'प्रतिबिम्बमिव स्थितं' इति पठित्वा आदर्शतलमिव स्थितम् । यद्वा लोकस्य प्रतिनिधिरिव स्थितम्—इत्याह—उभयं व्यर्थम्—न हि प्रतिबिम्बशब्द आदर्शवाची । नापि महोर्मिदन्तुरं नीलसमुद्रं आदर्शसमतलं पीतवर्णकम् । लोकान्तर्गतस्य समुद्रस्य कृत्स्नलोकप्रतिनिधित्वं दर्भस्थाने शरवत् किं मुख्यापेक्षया कल्प्यमिति न जानीमः ॥ ३ ॥

दक्षिणस्य समुद्रस्य समासाद्योत्तरां दिशम् ।
सन्निवेशं ततश्चक्रुः [4] सहिता वानरोत्तमाः ॥ ४ ॥

सन्निवेशं—सेनानिवेशम् ॥ ४ ॥

---

* रावणक्षयं—रावणनिलयभूतं लङ्काद्वीपमुद्दिश्य—गो. † महतो लोकस्यास्य—लोककारणीभूतस्य सचन्द्रादेः कृत्स्नं प्रतिबिम्बं यत्रावस्थितम्—रा. ‡ प्रतिबिम्बाधारभूतादर्शतलमिवेति तीर्थः । प्रतिनिधिमिवेति गोविन्दराजः ॥ वस्तुतस्तु तीर्थव्याख्या स्वरसैव ॥ अपूर्वलोकान्तरमिव स्थितमिति वार्थः ॥ इदं समनन्तरश्लोकेषु स्पष्टम् ॥

[1] रावणालयम्—ञ. [2] अतिक्रम्य—ङ. अभिगम्य—ञ. [3] प्रतिबिम्बमिव—ङ. [4] हरिवीरा महाबलाः—ङ.

[[1]शरीरैर्महद्भिर्विकृतैः क्रीडद्भिर्विविधैर्जले ।
[2]व्यात्तास्यैः सुमहाकायैः ऊर्मिभिश्चासमाकुलम् ॥]

प्रसुप्तमिव चान्यत्र क्रीडन्तमिव चान्यतः ।
क्वचित्पर्वत[3]मात्रैश्च जलराशिभिरावृतम् ॥ ५ ॥

प्रसुप्तमिति निस्तरङ्गप्रदेशे । अन्यतः—अन्यत्र पर्वतसङ्काशैः जलराशिभिरिति—ऊर्मिरूपैरित्यर्थः ॥ ५ ॥

संकुलं दानवेन्द्रैश्च पातालतलवासिभिः ।
रोमहर्षकरं दृष्ट्वा विषेदुः कपिकुञ्जराः ॥ ६ ॥

आकाशमिव दुष्पारं सागरं प्रेक्ष्य वानराः ।
विषेदुः [4]सहसा सर्वे [5]कथं कार्यमिति ब्रुवन् ॥ ७ ॥

[6]विषण्णां वाहिनीं दृष्ट्वा सागरस्य निरीक्षणात् ।
आश्वासयामास हरीन् भयार्तान् हरिसत्तमः ॥ ८ ॥

[7][तान् *विषादेन महता विषण्णान् वानरर्षभान् ।
उवाच [8]मतिमान् काले वालिसूनुर्महाबलः ॥]

न विषादे [9]मनः कार्यं विषादो [10]दोषवत्तमः ।
विषादो हन्ति [11]पुरुषं बालं क्रुद्ध इवोरगः ॥ ९ ॥

विषादो दोषवत्तरः इत्युक्तमेवार्थं दर्शयति—विषादो हन्तीत्यादि ॥

---

* विषादेन—विषादकारणेन—गो.

[1] सर्पैः—ङ. अयं श्लोकः कुण्डलितः—ञ. [2] व्यत्यस्तैः—ङ. [3] संकाशैः—ङ.
[4] सहिताः—ञ. [5] दुद्रुवुश्च ततस्ततः—ङ. [6] विद्रुतां—ङ. [7] अयं श्लोकः कुण्डलितः—ञ.
[8] वचनं—ङ. [9] न नः—ङ. [10] दोषवत्तरः—ञ. [11] पुरुषान् भीमरूप—ङ.

[1] विषादोऽयं प्रसहते विक्रमे [2] पर्युपस्थिते ।
तेजसा तस्य हीनस्य पुरुषार्थो न सिद्ध्यति *[3] ॥ १० ॥

प्रसहते—प्रसह्य प्रवर्तते । तेजसा हीनस्येति । विषादाभिभूतादिति शेषः ॥ १० ॥

तस्यां रात्र्यां व्यतीतायां अङ्गदो [4] वानरैस्सह ।
हरिवृद्धैः समागम्य पुनर्मन्त्रममन्त्रयत् ॥ ११ ॥

तस्यां रात्र्यामिति । †पलायितसमाधानरात्र्यामित्यर्थः ॥ ११ ॥

सा वानराणां ध्वजिनी परिवार्याङ्गदं बभौ ।
वासवं परिवार्येव मरुतां वाहिनी [5] स्थिता ॥ १२ ॥
कोऽन्यस्तां वानरीं सेनां शक्तः [6] स्तंभयितुं भवेत् ।
अन्यत्र वालितनयात् अन्यत्र च हनूमतः ॥ १३ ॥
ततस्तान् हरिवृद्धांश्च तच्च सैन्यमरिन्दमः ।
अनुमान्याङ्गदः श्रीमान् वाक्यमर्थवदब्रवीत् ॥ १४ ॥

अनुमान्य—अभिपूज्य ॥ १४ ॥

क इदानीं महातेजाः लङ्घयिष्यति सागरम् ।
कः करिष्यति सुग्रीवं सत्यसन्धमरिन्दमम् ॥ १५ ॥

सत्या सन्धा—सीताप्रत्यर्पणप्रतिज्ञा यस्य स तथा ॥ १५ ॥

---

* एतदनन्तरं इतिकरणं ऊह्यम् ॥ † एतद्दर्शने—पूर्वश्लोके 'दुद्रुवुश्च ततस्ततः' इति पाठः पाठसंमत इति भाति ॥

[1] यो विषादं—ञ. [2] समुपस्थिते—ञ. [3] एतदनन्तरं—इति ब्रुवति तस्मिंस्तु वालिपुत्रे महामतौ । आदित्योऽस्तं गतस्तत्र रजनी चाभ्यवर्तत—इत्यधिकं—ञ. [4] वानरर्षभः—ङ. [5] यथा—ङ. [6] भर्त्सयितुं—ङ.

को वीरो योजनशतं लङ्घयेच्च, प्लवङ्गमाः !
इमांश्च यूथपान् सर्वान् [1] मोक्षयेत् को महाभयात् ॥ १६ ॥
कस्य [2] प्रभावात् दारांश्च पुत्रांश्चैव गृहाणि च ।
इतो निवृत्ताः पश्येम सिद्धार्थाः सुखिनो वयम् ॥ १७ ॥
कस्य प्रसादाद्रामं च लक्ष्मणं च महाबलम् ।
अभिगच्छेम संहृष्टाः सुग्रीवं च महाबलम् ॥ १८ ॥
यदि कश्चित् समर्थो वः सागरप्लवने हरिः ।
स ददात्विह नः शीघ्रं पुण्यामभयदक्षिणाम् ॥ १९ ॥
अङ्गदस्य वचः श्रुत्वा न कश्चित् किञ्चिदब्रवीत् ।
स्तिमितेवाभवत् सर्वा तत्र सा हरिवाहिनी ॥ २० ॥
पुनरेवाङ्गदः प्राह तान् हरीन् हरिसत्तमः ।
सर्वे बलवतां श्रेष्ठाः भवन्तो दृढविक्रमाः ॥
[3] व्यपदेश्यकुले जाताः पूजिताश्चाप्यभीक्ष्णशः ॥ २१ ॥

पूजिताश्चेति । महाबलत्वेन सत्कृता इत्यर्थः, राज्ञेति शेषः ॥

न हि वो गमने *[4] सङ्गः कदाचित् कस्यचित् क्वचित् ।
ब्रुवध्वं यस्य या शक्तिः [5] प्लवने, प्लवगर्षभाः ! ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः

ब्रुवध्वमिति । ब्रूध्वमिति यावत् । ननु अङ्गदादीनां शतयोजनतरणे एवं चिन्तायां इतरदिग्गताः कथं समुद्रानुल्लङ्घ्य भास्करपर्यन्त-

---

* सङ्गः—प्रतिबन्धः–ति. प्रतिहतिः–गो.

[1] मोचयेत–ज. [2] प्रसादात–ज. [3] व्यपदेश–ङ. [4] शक्तिः–ङ. [5] गमने–ङ

मन्विष्यागता इति—उच्यते—तेषु समुद्रेषु सर्वत्रासन्नासन्नद्वीपाः सन्ति। लङ्काद्वीप एव परितः शतयोजनसमुद्रो द्वीपः। अत एव रावणेनेदं दुर्गमाश्रितम्। अरुद्र(२२ १/२)मानः सर्गः ॥ २२ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः

षट्षष्टितमः सर्गः

[लङ्घनशक्तिविचिकित्सा]

*ततोऽङ्गदवचः श्रुत्वा सर्वे ते वानरोत्तमाः।
स्वं स्वं गतौ समुत्साहं [1]आहुस्तत्र यथाक्रमम् ॥ १ ॥

अथ दशयोजनादिशतयोजनपर्यन्तं अङ्गदपृष्टेषु, अङ्गदे चोक्तवति तावता कार्यासिद्ध्या खेदे प्राप्ते कार्यसाधकं जाम्बवान् निर्दिशति। अथाङ्गदेत्यादि ॥ १ ॥

गजो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव सुषेणो जाम्बवांस्तथा ॥ २ ॥
आबभाषे गजस्तत्र प्लवेयं दशयोजनम्।
गवाक्षो योजनान्याह गमिष्यामीति विंशतिम् ॥ ३ ॥

---

* यद्यपि गजादयोऽपि शतयोजनलङ्घने शक्ताः; 'भूतले सागरे वाऽपि शैलेषु च वनेषु च। पातालस्यापि मध्ये वा न ममाच्छिद्यते गतिः॥' (पु.–413–414) इति सुग्रीवसंनिधौ स्वस्वशक्तेः ख्यापितत्वात्। 'न हि वो गमने सङ्गः कदाचित् कस्यचित् क्वचित्' (65–22) इति पूर्वमङ्गदोक्तेश्च—तथापि रावणाधिष्ठितलङ्काप्रवेशसीतान्वेषणादिकं दुष्करमन्येनेति तत्साधकहनुमत्प्रोत्साहनाय तथोक्तवन्त इति ध्येयम्–गो.

[1] ऊचु–ज.

गवयो वानरस्तत्र वानरांस्तानुवाच ह ।
त्रिंशतं तु गमिष्यामि योजनानां, प्लवङ्गमाः ! ॥ ४ ॥
शरभस्तानुवाचाथ वानरान् वानरर्षभः ।
चत्वारिंशद्गमिष्यामि योजनानां,[1] प्लवङ्गमाः ! ॥ ५ ॥
वानरांस्तु महातेजाः अब्रवीद्गन्धमादनः ।
योजनानां गमिष्यामि पञ्चाशत्तु न संशयः ॥ ६ ॥
मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह ।
योजनानां परं षष्टिं अहं प्लवितुमुत्सहे ॥ ७ ॥
ततस्तत्र महातेजाः द्विविदः प्रत्यभाषत ।
गमिष्यामि न संदेहः सप्ततिं योजनान्यहम् ॥ ८ ॥
सुषेणस्तु हरिश्रेष्ठः प्रोक्तवान् कपिसत्तमम् ।
अशीतिं योजनानां तु प्लवेयं, प्लवगेश्वराः ! ॥ ९ ॥
तेषां कथयतां तत्र सर्वांस्ताननुमान्य च ।
ततो [2]वृद्धतमस्तेषां जाम्बवान् प्रत्यभाषत ॥ १० ॥

वृद्धतमस्तेषामिति निर्धारणे षष्ठी ॥ १० ॥

पूर्वमस्माकमप्यासीत् कश्चित् गतिपराक्रमः ।
ते वयं वयसः पारं अनुप्राप्ताः स्म सांप्रतम् ॥ ११ ॥

स्म—स्मः इति यावत् ॥ ११ ॥

*किन्तु नैवं गते शक्यं इदं कार्यमुपेक्षितुम् ।
यदर्थं कपिराजश्च रामश्च कृतनिश्चयौ ॥ १२ ॥

---

* वस्तुतस्त्वा मादृशस्येदानीं स्वशक्तिप्रकटनस्यावसर एव नास्ति, अथापि कार्यगौरवमालोच्य वदामीति आहस्याशयः ॥

[1] न संशयः—ङ.   [2] वृद्धतर—ङ.

एवं गत इति। एवं कृच्छ्रप्राप्तावित्यर्थः। येऽर्थमाप्तु स्थितः सीतान्वेषणसिद्धिरूपोऽर्थः, तं—इति *मध्यमपदलोपी समासः। अर्थसिद्धिं अस्मत्प्रतिष्ठिततया कृतनिश्चयौ। अतः अस्माभिर्नेदं कार्यमुपेक्षितुं शक्यमिति योजनार्थः। कृतनिश्चयाविति कथञ्चिद्गमकत्वादसमासः ॥ १२ ॥

सांप्रतं कालभेदेन या गतिस्तां निबोधत।
नवतिं योजनानां तु गमिष्यामि न संशयः ॥ १३ ॥

या गतिः—गतिसामर्थ्यम् ॥ १३ ॥

तांस्तु सर्वान् हरिश्रेष्ठान् जाम्बवान् पुनरब्रवीत्।
न खल्वेतावदेवासीत् गमने मे पराक्रमः ॥ १४ ॥
मया [1] महाबलश्चैव यज्ञे विष्णुः सनातनः।
प्रदक्षिणीकृतः पूर्वं † क्रममाणस्त्रि[2]विक्रमः ॥ १५ ॥

त्रिविक्रमः—विष्णुः। प्रदक्षिणीकृत इति। तथा च ब्रह्माण्डमेव प्रदक्षिणीकृतमित्युक्तं भवति ॥ १५ ॥

स इदानीमहं वृद्धः प्लवने मन्दविक्रमः।
यौवने च तदाऽऽसीन्मे बलमप्रतिमं परैः ॥ १६ ॥
संप्रत्ये[3]तावतीं शक्तिं गमने तर्कयाम्यहम्।
नैतावता च संसिद्धिः कार्यस्यास्य भविष्यति ॥ १७ ॥

---

* 'यदर्थं' इत्यत्र येषु स्थितः अर्थः—सः यदर्थः इति विग्रह इति भावः ॥
† 'क्रममाणस्त्रिविक्रमम्' इति पाठे (गो.)—त्रयाणां विक्रमाणां समाहारः त्रिविक्रमम्। त्रिविक्रमं क्रममाणो विष्णुरित्यन्वयः।

[1] वैरोचने यज्ञे प्रभविष्णुः—ज. [2] विक्रमम्—ज. [3] तादृशीं शक्तिः—ङ.

अथोत्तरमुदारार्थं अब्रवीदङ्गदस्तदा ।
अनुमान्य [1]महाप्राज्ञं * जाम्बवन्तं [2]महाकपिः ॥ १८ ॥
अहमेतद्गमिष्यामि योजनानां शतं महत् ।
निवर्तने तु मे शक्तिः [3]स्यान्न वेति न निश्चिता ॥ १९ ॥
तमुवाच हरिश्रेष्ठं जाम्बवान् वाक्यकोविदः ।
ज्ञायते गमने शक्तिः तव, [4]हर्यृक्षसत्तम ! ॥ २० ॥
कामं शतं सहस्रं वा † न ह्येष विधिरुच्यते ।
योजनानां भवान् शक्तः गन्तुं प्रतिनिवर्तितुम् ॥ २१ ॥

न ह्येष विधिरुच्यत इति । प्रेष्येष्वस्मासु स्थितेषु तवैष विधिः—प्लवनकर्म न युक्तमित्युच्यते, अस्माभिरिति शेषः । इममेवार्थं प्रपञ्चयति—योजनानां भवानित्यादि ॥ २१ ॥

न हि प्रेषयिता, तात ! स्वामी प्रेष्यः कथञ्चन ।
भवताऽयं जनः सर्वः प्रेष्यः, प्लवगसत्तम ! ॥ २२ ॥
भवान् ‡ कलत्रमस्माकं स्वामिभावे व्यवस्थितः ।
स्वामी कलत्रं सैन्यस्य गतिरेषा, परंतप ! ॥ २३ ॥

भवान् कलत्रमिति । कलत्रवत् दृढं मदीयत्वबुद्ध्या यावत्स्व-प्राणबलं परिपाल्य इत्यर्थः ॥ २३ ॥

---

* जाम्बवन्तं महाकपिं–(रा.)—ऋक्षाणामपि कपिजातिविशेषत्वान्न सामानाधिकरण्यविरोधः–रा. † न ह्येष विधिः–एतावदेव गन्तुं शक्तः ; नाधिकमिति त्वद्विषये वक्तुं न युक्तम्, यतस्त्वं ततोऽपि शक्ततरः—इत्यर्थो वा ॥ ‡ कलत्रं–रक्षणीयं वस्तु–गो.

[1] महाप्राज्ञः–ज. [2] महाकपिम्–ज. [3] न स्यादिति मतिर्मम–ङ.
[4] हर्यक्ष–ङ.

तस्मात् कलत्रवत् तत्र प्रतिपाल्यः सदा भवान् ।
अपि चैतस्य कार्यस्य भवान् मूलं, अरिंदम! ॥ २४ ॥

अयमेवार्थः स्पष्टमुक्तः—तस्मात् कलत्रवदित्यादिना ॥ २४ ॥

मूलमर्थस्य संरक्ष्यं एष कार्यविदां नयः ।
मूले हि सति सिद्ध्यन्ति गुणाः [1]सर्वे फलोदयाः ॥२५॥

नयः—निश्चयः । गुणाः--गुणभूताः, अप्रधानाभूता इति यावत् ॥ २५ ॥

तद्भवानस्य कार्यस्य [2]साधनं, सत्यविक्रम !
बुद्धिविक्रमसंपन्नः * हेतुरत्र, परंतप ! ॥ २६ ॥
गुरुश्च गुरुपुत्रश्च त्वं हि नः, कपिसत्तम!
भवन्तमाश्रित्य वयं समर्था ह्यर्थसाधने ॥ २७ ॥
उक्तवाक्यं महाप्राज्ञं जाम्बवन्तं [3]महाकपिः ।
प्रत्युवाचोत्तरं वाक्यं वालिसूनुरथाङ्गदः ॥ २८ ॥
यदि नाहं गमिष्यामि नान्यो वानरपुङ्गवः ।
पुनः खल्विदमस्माभिः कार्यं प्रायोपवेशनम् ॥ २९ ॥
न ह्यकृत्वा हरिपतेः संदेशं तस्य धीमतः ।
तत्रापि गत्वा प्राणानां [4]पश्यामि परिरक्षणम् ॥ ३० ॥
स हि प्रसादे चात्यर्थं कोपे च हरिरीश्वरः ।
अतीत्य तस्य संदेशं विनाशो गमने भवेत् ॥ ३१ ॥

स हीत्यादि । स हरिः—सुग्रीवः प्रसादे चेश्वरः, अत्यर्थं कोपे चेश्वरः । निग्रहानुग्रहाधिकृत इति यावत् ॥ ३१ ॥

---

* साधनपदस्यैव व्याख्या—हेतुरिति—ति.

[1] पुष्पफलोदयाः—क., ङ. [2] साधने—क. [3] महाकपिम्—ञ. [4] न पश्ये—ञ.

*[1]तत्तथा ह्यस्य कार्यस्य न भवत्यन्यथा गतिः ।
तद्भवानेव दृष्टार्थः संचिन्तयितुमर्हति ॥ ३२ ॥

तत्तथेति । तत्—तस्मात् अस्य कार्यस्य—समुद्रलङ्घन-कार्यस्य गतिः—प्राप्तिः अन्यथा यथा न भवति-असिद्धा यथा न भवति, तथा-तेन प्रकारेण भवानेव तदुद्दिश्य चिन्तयितुमर्हति । तत्र हेतुः—दृष्टार्थ इति । चिरवृद्धसुबुद्धित्वात् अपरोक्षीकृतसमस्त-कृत्य कृत्यतत्त्वार्थ इत्यर्थः ॥ ३२ ॥

सोऽङ्गदेन तदा वीरः प्रत्युक्तः प्लवगर्षभः ।
जाम्बवा[2]नुत्तरं वाक्यं प्रोवाचेदं ततोऽङ्गदम् ॥ ३३ ॥
†अस्य ते, वीर! कार्यस्य न किञ्चित् [3]परिहीयते ।
एष संचोदयाम्येनं यः कार्यं साधयिष्यति ॥ ३४ ॥

एष इति । एषोऽहमित्यर्थः ॥ ३४ ॥

ततः [4]प्रतीतं प्लवतां वरिष्ठं
एकान्तमाश्रित्य सुखोपविष्टम् ।
संचोदयामास हरिप्रवीरः
हरिप्रवीरं हनुमन्तमेव ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे षट्षष्टितमः सर्गः

एकान्तमाश्रित्येति । यूथात् बहिः क्वचिदिति शेषः । मार्ग-(२५)मानः सर्गः ॥ ३५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे षट्षष्टितमः सर्गः

---

* अनन्यथासिद्धं उपायं त्वमेव वदेति भावः ॥ † प्रकृतकार्यस्य न क्वापि हानिरिति यावत् ॥

[1] तद्यथा—ङ, झ. [2] नुत्तमं—ज. [3] परिहास्यते-ज. [4] प्रवीरं—ङ.

सप्तषष्टितमः सर्गः

[हनुमत्प्रभाववर्णनम्]

अनेकशतसाहस्रीं विषण्णां हरिवाहिनीम् ।
जाम्बवान् समुदीक्ष्यैवं हनुमन्तमथाब्रवीत् ॥ १ ॥

अथ जाम्बवता हनुमदभिजनपराक्रमप्रत्यभिज्ञापनं सहजबलाविर्भावार्थम्; तथा देवकृतः समाधिः। अनेकशतेत्यादि ॥ १ ॥

*वीर! वानरलोकस्य सर्वशास्त्र[1]विशारद !
[2]तूष्णीमेकान्तमाश्रित्य, हनुमन्! किं न जल्पसि ॥ २ ॥

'एवं अब्रवीत्' इति एवंशब्दार्थ एव—वीर वानरेत्यादि। वानरलोकस्य किं जल्पसीति। कृत्यमुद्दिश्येति शेषः ॥ २ ॥

हनुमन्! हरिराजस्य सुग्रीवस्य समो ह्यसि ।
रामलक्ष्मणयोश्चापि तेजसा च बलेन च ॥ ३ ॥
अरिष्टनेमिनः पुत्रः वैनतेयो महाबलः ।
गरुत्मानिति विख्यातः उत्तमः सर्वपक्षिणाम् ॥ ४ ॥
बहुशो हि मया दृष्टः सागरे स महाबलः ।
भुजगानुद्धरन् पक्षी महावेगो महायशाः ॥ ५ ॥
पक्षयोर्यद्बलं तस्य [3]भुजवीर्यबलं तव ।
विक्रमश्चापि [4]वेगश्च [5]न ते †तेनापहीयते ॥ ६ ॥

---

* वानरलोकस्य वीरेत्यन्वयः। निर्धारणे षष्ठी–ति. † तेनेति पञ्चम्यर्थे तृतीया–गो., ती.

[1] विदां वर–ङ. [2] तूष्णीं–ङ. [3] तावद्भुजबलं, भुजयोस्तद्बलं–ङ.
[4] तेजश्च–ङ. [5] तेन तेनाय–ङ.

अरिष्टनेमिः—काश्यपः, नान्तत्वमार्षम् । तस्य पक्षयोः यद्बलं तव च यत् भुजवीर्यबलं, उभयं तुल्यमिति शेषः । 'पक्षयोर्यद्बलं तस्य भुजवीर्यबलं तव' इति पाठः । योजनाऽशक्त्याऽन्यथा पठति परः । ते वेगो विक्रमश्च तेन—गरुत्मद्बलेन वेगेन च नापहीयते—न्यूना न भवति ॥ ४-६ ॥

बलं बुद्धिश्च तेजश्च सत्त्वं च, हरिपुङ्गव !
*[1] विशिष्टं सर्वभूतेषु किमात्मानं न [2] बुध्यसे ॥ ७ ॥

विशिष्टं आत्मानं—आत्माभिजनबलपराक्रमवैभवमित्यर्थः ॥७॥

†[3] अप्सराऽप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला ।
अञ्जनेति परिख्याता पत्नी केसरिणो हरेः ॥ ८ ॥

तदेव प्रतिबोधयितुमाह—अप्सराप्सरसामिति । सन्धिः छान्दसः । अप्सरा इत्येकवचनान्तोऽप्यस्ति ॥ ८ ॥

विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि ।
[4] अभिशापादभूत्, तात ! [5] वानरी कामरूपिणी ॥ ९ ॥

का नाम साऽप्सरा इत्यतः—विख्यातेत्यादि । अप्सरसः केसरीवानरपत्नीत्वे हेतुमाह—अभिशापादित्यादि । ऋषिशापादित्यर्थः । वानरजन्मवतीति यावत् ॥ ९ ॥

---

* सर्वभूतेषु—सर्वजनबलादिषु मध्ये तव बलादि विशिष्टं—अधिकम्—रा. इतरद्व्याख्या पूर्वार्धे पूर्वश्लोकेनान्वेति ॥ † अप्सरसां मध्ये पुञ्जिकस्थलेति विख्याता अभिशापात् अञ्जनेति नाम्ना परिख्याता हरेः केसरिणः पत्नीत्यन्वयः ॥

[1] विशिष्टः—ङ. [2] लज्जसे—ग. [3] आसीद्—ङ. [4] अतिशापा—ङ
[5] कपित्वे—ज.

दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः ।
कपित्वे चारुसर्वाङ्गी कदाचित् कामरूपिणी ॥ १० ॥
मानुषं विग्रहं कृत्वा रूपयौवनशालिनी ।
विचित्रमाल्याभरणा [1] महार्हक्षौमवासिनी ॥
अचरत् पर्वतस्याग्रे प्रावृडम्बुदसन्निभे ॥ ११ ॥

कुत्र तज्जन्मेत्यतः—दुहितेत्यादि । कपित्व इति । कपिशरीरत्वेऽपीत्यर्थः । कामरूपिणीति । आत्मनो दिव्यदेवतानैसर्ग्यानुवृत्तेरिति शेषः । अम्बुदसन्निभ इति पर्वताग्रविशेषणम् ॥ १०-११ ॥

तस्या वस्त्रं विशालाक्ष्याः [2] पीतरक्तदशं शुभम् ।
स्थितायाः पर्वतस्याग्रे मारुतोऽपाहरच्छनैः ॥ १२ ॥

पीतरक्ताः दशाः—तन्तवः यस्य तत् तथा ॥ १२ ॥

स ददर्श [3] ततस्तस्याः वृत्तावूरू [4] सुसंहतौ ।
स्तनौ च पीनौ सहितौ [5] सुजातं चारु चाननम् ॥ १३ ॥

सुसंहतौ—सुश्लिष्टौ । पीनौ सहितौ—परस्परसंसक्तौ च तथा ॥ १३ ॥

तां [6] विशालायतश्रोणीं तनुमध्यां [7] यशस्विनीम् ।
दृष्ट्वैव शुभसर्वाङ्गीं पवनः काममोहितः ॥ १४ ॥
स तां भुजाभ्यां [8] दीर्घाभ्यां पर्यष्वजत मारुतः ।
मन्मथाविष्टसर्वाङ्गः * गतात्मा तामनिन्दिताम् ॥ १५ ॥

---

* तां गतात्मा—तद्गतचित्तः-गो.

[1] कदाचित्कामचारिणी-ङ. [2] पीतं-ङ. [3] तदा तस्याः-ङ. [4] सुसंस्थितौ-ङ. [5] सुजातौ-ङ. [6] बलादायत-ज. [7] मनस्विनीम्-छ. [8] पीनाभ्यां-ङ.

मारुतस्तां पर्यष्वजत । अथ मन्मथाविष्टसर्वाङ्गः—कामाक्रान्तकृत्स्नज्ञानकर्मेन्द्रियः, अत एव तां गतात्मा, गमकत्वात् समासः, तद्गर्भप्रविष्टात्मतेजाः बभूव । देवत्वात् विना योनिमर्दनं निजतेजःप्रवेशनमीषत्करम् ॥ १५ ॥

[1]सा तु तत्रैव संभ्रान्ता [2]सुवृत्ता वाक्यमब्रवीत् ।
*एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ १६ ॥

तत्रैवेति । गिरावेवेत्यर्थः ॥ १६ ॥

अञ्जनाया वचः श्रुत्वा मारुतः प्रत्यभाषत ।
†न त्वां हिंसामि, सुश्रोणि ! मा भूत्ते, [3]सुभगे ! भयम् ॥

त्वां न हिंसामीति । योनिमर्दनेन तावकमेकपत्नीत्वव्रतं न नाशयामीत्यर्थः । अत एव ते तन्निमित्तं भयं मा भूत् ॥ १७ ॥

‡[4]मनसाऽस्मि गतो यत्त्वां परिष्वज्य [5]यशस्विनीम् ।
वीर्यवान् बुद्धिसंपन्नः तव पुत्रो भविष्यति ॥ १८ ॥
महासत्त्वो महातेजाः महाबलपराक्रमः ।
लङ्घने प्लवने चैव भविष्यति मया समः ॥ १९ ॥

अपि तु यत्—यस्मात् त्वां परिष्वज्य मनसा—मानससंभोगभावावलम्बनेनैव त्वां गतोऽस्मि— स्वतेजसा त्वद्गर्भं प्राप्तोऽस्मि, तस्मात् तव उच्यमानगुणकः पुत्रो भविष्यति । मया समः—मारुतेन स्वेन समः इत्यर्थः ॥ १८-१९ ॥

---

* एकः पतिः यस्याः, तद्व्रतं—तं धर्मं—ति. † न हिंसामि—पातिव्रत्यान्न प्रच्यावयामि—गो. ‡ मनसेत्युक्त्या व्यभिचाराभावो ध्वनितः—रा.

[1] सा तु तत्रैव संभ्रान्ता कुत्सयन्ती च मारुतम् । तद्वचनमपि धारयन्ती सुवृत्ता वाक्यमब्रवीत्—ङ. [2] सुव्रता, संवृत्ता—ङ. [3] मनसो—ञ. [4] मारुतोऽस्मि—ङ. [5] यशस्विनि—ञ.

एवमुक्त्वा ततस्तुष्टा जननी ते, महाकपे !
गुहायां त्वां, महाबाहो ! प्रजज्ञे प्लवगर्षभम् ॥ २० ॥

ततस्तुष्टेति । स्वस्यप्रष्टृमहादैवतमारुतस्वतेजस्संक्रमकथनाभ्या-मित्यर्थः । गुहायामिति । तत्पर्वतगुहायां तदानीमेवेत्यर्थः ॥ २० ॥

[1]अभ्युत्थितं ततः सूर्यं बालो दृष्ट्वा महावने ।
फलं चेति जिघृक्षुस्त्वं [2]उत्प्लुत्याभ्युद्गतो दिवम् ॥ २१ ॥

फलमिति जिघृक्षुः सन् उत्प्लुत्य दिवमभ्युद्गतश्च इति योजना । उदयभास्करस्याम्रादिफलवत् रक्तवृत्तानुष्णादिमत्त्वात् फलबुद्धिः । ननु कथं फलं भक्ष्यं ममेति जातमात्रस्य ज्ञानम् ? उच्यते—अजशिशोरपि स्तनः पातव्य इति प्राचीनवासनया प्रत्यक्षा प्रवृत्तिः । एवं वानरशरीरग्रहे तदुचितानादिवासनया तदुचितप्रवृत्तिरविस्मयाय ॥ २१ ॥

*शतानि त्रीणि गत्वाऽथ योजनानां, महाकपे !
तेजसा तस्य निर्धूतः न विषादं गतस्ततः ॥ २२ ॥

तस्य तेजसेति । आदित्यतेजसेत्यर्थः । निर्धूत इति । क्षिप्तोऽपीत्यर्थः ॥ २२ ॥

†[3]तावदापततस्तूर्णं अन्तरिक्षं, महाकपे !
क्षिप्तमिन्द्रेण ‡ते वज्रं क्रोधाविष्टेन [4]धीमता ॥ २३ ॥
तदा शैलाग्रशिखरे वामो हनुरभज्यत ।
ततो हि नामधेयं ते हनुमानिति कीर्त्यते ॥ २४ ॥

---

* शतानि त्रीणि । यतोऽनेकशतयोजनानामुपलक्षणम् , 'बहुयोजनसाहस्रं क्रमत्येषः' (३५-२९) इत्युत्तरकाण्डे वक्ष्यमाणत्वात्—गो. 'अङ्कानां वामतो गतिः' इति न्यायेन शताधिकत्रिसहस्राणि—रा. † यतो न विषादं गतः, तत एवान्तरिक्षमापततस्ते—इत्यर्थः । ‡ ते—तव शरीरे—ति.

[1] अभ्युद्यन्तं—ङ. [2] उत्पपाताभ्युत्थितो—ङ. [3] अथाप्युपगत—ङ. [4] चेतसा—ञ.

ततस्त्वां [1]निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम् ।
*त्रैलोक्ये भृशसंक्रुद्धः न ववौ स प्रभञ्जनः ॥ २५ ॥

त्रैलोक्ये न ववौ स्म इत्यन्वयः ॥ २५ ॥

संभ्रान्ताश्च सुराः सर्वे त्रैलोक्ये [2]क्षोभिते सति ।
प्रसादयन्ति संक्रुद्धं मारुतं भुवनेश्वराः ॥ २६ ॥
प्रसादिते च पवने ब्रह्मा तुभ्यं वरं ददौ ।
†अशस्त्रवध्यतां, तात! समरे, सत्यविक्रम! ॥ २७ ॥
वज्रस्यापि निपातेन विरुजं त्वां समीक्ष्य च ।
सहस्रनेत्रः प्रीतात्मा ददौ ते वरमुत्तमम् ॥ २८ ॥
स्वच्छन्दतश्च मरणं ते भूयादिति वै, प्रभो! ॥ २९ ॥

वज्रस्य निपातेन, अपिशब्दात् गिरौ निपातेनापि विरुजं--अनुत्पादितव्यथम् ॥ २८-२९ ॥

स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः ।
मारुतस्यौरसः पुत्रः तेजसा वाऽपि तत्समः ॥ ३० ॥

मारुतस्यौरसः पुत्र इति । यथाऽयं भवति, तथा प्रागेव प्रादर्शि ॥ ३० ॥

[3][ईदृशस्य च ते, तात! वर्णयामः कथं बलम् ।
कार्यं चालोकसामान्यं कर्तुं शक्तस्त्वमेव हि ॥
भवान् [4]जीवातवेऽस्माकं, अञ्जनागर्भसंभव!
त्वं हि वायुसुतः, वत्स! प्लवने चापि तत्समः ॥

---

* त्रैलोक्ये (पा.) न ववौ—न गच्छति स्म—ति. † अशस्त्रवध्यतां—शस्त्रावध्यताम् ॥

[1] विक्षतं—ङ. [2] क्षुभिते—ज. [3] एतदादिश्लोकत्रयं कुण्डलितं—ङ. [4] वीरतमो—ङ.

वयमद्य गतप्राणाः भवान्नस्त्रातु सांप्रतम् ।
दाक्ष्यविक्रमसंपन्नः [1]पक्षिराज इवापरः ॥]
*त्रिविक्रमे मया, तात! सशैलवनकानना ।
त्रिस्सप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम् ॥ ३२ ॥

त्रिस्सप्तकृत्व इति । एकविंशतिवारमित्यर्थः ॥ ३२ ॥

[2]तथा चौषधयोऽस्माभिः संचिता देवशासनात् ।
[3]निष्पन्नममृतं याभिः तदासीन्नो महद्बलम् ॥ ३३ ॥

देवशासनात् संचिता इति । सागरे प्रक्षिप्य मथनार्थमिति शेषः ॥ ३३ ॥

स इदानीमहं वृद्धः [4]परिहीनपराक्रमः ।
सांप्रतं [5]कालमस्माकं भवान् सर्व[6]गुणान्वितः ॥ ३४ ॥

सांप्रतं कालमिति । सांप्रतमित्यव्ययम् । कालमिति सप्तम्यर्थे द्वितीया । अस्माकमिति निर्धारणे षष्ठी । अस्मिन् काले अस्माकं मध्ये भवानेवाभ्यधिकं सर्वगुणान्वित इत्यर्थः ॥ ३४ ॥

तद्विजृम्भस्व विक्रान्तः प्लवतामुत्तमो ह्यसि ।
त्वद्वीर्यं द्रष्टुकामेयं सर्ववानरवाहिनी ॥ ३५ ॥

विजृम्भस्व—निस्सीमनिजबलविजृम्भणं कुरु ॥ ३५ ॥

---

* पृथिवीत्यनेनाण्डकटाहमध्य उक्तः । तस्याः त्रिस्सप्तकृत्वः क्रमणं मध्यप्रदेशे । यद्वा यावती महाबलिभूमिः, तावती पृथिवी अत्र विवक्षिता । तस्याः प्रदक्षिणं तद्बहिः-प्रदेशेन संगच्छते । यद्वा क्रमणानन्तरं जाम्बवान् विजयघोषणार्थं पृथिवीमात्रप्रदक्षिणं कृतवानिति प्रसिद्धिः—गो.

[1] कपिराज—ख. [2] तदा—ज. [3] निर्मथ्यम—ङ. [4] परिक्षीण—ङ. [5] गतिर—ङ. [6] गुणाधिकः—ङ.

उत्तिष्ठ, हरिशार्दूल! लङ्घयस्व महार्णवम् ।
*परा हि सर्वभूतानां, हनुमन्! या गतिस्तव ॥ ३६ ॥

उत्तिष्ठ, लङ्घयस्वेत्यत्रोपपत्तिमाह—परा हीत्यादि । हे हनुमन्! परा—सर्वश्रेष्ठा तव या गतिः—लङ्काद्वीपगमनं, सा सर्वभूतानामुपकाराय, न केवलमस्माकमेवेति शेषः ॥ ३६ ॥

विषण्णा हरयस्सर्वे, हनूमन्! किमुपेक्षसे ।
विक्रमस्व [1]महावेगः [2]विष्णुस्त्रीन् विक्रमानिव ॥ ३७ ॥

विषण्णाः—असाध्यार्थप्राप्तया दीनाः । किमुपेक्षस इति । वानिति शेषः ॥ ३७ ॥

[3]ततस्तु वै जाम्बवता प्रचोदितः
प्रतीतवेगः पवनात्मजः कपिः ।
प्रहर्षयंस्तां हरिवीरवाहिनीं
चकार रूपं [4]पवनात्मजस्तदा ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः

रूपमिति । समुद्रतरणोचितमहाविग्रहमित्यर्थः । जल(३८)-मानः सर्गः ॥ ३८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः

---

* सर्वभूतानामिति निर्धारणे वा षष्ठी ॥

[1] महावेग—ज. [2] यथा विष्णुस्त्रिविक्रमः—ङ. [3] ततः कपीनामृषभेण—ज.
[4] महदात्मन—ङ.

अष्टषष्टितमः सर्गः

[हनुमद्विजृम्भणम्]

[1]तं दृष्ट्वा जृम्भमाणं ते क्रमितुं शतयोजनम् ।
[2]वीर्येणापूर्यमाणं च सहसा वानरोत्तमाः ॥ १ ॥
सहसा शोकमुत्सृज्य प्रहर्षेण समन्विताः ।
[3]विनेदुस्तुष्टुवुश्चापि हनुमन्तं महाबलम् ॥ २ ॥

अथ गृहीतमहाविग्रहस्य हनुमतः वानरबलाश्वासनाय निजबलप्रख्यापनपूर्वं समुद्रलङ्घनाय महेन्द्रपर्वतारोहणम् । तं दृष्ट्वेत्यादि । जृम्भमाणं—वर्धमानम् ॥ १–२ ॥

प्रहृष्टा विस्मिताश्चैव वीक्षन्ते स्म समन्ततः ।
[4]त्रिविक्रमकृतोत्साहं नारायणमिव प्रजाः ॥ ३ ॥
*संस्तूयमानो हनुमान् व्यवर्धत [5]महाबलः ।
समाविध्य च लाङ्गूलं हर्षाच्च बलमेयिवान् ॥ ४ ॥

समाविध्य—आस्फाल्य ॥ ४ ॥

तस्य संस्तूयमानस्य [6]वृद्धैर्वानरपुङ्गवैः ।
तेजसाऽऽपूर्यमाणस्य रूपमासीदनुत्तमम् ॥ ५ ॥
यथा विजृम्भते सिंहः [7]विवृद्धो गिरिगह्वरे ।
मारुतस्यौरसः पुत्रः [8]तथा संप्रति जृम्भते ॥ ६ ॥

---

* संस्तूयमानः, वानरैरिति शेषः—रा.

[1] 'तं दृष्ट्वा' इत्यादि श्लोकत्रयं 'अशोभत मुखं तस्य' इत्येतत्पूर्वं पठितं—झ.
[2] वेगेना—ज. [3] विनेदुर्विस्मिताश्चापि—ज. [4] त्रिविक्रमे—ङ. [5] महाकपिः—ङ.
[6] सर्वै—ङ. [7] वितते—ङ., विवृते—ज. [8] तथाऽजृम्भत वीर्यवान्—ङ.

अशोभत मुखं तस्य जृम्भमाणस्य धीमतः ।
*[1] अम्बरीषोपमं दीप्तं विधूम इव पावकः ॥ ७ ॥

अम्बरीषं—भ्राष्ट्रं, 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना'। दीप्तं—प्रज्वलत्, अत एव अङ्गारवर्णप्रतप्तभ्राष्ट्रोपमं तस्य मुखं अशोभत। स तु सर्वात्मना विधूमः पावक इवाशोभत। 'अम्बरीषोपमं दीप्तं विधूम इव पावकः' इति पाठः ॥ ७ ॥

हरीणामुत्थितो मध्यात् संप्रहृष्टतनूरुहः ।
अभिवाद्य हरीन् वृद्धान् हनुमानिदमब्रवीत् ॥ ८ ॥
[2] अरुजन् पर्वताग्राणि हुताशनसखोऽनिलः† ।
बलवानप्रमेयश्च वायुराकाशगोचरः ॥ ९ ॥
तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः ।
मारुतस्यौरसः पुत्रः प्लवने नास्ति [3] मत्समः ॥ १० ॥

अरुजन्—अत्यर्थं भिन्दमानः हुताशनस्य सखा, तथा। उच्यमानगुणो वायुः वानरस्वभावोऽनिलोऽस्ति, तस्य मारुतस्यौरसः पुत्र इति योजना ॥ ९-१० ॥

उत्सहेयं हि विस्तीर्णं आलिखन्तमिवाम्बरम् ।
मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः ॥ ११ ॥

---

* अम्बरीषोपमं—सूर्यसदृशम् .... अम्बरीणां—आकाशवतां नक्षत्रगणानां ईषः—तेजसा पराभूतत्वं यस्मादिति, अम्बरिणः—सर्वलोकान्, आकाशचारिणो वा ईषति—स्वतेजसा प्राप्नोतीति वा—रा. † अनिलः—गमनशीलः—गो. निलयः—रा. वस्तुतस्तु—आत्मविश्वासपूर्वकवाक्यत्वात् 'अनिलः', 'वायुः' इतिपदद्वयप्रयोगः न दोषाय ॥

[1] अम्भरीषमिवा—ङ. [2] अरुजत्—ङ. [3] तत्समः—ज.

मेरुं असङ्गेन—मध्ये विश्रमाय पादविक्षेपसङ्गरहित्येनैव । सहस्रशः परिगन्तुमुत्सह इति । सहस्रवारमेकयत्नेन प्रदक्षिणं कर्तुं शक्नोमीत्यर्थः ॥ ११ ॥

[1]बाहुवेगप्रणुन्नेन सागरेणाहमुत्सहे ।
[2]समाप्लावयितुं लोकं सपर्वतनदीह्रदम् ॥ १२ ॥
ममोरुजङ्घावेगेन भविष्यति समुत्थितः ।
[3]समुच्छ्रितमहाग्राहः समुद्रो वरुणालयः ॥ १३ ॥

उच्यमानगुणकः समुद्रः उत्थितो भविष्यति, मया सहेति शेषः ॥ १३ ॥

पन्नगाशनमाकाशे पतन्तं [4]पक्षिसेविते ।
वैनतेयमहं शक्तः परिगन्तुं *सहस्रशः ॥ १४ ॥

वैनतेयं परिगन्तुमिति । जातिस्वाभाव्यात् प्रदक्षिणमण्डलाकारपरिगमनवन्तं अहमपि सहस्रशः परिगन्तुं शक्तः, सह वा, तमतिक्रम्य वा प्रदक्षिणमण्डलं गन्तुं शक्त इत्यर्थः ॥ १४ ॥

उदयात् प्रस्थितं वाऽपि ज्वलन्तं रश्मिमालिनम् ।
अनस्तमितमादित्यं अभिगन्तुं समुत्सहे ॥ १५ ॥

उदयादित्यादि । उदयगिरेः प्रस्थितमादित्यं प्राप्य तेन सह प्रस्थितः तमादित्यं अनस्तमितमेव—तीव्ररश्मिमालिनमेव सन्तं, ततः पूर्वमस्तगिरिं प्राप्य, पुनश्च प्रत्यावृत्त्य तदभिमुखं गन्तुमुत्सहे । [उत्तरमिति अन्तमित्यनुकर्षः । अन्तः—अवसानम् (?)] ॥ १५ ॥

---

* तस्यैकपातं यावत् अहं सहस्रवारं पतितुं शक्त इति यावत्—ति.

[1] बाहु—ङ. [2] समं—ङ. [3] संमूर्छित—ङ. [4] पक्षिसेवितम्—ङ.

ततो भूमि[1]मसंस्पृश्य पुनरागन्तुमुत्सहे ।
[2]प्रसंगेनैव महता भीमेन, प्लवगर्षभाः ! ॥ १६ ॥

तत इति । उत्तरावधेरित्यर्थः । भूमिमिति । उत्तरावधिभूमिमित्यर्थः । प्रसङ्गेन—प्रस्तुतवेगेनैव, एकयत्नेनेत्यर्थः । ततश्च एकयत्नेन शतयोजनलङ्घनागमनागमनयोः कः प्रयास इति ज्ञापितं भवति ॥ १६ ॥

उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान् ।
[3]सागरं क्षोभयिष्यामि दारयिष्यामि मेदिनीम् ॥ १७ ॥

आकाशगोचराः—ग्रहनक्षत्रादयः ॥ १७ ॥

पर्वतान् [4]कम्पयिष्यामि प्लवमानः, प्लवङ्गमाः !
हरिष्याम्यूरुवेगेन प्लवमानो महार्णवम् ॥ १८ ॥

लतानां विविधं पुष्पं पादपानां च सर्वशः ।
अनुयास्यति मामद्य प्लवमानं विहायसा ॥ १९ ॥

लता, वीरुत्, अवान्तरभेद इति बहुश उक्तः । पादपानां चेति । पुष्पमित्यनुकर्षः ॥ १९ ॥

भविष्यति हि मे पन्थाः [5]स्वातेः पन्था इवाम्बरे ।
चरन्तं घोरमाकाशं उत्पतिष्यन्तमेव वा ॥ २० ॥

द्रक्ष्यन्ति *निपतन्तं च सर्वभूतानि, वानराः !
[6]महामेघप्रतीकाशं मां च द्रक्ष्यथ, वानराः ! ॥ २१ ॥

---

* निपतन्तं—नितरां आकाशे पतन्तं—इत्यर्थः ॥

[1] मसंस्पृष्ट्वा—ञ. [2] प्रवेगेनैव—ङ. [3] सागरान्—ञ. [4] चूर्णयिष्यामि—ङ. [5] वायोः—ङ. [6] महामेरु—ञ.

स्वातेः पन्था इति । स्वातिपथः छायापथ इति पर्यायः । स तु प्रकीर्णबहुक्षत्रकः । अस्य पन्थाश्च प्रकीर्णबहुपुष्पक इत्युपमा । चरन्तं, मध्यमार्गमाकाश इति शेषः । निपतन्तं—पारावार इति शेषः ॥

दिवमावृत्य गच्छन्तं [1]ग्रसमानमिवाम्बरम् ।
विधमिष्यामि जीमूतान् कम्पयिष्यामि पर्वतान् ॥ २२ ॥
सागरं [2]क्षोभयिष्यामि प्लवमानः समाहितः ।
वैनतेयस्य सा शक्तिः मम या मारुतस्य वा[3] ॥ २३ ॥
[4]ऋते सुपर्णराजानं मारुतं वा [5]महाजवम् ।
न तद्भूतं प्रपश्यामि यन्मां प्लुतमनुव्रजेत् ॥ २४ ॥

वैनतेयस्य मारुतस्य वा शक्तिरिति । सर्वभूतातिशायिनी प्लवनशक्तिः नान्यस्येति शेषः । यदेवं, अतः—ऋत इत्यादि । प्लुतं मां योऽनुव्रजेत्, तत्तु भूतमित्यन्वयः ॥ २४ ॥

निमेषान्तरमात्रेण निरालम्बनमम्बरम् ।
सहसा निपतिष्यामि घनाद्विद्युदिवोत्थिता ॥ २५ ॥

विद्युदृष्टान्तः शैघ्र्येण बहुदेशव्याप्तौ ॥ २५ ॥

भविष्यति हि मे रूपं प्लवमानस्य [6]सागरे ।
*विष्णोर्विक्रममाणस्य तदा त्रीन् विक्रमानिव ॥ २६ ॥

तदेति । त्रिविक्रम इत्यर्थः ॥ २६ ॥

---

*त्रीन् विक्रमान् विक्रममाणस्य विष्णोरिवेत्यन्वयः । वीरवादत्वात् अत्र पौनरुक्त्यादिकं न दोषाय ॥

[1] ग्रसन्तमिव चा—ङ. [2] क्षोभयिष्यामि—ञ. [3] एतदनन्तरं—महासत्त्वनोपेतौ महान्तौ पुरुषर्षभौ । ऋश्यमूकं पुनश्शैलं प्राप्तौ रामलक्ष्मणौ ॥ नूनं नेष्यामि वैदेहीं रामस्य महिषीं प्रियाम्—इत्यधिकं—ङ. [4] जाने सुपर्णमात्मानं—ङ. [5] महाबलम्—ङ. [6] सागरं—ञ.

बुद्ध्या चाहं प्रपश्यामि मनश्चेष्टा च मे तथा ।
अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं, प्लवङ्गमाः ! ॥ २७ ॥

अथ 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' इति न्यायेनाह—बुद्ध्या चेत्यादि । स्वान्तःकरणगतनिश्चयज्ञानेनेत्यर्थः । तथा मे मनश्चेष्टा—मनोव्यापारः अनुमानरूपः । किं पश्यसि ? किं विषयिणी ते मनश्चेष्टेत्यत्राह—अहं द्रक्ष्यामीत्यादि ॥ २७ ॥

मारुतस्य समो वेगे गरुडस्य समो जवे ।
अयुतं योजनानां तु गमिष्यामीति मे मतिः ॥ २८ ॥

वेगजवयोरेक एवार्थः मारुतस्य सम इत्यादौ । अयुतमिति संख्या तु अङ्गदान्तोक्तसामान्यप्रमाणदृशा, न तु परिच्छेदोऽस्ति । वस्तुतः रावणोऽपि वक्ष्यति 'न मारुतेरस्ति गतिप्रमाणम्' (सुन्द.–४८–११) इति ॥ २८ ॥

*वासवस्य सवज्रस्य ब्रह्मणो वा स्वयंभुवः ।
विक्रम्य सहसा हस्तात् अमृतं तदिहानये[1] ॥
†लङ्कां वाऽपि समुत्क्षिप्यागच्छयमिति मे मतिः ॥ २९ ॥

तदेवाप्रमेयबलत्वं प्रकाश्यते—वासवस्येत्यादि । वासवहस्ते वशे स्वर्गिभोग्यं अमृतं, ब्रह्मणो हस्ते मुक्तभोग्यं परमामृतं, तदानयनवचनं केवलं बलातिशयप्राकट्यपरम् । ब्रह्मलोकस्यैव प्रथमतो योनिजैर्दुर्गमत्वात् ॥ २९ ॥

---

* 'वासवस्य हस्ताद्वा साक्षात् ब्रह्मणो हस्ताद्वा अमृतं आनये' इति लोकवदुक्तिः ॥ † एतावत्युत्साहे मया गन्तव्यदेश एव विस्मृतो भवेदिति भवद्भिर्न चिन्तनीयमित्याशयेनाह—लङ्कामिति ॥

[1] एतदनन्तरं—तेजश्चन्द्राद्विगृह्णीयां सूर्याद्वा तेज उत्तमम्—इत्यधिकम्—ङ्क ॰

तमेवं वानरश्रेष्ठं गर्जन्त[1]ममितौजसम् ।
प्रहृष्टा हरयस्तत्र समुदैक्षन्त विस्मिताः ॥ ३० ॥
तस्य तद्वचनं श्रुत्वा ज्ञातीनां शोकनाशनम् ॥ ३१ ॥
उवाच परिसंहृष्टः जाम्बवान् [2]हरिसत्तमम् ।
वीर! केसरिणः पुत्र! [3]वेगवन्! मारुतात्मज! ॥ ३२ ॥
ज्ञातीनां विपुलः शोकः त्वया, तात! विनाशितः ।
तव * कल्याणरुचयः कपिमुख्याः [4]समागताः ॥
मङ्गलं कार्यसिद्ध्यर्थं करिष्यन्ति समाहिताः ॥ ३३ ॥

'वेगवन्' इति संबुद्धिः । कल्याणसिद्धौ रुचिः---अभिलाषा येषां ते तथा ॥ ३२-३३ ॥

ऋषीणां च प्रसादेन कपिवृद्धमतेन च ।
गुरूणां च प्रसादेन प्लवस्व त्वं महार्णवम् ॥ ३४ ॥
† स्थास्यामश्चैकपादेन यावदागमनं तव ॥ ३५ ॥

कपिवृद्धानां मतं—आशीर्वादः इति यावत् । तव यावदागमनं एकपादेन स्थास्याम इति । प्रियं श्रोतुं त्वरयेति शेषः । एकपादेन स्थित्वा तपश्चरिष्याम इत्यन्यः, नैवं तपश्चरणमस्ति हरीणाम् ॥ ३५ ॥

त्वद्गतानि च सर्वेषां जीवितानि वनौकसाम् ।
ततस्तु हरिशार्दूलः तानुवाच वनौकसः ॥ ३६ ॥

---

* तव कल्याणं वाञ्छन्तारः—ति. हितकांक्षिणः—ती. † एकपादेन स्थास्याम इति लोकवदुक्तिः ॥

[1] ममितप्रभम्—ज. [2] हरिसत्तमः—ङ. [3] हनुमन्—ङ. [4] समाहिताः—क.

[1]नेयं मम मही वेगं प्लवने धारयिष्यति ।
एतानीह नगस्यास्य * शिलासङ्कटशालिनः ॥ ३७ ॥
शिखराणि महेन्द्रस्य स्थिराणि च महान्ति च ।
एषु वेगं करिष्यामि महेन्द्रशिखरेष्वहम् ॥ ३८ ॥

प्लवन इति । सतीति शेषः । शिलासङ्कटं—शिलावरणम् । † कटे वृत्तौ वर्षे च । अत एव—स्थिराणीति ॥ ३६-३८ ॥

नानाद्रुमविकीर्णेषु धातुनिष्यन्दशोभिषु ।
एतानि मम [2] निष्पेषं पादयोः, प्लवतां वराः ! ॥ ३९ ॥
प्लवतो धारयिष्यन्ति योजनानामितः शतम् ॥ ४० ॥

धातुनिष्यन्दः—धातुप्रवाहः ॥ ३९-४० ॥

ततस्तं मारुतप्रख्यः स हरिर्मारुतात्मजः ।
आरुरोह [3] नगश्रेष्ठं महेन्द्रमरिमर्दनः ॥ ४१ ॥
वृतं [4] नानाविधैर्वृक्षैः मृगसेवितशाद्वलम् ।
लताकुसुमसंबाधं नित्यपुष्पफलद्रुमम् ॥ ४२ ॥

मृगैः सेवितः शाद्वलः—बालतृणदेशः यस्य स तथा ॥ ४२ ॥

सिंहशार्दूल[5]चरितं मत्तमातङ्गसेवितम् [6] ।
मत्तद्विजगणोद्घुष्टं सलिलोत्पीडसंकुलम् ॥ ४३ ॥

सलिलोत्पीडः—निर्झरः ॥ ४३ ॥

---

* शिलासङ्कटशालिनः—शिलाबहुलप्रदेशभूयिष्ठस्य—गो. † धातुपाठे तु 'कटे वर्षावरणयोः' इति दृश्यते ॥

[1] कोऽपि लोके न मे वेगं—ज. [2] वेगं हि शिखराणि महान्ति च—ज. [3] गिरिश्रेष्ठं—ङ. [4] नानाविधैः पुष्पैः—झ. [5] सहितं—झ. [6] एतदनन्तरं—अनेकश्वापदाकीर्णं नानाविहगसेवितम् । आक्रम्य शृङ्गं पादाभ्यां उत्पातुमुपचक्रमे—इत्यधिकं—झ.

महद्भिरुच्छ्रितं शृङ्गैः महेन्द्रं स महाबलः ।
विचचार हरिश्रेष्ठः महेन्द्रसमविक्रमः ॥ ४४ ॥

पादाभ्यां पीडितस्तेन महाशैलो महात्मनः ।
[1]ररास सिंहाभिहतः महान् मत्त इव द्विपः ॥ ४५ ॥

ररासेति । स्ववृत्तिप्राणिशब्दद्वारेणेति शेषः ॥ ४५ ॥

मुमोच सलिलोत्पीडान् विप्रकीर्णशिलोच्चयः ।
वित्रस्तमृगमातङ्गः प्रकम्पितमहाद्रुमः ॥ ४६ ॥
[2]नानागन्धर्वमिथुनैः *पानसंसर्गकर्कशैः ।
उत्पतद्भिश्च विहगैः विद्याधरगणैरपि ॥ ४७ ॥

पानसंसर्गे स्त्रीसंसर्गे च कर्कशाः—अत्यासक्तचित्ताः ।
गन्धर्वाणां तथात्वं स्वाभाव्यम् ॥ ४७ ॥

[3]त्यज्यमानमहासानुः [4]सन्निलीनमहोरगः ।
चलशृङ्गशिलोत्पातः †तदाऽभूत् स महागिरिः ॥ ४८ ॥
शैलशृङ्गस्य शिलानां उत्पातः—पातनं यस्य स तथा ॥ ४८ ॥

---

* पानप्रवृत्तौ दृढाभिनिवेशैः-गो.　† उद्घातः (पा.)—समूहः—गो.

[1] रराज-ङ. ररासेत्याद्यर्धत्रयस्थाने-विशीर्णः सहसाऽधस्तात् भूमीसमशिराः स्थितः । हनूमच्चरणद्वन्द्वपीडितस्य गिरेस्तदा । बाष्पासारा इवापेतुः सर्वतस्तत्र निर्झराः । हनूमच्चरणाक्रान्तात् गिरिशृङ्गादधो द्रुताः । लम्बमानास्तु भुजगाः विशीर्णान्त्रा इवाबभुः । सम्भ्रान्तवन्यमातङ्गप्रपीडितमहाद्रुमः-इत्यधिकम्-झ.　[2] नागगन्धर्व-ङ.
[3] त्यज्यमानेत्याद्यर्धद्वयस्थाने-वानरेन्द्रपदाघातसंकीर्णतटनिस्वनैः । रक्षसां हि महोत्पातः तदाऽभूत्स महागिरिः ॥ गुहाभ्यो निष्पतद्भिश्च सिंहैरुन्नतकन्धरैः । हरिपादावभग्नोऽद्रिः बलाऽद्भिरिव चाबभौ-इत्यधिकम्-झ.　[4] स्कन्धलीन-ङ.

[1] निःश्वसद्भि[2]स्तदार्तैस्तु भुजङ्गैरर्धनिस्सृतैः ।
सपताक इवाभाति स तदा धरणीधरः ॥ ४९ ॥

* ऋषिभिस्त्राससंभ्रान्तैः त्यज्यमानाशिलोच्चयः ।
[3]सीदन् महति कान्तारे सार्थहीन इवाध्वगः ॥ ५० ॥

सवेगवान् वेगसमाहितात्मा
हरिप्रवीरः [4]परवीरहन्ता ।
[5]मनस्समाधाय महानुभावः
† जगाम लङ्कां मनसा [6]मनस्वी ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसाहस्रिकायां संहितायां
किष्किन्धाकाण्डे अष्टषष्टितमः सर्गः

मनसा जगामेति । सस्मारेत्यर्थः । कर्म(५१)मानः सर्गः ॥ ५१ ॥

इति श्रीमन्माधवयोगिविरचितायां श्रीमद्रामायणामृतकतकटीकायां किष्किन्धाकाण्डे
अष्टषष्टितमः सर्गः

किष्किन्धाकाण्डः समाप्तः

---

* ऋषिभिः त्यज्यमानः शिलोच्चयः—पर्वतः महति कान्तारे सार्थहीनोऽध्वग इव सीदन्नास्त—ति. † जगाम—प्राप—रा.

[1] निष्पतद्भि—ङ. [2] स्तदा तैस्तु—ञ. [3] आसीत्—ङ. [4] पवनात्मजः कपिः—ङ. [5] वत—ङ. [6] हनूमान्—ङ.

श्रीमद्वाल्मीकि-
रामायणम्
(किष्किन्धाकाण्डः)

संपादकः
के. एस्. वरदाचार्यः

विश्वविद्यानिलयः
मैसूरु
१९७५
5